श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥ धातोः॥ आतृतीयाध्यायान्तं ये प्रत्ययास्ते धातोः परे स्युः॥ कृदतिङ्॥ तिङ्भिन्नः कृत्सं
ज्ञः॥ वासरूपोऽस्त्रियां॥ अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य वाबाधकः स्यात् स्त्र्यधिकारोक्तं विना॥ कृत्याः
त्य ॥ण्वुल्तृचावित्यतः प्राग्ये प्रत्ययास्ते कृत्यसंज्ञाः स्युः॥ कर्त्तरि कृत्॥ कृत्प्रत्ययः कर्त्तरि स्यात्॥ इति प्राप्ते॥
तयोरेव कृत्यक्तखलर्थाः॥ एते भावकर्मणोरेव स्युः॥ तव्यत्तव्यानीयरः॥ धातोरेते स्युः॥ तकारौ स्वरार्थौ॥ एधि
तव्यं॥ एधनीयं त्वया॥ भावे औत्सर्गिकमेकवचनं क्लीबत्वं च॥ चेतव्यश्चयनीयो वा धर्मस्त्वया॥ केलिम
र उपसंख्यानं॥ पचेलिमा माषाः॥ पक्तव्या इत्यर्थः॥ भिदेलिमाः सरलाः॥ कर्मणि प्रत्ययः॥ वसेस्त
भिवयं व्यत्कर्त्तरि णिच्च॥ वसतीति वास्तव्यः॥ कृत्यचः॥ उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थ
स्य नस्य णत्वं॥ प्रयाणीयं॥ अचः किं॥ प्रमग्नः॥ निर्विण्णस्योपसंख्यानं॥ अचः परत्वाभावादप्रा
प्ते वचनं॥ परस्य णत्वं पूर्वस्य ष्टुत्वं॥ निर्विण्णः॥ णेर्विभाषा॥ उपसर्गस्थान्निमित्तात्परस्य ण्यन्ता
द्विहितो यः कृन्नकारस्तस्य णो वा॥ प्रयापणीयं॥ प्रयापनीयं॥ हलश्च इजुपधात्॥ हलादेरि

म०कौ०कृ उपधात्कृन्नस्याचः परस्य णो वा॥ प्रकोपणीयं॥ प्रकोपनीयं॥ हलः किं॥ प्रोहणीयं॥ इजुपधा
॥२॥ त्किं॥ प्रवपणीयं॥ इजादेः सनुमः॥ सनुमश्चेड्वतिइजादेर्हलंताद्वितीयः कृत्स्येव॥ प्रेंख
णीयं॥ इजादेः किं॥ मगिसर्पणौ प्रमंगनीयं॥ वानिंसनिक्षनिंदां॥ एषां नस्य णो वा कृति॥ प्रणिं
सितव्यं॥ प्रनिंसितव्यं॥ नभाभूपूकमिगमिप्यायीवेपां॥ एभ्यः कृन्नस्य णो न॥ प्रभानीयं॥ प्र
भवनीयं॥ पूञ एव ग्रहः॥ पूङस्तु प्रपवणीयः सोमः॥ एयंतभादीनामुपसंख्यानं॥ प्रभापनीयं॥
कृत्यल्युटो बहुलं॥ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव॥ विधेर्विधानं ब
हुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति॥ १॥ स्नांत्यनेनेति स्नानीयं चूर्णं॥ दीयते स्मै दानीयो वि
प्रः॥ ऋदुपधाच्चाक्लृपिचृतेः॥ ण्यत्॥ वृत्॥ वृत्यं॥ वृधु॥ वृध्यं॥ क्लृपिचृतोस्तु कल्प्यं॥ चर्त्यं॥ तप कृ॰
रः किं॥ कृत्॥ कीर्त्यं॥ अचो यत्॥ चेयं जेयं॥ ईद्यति॥ आतः गुणः॥ येदं। ग्लेयं॥ हनो वा वध च ॥२॥
॥ वध्यः॥ पसेण्यत्॥ घ्यास्यः॥ पोरदुपधात्॥ पवर्गांताददुपधाद्यत् ण्यतोपवादः॥ शप्यं॥ ल

गम्यं॰ विवक्षिते॰
म्यं॥ आजेर्यि॥ आजेस्तृभेर्नुम् यादौ प्रत्यये॥ आलंभ्यो गौः॥ उपात्प्रशंसायां॥ उपलंभ्यो साधुः॥ स्तु
तौ किं। उपलब्धुं शक्यः उपलभ्यः॥ शकिसहोश्च। शक्यं। सह्यं। गदमदचरयमश्चानुपसर्गे। गद्यं। च
र्यं। नेरराड्ङ्चागुरौ। आचर्या देशः। गंतव्य इत्यर्थः॥ अगुरौ किं। आचार्या गुरुः। गम्यं। अवद्यपण्य
वर्यागर्ह्यपणितव्यानिरोधेषु॥ अवद्यं पापं। गर्ह्ये किं। अनुद्यं गुरुनामेति द्वन गर्ह्यं॥ वचनानर्हं।
आत्मनाम गुरोर्नाम नामातिकृपणस्य च॥ श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोरितिस्मृ
तेः। पण्यो गौः॥ व्यवहर्तव्य इत्यर्थः॥ पाण्यमन्यत्॥ पण्यं विक्रेयं। अनिरोधो प्रतिबंधः। शतेन व कृ॰सहेमित्या
र्या कन्या। वृत्यान्या। वह्यं करणं। वहंत्यनेनेति वह्यं शकटं। वाह्यमन्यत्॥ वाह्यं वोढव्यं। अर्यः करणं किं
स्वामिवैश्ययोः॥ अनयोः किं। आर्यो ब्राह्मणः। प्राप्तव्य इत्यर्थः। उपसर्या काल्या प्रजने॥ गर्भ
ग्रहणे प्राप्तकाला चेदित्यर्थः॥ उपसर्या गौः॥ गर्भाधानार्थं वृषभेणोपगंतुं योग्येत्यर्थः॥ प्रजने
काल्येति किं। उपसार्या काशी। प्राप्तव्येत्यर्थः। अजर्यं संगतं। विशेष्यं चेत्॥ न जीर्यतीत्यजर्यं॥

ब्रह्मवेदस्तस्य वदनमित्यर्थः

म॰को॰कृ ॥२॥

वदः सुपि क्यप् च । भावे वाद्यत् । ब्रह्मोद्यं । ब्रह्मवद्यं ॥ भुवो भावे । क्यप् । ब्रह्मणो भावो ब्रह्मभूयं
। सुपीत्येव । भव्यं । अनुपसर्गादित्येव । प्रभव्यं । हनस्त च । अनुपसर्गे सुप्युपपदे हंतेः क्यप् वे
प् तकारश्चांतादेशः ॥ ब्रह्महननं ब्रह्महत्या ॥ एतिस्तुशास्वृदृजुषः क्यप् । ह्रस्वस्य पिति कृति ति
तुक् ॥ इत्यः । स्तुत्यः । शिष्यः । वृञ् इति निरनुबंधग्रहणं । न वृङः । वृत्यः । वृङस्तु वार्या ऋत्विजः ॥
आदृत्यः । जुष्यः । पुनः क्यबुक्तिः परस्यापि ण्यतो बाधनार्था । अवश्यस्तुत्यः । मृजेर्विभाषा
॥ मृजेः क्यब्वा । मृज्यः । ऋहलोर्ण्यत् ॥ ऋवर्णांताद्धलंताच्च ण्यत् । चजोः कु घिण्ण्यतोः ॥ चजोः
कुत्वं घिति ण्यति च । निष्ठायामनिट इति वक्तव्यं । तेनेह न । गर्ज्यः । मार्ग्यः । ओरावश्यके । ण्यत् ।
लाव्यं । लुंपेदवश्यमः कृत्ये तुंकाममनसोरपि । समो वा हिततयोर्मांसस्य पचि ल्युड्घञोः ॥ १ ॥
। अवश्यलाव्यं । भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा । एते कृत्यंताः कर्त ॥ २ ॥
रि वा निपात्यंते । भवतीति भव्यः । भव्यमनेन वा । भोज्यं भक्ष्यं । भोग्यमन्यत् । राजसूयसूर्य

गुपेरादेः कत्वं च संज्ञायां

कुप्यादिकरणाय शोधयितव्योऽर्थः

मृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः ॥ एते सप्त क्यबंता निपात्यंते ॥ भिद्योध्यौ नदे ॥ नदे किं । भे
त्ता । उज्झिता । पुष्यसिद्ध्यौ नक्षत्रे । विपूयविनीयजित्या मुंजकल्कहलिषु । विपूयो मुंजः । वि
नीयः । जित्यो हलिः । प्रत्यपिभ्यां ग्रहेः । छंदसीति वक्तव्यं । प्रतिगृह्यं । अपिगृह्यं । लोके तु प्रति
ग्राह्यं । अपिग्राह्यं ॥ पदास्वैरिबाह्यापक्ष्येषु च ॥ अवगृह्यं । प्रगृह्यं पदं । अस्वैरी परतंत्रः ॥
गृह्यकाः शुकाः । ग्रामगृह्या सेना । ग्रामाद्बाह्येत्यर्थः । आर्यैर्गृह्यत आर्यगृह्यः ॥ तत्पक्षा
श्रित इत्यर्थः । विभाषा कृवृषोः ॥ कृत्यं । वृष्यं । पक्षे ण्यत् । कार्यं । वर्ष्यं । युग्यं च पत्रे । पत्रं
५१ वाहनं । योग्यमन्यत् । अमावस्यदन्यतरस्यां । अमोपपदाद्वसेरधिकरणे ण्यत् वृद्ध्य
भावश्च वा निपात्यते । अमा सह वसतोऽस्यां चंद्रार्काविति अमावस्या । अमावास्या वा । अ
न्नायपरिचाय्योपचाय्यसमूह्याः ॥ अग्निधारणार्थे स्थलविशेषे एते साधवः ॥ क्रतौ कुंडपा
य्यसंचाय्यौ ॥ चित्याग्निचित्ये च ॥ चित्योऽग्निः । अग्नेश्चयनमग्निचित्या ॥ ॥ इति कृत्यप्रक्रिया ॥

x नीयतेसौ x

नच्चारेतया ... एते कृत्याः १

मण्कोरु ॥ ण्वुल्तृचौ ॥ धातोरेतौ स्तः ॥ कर्तरि कृदिति कर्त्रर्थे। युवोरनाकौ। युवु एतयोरनुनासिकयो
॥३॥ रेतौ स्तः। कारकः। कर्ता। नंदिग्रहिपचादिभ्यो ल्युणिन्यचः॥ नंद्यादेर्ल्युर्ग्रहादेर्णिनिः पचादे
रच्॥ नंदयतीति नंदनः। जनार्दनः। लवणः। नंद्यादिगणे निपातनाण्णत्वं। ग्राही। स्थायी।
मंत्री। पचः॥ ॥आकृतिगणोयं॥ ॥ इगुपधज्ञाप्रीकिरः कः॥ क्षिपः। बुधः। कृशः। ज्ञः। प्रि
यः। किरः। आतश्चोपसर्गे। प्रज्ञः। सुग्लः। पाघ्राध्माधेट्दृशः शः। पिबः। जिघ्रः। धमः। धयः
। पश्यः। अनुपसर्गाल्लिंपविंदधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। लिंपः। विंदः। धा
रयः। पारयः। वेदयः। उदेजयः। चेतयः। साहयः (सातयः)। अनुपसर्गात्किं॥ प्रलिपः। गवादिषु विंदेः सं
विवार्थे ज्ञायां॥ गोविंदः। अरविंदं। ददातिदधात्योर्विभाषा॥ ददः। दधः। पक्षे वक्ष्यमाणो णः॥ ज्वलि
तिकसंतेभ्यो णः॥ वास्यात्। ज्वालः। ज्वलः। चालः। चलः। श्याद्व्यधास्रुसंस्रुतीणवसाव ॥३॥
हृलिहृश्लिषश्वसश्च॥ णः। अवश्यायः। आलः। धायः। व्याधः। आस्रावः। अत्यायः। अवसायः॥

१ चक्रस्य नाभिनेम्योरंतराले काष्ठानि अराः इति ताननु विंदती तत् अरविंदं संस्रावः
× ताराः आतोयुक्चिण्कृतोः

अवहारः। लेहः। श्लेषः। श्वासः। विभाषाग्रहः॥ व्यवस्थितविभाषेयं। तेन जलचरे ग्राहः। ज्यो
तिषि ग्रहः। गेहे कः। गेहं कर्तरि ग्रहेः कः स्यात्। गृह्णाति धान्यादिकमिति गृहं। शिल्पिनि ष्वु
न्। क्रियाकौशलं शिल्पं। षः प्रत्ययस्य। प्रत्ययादेः षइत्। नृतिखनिरंजिभ्य एव। नर्तकः। नर्तकी
आसिभ्रूकि अनेवरं जेन्लोपो वाच्यः। रजकः। गस्थकन्॥ गाथकः। ण्युट् च॥ गायनः। पुंस्ट रजकी
त्वं। सिमभिहारे वुन्॥ समभिहारग्रहणेन साधुकारित्वं लक्ष्यते॥ प्रवकः। सरकः। आ सरकः
नंदकः शिषि च। वुन्। जीवतात् जीवकः। तत्रोपपदं सप्तमीस्थं। सप्तम्यंते पदे कर्मणीत्यादौ वा
स्थितं च्यत्वेन कुंभादि तद्वाचकं पदमुपपदसंज्ञं। कर्मण्यण्॥ कर्मण्युपपदे धातोरण्।
कुंभं करोतीति कुंभकारः। आतोनुपसर्गे कः॥ सुप्युपपदे। अणोपवादः॥ गोदः। कंब
लदः। अनुपसर्गे किं। गोसंदायः। मूलविभुजादिभ्यः कः। मूलानि विभुजतीति मूलविभु
जो रथः॥ ॥आकृतिगणोयं॥ ॥ महीध्रः। कुध्रः। सुपि स्थः। सुपीति योगो विभज्य

म॰कौ॰कृ
॥४॥

ते। आरंतालुकः। द्वाभ्यांपिबतीतिद्विपः। समस्थः। विषमस्थः। ततस्थः। सुपिस्थ इतेःकः। आरंभसाम
र्थ्याद्भवे। आखूनामुत्खननमाखूत्थः। अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंकुंगुमंजिपुंजिपर
मेबर्हिर्दिव्यग्निभ्यःस्थः। षस्यात्। द्विष्ठः। त्रिष्ठः। तुंदशोकयोःपरिमृजापनुदोः। तुंदशोकयोरुपप
दयोःकर्मणोराभ्यांकः। आलस्यसुखाहरणयोरितिवाच्यं। तुंदपरिमृजोलसः। शोकापनुदःसु
खस्याहर्ता। प्रेदाज्ञः। कःस्यात्। सर्वप्रदः। पथिप्रज्ञः। [illegible]। समिख्यः। गापोष्टक्। समागः गोसंख्यः
पिबतेःसुराशीध्वोरितिवाच्यं। सुरापी। शीधुपी। अहरतेरनुद्यमनेचः। अंशहरः। अनुद्य
मनेकिं। भारहारः। शक्तिलांगलांकुशतोमरयष्टिघटघटीधनुष्षुग्रहेरुपसंख्यानं। श
क्तिग्रहः। लांगलग्रहः। वयसिच। उद्यमनार्थसूत्रं। कवचहरःकुमारः। आङिताच्छील्ये। पु
ष्पाण्याहर्त्तुं[illegible]तिंतच्छीलः पुष्पाहरः। अर्हः। कर्मण्युपपदेऽणोऽपवादः। पूजार्हाब्राह्मणी। ॥५॥
स्तंबकर्णयोरमिजपोः। हस्तिसूचकयोरितिवाच्यं॥ स्तंबेरमोहस्ती। कर्णेजपः[illegible]सूचकः।

×सूत्रेणधार्यर्थे। सूत्रग्रहः×

अधिकरणेशेतेः। खेशेतेखशयः। पार्श्वादिषूपसंख्यानं। पार्श्वाभ्यांशेतेपार्श्वशयः। पृष्ठशयः। उ
रशयः। चरेष्टः। अधिकरणे[illegible]। कुरुचरः। कुरुचरी। भिक्षासेनादायेषुच। भिक्षाचरः। सेना
चरः। आदायेतिल्यबंतं। आदायचरः। कृञोहेतुताच्छील्यानुलोम्येषु। एषुद्योत्येषुकरोतेष्टः।
अतःकृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य। अतःपरस्यानव्ययविसर्गस्यसमासेनित्यंसा
देशः। करोत्यादिषुपरेषु। यशस्करीविद्या। श्राद्धकरः। वचनकरः। दिवाविभानिशाप्रभाभास्कारां विभा
तानंतादिबह्वनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररु
ष्षु। एषुकृञष्टः हेत्वादावपि। दिवाकरः। विभाकरः। कस्कादित्वात्सः। भास्करः। बहुकरः॥
एककरः। द्विकरः। अहस्करः। धनुष्करः। अरुष्करइत्यादि। नशब्दश्लोककलहगाथावैरचाटु
सूत्रमंत्रपदेषु। एषुकृञःन। शब्दकारइत्यादि। स्तंबशकृतोरिन्। व्रीहिवत्सयोरितिवक्तव्यं। स्तंब
करिर्व्रीहिः। शकृत्करिर्वत्सः। हरतेर्दृतिनाथयोःपशौ। दृतिहरिः। नाथहरिः। पशौकिं। दृतिहारः।

नाथंनाथारज्जुंहरतीतिनाथहरिः पशुः ।१

मध्कोल नाथहरः । फलेग्रहिरात्मंभरिश्च ॥ एतौ निपात्येते । वाकुक्षिंभरिः । चांद्रास्तु आत्मोदरकुक्षिष्वि
॥५॥ तिपेठुः । उक्तं च कल्पाकरंभ्रमुदरंभरयश्च कौश इति मुरारिः । एजेः खश् । ण्यंतात् । अरुर्द्विषद अंतस्य
मुम् ॥ अरुषो द्विषतोऽजंतस्य मुम् खिदंते नत्वव्ययस्य । शित्वाल्लवादि । जनमेजयतीति जनमेजयः ॥
वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातिभ्यः खश् ॥ वातमजा मृगाः । खित्यनव्ययस्य । ह्रस्वः ।
मुनिंधयः । तिलंतुदः । शर्द्धंजहा माषाः ॥ नासिकास्तनयोर्ध्माधेटोः ॥ नासिकायां ध्मश्च धेटश्च स्तनंध स्तनेधेटश्च यकेयं ५
यतीति स्तनंधयः । टित्वाड्ङीप् । स्तनंधयी । नासिकंधमः । नाडीमुष्ट्योश्च ॥ ध्माधेटोः खश् । ना
डिंधमः । नाडिंधयः । मुष्टिंधमः । मुष्टिंधयः । उदिकूले रुजिवहोः ॥ कूलमुद्रुजः । कूलमुद्वहः ॥
वहाभ्रेलिहः ॥ वहः स्कंधः स्कंधं लेढि वहंलिहो गौः । अभ्रंलिहो वायुः । परिमाणे पचः । प्रस्थंपचा
स्थाली । खारिंपचः कटाहः । मितनखे च । मितंपचा ब्राह्मणी । नखंपचा यवागूः । विध्वरुषोस्तु ॥५॥
दः ॥ विधुंतुदः । अरुंतुदः । असूर्यललाटयोर्दृशितपोः ॥ असूर्यमिति असमर्थसमासः । दृशि

पशिरन्तापयाविः

नान्वयः संबंधात् । सूर्यं न पश्यंतीत्यसूर्यंपश्या राजदाराः । ललाटंतपः सूर्यः ॥ प्रियवशे वदः खच् ॥
प्रियंवदः । वशंवदः । गमेः सुपि वाच्यः । मितंगमो हस्ती । विहायसो विह च ॥ खच्च डिद्वा वाच्यः ॥ वि
हंगः । विहंगमः । भुजंगः । भुजंगमः । द्विषत्परयोस्तापेः ॥ खच् । खचि ह्रस्वः । खचि परे णौ उपधाया ह्र
स्वः । द्विषंतं तापयति द्विषंतपः । परंतपः । वाचि यमो व्रते । खच् ॥ वाचंयमपुरंदरौ च ॥ वाक्पुरयोरमंतत्वं निपा
व्रतोक्तिं त्यते । वाचंयमो मौनव्रती । अशक्त्यादिना वा संयच्छतीति वाग्यामः । पूःसर्वयोर्दारिसहोः ॥ पुरंद
रः । सर्वंसहः । भगंदारयतीति भगंदर इति कथं । बाहुलकात् । सर्वकूलाभ्रकरीषेषु कषः । सर्वंक
षः खलः । कूलंकषा नदी । अभ्रंकषो वायुः । करीषंकषा वात्या । मेघर्तिभयेषु कृञः । मेघंकरः ।
ऋतिंकरः । भयंकरः । भयशब्दे तदंतविधिः । अभयंकरः । क्षेमप्रियमद्रेऽण् च । एषु कृञोऽण्
तवनः वैश्चात् खच् । क्षेमंकरः । क्षेमकारः । प्रियंकरः । प्रियकारः । मद्रंकरो मद्रकारः । कथं तर्हि ल्यारंभाः क्षेम
कराइति । कर्मणः शेषत्वविवक्षायां पचाद्यच् ॥ गंगाधरभूधरवदित्यादयः । आशिते भुवः क

रणभावयोः। खच्। आशितोभवत्यनेनाशितंभवः। आशितस्यभवनमाशितंभवं। संज्ञायांभृ
तृवृजिधारिसहितपिदमः। खच्। विश्वंबिभर्तीतिविश्वंभरः। रथंतरंसाम। पतिंवरा कन्या। शत्रुंज
यो हस्ती। युगंधरः पर्वतः। शत्रुंसहः। अरिंदमः। गमश्च। सुतंगमः। अंतात्यंताध्वदूरपारसर्वा
नंतेषुडः। गमेः। अंतगः। सर्वत्रपन्नयोरुपसंख्यानं। सर्वत्रगः। पन्नंगच्छतीतिपन्नगः। उरसोलो
पश्च॥ उरसा गच्छत्युरगः। सुदुरोरधिकरणे। सुखेनगच्छत्यत्रसुगः। दुर्गः। अन्यत्रापिदृश्यतइ
तिवाच्यं। ग्रामगः। डेर्विहायसोविहादेशोवाच्यः। विहगः। आशिषिहनः। शत्रुंवध्यात् शत्रुहः
आशिषिकिं। शत्रुघातः। दारावाहनोणंतस्य चटः संज्ञायां। दारुशब्द उपपदे आङ्पूर्वाद्धंतेर
ण् टश्चांतादेशः। दारावाघाटः। दारोवा। चार्वाघाटः। वार्वाघातः। अपेक्लेशतमसोः। अपपूर्वाद्धंते
र्डः। अनाशीरर्थमिदं। क्लेशापहः पुत्रः। तमोपहोरविः। कुमारशीर्षयोर्णिनिः। कुमारघाती। ॥६॥
शिरसः शीर्षभावोनिपात्यते। शीर्षघाती। लक्षणेजायापत्योष्टक्। हंतेर्लक्षणवति कर्त्त

नु

रि। जायाघ्नोना। पतिघ्नीस्त्री। अमनुष्यकर्तृकेच। जायाघ्नस्तिलकालकः। पतिघ्नी पाणिरेखा। पित्त
घ्नंघृतं। अमनुष्येतिकिं। आखुघातः शूद्रः। अथकथंबलभद्रः प्रलंब[illegible]घ्नः देवो[illegible]। शत्रु
घ्नः कृतघ्न इत्यादि। मूलविभुजादित्वात्सिद्धं। चोरघातो नगरघातोहस्ती। किंतु बाहुळकादिवा॥
शक्तौहस्तिकपाटयोः। हंतेष्टक्। मनुष्यकर्तृकार्थमिदं। हस्तिघ्नोना। कपाटघ्नश्चोरः। कवा
टमिपादांतरं। पाणिघताडघौशिल्पिनि। पाणिघः। ताडघः। शिल्पिनिकिं। पाणिघातः॥
ताडघातः। राजघ उपसंख्यानं॥ राजानंहंतीतिराजघः। आढ्यसुभगस्थूलपलितनग्नांध
प्रियेषुच्व्यर्थेषु[illegible]कृञः करणेख्युन्। च्व्यर्थेष्वभूततद्भावेकर्मसूपपदेषुकृञः ख्युन्। अ
नाढ्यं आढ्यं[illegible]कुर्वंत्यनया आढ्यंकरणी। अच्व्यर्थेकिं। आढ्यीकुर्वंत्यनेन। कर्तरिभुवः
खिष्णुच्खुकञौ। आढ्यादिषुच्व्यर्थेषुभवतेरेतौस्तः। अनाढ्य आढ्योभवति आढ्यं
भविष्णुः। आढ्यंभावुकः॥ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेपिक्विप्।

गोधुक्। प्रधुक्। सदिर प्रतेरिति। प्रसूः

म०कौ०पू० ॥७॥ स्पृशः क्विन्। उपसर्गे सत्सूसति न सुप्युपपदे। द्युसत्। ऐषत्। उपनिषत्। अंडसूः। मित्रद्विट्। प्रद्विट्। मि
त्रध्रुक्। प्रध्रुक्। अश्वयुक्। प्रयुक्। वेदवित्। निवित्। इत्यादि। अग्रग्रामाभ्यां नयतेर्णो वाच्यः।
अग्रणीः। ग्रामणीः। भजो ण्विः। अंशभाक्। प्रभाक्। अदोऽनन्ने। विट्। आममत्तीत्यामा। सखा
त्। अनन्ने किं। अन्नादः। क्रव्ये च। अदेर्विट्। पूर्वेण सिद्धे वचनं नैमित्तिकबाधनार्थं। क्रव्यात्॥ पासरूपेतिप्रो
आममांसभक्षकः। दुहः कब्घश्च। कामदुघा। अन्येभ्योपि दृश्यंते। मनिन् क्वनिप् वनिप् वि
च एते प्रत्यया धातोः स्युः। नेड्वशि कृति। वशादेः कृतोणन्। सुशर्मा। प्रातरित्वा। विड्वनोरनु ६
नासिकस्यात्। अनुनासिकस्यात्स्यात् विड्वनिच। विजायत इति विजावा। ओण् अपनय के
ने। अवावा। रोट्। रेट्। सुगण्। क्विप् च। अयमपि दृश्यते। उखास्रत्। पर्णध्वत्। वाहभ्रट्। तः॥
अंतः। परांतस्यानिते र्नस्य णत्वमुपसर्गस्थान्निमित्तात्परस्यैव॥ हे प्रीणः। आशासः क्वौ ॥७॥
वुपधाया इत्वं वाच्यं। आशीः। इत्वोत्वे। गीः। पूः। मो नो धातोः। प्रतान्। प्रशान्। गमः क्वौ॥

शीतभोजी

अनुनासिकलोपः॥ अंगगत्। गमादीनामिति वक्तव्यं। परितत्। ये सैते। ऊङ् च गमादीनामिति वाच्यं॥
लोपश्च। अग्रेगूः॥ अग्रेभ्रूः। स्थः क च। शंस्थः। शंस्थाः। सुप्यजातौ णिनिस्ताच्छील्ये॥ अजा
त्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये। उष्णभोजी॥ मनः॥ सुपि मन्यतेर्णिनिः। दर्शनीयमानी॥ आत्म
माने खश्च। स्वकर्मके मनने वर्त मानान्मन्यतेः सुपि खश्च णिनिः॥ पंडितमा
त्मानं मन्यते पंडितंमन्यः॥ पंडितमानी॥ इचएकाचोऽम्प्रत्ययवच्च॥ इजंतादेकाचोऽम्स्यात्स चाम्व स्यात्
त् खिदंते उत्तरपदे॥ औतोम्शसोः। गांमन्यः। याम्शसोः॥ श्रियंमन्यः। स्त्रीमन्यः। नृ। नरं
मन्यः॥ भुवंमन्यः। स्त्रियमात्मानं मन्यते श्रिमन्यं कुलं। भाष्यकारवचनात्स्त्रीशब्दस्य ह्रस्वोमु
मनोरभावश्च॥ भूते॥ अधिकारोयं। वर्तमाने लडिति यावत्॥ करणे यजः॥ करणे उपपदे भू हनस्तोऽचिण्णलोः २
घट ता र्थाद्यजेर्णिनिः कर्तरि। सोमेनेष्टवान् सोमयाजी। कर्मणि हनः॥ पितृव्यघाती। ब्रह्मभ्रूण
वृत्रेषु क्विप्। ब्रह्महा। भ्रूणहा। वृत्रहा। क्विप् चेत्येव सिद्धे ब्रह्मादिष्वेव क्विप्चेवेति द्विविधोऽत्र

म॰ कौ॰ कृ॰ यमार्थमिदं ॥ एवमग्रेऽपि ॥ सुकर्मपापमन्त्रपुण्येषु कृञः ॥ सुकृत् । कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्य
॥८॥ कृत् ॥ सोमे सुञः । सोमसुत् । अग्नौ चेः । अग्निचित् । कर्मण्यग्न्याख्यायां । कर्मण्युपपदे कर्म
नो ण्येव कारके चिनोतेः क्विप् अग्न्याधारस्थलविशेषस्याख्यायां । श्येन इव चितः श्येनचित् ।
कर्मणीनि विक्रियः । कर्मण्युपपदे विपूर्वात् क्रीणातेरिनिः । कुत्सितग्रहणं कर्तव्यं ॥ सोमविक्री
यी । घृतविक्रयी ॥ दृशेः क्वनिप् । कर्मणि भूते । पारं दृष्टवान् पारदृश्वा । राजनि युधिकृञः । क्वनि
प् । युधिरन्तर्भावितण्यर्थः ॥ राजानं योधितवान् राजयुध्वा । राजकृत्वा । सहे च । सहयु
ध्वा । सहकृत्वा । सप्तम्यां जनेर्डः । तत्पुरुषे कृति बहुलं ॥ उरसिजः । सरसिजं सरोजं । उपस
र्गे च संज्ञायां । प्रजा । अनौ कर्मणि । अनुपूर्वाज्जनेः कर्मण्युपपदे डः । पुमांसमनुरुध्य
जाता पुमनुजा । अन्येष्वपि दृश्यते । अजः । द्विजः । अपिशब्दः सर्वोपाधिव्यभिचारार्थः ॥ ॥८॥
तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित् । परितः खाता परिखा । पंचम्यामजातौ । जाति

ब्राह्मणजः २

धातो शब्दवर्जिते पंचम्यंते जनेर्डः । संस्कारजः । अदृष्टजः । क्तक्तवतू निष्ठा । एतौ निष्ठासंज्ञौ स्तः । निष्ठा ।
भूतार्थवृत्तेर्धातोर्निष्ठा स्यात् । तत्र तयोरेवेति भावकर्मणोः क्तः । कर्तरि कृदिति कर्तरि क्तवतुः । स्नातं मया
। स्तुतस्त्वया विष्णुः । विश्वं कृतवान् । निष्ठायामण्यदर्थे । ण्यदर्थो भावकर्मणी ततोऽन्यत्र निष्ठा त ३
र्था यां क्षियो दीर्घः ॥ क्षियो दीर्घात् । निष्ठातस्य नः । क्षीणवान् । भावकर्मणोस्तु क्षितः कामो म
या । ऊर्णोर्णुवद्भावो वाच्यः । तेनैकाच्त्वान्नेट् । ऊर्णुतः । रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥
रदाभ्यां परस्य निष्ठातस्य नो निष्ठापेक्षया पूर्वस्य धातोर्दस्य च ॥ शीर्णः । भिन्नः ।
छिन्नः । संयोगादेरातो धातोर्यण्वतः । यण्वतः संयोगादेरादन्तान्निष्ठातस्य नः । द्राणः ।
ग्लानः । ल्वादिभ्यः । एकविंशतेर्लूञादिभ्यः प्राग्वत् । लूनः । ज्या । ग्रहीति हलः ॥ अंगाव
॥८॥ यवाद्धलः परं यत्संप्रसारणं तदन्तस्यांगस्य दीर्घः । जीनः । दुग्वोर्दीर्घश्च ॥ दूनः ॥ दुग्वोः
गूनः । पूञो विनाशे । पूनाः यवाः । विनष्टा इत्यर्थः । सिनोतेर्ग्रासकर्मकर्तृकस्य ॥

इत्यर्थः ।८ कर्म

म०कौ० सिनो ग्रासः ॥ ग्रासः किं । सिता पाशेन सूकरी । कर्मकर्तृके किं । सिनो ग्रासो देवदत्तेन । आदितश्च ॥
॥९॥ प्रस्विन्नः । भुजो भुग्नः । टुओश्वि । शूनः । द्रवमूर्तिस्पर्शयोः श्यः । द्रवस्य मूर्तौ काठिण्ये स्पर्शे चार्थे श्य
ऊः संप्रसारणं निष्ठायां । श्योऽस्पर्शे । श्येङो निष्ठातस्य नो स्पर्शे र्थे । दुलः । शीनं घृतं । अस्पर्शे किं । शी
तं जलं । द्रवमूर्तिस्पर्शयोरिति किं । संश्यानो वृश्चिकः । शीतात्संकुचित इत्यर्थः । प्रतेश्च । श्यः सं
प्रसारणं निष्ठायां । प्रतिशीनः । विभाषाभ्यवपूर्वस्य । तथा । अभिश्यानं घृतं । अभिशीनं घृतं ।
अवश्यानोऽवशीनो वृश्चिकः । व्यवस्थितविभाषेयं । तेनेह न । समुमेव श्यानः । अंचोऽनपादाने ।
निष्ठातस्य नो न तु अपादाने । यस्य विभाषा । यस्य क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया नेट् । उदितो
त्कायां वेतिविकल्पादिह नेट् । समक्नः । अपादाने किं । उद्धृतं उदकं कूपात् ॥ दिवो विजिगीषायां । निष्ठात
स्य नः । द्यूनः । विजिगीषायां तु द्यूतं । निर्वाणोऽवाते । अवाते इति च्छेदः । निःपूर्वाद्वातेर्निष्ठातस्य ॥९॥
नत्वं वातश्चेत्कर्ता न ॥ निर्वाणोऽग्निर्मुनिर्वा । वाते तु । निर्वातो वातः । शुषः कः । निष्ठातस्य ।

शुष्कः । पचो वः । पक्वः । क्षायो मः । क्षामः । स्त्यः प्रपूर्वस्य । प्रात्स्त्यः संप्रसारणं निष्ठायां । प्रस्त्योऽन्यतरस्यां । नि
वा ष्ठातस्य मो । प्रस्तीमः प्रस्तीतः । प्रात्किं । स्त्यानः । अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः ॥ एते निष्ठांता
निपात्यंते । क्तवत्वेकदेशस्यापीदं निपातनमिष्यते । फुल्लवान् । अनुपसर्गात्किं । आदितश्चेत्यां
दितश्च । आकारेतो निष्ठाया इण्न । ञि । फला विशरणे । तत उत्त्वादेशोऽकेति । प्रफुल्लः । प्रक्षीबितः । प्रकृ
शितः । प्रोल्लाघितः । उत्फुल्लसंफुल्लयोरुपसंख्यानं ॥ नुदविदोंदत्राघ्राह्रीभ्योऽन्यतरस्यां । निष्ठा
तस्य नो वा । नुन्नः नुत्तः । विन्नः । वित्तः । ऊंदीदितो निष्ठायां । श्वयतेरीदितश्च निष्ठाया इण्न ।
उन्नः । उत्तः । त्राणः । त्रातः । ह्रीणः । ह्रीतः । न ध्याख्यापॄमूर्छिमदां ॥ एभ्यो निष्ठातस्य नो न ।
ध्यातः । ख्यातः । पूर्तः । राल्लोपच्छ्वोः । क्रोशलादेशो येव क्विति अनुनासिके रो प्रत्यये ॥ मूर्त्तः ।
मत्तः । विन्नो भोगप्रत्यययोः । विदेर्निष्ठातस्य निपातोऽयं भोग्ये प्रतीते चार्थे । वित्तं धनं । वित्तः पुरु
षः । अनयोः किं । विन्नः । भित्तं शकलं । भिन्नमन्यत् । ऋणमाधमर्ण्ये । ऋतमन्यत् । स्फायः स्फी

म०कौ०रु
॥१०॥

निष्ठायां॥ स्फीतः। इण्निष्ठायां॥ निरः कुषो निष्ठाया इड्वा। यस्य विभाषेति निषेधे प्राप्ते पुनर्विधिः।
निष्कुषितः। निष्कुष्टः। वसतिक्षुधोरिट्। आभ्यां क्त्वानिष्ठयोर्नित्यमिट्। उषितः। क्षुधितः। अञ्चेः पूजा
यां। क्त्वानिष्ठयोरिट्। अञ्चितः। गतौ तु अक्तः। लुभो विमोहने। क्त्वानिष्ठयोरिण्न तु गार्ध्ये। लुभि
तः। गार्ध्ये लुब्धः। क्लिशः क्त्वानिष्ठयोः इड्वा। क्लिशितः। क्लिष्टः। पूङश्च। क्त्वानिष्ठयोरिड्वा।
पूङः क्त्वा च। निष्ठा सेट् किन्न। पवितः। पूतः। क्त्वाग्रहणमुत्तरार्थं। नोपधादित्यत्र हि क्त्वैव
संबध्यते। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। निष्ठा सेट् किन्न। शयितः। आदिकर्म
णि निष्ठा वक्तव्या। आदिकर्मणि क्तः कर्तरि च॥ वा भावकर्मणोः। विभाषा भावादिकर्मणोः।
आदितो निष्ठायां इड्वा। प्रस्वेदितश्चैत्रः। प्रस्वेदितं तेन। ञिष्विदेर्भ्वादिस्तु गृह्यते। ञि २०॥
ध२ क्ष्विदः साहचर्यात्। स्विन्नस्तु स्विदित इत्येव। ञिमिदा ञिक्ष्विदा दिवादी च। प्रमेदितः। प्रक्ष्वे
दितः। प्रधर्षितः। प्रधर्षितं तेन। सेट् किं। प्रस्विन्नः। प्रस्विन्नं तेनेत्यादि। मृषस्तितिक्षायां।

दा२

सेण्णिष्ठा किन्न। मर्षितं तेन। क्षमायां किं। अपमृषितं वाक्यं। अविस्पष्टं। उदुपधाद्भावादिकर्म
णोरन्यतरस्यां। सेण्णिष्ठा किन्न। द्युतितं द्योतितं मुदितं मोदितं साधुना। प्रद्युतितः प्रद्यो
तितः। प्रमुदितः। प्रमोदितः साधुः॥ उदुपधात्किं। विदितं। भावेत्यादि किं। रुचितं कार्षापणं।
सेट् किं। कुष्टं। शब्विकरणेभ्य एवेष्यते। नेह। गुधितः गुधितं॥ निष्ठायां सेटि॥ णेर्लो
पः॥ भावितः। भावितवान्। दृढः स्थूलबलयोः। स्थूले बले वर्ति निपात्यते॥ दृढः॥ दधाते
र्हिः। नादेः किति॥ अभिहितः॥ दो दद्घोः॥ घुसंज्ञस्य दा इत्यस्य दथ् स्यात्तादौ किति। दत्तं। दत्तः॥
नि४ गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च॥ एभ्यः कर्तरि क्तः भावकर्मणोश्च। को
गंगां गतः। गंगां प्राप्तः। ग्लानः सः। लक्ष्मीमाश्लिष्टो हरिः। शेषमधिशयितः। भूतिस्यतिमा
स्थामितिक्तिकति। वैकुण्ठमधिष्ठितः। शिवमुपासितः। हरिदिनमुपोषितः। राममनुजा
तः। गरुडमारूढः। विश्वमनुजीर्णः। पक्षे प्राप्ताङ्गं गातेत्यादि। क्तोऽधिकरणे च ध्रौव्यग

श्रि३

म०कौ०रू०

॥११॥

निष्ठत्स्य सानेनोऽस्य ॥ एभ्योऽधिकरणे क्तः ॥ गत्यर्थाप्राप्ते ॥ मुकुंदस्यासितमिदमिदं यातेरमापतेः ॥ भुक्तमेदतनंतस्ये
स्तुर्गाख्योरिदस्तवः ॥ उपसे ॥ आसेरकर्मकेत्वात्कर्तरि भावेन ॥ आसितो मुकुंदः ॥ आसितं तेन ॥ गत्यर्थेभ्यः कर्म
णि कर्तरि च ॥ रमापतिरिदं यातः ॥ भुजेः कर्मणि ॥ भुक्तं तेनेदं भुक्तं ॥ वर्तमानेऽर्थे धिकृत्य ॥ शीलतः ॥ श्लिष्टः ॥
मतिबुद्धिपूजार्थेभ्यश्च ॥ राज्ञां मतः इष्टः बुद्धः विदितः अर्चितः ॥ चकारोऽनुक्तसमुच्चयार्थः ॥ शीलितो रक्षितः ॥
क्षांत आक्रुष्ट जुष्ट इत्यादि ॥ नपुंसके भावे क्तः ॥ क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः ॥ जल्पितं सुप्तं नाट्यं ॥ हसितं
निष्ठ ॥ भ्रूत ॥ सुप्त्वा ॥ यज्वा ॥ जीर्यतेरतृन् ॥ जरंतो ॥ वासरूपन्यायेन निष्ठापि ॥ जीर्णो जीर्णवान् ॥ छंदसि ॥ जरन्
लिट् ॥ लिटः कानज्वा ॥ क्वसुश्च ॥ भूतसामान्ये लिट् ॥ तस्य कानच् क्वसू वास्तः ॥ तंनो ऽऽत्मनेपदं ॥ वक्र
गः ॥ स्वार्थे ॥ जगन्वान् ॥ कवयस्तु बाहुलकात् लोके प्रयुंजते ॥ तं तस्थिवांसं नगरोपकंठे श्रेयांसि सं ॥११॥
वण्यधिजग्मुषस्तेत्युपादि ॥ वस्वेकाजाद्घसां ॥ कृतद्विर्वचनानामेकाचामादंतानां घसेश्च वसोरिण्नान्ये
षां ॥ आरिवान् ॥ आदिवान् ॥ ददिवान् ॥ एषां किं ॥ बभूवान् ॥ भाषायां सदवसश्रुवः ॥ सदादिभ्यो भू

अद्दिवान् ना२

नात्रोपसर्गोस्तंत्रं १ ईदासः ॥ आनस्य ॥ आदेः परस्य ॥ आसीनः ॥ ६

वा सामान्ये भाषायां लिड्वा तस्य नित्यं क्वसुः ॥ निषेदुषीमासनबंधधीरः ॥ अध्यूषुषस्तामभवज्जनस्या श्रुश्रु
वान् ॥ उपेयिवाननाश्वाननूचानश्च ॥ एते निपात्यंते ॥ उपादिणो लिड्वा तस्य च नित्यं क्वसुः ॥ इट् ॥ उपेयि
वान् ॥ ईयिवान् ॥ नञ्पूर्वादश्नातेः क्वसुरिड्भावश्च ॥ अनाश्वान् ॥ अनु पूर्वाद्वचेः कर्तरि कानच् ॥ विवरस्य उपेयिवानिति ॥
अनूचानः ॥ लटः शतृशानचावप्रथमासमानाधिकरणे ॥ अप्रथमांतेन समानाधिकरणे
ऽन्ते ॥ लट एतावादेशौ स्तः ॥ शबादि ॥ पचंतं चैत्रं पश्य ॥ आने मुक् ॥ अतोंगस्य ॥ पचमानं चैत्रं पश्य ॥ लडित्य
नुवर्तमाने पुनर्लङ्ग्रहणात् प्रथमासमानाधिकरणेपि क्वचित् ॥ सन्द्विजः ॥ विदेः शतुर्वसुः ॥ वेत्तेः
परस्य शतुर्वसुरादेशो वा ॥ विदन् ॥ विद्वान् ॥ तौ सत् ॥ शतृशानचौ सत्संज्ञौ स्तः ॥ लृटः सद्वा ॥ करि
ष्यंतं करिष्यमाणं पश्य ॥ आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु ॥ क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्य
यास्ताच्छील्यादिषु बोध्याः ॥ तृन् ॥ कर्ता कटान् ॥ स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्य आ
लुच् ॥ आलुच्प्रत्ययः स्यादादंताः ॥ स्पृहयालुः ॥ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यप

कृतेषु भीरुश्चैव भया कु

म॰कौ॰रू
॥१२॥

४ रूल्पः। नवेवंशमीशमि नादिलादेनुभ्रसंगः रूलग्रहणमारूप्यरूलंतामेवत द्विधानातु। नोदात्तोपदेशे स्ये
त्र्वेतुरधुसहन्वरइसुहुव्र। अलंकंरिष्णुः। ग्लाजिस्थश्चस्नुः। मिदयंनताकित। नैनेतंभ्लास्नुः। त्रिसुः
स्थास्नुः। वाह्नुवः। श्युकःकितीत्यत्रगकारप्रश्लेषान्नेट्। भूष्णुः। त्रसिगृधिधृषिक्षिपःक्नुः। त्रस्नुः। गृ
ध्नुः धृष्णुः। क्षिप्नुः। शमित्यष्टाभ्यो घिनुण। उकार उच्चारणार्थ इतिकाशिका। अनुबंधइति
भाष्यं। तेनशमिनितराशमिनीतरेत्यत्रागितश्चेतिह्रस्वाविसंघ्वानुरुधाङ्गमाड्यसपरिसृसंस
ृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविच
त्यजरजभजातिचरापचरामुषाभ्याहनश्च। घिनुणस्यात्। शमपकइत्यादि। रूवीविनि
त्यादि। वौकषलषकत्थस्रंभः। विकाषी। अपेवलषः। वाहू। अपलाषी। विलाषी। वलनशब्दा
र्थादकर्मकाद्युच्। वलनाच्छब्दार्थाद्युच्। चलनः। कंपनः। शब्दनः। रवणः। अकर्मकात्किं।
फलिताविद्या। अनुदात्तेतश्चहलादेः। अकर्मकाद्युच्। वर्त्तनः। वर्धनः। अनुदात्तेत[illegible]किं। भवि
ता। हलादेःकिं। एधिता। अकर्मकात्किं। वसितावस्त्रं। निंदहिंसक्लिशखादविनाशपरिक्षिपप

[illegible]अनुप[illegible]। [illegible]इत्यादि

[illegible] ॥१३॥

या
रिरटपरिवादिव्याभाषासूयोवुञ्। निंदकः। हिंसकः। देविक्रुशोश्चोपसर्गे। आदेवकः। आक्रोशकः। उपसर्गे
किं। देवयिता। क्रोष्टा। लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्। लाषुकः। पातुकः। जल्पभि
क्षकुट्टलुंटवृङः षाकन्। जल्पाक इत्यादि। सनाशंसभिक्ष उः। [illegible]ः। आशंसुः। भिक्षुः॥
प्रत्ययं[illegible]तेर्यङं ता ह्रस्व। अतोलोपः। तस्या चःपरस्मिन्निति स्थानिवत्त्वप्राप्ते। नपदांतद्वि
र्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। पदस्य चरमाएवैषद्विर्वचनादौ वक
त्व्ये परनिमित्तोजादेशस्थानिवत्। इतियलोपंप्रति स्थानिवत्त्वनिषेधाल्लोपो व्योर्वलिलोपः।
अल्लोपस्य स्थानिवत्त्वमाश्रित्यालोपे प्राप्ते। वरेलुप्तंनस्थानिवत्। यायावरः। भ्राजभासधु
र्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्। विभ्राट्॥ भाः। धूः॥ विद्युत्। ऊर्क्। पूः। दृशिग्रहणस्यापकर्षणा
ज्जवतेर्दीर्घः। जूः। ग्रावस्तुत्। क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोसंप्रसारणं। वक्
इतिवाक्॥ पृच्छतीतिप्राट्॥ आयतंस्तौतीत्यायतस्तूः। कटंप्रवतेकटप्रूः। जूरुक्तः॥

वृत्ती

धेदोधात्वकर्मण्यर्थे ष्ट्रन् स्यात् ४ धमिकात्वमपदि मारं तरयसित्वनितिभ्यासार्थे सप्रतिभू २

म०कौ०उ श्रयानिहारिंश्री॥ द्युतिगमिजुहोतीनांद्वे च॥ दिद्युत्। जगत्। जुहूः। कॄ रादिर्घश्च। जुहूः। ध्यायतेः संप्रसा

॥१३॥ रणं च। धीः। भुवः संज्ञांतरयोः। मित्रभूर्नाम कश्चित्। विप्रसंभ्यो ड्वसंज्ञायां। एभ्यो भुवो डुः। वि

भुर्व्यापकः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु विभूर्नाम कश्चित्। मितद्र्वादिभ्य उपसंख्यानं। मितं

अंतर्भावितण्यर्थो त्र भवतिः द्रवतीति मितद्रुः। शंभुः। धःकर्मणि ष्ट्रन्। धात्री जनन्यामलकी वसुमत्युपमातृषु। दाम्नीश

सयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे। दाबाद्धं देनू कारणार्थे। दात्यनेनदात्रं। नेत्रं

तिलु त्रं तथा सिस्तुरे कसेषु च। एषां दशानां नाभिनेर्णयः। शस्त्रं। योत्रं। योक्त्रं। मेढ्रं। पत्रं। दंष्ट्रा॥

नद्धी। हलसूकरयोः पुवः। पूज्यते ज्ञो करणे ष्ट्रन्। तच्चेत्करणं हलसूकरयोरवयवः। हलस्य

सूकरस्य च पोत्रं। मुखमित्यर्थः। अर्तिलूधूसूखनसहचर इत्रः। अरित्रं। लवित्रं। धु

वित्रं। सवित्रं। खनित्रं। सहित्रं। चरित्रं। पुवः संज्ञायां। पवित्रं॥ ॥ अथोणादयः॥ ॥१३॥

कृवापाजिमिस्वदिसाध्यशूभ्य उण्। कारुः। वायुः। पायुः। जायुः। मायुः। स्वादुः। साधु

करोतीति ~ धुवः कु यादित्वान्त गुणः स्तो त्रं। तोत्रं। सेत्रं। सेत्रं ५

ये नाद्य मुत्पूयते यच्चा नामिका वेष्टनं २

खं डोस्त्री शकले नेक्षुविकारपाणिभेदयोः ६

तिपरकार्यतिसाधुः॥ अशू शीघ्रं। हरिमितयोर्द्रुवः। द्रु गतौ। अस्माद्धरिमितयोरुपपदयोः कुः स्व

दित्। हरिभिर्द्रूयते। हरिद्रुर्वृक्षः। मितं द्रवतीति मितद्रुः समुद्रः। शतेर्च। शतधा द्रवति शतद्रुर्नदीभेदः।

खंधेर्द्धं हस्व जसे केफलूक कंधुदिधिषूः एते कुप्रत्ययांता निपात्यंते। शमेर्ढः। बाडुक काढु

स्याद्वल्मेक यूंट्रवन। शंढः स्यात्पुंसि गोपतौ। कमेरढः॥ कमठः कच्छपे पुंसि भांडभेदे नपुंस

कं। रमेर्वृद्धिश्च॥ रामठं हिंगुः। शमिःखः। शंखः। कणोष्ठः। कंठः। अमंताड्डः। त्रिमितिप्रत्याहा

रः॥ दंडोस्त्री लगुडेपि स्यात् रंडा मूषिकपर्ण्यां च विधवायां च योषिति। दुंडः। मंडः। पति

चडिभ्यामाल ञ्। पाताळं। चंडालः। डार्ष्ट्राणि चांडाळोपीत्युक्ते। गमेर्गद्योः। गंगा। अ

पुरोडाशः। छापूखडिभ्यः कित्। छागः। पूगः। खड्गः। भञ्जः किन्तुंदुच। भञ्जो ंस चकित्तस्य

भृंगाख्य ग्रालि चान्या दाः। भ्रणाते दूरस्वश्च। भृंगं। आर्तिस्तुसुःसृधृक्षिस्तु भायावापदिय

सिनीभ्यामन्। एभ्य श्चतुर्दशभ्योमन्। अमश्च स्तुरागाः। स्तोमः। होमः। समोगमनं।

मेडः पंचां ... लेश ... भेदकी चंतुमस्तु नीः

४ तन्तोकुलाल वरुड कर्मार निषाद चांडाल मित्रामि वेभ्य श्चंद सी ति चंडाळ रा ... भेदा विधेरताराार्थिके नतः ... पयोण

मनहाने

१ उदक

रसङ्ख्या

म०कौ०उ
॥१४॥

कुशलं २ सूर्यः २ रोगराजः २

धर्मः। क्षेमं। सोमं। भामः। यामः। वामः। प्लुषो मन्नुष्यो। पक्ष्मं। यक्ष्मः। यक्ष्मः। नेमः। अ
वतेष्टिलोपश्च। मन्नप्रत्ययस्यायं टिलोपो न प्रकृतेः। अन्यार्थोऽयं दिदित्येव ब्रूयात्। ज्वरत्वरस्रि
व्यविमवामुपधायाश्च। एषामुपधा वकारयोरूठ् कौ झलादौ च अनुनासिके च प्रत्यये। अ
त्र क्ङितीति नानुवर्त्तते॥ अवतेस्तु निकृते ओतु सिति दर्शनात्। स्वरादिपाठादव्ययत्वं॥ अव
तीति ओम्। ग्रसेरा च। ग्रामः। अविसिविसिशुषिभ्यः कित्। ऊमं। सीमं। शुष्मम्। अग्नि
समीपयोः। घर्मः। घृधातोर्निपातोयं। ग्रीष्मः। ग्रसतेर्निपातोयं॥ अशूप्रुषिलटिकणि
खटिविशिभ्यः क्वन्। अश्वः। प्रुष्वः स्याद् ऋतुसूर्ययोः। लट्वा। कंण्वं। खट्वा। विश्वं। क
निन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः। युवा। वृषा। तक्षा। राजा। धन्वा। द्युः कृषु
किरणाः। पुराणाः। श्वानः। श्वानौ। मनौ। निधने। धृषधिषच संज्ञायां। धिषणोति धिषणा। नप्तृ ॥१४॥
नेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ। एते तृन्नन्ता निपात्यंते॥ नप्ता

समुद्रः २ अंतरिक्षं २ स्तोत्रं २ तक्षा। राजा। धन्वा मरुः। धनुः। शरासनं। धृमकः सूर्यः
प्रतिदीव्यत्यस्मिन् प्रतिदिवा दिवसः ३

पापं

पत्युः ४

इत्यादि। सुरसरसे स्क्रन्। स्वसा। यतेर्वृद्धिश्च। भार्यास्तु भ्रातृवर्गस्य यातारः स्युः परस्परं। नन्दिवनंदेः
ननन्दृतिननांदा। इह वृद्धिर्नानुवर्त्तत इत्येके॥ ननांदा तु स्वसा पत्युर्ननंदा नंदिनी नुसा॥ दि
वेर्ऋः। देवा। नयतेर्डिच्च। नाना नरो। अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः। अर्चिः। शोचिः। हविः।
सर्पिः। इत्यमन्त्रन् त्रनक्विषु च॥ छादेरद्भ्यस्वः। छदिः। छर्दिः। दंहेर्नलोपश्च। बर्हिर्निदितेश्चिसिन्नन्ता
देश्च उः। ज्योतिः। जनेरुसिः। जनुरुजननं। अर्तिपृवपियजितनिधनितपिभ्यो नित्। अ
रुः। परुः। वपुः। यजुः। तनुः। धनुरस्त्रियां। तपुः सूर्याग्निशत्रुषु॥ एतेर्णिच्च। आयुः। आयु
षी॥ चक्षेः शिच्च। चक्षुः। मुहेः किच्च। मुहुः। पानीविषिभ्यः पः। रक्षत्यस्मादात्मानमिति पा
पं॥ तद्योगात्पापः। नेपः। वेष्पः। स्तुवोदीर्घश्च। स्तूपः। सुशृभ्यां निच्च। शालिकेत। सूपः।
वाहुकृक्षादुत्वं रपरत्वं। शूर्पः। कुयुभ्यां च। कुवंति मंडूका अस्मिन्निति कूपः। यु वंति पशुमितियूपः। खष
शिल्पशिष्पवाष्परूपपर्पतल्पाः। स नि नेप प्रत्ययांता निपात्यंते। स्तनिहृषिपुषिगदिमदिभ्यो णेरि

तः पुरोहितः ३ बंभंतिः २

कृशाणुषष्ठ्योः

पोषयित्नुः। गुदयित्नुः

मदिरा

म०कोरु स्तनयित्नुः। अपामंते। प्रयूक्तनमिंदुः। हर्षयित्नुः मदयित्नुः। अशेःसरः। अप्सरः। समेश्च। वत्सरः। संपूर्वा

॥१५॥ च्चित्। संवत्सरः। कृश्टशालिकलिगर्दिभ्यो भच्। करभः। शरभः। शलभः। कलभः। गर्दभः। ऋषिवृ

षिभ्यां कित्। ऋषभः। वृषभः। रासिवल्लिभ्यां च। रासभः। वल्लभः। नियो मिः। नेमिः। अर्त्तेरूच्च। ऊर्मिः।

र्नि भुवः कित्। भूमिः। अंगेर्नलोपश्च। अग्निः। वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्। वह्निः। श्रेणिः।

श्रोणिः। योनिः। ग्लानिः। हानिः। तूर्णिः। पातेर्डतिः। पतिः। सृ ऊः किः। सूरिः। अदिशदिभूशुभि

भ्यः क्रिन्। अद्रिः। शद्रिः। भूरिः। शुभ्रिः। वाहिमल्लितनिभ्यः कयन्। वलयं। मलयः। तनयः॥

माछाससिभ्यो यः। माया। छाया। सस्यं। वाकुलकात्म व्यं। जनेर्यक्। ये विभाषा। जन्यं।

जाया। सर्वधातुभ्य इन्। पचिः। तुडिः। वलिः। वटिः। यजिः। काशतेरिति काशिः। यातिः। मं

ल्लिः। केलिः। मसिपूरिणाम। परिणामो विकारः। मसिः। बोधिः। नंदिः। कलिः॥ हरिर्विष्णावि ॥१५॥

हाविन्द्रे भेके सिंहे हये रवौ। चंद्रे कीले प्लवंगे च यमे वाते च कीर्तितः॥१॥ इगुपधात्कित्। कृषिः।

शुचिः

अननं। घासिर्भक्ष्यमत्रिश्च

ऋषिः। मनेरुच्च। अतः। मुनिः। जनिघसिभ्यामिण्। जानिः। अवद्रः। रविः। तरिः। पविः। कविः। अरिः।

कुडिकंप्योर्नलोपश्च॥ कुडिः। कपिः। इषेः क्सुः। इक्षुः। कृषेर्वर्णे। नक्। कृष्णः। दाभाभ्यां नुः। दानुः। भानुः।

विपेः किच्च। विष्णुः। सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्। सेतुः। तंतुः। जंतुः। गंतुः।

मस्तुः। सक्तुः। ओतुः। धातुः। क्रोष्टुः। अवितृस्तृतंत्रिभ्य ईः। अवीः। तरीः। तंत्रीः। यापोः किद्द्वे च। ययीः। नारीरजस्वला

प्यायःसोमस्सर्पयोः पपीः। वातप्रमीः। निपातोयं। लक्षेर्मुट् च। लक्ष्मीः। सर्वधातुभ्यो मनिन्। कर्म। वर्म। भस्म। जन्म।

शर्म। स्थेहेर्नेश्च। निनकारस्याकारः। ब्रह्मतत्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः। नामन्सीमन्व्यो न्

मन्पमन्रोमन्लोमन्पाप्मन्ध्यामन्। सप्त निपात्यन्ते। सातिभ्यां मनिन्मनिणौ। साम।

आत्मा। हनिमशिभ्यां सिकन्। हंसिका हंसयोषिति। मसिका। गिरुडच्। गरुडः। इंदेः क

मिन्नलोपश्च। इदं। कायतेर्डिमिः। किं। सर्वधातुभ्यः ष्ट्रन्। वस्त्रं। अस्त्रं। शस्त्रं। अमिचिमिदि

शसिभ्यः क्त्रः। आंत्रं। चित्रं। मित्रं। शस्त्रं। पुवो ह्रस्वश्च। पुत्रः। स्त्यायतेर्ड्रट्। स्त्री। सत्तेरस्मन्।

म०कौ०उ
॥१९॥

सूक्ष्मं। पातेर्डुम्सुन्। पुमान्। वसेस्तिः। वस्तिर्नाभेरधो द्वयोः। सावसेः स्वस्ति। वौ तसेः। वितस्तिः। स
र्वधातुभ्योसुन्। वितः। सरः। पयः। अवेर्दवने युट् च। दवने स्तुतौ। यशः। उब्जेर्बलोपश्च। ओजः। श्रयतेस्वां लेख॰
गे शिरः किच्च। श्रयतेः स्वांगे शिर आदेशोसुन् किच्च। शिरः। अर्त्तेरुच्च। उरः। उषिरंजिभ्यां कित्। उषः। अंतरिक्षं
रजः। वसेर्णित्। वासः। चंदेरादेश्च छः। छंदः। पचिवचिभ्यां सुट् च। पक्षसमीतु सस्तोपसे। वक्षः। नञि
हन एह च। अनेहा। विधाञो वेध च। वेधाः। चंदेर्मो डित्। चंद्रोपपदान्माङोसिरसन् डित्। चंद्रमाः।
उम्नः कित्। षेडें। अप्सराः। सर्त्तेरप्पूर्वादसिः। प्रायेणायं भूम्नि। अप्सरसः। करोतेर्भैसिः। उश
ना। अदिभुवो डुतच्। अद्भुतं। गुधेरूमः। गोधूमः। रहेश्चो रलोपश्च। त्वणं। उदि वेर्डैसिः। उच्चैः।
नौ दीर्घश्च। नीचैः। पूञो यत् णुक् ह्रस्वश्च। पुण्यं। उदि दृणाते रजलौ पूर्वपदान्त्यलोपश्च। उदरं।
उत्खनेर्मुट् चोदरत्वं। अञ्जलुक् खडिद्रूतौ मुट् च। मुखं। अमेः सन्। अंसः। मुहेः खो मूर् च। मूर्खः। न ॥१९॥
हेर्हलोपश्च। नखः। शीङो ह्रस्वश्च। शिखा। माङ ऊखो मय् च। मयूखः। जनेर्हलोपश्च। उर्याक्लि

लो　　　　　　　　　　　　　　　　　　　　　　करकं
शेरन् लोलोपश्च। केशः। फलेरितजादेश्च पः। पलितं। कृञादिभ्यः संज्ञायां वुन्। करकः। नरको नारकोपि
न। चीकयतेराद्यंतविपर्ययश्च। कीचकः। जनेररष्ठ च। जठरं। हर्यतेः कन्यन् हिरच्च। हिरण्यं। कृञः पा
सः। कर्पासः। बिल्वादित्वात् कार्पासं॥ ऊर्णोतेर्डः। ऊर्णा। धाञो यत् नुट् च। धान्यं। वतेररन्। वत्सरः।
प्रान्ततेररन्। प्र अतत इति छेदः। प्रातः। अमेस्तुट् च। अंतः। दहेर्गो लोपो दश्च नः। गप्रत्ययो धातोरं
त्यस्य लोपो दस्य नः। नगः। हंतेरच् घुर च। घोरं। तरतेर्ड्रिः। त्रयः। ग्रहेरनिः। रेग्रणीः। प्रथेरमच्।
प्रथमं। चरेश्च। चरमः। मंगेरलच्। मंगलं॥ ॥ इत्युणादयः॥ ॥ उणादयो बहुलं॥ एते
वर्त्तमाने संज्ञायां बहुलं। किञ्चिद्विहिता अप्यूह्याः। संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्या
द्विद्यादनूबंधमेतच्छास्त्रमुणादिषु॥१॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायां। क्रियार्थायां क्रिया
यामुपपदे धातोरेतौ स्तः। मांतत्वादव्ययत्वं। कृष्णं द्रष्टुं याति। कृष्णं दर्शको याति। कालसमय
वेलासु तुमुन्। कालः समयो वेला वा भोक्तुं। भावे। सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्। पाकः।
वा　　ने३

मञ्कोरु
॥१७॥ अकर्तरि च कारके संज्ञायां। कर्तृभिन्ने कारके घञ्। घञि च भावकरणयोः। रंजेर्नलोपः। रागः। अनयोः
किं। रंजत्यस्मिन्निति रंगः॥ निवासचितिशरीरोपसमाधानेष्वादेश्च कः॥ एषु चिनोतेर्घञ् आदेश्च कः।
उपसमाधानं राशीकरणं॥ निकायः। आकायः। कायः। गोमयनिकायः। एरच्। चयः। जयः। ऋदोरप्। ऋ इन्वर्णांतादच्
वर्णांतादुवर्णांतादप्। करः। शरः। गरः। यवः। लवः। स्तवः। पवः। घञर्थे कविधानं। प्रस्थः। विघ्नः।
ड्वितः क्त्रिः। भावे। स्वभावात्। क्त्रेर्मम्नित्यं। क्त्रिप्रत्ययांतान्मप् निर्वृत्तेऽर्थे। पाकेन निर्वृत्तं पक्त्रिमं। डुव
भयमपि भेदे मं। ट्वितोऽथुच्। वेपथुः। श्वयथुः। यजयाचयतविच्छप्रच्छरक्षो नङ्। यज्ञः। याच्ञा। यत्नः।
विश्नः। प्रश्नः। रक्ष्णः। स्वपो नन्। स्वप्नः। उपसर्गे घोः किः। प्रधिः। उपाधिः। स्त्रियां क्तिन्॥ स्त्रीलिंगे
भावादौ क्तिन्। घञोऽपवादः। कृतिः। स्तुतिः। ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः। तेन नत्वं। कीर्णिः॥
गीर्णिः। लूनिः। पूनिः। धूनिः। संपदादिभ्यः क्विप्। संपत्। विपत्। आपत्। क्तिन्नपीष्यते। संप ॥१७॥
त्तिः। ऊतियूतिजूतिसातिहेतिकीर्तयश्च॥ एते निपात्यंते। कृञः क्यप्। तुक्। कृत्या। वेशा॥

क्ति

कृञः शश्च क्तिन्। प्रकरणं प्रक्रिया। प्रकृतिः। इच्छा। इषेर्निपातोऽयं। अ प्रत्ययात्॥ प्रत्ययांतेभ्यो धातु
भ्यः स्त्रियामकारप्रत्ययः। चिकीर्षा। पुत्रकाम्या। गुरोश्च हलः। गुरुमतो हलंतात् स्त्रियामप्रत्ययः।
ईहा। ऊहा। षिद्भिदादिभ्योऽङ्। जॄष्। ऋदृशोऽङि गुणः। जरा। त्रपूष्। त्रपा। भिदा। विदारणे
वाच्यं। भित्तिरन्या। छिदा। मृजा। कृपेः संप्रसारणं च। कृपा। आतश्चोपसर्गे। अङ्। उपदा। ण्या
सश्रंथो युच्। अपवादः। कारणा। आसना। श्रंथना। रोगाख्यायां ण्वुल् बहुलं। प्रच्छर्दिका।
प्रवाहिका। विचर्चिका। कृ विचल्। शिरोऽर्त्तिः। धात्वर्थनिर्देशे ण्वुल् वक्तव्यः। आसिका। इक्
श्तिपौ धातुनिर्देशे वक्तव्यौ। पचिः। पचतिः। वर्णात्कारः। निर्देश इत्येव। अकार इत्यादि॥
रादिफः। रेफः। नपुंसके भावे क्तः। ल्युट् च। हसितं। हसनं। पुंसि संज्ञायां घः प्रायेण॥ छादेर्घे
द्व्युपसर्गस्य। द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वो घे। दंतच्छदः। आकुर्वंत्यस्मिन्निति आ
करः। अवे तॄस्त्रोर्घञ्। अवतारः। अवस्तारः। हलश्च। घञोऽपवादः। रमंतेस्मिन्यो
करणाधिकरणयोश्च। ल्युट्। अनुमानः। अनुमानी।३

म॰ कौ॰
॥९८॥

गिनो रामः। अपमृज्यते नैन व्याध्यादिकं नेनेव अपामार्गः॥ ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्॥ दुःखसु
खार्थेषूपपदेषु खल्। तयोरिति भावकर्मणोः। कृच्छ्रे। दुष्करः। कथं भवता। अकृच्छ्रे। ईषत्करः।
सुकरः। आतो युच्। खलोऽपवादः। ईषत्पानः सोमो भवता। दुष्पानः। सुपानः। अलंखल्वोः
प्रतिषेधयोः प्राचां क्त्वा। प्राचामिति पूजार्थं। प्रतिषेधार्थयोरुपपदयोरलंखल्वोः। दोदद्घोः। घु
संज्ञकस्य दा इत्यस्य दथ् तादौ किति। अलं दत्वा। घुमास्थेतीत्वं पीत्वा खलु। अलंखल्वोः किं। मा का
र्षीः। प्रतिषेधयोः किं। अलंकारः। समानकर्तृकयोः पूर्वकाले॥ समानकर्तृकयोर्धात्वर्थ
योः पूर्वकाले वर्तमानाद्धातोः क्त्वा। भुक्त्वा व्रजति। द्वित्वमतंत्रं। स्नात्वा भुक्त्वा पीत्वा
व्रजति। न क्त्वा सेट्। सेट् क्त्वा किन्न। शयित्वा। सेट् किं। कृत्वा। रलो व्युपधाद्धलादेः संश्च।
इवर्णोवर्णोपधाद्धलादेरलंतात्परौ क्त्वासनौ सेटौ वा कितौ स्तः। द्युतित्वा। द्योतित्वा॥ ॥९८॥
लिखित्वा। लेखित्वा॥ व्युपधात्किं। वर्तित्वा। रलः किं। सेवित्वा। हलादेः किं। एषित्वा॥

सेट् किं। भुक्त्वा। उदितो वा। उदितः क्त्वा इड्वा। शमित्वा। शांत्वा। देवित्वा। द्यूत्वा। दधातेर्हिः। हित्वा।
जहातेश्च क्त्वि। हित्वा। हाङस्तु। हात्वा। समासेऽनञ्पूर्वे क्त्वो ल्यप्। अव्ययपूर्वपदेऽनञ्॥
समासे क्त्वो। विषये णमुल् क्त्वा च। नित्यवीप्सयोः। आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य
द्वित्वं। आभीक्ष्ण्यं तिङन्तेष्वव्ययसंज्ञककृदन्तेषु च। पचति। पठति। २। स्मारं नमति शिवं॥
स्मृत्वा। २। पायं। २ भोजं। २ श्रावं २॥ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्॥ एषु कृञो
णमुल् सिद्धाप्रयोगो यस्य एवंभूतश्चेत्कृञ्। व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः। अन्यथाकारं।
एवंकारं। इत्थंकारं भुंक्ते। सिद्धेति किं। शिरोऽन्यथा कृत्वा भुंक्ते॥ यावति विंदजीवोः। यावद्वे
दं भुंक्ते। यावल्लभते तावदित्यर्थः। यावज्जीवमधीते। निमूलसमूलयोः कषः। कर्मण्युप
पदे। निमूलकाषं कषति। समूलकाषं कषति। निमूले समूले कषतीत्यर्थः। शुष्क
चूर्णरूक्षेषु पिषः। एषु कर्मसूपपदेषु पिषेर्णमुल्। शुष्कपेषं पिनष्टि। शुष्कं पिनष्टीत्यर्थः।
द्योत्ये

८ ल्यबादेशः। तुक्। प्रकृत्य। अनञ् किं। अकृत्वा। अव्ययपूर्वपदे किं। परमकृत्वा। आभीक्ष्ण्ये णमुल् च। पौनःपुन्ये क्त्वा। ८

तं २

॥११॥ [illegible] स्वर्णरैपं। रूपपेषं। समूलाकृ-
तजीवेषु हन्कृञ्ग्रहः। कर्मणीत्येव। समूलघातं हंति। अकृतकारं करोति। जीवग्रा-
हं गृह्णाति। जीवंतं गृहीत्वा तीत्यर्थः। करणे हनः। पादघातं हंति। स्नेहने पि- पादेन हंतीत्यर्थः
पि षः। स्निह्यते येन तस्मिन्करणे पिषेर्णमुल्। उदपेषं पिनष्टि। उदकेन पिनष्टीत्यर्थः। हस्ते वर्त्तिग्र-
होः। हस्तार्थे करणे। हस्तवर्त्तं वर्त्तयति। हस्तेन गुलिकां करोतीत्यर्थः। हस्तग्राहं गृह्णाति। कर-
ग्राहं पाणिग्राहं। स्वे पुषः। करण इत्येव। स्व इत्यर्थग्रहणं तेन स्वरूपपर्यायविशेषाणां णमुल्। ण
स्वपोषं पुष्णाति। धनपोषं। गोपोषं॥ ॥छ॥ ॥ इति मध्यकौमुद्यामुत्तरार्द्धे कृत्प्रक्रिया
॥छ॥ ॥छ॥ श्री॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा॥ नियतोपस्थितिकः
प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः। प्रातिपदिकार्थमात्रे लिंगमात्राद्याधिक्ये सं- ॥५८॥
ख्यामात्रे च प्रथमा स्यात्। कृष्णः। श्रीः। ज्ञानं। लिंगमात्रे। तटः। तटी। तटं। परिमाणमात्रे।
प्रातिपदिकार्थमात्रे। उच्चैः। नीचैः।

द्रोणो व्रीहिः। वचनं संख्या। एकः। द्वौ। बहवः। संबोधने च। प्रथमा। हे राम। कर्तुरीप्सिततमं कर्म। कर्तुः
क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्। कर्मणि द्वितीया। अनभिहिते कर्मणि द्वितीया स्यात्॥
हरिं भजति। अभिहिते तु कर्मादौ प्रथमा। हरिः सेव्यते। ल[illegible] लक्ष्म्या सेवितः। शास्त्रः। प्रासादं द्र-
क्रमाद्रमुं नारसः इत्य बोधिसः। अकथितं च। अपादानादिविशेषैरकथितं कारकं कर्मसंज्ञं।
दुह्याच्पच्दंड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषां। कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहां॥१॥
गां दोग्धि पयः। बलिं याचते वसुधां। तंडुलानोदनं पचति। गर्गान् शतं दंडयति। व्रजमव-
रुणद्धि गां। माणवकं पंथानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते। शास्ति वा।
शतं जयति देवदत्तं। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति। हरति
कर्षति वहति वा। अर्थनिबंधनेयं संज्ञा। बलिं भिक्षते वसुधां। माणवकं धर्मं भाषते। अभिध-
त्ते वक्तीत्यादि। अकर्मकधातुभिर्योगे देशः कालो भावो गंतव्यो ध्वा च कर्मसंज्ञ इति वाच्यं।

क २

भक्तेरुं
॥२०॥ च

कुरुन्स्वपिति। मासमास्ते। क्रोशमास्ते। गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्त्ता स
णौ॥ गत्यार्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्त्ता सणौ कर्म स्यात्। शत्रूनगमयत्स्व
र्गं वेदार्थं स्वानवेदयत्। आशयच्चामृतं देवान्वेदमध्यापयद्विधिं। आसयत्सलिले पृथ्वीं यः स मे
श्रीहरिर्गतिः। नीवह्योर्न। नाययति वाहयति वा भारं भृत्येन। नियन्तृकर्तृकस्य वहेरनि
षेधः॥ वाहयति रथं वाहान्सूतः। आदिखाद्योर्न। आदयति खादयति वान्नं बटुना। भक्षे
रहिंसार्थस्य न॥ भक्षयत्यन्नं बटुना। अहिंसार्थस्य किं। भक्षयति बलीवर्दान्सस्यं। जल्प
तिप्रभृतीनामुपसंख्यानं। जल्पयति। भाषयति धर्मं पुत्रं देवदत्तः। हृक्रोरन्यतरस्यां। हृक्रोर र
णौ कर्त्तासणौ वा कर्म स्यात्। हारयति कारयति भृत्यं भृत्येन वा कटं। अभिवादिदृशो
रात्मनेपदे वेति वाच्यं। अभिवादयते दर्शयते देवं भक्तं भक्तेन वा। अधिशीङ्स्थासां क ॥२०॥
र्म। अधिपूर्वाणामेषामाधारः कर्मसंज्ञः। अधिशेते। अधितिष्ठत्यध्यास्ते वा वैकुण्ठं हरिः।
दृशेश्च। दर्शयति हरिं भक्तान्। शब्दायतेर्न। शब्दापयति देवदत्तेन ×

अभिनिविशश्च। अभिनीत्येतत्पूर्वस्य विशतेराधारः कर्मसंज्ञः। अभिनिविशते सन्मार्गं कश्चिन्न। पापे
भिनिवेशः। उपान्वध्याङ्वसः। उपादिपूर्वस्य वसतेराधारः कर्मसंज्ञः। उप। अनु। अधि। आङ्। वस
ति वैकुण्ठं हरिः। अभुक्त्यर्थस्य न। वने उपवसति। उभसर्वतसोः कार्या धिगुपर्यादिषु त्रि
षु। द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते। उभयतः कृष्णं गोपाः। सर्वतः कृष्णं। धिक्कृष्णा
भक्तं। उपर्युपरि लोकं हरिः। अध्यधि लोकं। अधोऽधो लोकं। अभितः परितः समया निकषा
हाप्रतियोगेऽपि। अभितः कृष्णं। परितः कृष्णं। समया निकषा ग्रामं। हा कृष्णाभक्तं। बुभुक्षितं न अतोहमसर्चं
प्रतिभाति किंचित्। अन्तरान्तरेण युक्ते द्वितीया। अन्तरा त्वां मां हरिः। हरिमन्तरेण न सु
खं। कर्मप्रवचनीयाः इत्यधिकृत्य। अनुर्लक्षणे। योऽयं कर्मप्रवचनीयसंज्ञः गत्युपसर्गसंज्ञा

म॰कौ॰ल॰
॥२१॥

पवादः॥ कर्मप्रवचनीययुक्ते द्वितीया॥ जपमनु प्रावर्षत्। हेतुभूतजपोपलक्षितं वर्षण
मित्यर्थः। तृतीयार्थे। अनुरुक्तसंज्ञः। नदीमन्ववसिता सेना। नद्या सह संबद्धेत्यर्थः। हीने। अ
नु प्राग्वत्। हरिमनु सुराः। हरेर्हीना इत्यर्थः। उपोऽधिके च। अधिके हीने चोपः प्राग्वत्। अ
धिके सप्तमी वक्ष्यते। हीने। उप हरिं सुराः। लक्षणेत्थंभूताख्यानभागवीप्सासु प्र
तिपर्यनवः। उक्तसंज्ञाः स्युर्लक्षणे। वृक्षं प्रति पर्यनु वा विद्योतते विद्युत्। इत्थंभूताख्या
ने। भक्तो विष्णुं प्रति पर्यनु वा। भागे। लक्ष्मीर्हरिं प्रति पर्यनु वा। वीप्सायां। वृक्षं २ प्रति
सिंचति। एषु किं। परिषिंचति। अभिरभागे। भागवर्जे लक्षणादावभिरुक्तसंज्ञः। हरिम
भिवर्तते। भक्तो हरिमभि। देवं २ मभिषिंचति। अभागे किं। यदत्र ममाभिष्यात्तद्दीयतां। ॥२१॥
सुः पूजायां। अतिरतिक्रमणे च। वा सह ज्ञायां उक्तसंज्ञः। सुः। अति देवान् कृष्णः। कालाध्व

नोरत्यंतसंयोगे द्वितीया। मासं कल्याणी। मासमधीते। मासं गुडधानाः। क्रोशं कुटिला नदी। क्रोशम
धीते। क्रोशं गिरिः। अत्यंतसंयोगे किं। मासस्य द्विरधीते। क्रोशस्यैकदेशे पर्वतः। स्वतंत्र इति कर्तृ
संज्ञा। साधकतमं करणं। क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। कर्तृकरणयोस्तृतीया। अ
नभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली। प्रकृत्यादिभ्य उपसंख्यानं।
प्रकृत्या चारुः। प्रायेण याज्ञिकः। गोत्रेण गार्ग्यः। समेनैति। विषमेणैति। द्विद्रोणेन धान्यं क्रीणा
ति। पंचकेन पशून् क्रीणाति। सुखेन दुःखेन यातीत्यादि। दिवः कर्म च। दिवः साधकतमं कर्मसंज्ञं
करणसंज्ञं। अक्षैरक्षान् वा दीव्यति। सहयुक्तेऽप्रधाने। सहार्थेन युक्तेऽप्रधाने तृतीया। पुत्रे
ण सहागतः पिता। एवं साकं सार्धं समं योगेऽपि। विनापि तद्योगे तृतीया। वृद्धो यूनेति निर्देशा
त्। येनांगविकारः। येनांगेन विकृतेनांगिनो विकारो लक्ष्यते ततस्तृतीया। अक्ष्णा काणः।

न०कौ० ॥२२॥ अस्तिसंबंधि कालस्त्वविशिष्ट इत्यर्थः॥ अपवर्गे तृतीया। फलप्राप्तौ द्योत्यायां कालाध्वनोरत्यंतसंयोग
तृतीया। अह्ना क्रोशेन वानुवाकोधीतः। अपवर्गे किं। मासमधीतो नायातः। हेतौ। हेत्वर्थे तृती
या स्यात्। द्रव्यादिसाधारणं निर्व्यापारसाधारणं हेतुत्वं। करणत्वं तु क्रियामात्रव्यापारनियतं र
च। दंडेन घटः। पुण्येन दृष्टो हरिः। इत्थंभूतलक्षणे। किंचित्प्रकारं प्राप्तस्य लक्षणे तृतीया। ज
टाभिस्तापसः। जटाज्ञाप्यतापसत्वविशिष्ट इत्यर्थः। संज्ञोन्यतरस्यां कर्मणि। संपूर्वस्य
जानातेः कर्मणि तृतीया वा स्यात्। पित्रा पितरं वा संजानीते। ॥ कर्मणा यमभिप्रैति स सं
प्रदानं। दानस्य कर्मणा यमभिप्रैति स संप्रदानसंज्ञः। चतुर्थी संप्रदाने। अनुक्ते। विप्रा
य गां ददाति। उक्ते तु दानीयो विप्रः। क्रियया यमभिप्रैति सोपि संप्रदानसंज्ञः। पत्ये शेते। परि ॥२२॥
क्रयणे संप्रदानमन्यतरस्यां। नियतकालं भृत्या स्वीकारः परिक्रयः। तस्मिन्साधकतमं

कारकं संप्रदानं वा। शतेन शताय वा परिक्रीतः। तादर्थ्ये चतुर्थी वाच्या। मुक्तये हरिं भजति। उत्पातेन ज्ञा
पिते च। वाताय कपिला विद्युत्। हितयोगे च। ब्राह्मणाय हितं। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च।
एभिर्योगे चतुर्थी। हरये नमः। उपपदविभक्तेः कारकविभक्तिर्बलीयसी। नमस्करोति देवान्। प्रजाभ्यः
स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणं। तेन दैत्येभ्यो हरिरलं प्रभुः सम
र्थः शक्त इत्यादि। ध्रुवमपायेपादानं। अपायो विश्लेषस्तस्मिन्साध्ये ध्रुवमवधिभूतमपादानं॥
अपादाने पंचमी। ग्रामादायाति। धावतोश्वात्पततीत्यादि। जनिकर्तुः प्रकृतिः। जायमा
२ नस्य हेतुरपादानं स्यात्। ब्रह्मणः प्रजाः प्रजायंते। ल्यब्लोपे कर्मण्यधिकरणे च। प्रासादात्प्रे
क्षते। आसनात्प्रेक्षते। प्रासादमारुह्य आसने उपविश्य प्रेक्षते इत्यर्थः। विभाषा गुणेऽस्त्रियां॥
गुणे हेतावस्त्रीलिंगे पंचमी वा स्यात्। जाड्याज्जाड्येन वा बद्धः। गुणे किं। धनेन कुलं। अस्त्रि

म०कौ०रू० यांकिं। बुधआसुक्तः। विभाषेति योगविभागादगुणे स्त्रियां च कश्चित्। धूमादग्निमान्। नास्ति घटोऽनु
॥२३॥ पलब्धेः। पृथग्विनानानाभिस्तृतीयान्यतरस्यां। एभिर्योगे तृतीयास्यात् पंचमीद्वितीये च। पृथग्रा
मेण रामाद्रामं वा। एवं विनानाना। अपपरीवर्जने। कर्मप्रवचनीयौ स्तः। आङ्मर्यादा
वचने। उक्तसंज्ञः। वचनग्रहणादभिविधावपि। पंचम्यपाङ्परिभिः। एतैः कर्मप्रवचनीयैर्यो
गे पंचमी। अपहरेः परिहरेः संसारः। परिरत्र वर्जने। साहचर्यात्। लक्षणादौ तु हरिं परि।
व आमुक्तेः संसारः। आसकलाद्ब्रह्म। प्रतिः प्रतिनिधिप्रतिदानयोः। कर्मप्रवचनीयः। प्र
तिनिधिप्रतिदाने च यस्मात्। अत्र कर्मप्रवचनीयैर्योगे पंचमी। प्रद्युम्नः कृष्णात् प्रति। ति
लेभ्यः प्रतिमाषान्। [redacted] षष्ठीशेषे। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावा ॥२३॥
दिसंबंधः शेषस्तत्र षष्ठी। राज्ञः पुरुषः। कर्मादीनामपि संबंधमात्रविवक्षायां षष्ठ्येव। सतां गतं।

पद्धति-२

सर्पिषो जानीते। मातुः स्मरति। एधोदकस्योपस्कुरुते। भजे शंभोश्चरणयोः। फलानां तृप्तः। क
र्तृकर्मणोः कृति। कृद्योगे कर्तरि कर्मणि च षष्ठी। कृष्णस्य कृतिः। जगतः कर्ता कृष्णः। गुणकर्मणि ॥२४॥
वेष्यते। नेताश्वस्य स्रुघ्नं स्रुघ्नस्य वा। कृतिति किं। तद्धितेमाभूत्। कृतपूर्वी कटं। उभयप्राप्तौ क
र्मणि। उभयोः प्राप्तिर्यस्मिन् कृति तत्र कर्मण्येव षष्ठी। आश्चर्यो गवां दोहोऽगोपेन। कृ
त्यानां कर्त्तरि वा। षष्ठी स्यात्। मया मम वा सेव्यो हरिः। क्तस्य च वर्त्तमाने। वर्त्तमानार्थक्तस्य र्थ
योगे षष्ठी। न लोकेति वक्ष्यमाणनिषेधस्यापवादः। राज्ञां मतः। बुद्धः। पूजितो वा। अधिकर
णवाचिनश्च। क्तस्य योगे षष्ठी। इदमेषां शयितं। न लोकाव्ययनिष्ठाखलर्थतृनां। एषां
॥२४॥ प्रयोगे षष्ठी न। लादेशाः। कुर्वन्कुर्वाणः सृष्टिं हरिः। उ। हरिं दिदृक्षुः। अलंकरिष्णुर्वा। उ
२०॥१४॥ क। दैत्यान्घातुको हरिः। कमेरनिषेधः। लक्ष्म्याः कामुकः। अव्ययं। जगत्सृष्ट्वा। निष्ठा दे

म०कौ० ॥२५॥

स्यान्न हतवान्न ॥ विष्णुना हतो दैत्याः । खलर्थे । ईषत्करः प्रपंचो हरिणा । त्यजन्तीति प्रत्याहारः । शातृ
शानचाविति तृशब्दस्तृन्स्यात् नौन्निकाय तृन् । शानन् । सोमं पवमानः । चानश् । आत्मानं मं
डयमानः । शतृ । देवं मेधीयन् । तृन् । कर्त्तालोकान् । द्विषः शतुर्वा । मुरस्य मुरं वा द्विषन् ।
सर्वोयं कारकषष्ठ्याः प्रतिषेधः । शेषषष्ठी तु स्यादेव । ब्राह्मणस्य कुर्वन् । नरकस्य जि
ष्णुः । अकेनोर्भविष्यदाधमर्ण्ययोः । भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थेन श्च
योगेषष्ठी । सतः पालको वतरति । व्रजं गामी । शतं दायी । निमित्तपर्यायप्रयोगेसर्वा
सां प्रायदर्शनं । किं निमित्तं वसति । केन निमित्तेन कस्मै निमित्ताय इत्यादि । एवं किं का
रणं को हेतुः । किं प्रयोजनमित्यादि । प्रायग्रहणादसर्वनाम्नः प्रथमाद्वितीये न स्तः । ॥२५॥
ज्ञानेन निमित्तेन सेव्यो हरिः । ज्ञानाय निमित्ताय इत्यादि । षष्ठ्यतसर्थप्रत्ययेन । ग्रामस्य

एनबंतेन योगे द्वितीया स्याद् १

दक्षिणतः पुरः पुरस्तात् । एनपा द्वितीया । एनयोगे त्रियोगविभागात् षष्ठ्यपि । दक्षिणेन ग्रामं ग्राम
स्य वा । एवमुत्तरेण । दूरान्तिकार्थैः षष्ठ्यन्यतरस्यां । एतैर्योगे षष्ठीपंचमीव । दूरं निकटं ग्रामस्य
ग्रामाद्वा । दिवस्तदर्थस्य । द्यूतार्थस्य क्रयविक्रयरूपस्य व्यवहारार्थस्य वा दिवः कर्मणि षष्ठी । श
तस्य दीव्यति । तदर्थस्य किं । ब्राह्मणं दीव्यति स्तौतीत्यर्थः । विभाषोपसर्गे । शतस्य
शतं वा प्रदीव्यति । आधारोधिकरणं । कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधि
करणं । सप्तम्यधिकरणे च । चाद्दूरान्तिकार्थेभ्यः । औपश्लेषिको वैषयिकोभिव्यापकश्चेत्या
धारस्त्रिधा । कटे आस्ते । स्थाल्यां पचति । मोक्षे इच्छास्ति । सर्वस्मिन्नात्मास्ति । वनस्य दूरे अ
न्तिके वा । क्तस्येन्विषयस्य कर्मण्युपसंख्यानं । अधीती व्याकरणे । साध्वसाधुप्रयोगे च ॥
साधुः कृष्णो मातरि । असाधुर्मातुले । निमित्तात्कर्मयोगे ॥ चर्मणि द्वीपिनं हन्ति दंतयोर्हन्ति
निमित्तमिह फलं १ अधीतमनेनेति विग्रहे इष्टादिभ्यश्चेति कर्तरीनिः २

षष्ठ्यामेव प्राप्तायां पाक्षिकसप्तम्यर्थं वचनं है भंडकोन्नो- पुष्कलकोगोधमगः

म० कौक कुंजरं ॥ केशेषु चमरीं हंति । सीम्नि पुष्कलको हतः ॥ १ ॥ यस्य च भावेन भावलक्षणं । यस्य क्रियया
॥ २५ ॥ क्रियांतरं लक्ष्यते ततः सप्तमी । गोषु दुह्यमानासु गतः । षष्ठी चानादरे । अनादराधिके भावलक्ष
णे षष्ठीसप्तम्यौ स्तः । रुदति रुदतो वा प्राव्राजीत् । रुदंतं पुत्रादिकमनादृत्य संन्यस्तवानित्यर्थः ।
स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च । षष्ठीसप्तम्यौ स्तः । गवां गोषु स्वामी । आ
युक्तकुशलाभ्यां चासेवायां । आभ्यां योगे षष्ठीसप्तम्यौ स्तः । आयुक्तो व्यापारितः । आयुक्तो
हरिपूजने हरिपूजनस्य वा । आसेवायां किं । आयुक्तो गौः शकटेन । ईषद्युक्त इत्यर्थः । यतश्च
निर्धारणं । जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं यतस्ततः
षष्ठीसप्तम्यौ स्तः । नृणां नृषु वा ब्राह्मणः श्रेष्ठः । गवां गोषु कृष्णा गौर्बहुक्षीरा । गच्छतां गच्छ ॥ २५ ॥
त्सु वा धावन् शीघ्रः । छात्राणां छात्रेषु मैत्रः पटुः । पंचमी विभक्ते । विभागो विभक्तं । निर्द्धा

र्यमाणस्य यत्र भेद एव तत्र पंचमी । माथुराः पाटलिपुत्रकेभ्य आढ्यतराः । साधुनिपुणाभ्यां
अर्चायां सप्तम्यप्रतेः । मातरि साधुर्निपुणो वा । अर्चायां किं । निपुणो राज्ञो भृत्यः । इह तत्त्वकथ
नं तात्पर्यं । अप्रत्यादिभिरिति वक्तव्यं । साधुर्निपुणो मातरं प्रति पर्यनु वा । प्रसितोत्सुका
भ्यां तृतीया च । आभ्यां योगे तृतीया स्यात्सप्तमी च । प्रसित उत्सुको वा हरिणा हरौ वा ॥
अधिरीश्वरे । स्वस्वामिसंबंधे अधिः कर्मप्रवचनीयः । यस्मादधिकं यस्य चेश्वरवचनं तत्र स
प्तमी । अधि भुवि रामः । अधि रामे भूः ॥ छ ॥ ॥ इति विभक्त्यर्थाः ॥ छ ॥ समा
साः पंचधा । समसनं समासः । स च विशेषसंज्ञाविनिर्मुक्तः केवलसमासः प्रथमः । प्रायेण
पूर्वपदार्थप्रधानोऽव्ययीभावो द्वितीयः । प्रायेणोत्तरपदार्थप्रधानस्तत्पुरुषस्तृतीयः ।
तत्पुरुषभेदः कर्मधारयः । कर्मधारयभेदो द्विगुः । प्रायेणान्यपदार्थप्रधानो बहुव्रीहिश्चतुर्थः ।

सुपो धातुप्रातिपदिकयोः। एतयोरवयवस्य सुपो लुक् स्यात्॥ ३ या

म॰कौ॰कृ ॥२६

प्रायेणोभयपदार्थप्रधानो बहुव्रीहिर्द्वंद्वः पंचमः। समर्थः पदविधिः। पदसंबंधी यो विधिः स समर्थाश्रि
तो बोध्यः। प्राक्कडारात्समासः। कडाराः कर्मधारय इत्यतः प्राक् समास इत्यधिक्रियते। सह सुपा॥
सुप् सुपा सह वा समस्यते। समासत्वात्प्रातिपदिकत्वे सुपो लुक्। परार्थाभिधानं वृत्तिः। कृत्त
द्धितसमासैकशेषसनाद्यंतधातुरूपाः पंच वृत्तयः। वृत्त्यर्थावबोधकं वाक्यं विग्रहः। स च लौ
किकोऽलौकिकश्चेति द्विधा। तत्र पूर्वं भूत इति लौकिकः। पूर्व अम् भूत सु इति अलौकिकः।
[illegible] भूतपूर्वः। भूतपूर्वे चरडिति निर्देशात्पूर्वनिपातः। इवेन समासो विभक्त्यलोपश्च। वाग
र्थाविव। वागर्थाविव। इति केवलसमासः॥ ॥अव्ययीभावः॥ ॥अधिकारोयं प्राक्
तत्पुरुषात्। अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावप ॥२६॥
श्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यांतवचनेषु। विभक्त्यर्थादिषु वर्तमानम

व्ययं सुबंतेन सह नित्यं समस्यते। प्रायेणाविग्रहो नित्यसमासः। अस्वपदविग्रहो वा। वि
भक्तौ हरि ङि अधि इति स्थिते। प्रथमानिर्दिष्टं समास उपसर्जनं। समासशास्त्रे प्रथमानिर्दिष्टमुप
सर्जनं। उपसर्जनं पूर्वं। समासे उपसर्जनं प्राक् प्रयोज्यं। इत्यधेः प्राक् प्रयोगः। सुपो लुक्। एक
देशविकृतस्यानन्यत्वात्प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिः। अव्ययीभावश्चेत्यव्ययत्वात्सुपो
लुक्। अधिहरि। अव्ययीभावश्च। नपुंसकं। गाः पातीति गोपाः। तस्मिन्नित्यधिगोपं। नाव्ययीभा
वादतोऽम्त्वपंचम्याः। अदंतादव्ययीभावात्सुपो न लुक् तस्य पंचमीं विना अमादेशः। कृष्ण
स्य समीपमुपकृष्णं। तृतीयासप्तम्योर्बहुलं। अदंतादव्ययीभावात्तृतीयासप्तम्योर्बहुलम
म्भावः। उपकृष्णं। उपकृष्णेन। उपकृष्णे। बहुलग्रहणात्सुमद्रमुन्मत्तगंगमित्यादि।
सप्तम्या नित्यमम् [illegible] भावः। मद्राणां समृद्धिः सुमद्रं। यवनानां व्यृद्धिर्दुर्यवनं। मक्षि

स०कौ०
॥२७॥

काणामभावो निर्मक्षिकं। हिमस्यात्ययोऽतिहिमं। निद्रा संप्रति न युज्यते अतिनिद्रं। हरिशब्दस्य
प्रकाश इति इतिहरि। विष्णोः पश्चादनुविष्णु। योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः।
रूपस्य योग्यमनुरूपं। अर्थमर्थं प्रति प्रत्यर्थं। शक्तिमनतिक्रम्येति यथाशक्ति॥ अव्ययीभा
वे चाकाले। सहस्य सः स्यादव्ययीभावे न तु काले। हरेः सादृश्यं सहरि। काले तु सहपूर्वाह्णं॥
ज्येष्ठस्यानुपूर्व्येणेत्यनुज्येष्ठं। चक्रेण युगपत् सचक्रं। सदृशः सख्या ससखि। यथार्थत्वेनै
व सिद्धे पुनः सादृश्यग्रहणं गुणभूतेपि सादृश्ये यथा स्यादित्येवमर्थं। क्षत्राणां संपत्तिः सक्ष
त्रं। तृणमप्यपरित्यज्य सतृणं। अग्निग्रंथपर्यंतमधीते साग्नि। यथासादृश्ये। असाद
श्ये एव यथा नाद्यः समस्यते। तेन हि न। यथा हरिस्तथा हरः। यावदवधारणे। यावंतः श्लो
कास्तावंतोऽच्युतप्रणामाः यावच्छ्लोकं। सुप्प्रतिना मात्रार्थे। शाकस्य लेशः शाकप्रति। ॥२७॥

विभाषा। अपपरिबहिरंचवः पंचम्या। अपविष्णोः संसारः। अपविष्णु संसारः। परिविष्णु सं
सारः। परिविष्णोः संसारः। बहिर्वनं बहिर्वनात्। प्राग्वनं प्राग्वनात्। तिष्ठद्गुप्रभृतीनि च। ए
तानि निपात्यंते। तिष्ठंति गावो यस्मिन् काले स तिष्ठद्गु दोहनकालः। पारे मध्ये षष्ठ्या
वा। पारमध्यशब्दौ षष्ठ्यंतेन सह वा समस्यते। एदंतत्वं चानयोर्निपात्यते। पारेगंगं गंगा
पारं। मध्येगंगं। गंगामध्यं। महाविभाषया वाक्यमपि। संख्या वंश्येन। वंशो द्विधा। वि
द्यया जन्मना च। तत्र भवो वंश्यः। तद्वाचिना सह संख्या समस्यते। द्वौ मुनी वंश्यौ द्विमुनि वा
न्निव्याकरणस्य त्रिमुनिस्यं। विद्यातद्वतामभेदविवक्षायां। त्रिमुनि व्याकरणं। एकविंशति
भारद्वाजं। नदीभिश्च। नदीभिः संख्या सह वा समस्यते। समाहारे चायमिष्यते। पंचगं
गं। द्वियमुनं। अन्यपदार्थे च संज्ञायां। अन्यपदार्थे विद्यमानं सुबंतं नदीभिः सह नित्यं

समस्यते। विभाषाधिकारेऽपि वाक्येन तदर्थानवगमान्नित्यसमासः। उन्मत्तगंगं नाम देशः।
लोहितगंगं। नदीभिश्च॥ आ पंचम परिसमाप्तेरधिकारोऽयं। अव्ययीभावे शरत्प्रभृतिभ्यः।
शरदादिभ्यष्टच् स्यात् समासांतोऽव्ययीभावे। शरद्विपाशनस मनस् उपानह् हिमवच्चतुर्। दिश्
दृश् विश् चेतो नडुह् त्यत्तद्यद्दिवक्रियद्रूपः। जराया जरश्च। उपजरसं। अनश्च। अन्नं
त ताद्व्ययीभावाट्टच्स्यात् समासांतोऽव्ययीभावे। नस्तद्धिते। नांतस्य भस्य टेर्लोपः स्तद्धिते।
उपराजं। अध्यात्मं। नपुंसकादन्यतरस्यां। अन्नंतं यत्क्लीबं तदंतादव्ययीभावाट्टच्वा।
उपचर्म। उपचर्मं। झयः। झयंतादव्ययीभावाट्टच्वा। उपसमित्। उपसमिधं। नदी
पौर्णमास्याग्रहायणीभ्यः। टच्वा। उपनदं। उपनदि। गिरेश्च सेनकस्य। टच्वा। उपगि ॥२९॥
रं। उपगिरि। प्रतिपरसमनुभ्योऽक्ष्णः। टच्। प्रत्यक्षमित्यादि॥ इति अव्ययीभावः॥

अक्ष्णः परं परोक्षं। अत एव समासः। परोक्षे लिटि निपातनादेते नात्परस्यौकारः इत्यादि॥ इति
अव्ययीभावः॥ तत्पुरुषः॥ अधिकारोऽयं। प्राग्बहुव्रीहेः॥ द्विगुश्च। तत्पुरुषसंज्ञः स्यात्॥ द्विती
या श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः॥ द्वितीयांतं श्रितादिप्रकृतिकैः सुबंतैः सह वा स
मस्यंते। कष्टं श्रितः कष्टश्रितः। दुःखातीतः। गम्यादीनामुपसंख्यानं। ग्रामं गामी ग्रा
मगामी। अन्नं बुभुक्षुः। स्वयं क्तेन। द्वितीयेति न संबध्यते। अयोग्यत्वात्। स्वयंकृतस्या
पत्यं स्वायंकृतिः। तृतीया तत्कृतार्थेन गुणवचनेन। तृतीयांतं तृतीयांतार्थकृतगुण
वचनेनार्थशब्देन च सह प्राग्वत्। शंकुलया खंडः शंकुलाखंडः। धान्येनार्थो धान्या
र्थः। तत्कृतेति किं। अक्ष्णा काणः। पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः।
तृतीयांतमेतैः प्राग्वत्। मासपूर्वः। मातृसदृशः। पितृसमः। ऊनार्थः। माषोनं कार्षा

म०कौ०
॥२९॥

एं। माषविकलं। वाक्कलहः। आचारनिपुणः। गुणमिश्रः। आचारश्लक्ष्णः। अवरस्योपसंख्या
नं। मासावरः। अन्नेन व्यंजनं। संस्कारद्रव्यवाचकं स्तृतीयांतं सन्नेन प्राग्वत्। दध्ना उपसि
क्तो ओदनः दध्योदनः। भक्ष्येण मिश्रीकरणं। गुडेन मिश्रा धाना गुडधानाः। कर्तृकरणे
कृता बहुलं। कर्तरि करणे च तृतीया बहुलं प्राग्वत्। हरित्रातः। नखभिन्नः। कृद्ग्रह
णे गतिकारकपूर्वस्यापि ग्रहणं नखनिर्भिन्नः। कृतार्कि। काष्ठैः पचतितरां। चतुर्थी
तदर्थार्थबलिहितसुखरक्षितैः। चतुर्थ्यंतार्थाय यत्तद्वाचिना अर्थादिभिश्च चतुर्थ्यंतं वा
प्राग्वत्। यूपाय दारु यूपदारु। तदर्थेन प्रकृतिविकारभाव एवेष्टः। तेनेह न। रंधना
य स्थाली। अश्वघासादयस्तु षष्ठीतत्पुरुषाः। अर्थेन नित्यसमासो विशेष्यलिंगता चे ॥२९॥
ति वक्तव्यं। द्विजायायं द्विजार्थः सूपः। द्विजार्था यवागूः। द्विजार्थं पयः। भूतबलिः। गोहितं।

गोसुखं। गोरक्षितं। पंचमी भयेन। चोराद्भयं। चोरभयं। स्तोकांतिकदूरार्थकृच्छ्राणि क्तेन। पंचम्याः स्तो
कादिभ्यः। अलुगुत्तरपदे। स्तोकान्मुक्तः। अल्पान्मुक्तः। अंतिकादागतः। दूरादागतः। अभ्याशादागतः ॥ दा
कृच्छ्रादागतः। षष्ठी। कृद्योगेन प्राग्वत्। राज्ञः पुरुषो राजपुरुषः। याजकादिभिश्च। षष्ठ्यंतं समस्यते। वक्ष्यमा
णनिषेधस्यापवादः। ब्राह्मणस्य याजकः। देवपूजकः। याजक पूजक परिचारक परिवेषक स्नातक अध्या
पक उत्सादक उद्वर्तक होतृ पोतृ भर्तृ रथगणक पत्तिगणक इति याजकादिगणः। गुणात्तरेण तर
लोपश्च। तरबंतं यद्गुणवाचि तेन समासः। सर्वेषां श्वेततरः सर्वश्वेतः। सर्वेषां महत्तरः सर्वमहान्।
न निर्धारणे। षष्ठी न समस्यते। नृणां द्विजः श्रेष्ठः। पूरणगुणसुहितार्थसदव्ययतव्यसमानाधि
करणेन। पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते। सतां षष्ठः। काकस्य कार्ष्ण्यं। सुहितार्था
स्तृप्त्यर्थाः। फलानां सुहितः। सत्। द्विजस्य कुर्वन् कुर्वाणो वा। ब्राह्मणस्य कृत्वा। हर्तव्यं
×प्रतिपदविधी षष्ठी न समस्यत इति भावः। सर्पिषो ज्ञानं २ ×कृद्योग षष्ठी समस्यत इति भावः। इध्मव्रश्चनः ॥ ४

सूत्रेण २ ब्राह्मणस्य [illegible] समासः २

स०कौ०त० ॥३०॥ हवर्यात् उदयस्य मे चमस्यते तेन तदुपरीत्यादिसिद्धं कर्तृत्वं। न सकस्य सर्पस्य। क्तेन च पूजायां। मतिबु
द्धिं विहितो यः क्तस्तदंतेन षष्ठी न समस्यते। राज्ञां मतः। बुद्धः। पूजितो वा। अधिकरणवाचिना च
क्तेन षष्ठी न समस्यते। इदमेषामासितं। गतं भुक्तं वा। कर्मणि च। उभयप्राप्तौ कर्मणीति या षष्ठी
सा न समस्यते। आश्चर्यो गवां दोहोऽगोपेन। तृजकाभ्यां कर्तरि। कर्त्रर्थतृजकाभ्यां षष्ठ्या न
समासः। वज्रस्य भर्त्ता। ओदनस्य पाचकः। कर्तरि च। कर्तरि षष्ठ्या अकेन न समासः। भवतः शा
यिका। पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। अवयविना सह पूर्वादयः समस्यंते। एकत्व
विशिष्टश्चेदवयवी षष्ठीसमासापवादः। पूर्वं कायस्य पूर्वकायः। अपरकायः। एकाधिकरणे किं।
पूर्वश्छात्राणां। अर्द्धं नपुंसकं। समांशवाच्यर्द्धशब्दो नित्यं क्लीबे स प्राग्वत्। अर्द्धं पिप्पल्याः ॥३०॥
अर्द्धपिप्पली। एकविभक्तावषष्ठ्यंतवचनमित्युपसर्जनसंज्ञाऽभावान्न ह्रस्वो न। क्लीबे किं।।

x कर्त्तरि विहितं [illegible] भवतः शायिका। [illegible] भूभर्त्ता। कथं तर्हि घटानां निर्मातुस्त्रिभुवनविधातुश्च कलहः इति शेषषष्ठ्या समास [illegible] ५ x२ सर्वोप्येकदेशः कालेन समस्यते संख्याविसायेति ज्ञापकात् [illegible] x एकदेशिना [illegible] कायस्य ३

ग्रामार्द्धः। द्रव्यैक्य एव। अर्द्धं पिप्पलीनां। द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्यां। एतान्येकदेशिना स
ह प्राग्वत्। द्वितीयं भिक्षाया द्वितीयभिक्षा। एकदेशिना किं। द्वितीयं भिक्षाया भिक्षुकस्य। अन्यत
रस्यां ग्रहणसामर्थ्यात्पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः। भिक्षाद्वितीयं। प्राप्तापन्ने
च द्वितीयया। पक्षे द्वितीयासमासः। प्राप्तो जीवनं प्राप्तजीवनः। जीवनप्राप्तः। आपन्नजीवनः। जी
वनापन्नः। इह सूत्रे द्वितीयया अ इति छित्वा अकारोऽपि विधीयते। तेन जीविकां प्राप्तः प्रा
प्तजीविका। आपन्नजीविका। कालाः परिमाणिना। परिच्छेद्यवाचिना सुबंतेन कालाः समस्यं
ते। मासो जातस्य मासजातः। सप्तमी शौंडैः। सप्तम्यंतं शौंडादिभिः प्राग्वत्। अक्षेषु शौं
डो अक्षशौंडः। शौंड धूर्त कितव व्याध प्रवीण संवीत अंतर अधि पटु पंडित कुशल चपल निपु
ण नीति शौंडादिः। द्वितीया तृतीया इत्यादि योगविभागादन्यत्रापि द्वितीयादिविभक्तीनां

ल०कौमु ॥३१॥

प्रयोगवशात्समासेऽङ्गिरन्यः। दिक्संख्ये संज्ञायां। विशेषणं विशेष्येण बहुलमित्येवसिद्धे संज्ञायामे
वेति नियमार्थं सूत्रं। पूर्वेषुकामशमी। सप्तर्षयः। नेह। उत्तरा वृक्षाः। पंचब्राह्मणाः। तद्धितार्थो
त्तरपदसमाहारे च। तद्धितार्थे विषय उत्तरपदे च परतः समाहारे च वाच्ये दिक्संख्ये प्राग्वत्॥
पूर्वस्यां शालायां भवः पूर्वाशाला इति समासे जाते। सर्वनाम्नो वृत्तिमात्रे पूर्वस्य पुंवद्भावः।
दिक्पूर्वपदादसंज्ञायां ञः। अस्माद्भवाद्यर्थे ञः स्यादसंज्ञायां। तद्धितेष्वचामादेः। ञिति णिति च त
द्धितेऽचामादेरचो वृद्धिः। यस्येति च। पौर्वशालः। पूर्वा शाला प्रिया यस्येति। त्रिपदे बहु
व्रीहौ कृते प्रिया शब्दे उत्तरपदे पूर्वयोस्तत्पुरुषः। तेन शालाशब्दे आकार उदात्तः। पूर्वशालाप्रि
यः। दिक्षु समाहारो नास्ति अनभिधानात्। षण्णां मातॄणामपत्यं षाण्मातुरः। मातुरुत्संख्या ॥३१॥
संभद्रपूर्वायाः। इति वक्ष्यमाणोऽण्। पंचगावो धनं यस्येति त्रिपदे बहुव्रीहौ। द्वंद्वतत्पुरुषयो

रुत्तरपदे नित्यसमासवचनं। गोरतद्धितलुकि। गोन्तात्तत्पुरुषाट्टच्समासांतो न तु तद्धितलुकि। पंचगवधनं।
संख्यापूर्वो द्विगुः। द्विगुरेकवचनं। द्विगर्थः समाहार एकवत्। स नपुंसकं। समाहारे द्विगुर्द्वंद्वश्च नपुंसकं।
पंचानां गवां समाहारः पंचगवं। विशेषणं विशेष्येण बहुलं। भेदकं भेद्येन समानाधिकरणेन
बहुलं प्राग्वत्॥ नीलमुत्पलं नीलोत्पलं। बहुलग्रहणात्क्वचिन्नित्यं। कृष्णसर्पः। क्वचिन्न।
रामो जामदग्न्यः। अपरस्यार्द्धे पश्चभावो वक्तव्यः। अपरश्चासावर्द्धश्च पश्चार्द्धः। सन्महत्परमो
त्तमोत्कृष्टाः पूज्यमानैः। सत्समस्यंते। सद्वैद्यः। आन्महतः समानाधिकरणजातीययोः। म
हावैयाकरणः। तत्पुरुषः समानाधिकरणः कर्मधारयः। पुंवत्कर्मधारयजातीयदेशीयेषु। क
र्मधारये जातीये देशीये च परतो भाषितपुंस्कात्पर ऊङ्भावो यस्मिन्न तथाभूतं पूर्वं पुं
वत्। पुरणीप्रियादिष्वप्राप्तः पुंवद्भावोऽनेन विधीयते। महानवमी। कृष्णचतुर्दशी। महाप्रिया।

म०कोस ॥३१॥ रूढ्यभावे किं। उत्कृष्टो गौः। पंकादुद्धृत इत्यर्थः। उपमानानि सामान्यवचनैः। घन इव श्यामः घनश्या
मः। शाकपार्थिवादीनामुत्तरपदलोपश्च। शाकप्रियः पार्थिवः शाकपार्थिवः। देवब्राह्मणः। म
यूरव्यंसकादयश्च। एते निपात्यंते। मयूरो व्यंसको मयूरव्यंसकः। व्यंसको धूर्त्तः। उदक् च अवा
क् च उच्चावचं। निश्चितं च प्रचितं च निश्चप्रचं। नास्ति किंचन यस्य सोऽकिंचनः। आख्यातमाख्यातेन
क्रियासातत्ये। अश्नीत पिबत इत्येवं सततं यत्राभिधीयते साऽश्नीतपिबता। पचतभृज्जता। खा
दतमोदता। नास्ति कुतो भयं यस्य स अकुतोभयः। अन्यो राजा राजांतरं। चिदेव चिन्मात्रं। नञ्।
सुपा प्राग्वत्। नलोपो नञः। नञो नस्य लोप उत्तरपदे। अब्राह्मणः। तस्मान्नुडचि। लुप्तन
कारान्नञ उत्तरपदस्याजादेर्नुट्। अनश्वः। नैकधेत्यादौ नेतुशब्देन सह सुप्सुपेति समासः। ॥३१॥
कुगतिप्रादयः। एते समर्थेन सह समस्यंते। कुत्सितः पुरुषः कुपुरुषः। ऊर्यादिच्विडाचश्च।

ऊर्यादयश्च्व्यंता डाजंताश्च क्रियायोगे गतिसंज्ञाः स्युः। ऊरीकृत्य। उररीकृत्य। शुक्लीकृत्य। पटपटाकृत्य।
कारिकाशब्दस्योपसंख्यानं। कारिका क्रिया। कारिकाकृत्य। अनुकरणं चानितिपरं। खाट्कृत्य।
अनितिपरं किं। खाडिति कृत्वा निरष्ठीवत्। आदरानादरयोः सदसती। सत्कृत्य। असत्कृ
त्य। भूषणेऽलं। अलंकृत्य। भूषणे किं। अलं कृत्वौदनं गतः। पर्याप्तमित्यर्थः। अनुकरणमि
त्यादित्रिसूत्रीस्वभावात् कृत्वाविषया। अंतरपरिग्रहे। अंतर्हत्य। मध्ये हत्वेत्यर्थः। अपरिग्र
हे किं। अंतर्हत्वा गतः। हतं परिगृह्य गतेत्यर्थः। कणेमनसी श्रद्धाप्रतीघाते। कणेहत्य पयः
पिबति मनोहत्य। कणेशब्दः सप्तमीप्रतिरूपको निपातोऽभिलाषातिशये वर्त्तते। मनःशब्दोप्ये स्र
वं। पुरोऽव्ययं। पुरस्कृत्य। अस्तं च। अस्तमिति मांतमव्ययं गतिसंज्ञं स्यात्। अस्तंगत्य। अच्छ गत्य
र्थवदेषु। अव्ययमित्येव। अच्छगत्य। अच्छोद्य। अभिमुखं गत्वा उक्त्वेत्यर्थः। अव्ययं किं॥

म॰कौस ॥३३॥ जकमन्छं गच्छति। अदोऽनुपदेशे। अदःकृत्य। अदःकृतं। परं प्रत्युपन्नदेशे प्रत्युदाहरणं। तिरोऽन्तर्धौ। ति
रोभूय। विभाषा कृञि। तिरःकृत्य। तिरस्कृत्वा। तिरःकृत्वा। तिरस्कृत्य। उपाजेऽन्वाजे। एतौ कृ
त्रि ञि वा गतिसंज्ञौ स्तः। उपाजेकृत्य। अन्वाजेकृत्य। उपाजेकृत्वा। अन्वाजेकृत्वा। दुर्बलस्य बल
माधायेत्यर्थः। साक्षात्प्रभृतीनि च। कृञि वा गतिसंज्ञाः स्युः। च्व्यर्थ इति वक्तव्यं। साक्षात्कृत्य॥
साक्षात्कृत्वा। लवणंकृत्य। लवणं कृत्वा। मांतत्वं निपातनात्। अनत्याधान उरसिमनसी। उरसि
कृत्य। उरसि कृत्वा। अभ्युपगम्येत्यर्थः। मनसिकृत्य। मनसि कृत्वा। निश्चित्येत्यर्थः। अत्याधा
नमुपश्लेषः। तत्र न। उरसि कृत्वा पाणिं शेते। मध्ये पदे निवचने च। एते कृञि वा गतिसंज्ञा स्यु
रनत्याधाने। मध्येकृत्य। मध्ये कृत्वा। निवचनेकृत्य। निवचने कृत्वा। वाचं नियम्येत्यर्थः। नित्यं हस्ते ॥३३॥
पाणावुपयमने। कृञि। उपयमनं विवाहः। स्वीकारमात्रमित्यन्ये। हस्तेकृत्य। प्राध्वं बंधने।

प्राध्वमित्यव्ययं। प्राध्वंकृत्य। बंधनेनानुकूलं कृत्वेत्यर्थः। प्रार्थनादिना त्वनुकूलकरणे प्राध्वं कृत्वा।
जीविकोपनिषदावौपम्ये। जीविकामिव कृत्वा जीविकाकृत्य। औपम्ये किं। जीविकां कृत्वा। प्रादिग्रहण
मगत्यर्थं। सुपुरुषः। प्रादयो गताद्यर्थे प्रथमया। प्रगतः आचार्यः प्राचार्यः। अत्यादयः क्रांता
द्यर्थे द्वितीयया। अतिक्रांतो मालामिति विग्रहे। एकविभक्ति चापूर्वनिपाते। विग्रहे यन्नियतवि
ह्रस्वे भक्तिकं तदुपसर्जनं स्यात् न तु तस्य पूर्वनिपातः। गोस्त्रियोरुपसर्जनस्य। उपसर्जनं यो गोशब्दः स्त्रीप्र
त्ययांतं च तदंतस्य प्रातिपदिकस्य ह्रस्वः। अतिमालः। अवादयः क्रुष्टाद्यर्थे तृतीयया। अ
वक्रुष्टः कोकिलया अवकोकिलः। पर्यादयो ग्लानाद्यर्थे चतुर्थ्या। परिग्लानोऽध्ययनाय प
र्यध्ययनः। निरादयः क्रांताद्यर्थे पंचम्या। निष्क्रांतः कौशांब्याः निष्कौशांबिः। तत्रोपपदं स
प्तमीस्थं। उपपदमतिङ्। उपपदं सुबंतं समर्थेन नित्यं समस्यते। अतिङंतश्चायं समासः। कुंभकं
कर्मप्रवचनीयानां प्रतिषेधः॥ संपूर्ति २

स॰कौस ॥३५॥

शेतिङ इति कुंभकारः। अतिङ् किं। मा भवान्भूत्। माङि लुङिति सप्तमीनिर्देशान्माङ् उपपदं। गतिकारको
पपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः। व्याघ्री। अश्वक्रीती। कच्छपीत्यादि। अमैवाव्ययेन।
अमैव तुल्यविधानं यदुपपदं तदेवाव्ययेन समस्यते। स्वादुंकारं। नेह। कालसमयवेलासु तुमु
न्। कालः समयो वेला वा भोक्तुं। अमैवेति किं। अग्रेभोजं। अग्रेभुक्त्वा। विभाषाग्रेप्रथम
पूर्वेष्विति क्त्वाणमुलौ। अमा चान्येन च तुल्यविधानमेतत्। तृतीयाप्रभृतीन्यन्यतरस्यां।
उपदंशस्तृतीयायामिति णमुल्। तृतीया[illegible]याम्भित्यादीन्युपपदान्यमैवाव्ययेन सह वा
समस्यंते। मूलकेनोपदंशं भुंक्ते मूलकोपदंशं। क्त्वा च। तृतीयाप्रभृतीन्युपपदानि क्त्वांते
न सह वा समस्यंते। उच्चैःकृत्य। उच्चैः कृत्वा। तत्पुरुषस्यांगुलेः संख्याव्ययादेः। संख्या ॥३५॥
यो व्ययादिरंगुल्यंतात्तत्पुरुषादच् स्यात्। द्वे अंगुली प्रमाणमस्य द्व्यंगुलं। निरंगुलं। अहःसर्वैकदेश

दारु॰ निर्गतमंगुलीभ्यो॰

व्या

संख्यातपुण्याच्च रात्रेः। एभ्यो रात्रेरच् स्यात् संख्याव्ययादेः। अहर्ग्रहणं द्वंद्वार्थं। रात्राह्नाहाः पुंसि। एते पुं
स्येव। अहश्च रात्रिश्चाहोरात्रः। सर्वरात्रः। पूर्वरात्रः। संख्यातरात्रः। पुण्यरात्रः। संख्यापूर्वं रात्रं क्ली
बं। द्विरात्रं। अतिरात्रः। राजाहःसखिभ्यष्टच्। एतदंतात्तत्पुरुषाट्टच्। परमराजः। कृष्णस
खः। अह्नष्टखोरेवेति टिलोपः। उत्तमाहः। अह्नोऽह्न एतेभ्यः। सर्वादिभ्योऽहन् शब्दस्याह्नादे
शः समासांते परे। अह्नोऽदंतात्। अदंतपूर्वपदस्थान्निमित्तात्परस्याह्नो नस्य णः। सर्वाह्णः।
[illegible] न संख्यादेः समाहारे। अह्नो ह्लादेशो न। द्व्यहः। त्र्यहः। उत्तमैकाभ्यां च। उत्तमशब्दोंत्या
र्थः। पुण्यशब्दमाह। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा। पुण्याहं। सुदिनाहं। एकाहः। अ
ग्राख्यायामुरसः। टच्। अश्वानामुर इव अश्वोरसं। मुख्योश्व इत्यर्थः। ग्रामकौटाभ्यां च त
क्ष्णः। ग्रामतक्षः। कौटतक्षः। अतेः शुनः। [illegible] उपमानात्
साधारणतक्षेत्यर्थः। कुट्यां भवः कौटः स्वतंत्रः स्वगृहे तक्षा॰

२अप्राणिषु किं। वानरः श्वेव वानरश्वा। ३अकर्मगार्हवी ब्रह्मचः। गतुपमानात्। ४तस्य सख्यं। २
नेश ह्वाता द्विगोस्तु स्यात् नतु अद्विते लुकि। २

मक्कोस ...श्वः। अतिश्वो वराहः। उपमानादप्राणिषु। अप्राणिविषयकोपमानवाचिनः श्वुन
॥३५॥ श्च। आकर्षश्वेवाकर्षश्वः। ...मृगसक्थं। पूर्वसक्थं। फलकमिव सक्थि फलकसक्थं। नावो
द्विगोः। द्विनावं। त्रिनावं। अर्द्धाच्च। अर्द्धनावं। खार्याः प्राचां। द्विगोरर्द्धाच्च खार्या टज्वा। द्विखा
रं। द्विखारि। अर्द्धखारं। अर्द्धखारि। द्वित्रिभ्यामंजलेः। द्व्यंजलं। द्व्यंजलि। ब्रह्मणो जान
पदाख्यायां। ब्रह्मांतात्तत्पुरुषाट्टच्। सुराष्ट्रे ब्रह्मा सुराष्ट्रब्रह्मः। कुमहद्भ्यामन्यत
रस्यां। कुब्रह्मः। कुब्रह्मा। महाब्रह्मा। महाब्रह्मः। आन्महते इत्यात्वम्। महाराजः।
प्रकारवचने जातीयर्। महाप्रकारो महाजातीयः। द्व्यष्टनः संख्यायामबहुव्रीह्यशी
त्योः। आत्स्यात्। द्वादश। अष्टादश। अबहुव्रीह्यशीत्योः किं। द्वित्राः। द्व्यशीतिः। प्रा ॥३५॥
क्शतादित्येव। नेह। द्विशतं। त्रेस्त्रयः। त्रिशब्दस्य त्रयस् आदेशः स्यात् पूर्वविषये। त्रयोदश। त्र

द्वैअष्टशत। द्व्यधिका दश इति। २ समासेन लाभ पद मा ख्या यते वेत्। ५ सा०

द्वाचत्वारिंशत् २

योविंशतिः। विभाषा चत्वारिंशत्प्रभृतौ सर्वेषां। द्व्यष्टनोः स्त्रेश्च प्राग्युक्तं वा स्यात् चत्वारिंशदादौ परे। द्वि
चत्वारिंशत् द्विचत्वारिंशत्। अष्टाचत्वारिंशत्। अष्टचत्वारिंशत्। त्रिचत्वारिंशत्।
त्रयश्चत्वारिंशत्। एवं पंचाशत् षष्टिसप्ततिनवतिषु। परवल्लिंगं द्वंद्वतत्पुरुषयोः। कुक्कुट
मयूर्याविमे। मयूरीकुक्कुटाविमौ। अर्द्धपिप्पली। द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु न।
पंचकपालः पुरोडाशः। प्राप्तो जीविकां प्राप्तजीविकः। अलंकुमार्यै। अलंकुमारिः। अत
एव ज्ञापकात्समासः। निष्कौशांबिः। पूर्ववदश्ववडवौ। द्विलमतंत्रं। अश्ववडवौ। अश्ववड
वान्। अपथं नपुंसकं। तत्पुरुष इत्येव। अन्यत्र अपथो देशः। कृतसमासांतग्रहणादे
है। अपंथाः। अकारांतोत्तरपदो द्विगुः स्त्रियामिष्टः। पंचपूली। आबंतो वा। पंचखट्वं।
पंचखट्वी। पात्राद्यंतस्य न। पंचपात्रं। त्रिभुवनं। चतुर्युगं। छाया बाहुल्ये। छायांतस्तत्पुरुषो

म०कौस ॥३६॥

नपुंसकं। पूर्ववत् पदार्थबाहुल्ये। वृक्षाणां छाया इक्षुच्छायं। सभाराजामनुष्यपूर्वा। राजपर्यायपूर्वा
अमनुष्यपूर्वश्च सभांतस्तत्पुरुषो नपुंसकं स्यात्। इनसभं। ईश्वरसभं। अमनुष्यशब्दो रूढ्या
रक्षःपिशाचादीनाह। रक्षःसभं। पिशाचसभं। विभाषा सेनासुराच्छायाशालानिशा-
नां। एतदंतस्तत्पुरुषः क्लीबं वा स्यात्। ब्राह्मणसेनं। ब्राह्मणसेनेत्यादि। अशालाच। सं-
घातार्था या सभा तदंतस्तत्पुरुषः क्लीबं स्यात्। स्त्रीसभं। संघात इत्यर्थः। अशालाकिं।
धर्मसभं। धर्मशाला इत्यर्थः। अर्द्धर्चाः पुंसि च। अर्द्धर्चादयः पुंसि क्लीबे च स्युः। अ-
र्द्धर्चं। अर्द्धर्चः। एवं ध्वजतीर्थशरीरमंडपयूपदेहांकुशकलशसूत्रपात्रादयः। सेना-
न्ये नपुंसकं। मृदुपचति। प्रातःकमनीयं॥ ७॥ इति तत्पुरुषः॥ ॥७॥ शेषो ब- ॥३८॥
हुव्रीहिः। अधिकारोयं प्राग्द्वंद्वात्। अनेकमन्यपदार्थे। अनेकं प्रथमांतमन्यपदा-

र्थे वर्त्तमानं वा समस्यते स बहुव्रीहिः। सप्तमीविशेषणे बहुव्रीहौ। सप्तम्यंतं विशेषणं च बहुव्रीहौ पूर्वं स्या-
त्। हलदंतात्सप्तम्याः संज्ञायां। हलंतादंताच्च सप्तम्या अलुक्। कंठेकालः। अत एव ज्ञापकाद्व्य-
धिकरणपदो बहुव्रीहिः। प्राप्तमुदकं यं प्राप्तोदको ग्रामः। ऊढरथोऽनड्वान्। उपहृतपशू रुद्रः। उ-
द्धृतौदना स्थाली। पीतांबरो हरिः। वीरपुरुषको ग्रामः। प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलो-
पः। प्रपतितपर्णः प्रपर्णः। नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः। अविद्यमानपुत्रोऽपुत्रः। स्त्रियाः पुंव-
द्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु। उक्तपुंस्कादनूङ् ऊङो भावो
यत्र तथाभूतस्य स्त्रीवाचकशब्दस्य पुंवाचकस्येव रूपं स्यात्समानाधिकरणे न तु पूरण्यां प्रिया-
दौ च। गावश्चित्रा यस्य सः। चित्रगुः। रूपवद्भार्यः। अनूङः किं। वामोरूभार्यः। पूरण्यां तु। अपूरणीप्रियादिषु
प्रमाण्योः। पूरणार्थप्रत्ययांतं यत्स्त्रीलिंगं तदंतात्प्रमाण्यंताच्च बहुव्रीहेरप्। कल्याणी

म॰कौस ॥३७॥ पंचमीयासांरात्रीणांताःकल्याणीपंचमारात्रयः। स्त्रीप्रमाणीयस्यसःस्त्रीप्रमाणः। पुंवद्भावनिषेधोऽप्र
स्ययंपुंवद्धप्रधानपूरण्यामेव। रात्रिःपूरणीवाच्याचेत्युक्तोदाहरणेऽतिप्राप्तौ। नकपि। ह्रस्वः। रमणीप्रि पुरव्या
यत्रौ। नद्यृतश्च। नद्युत्तरपदादृदंतोत्तरपदाच्चबहुव्रीहेःकप्। पुंवद्भावः। केऽणःह्रस्वः। कल्याणपं
चमीकःपक्षः। अत्रतिरोहितावयवभेदस्यपक्षस्यान्यपदार्थतयारात्रिरप्रधानं। बहुकर्तृकः। अप्रि
यादिषुकिं। कल्याणीप्रियः। प्रियामनोज्ञाकल्याणीसुभगादुर्भगाभक्तिः। सचिवास्वसाकांताक्षांता।
समाचपलादुहितावामाबलातनया। सामान्येनपुंसकं। दृढंभक्तिर्यस्यदृढभक्तिः। स्त्रीत्वविवक्षा
यांतुदृढाभक्तिः। तसिलादिष्वाकृत्वसुचः। त्रतसौ। तरप्तमपौ। चरड्जातीयरौ। रूपकल्प
द्देशीयरौ। शपौ। [illegible] थाल्तिल्थ्यनौ। एषुपरेषुस्त्रियाःपुंवत्। बह्वीषुबहुत्र। बहुतः। इत्यादि।
त्वतलोर्गुणवचनस्य। शुक्लत्वं। शुक्लता। भस्याढेतद्धिते। हस्तिनीनांसमूहोहास्तिकं। अढेकिं। ॥३७॥

रूपप्या २ शुक्लायाःभावः ० परिगणनंकर्तव्यं। अव्याप्त्यतिव्याप्तिपरिहाराय २

मायूरीमते। मायूरीमानिनी ६ स्वभिन्नांकांचि २

रौहिणेयः। कुक्कुट्यादीनामंडादिषु। कुक्कुटांडं। मृगपदं। मृगक्षीरं। काकशावः। क्यङ्मानिनोश्च। पुंवत्। ए
नीवाचरतिएतायते। श्येनीवाचरतिश्येनायते। दर्शनीयांमन्यतेदर्शनीयमानीमिमी। नकोपधा
यास्त्रियाःपुंवत्। पाचिकाभार्यः। रसिकाभार्यः। मद्रिकायते। मद्रिकामानिनी। कोपधप्रतिषेधेतद्धि
तवुग्रहणंचेद। पाकभार्यः। संज्ञापूरण्योश्च। नपुंवत्। दत्ताभार्यः। पंचमीभार्यः। वृद्धिनिमित्तस्य
चतद्धितस्यारक्तविकारे। वृद्धिशब्देनविहितायावृद्धिस्तद्धेतुर्यस्तद्धितोरक्तेविकारार्थस्तदं
तास्त्रीनपुंवत्। स्रौघ्नीभार्यः। रक्तेतुकाषायकंथः। विकारेतुहैमीमुद्रिकायस्यहैममुद्रिकः।
स्वांगाच्चेतः। स्वांगाद्यईकारस्तदंतास्त्रीनपुंवत्। सुकेशीभार्यः। स्वांगात्किं। पटुभार्यः। इतःकिं।
अकेशाभार्यः। अमानिनीतिवक्तव्यं। सुकेशमानिनी। जातेश्च। नपुंवत्। शूद्राभार्यः। संख्ये
याव्ययासन्नादूराधिकसंख्याःसंख्येये। संख्येयार्थसंख्ययाव्ययादयःसमस्यंतेसबहु
व्रीहिः। बहुव्रीहौसंख्येयेडजबहुगणात्। संख्येयेयोबहुव्रीहिस्तस्माड्समासांतः। [illegible]

नामग्रहणाद्यौगिकानां न। ऐन्द्र्याश्च कौबेर्याश्चान्तराले ४   प्र अम्बरवितरोच: ~

मल्कौस ॥३८॥ दशानांसमीपेयेसंतितेउपदशाः। अबहुगणात्किं। उपबहवः। उपगणाः। तिविंशतेर्डिति। विंशतेर्भस्य ति
शब्दस्य लोपो डिति परे। आसन्नविंशाः। अदूरत्रिंशाः। अधिकचत्वारिंशाः। द्वौ वा त्रयो वा द्वित्राः। दिङ्ना
मान्यन्तराले। दिशो नामान्यन्तराले वाच्ये प्राग्वत्। दक्षिणस्याः पूर्वस्याश्च दिशोऽन्तरालं दक्षि
णपूर्वा। तत्रतेनेदमिति सरूपे। सप्तम्यन्ते ग्रहणविषये सरूपे पदे तृतीयान्ते च प्रहरणविषये इदं युद्ध
मित्यर्थे समस्येते कर्मव्यतिहारे। अन्येषामपि दृश्यते। इति कर्मव्यतिहारे बहुव्रीहौ पूर्वपदस्य
दीर्घः। केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तं केशाकेशि। दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तं दं
डादंडि। मुष्टीमुष्टि। तेन सहेति तुल्ययोगे। तुल्ययोगे वर्तमानं सहेत्येतत् तृतीयान्तेन प्राग्व
त्। वोपसर्जनस्य। बहुव्रीहिरवयवस्य सहस्य सो वा। पुत्रेण सह सपुत्रः। सहपुत्रो वा आगतः।
प्रकृत्याशिषि। सहशब्दः। स्वस्ति राज्ञे सहपुत्राय सहामात्याय। अगोवत्सहलेष्विति वक्तव्यं। ॥३८॥
सगवे सवत्साय सहलाय। बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच्। स्वाङ्गवाचि सक्थ्यक्ष्यन्ताद्ब

अत्ययेनषष्ठी ~

हुव्रीहेः षच्। दीर्घसक्थः। जलजाक्षी। स्वाङ्गात्किं। दीर्घसक्थि शकटं। स्थूलाक्षा वेणुयष्टिः। अक्ष्णोऽदर्श
नादिति वक्ष्यमाणोऽच्। द्वित्रिभ्यां ष मूर्ध्नः। द्विमूर्धः। त्रिमूर्धः। अन्तर्बहिर्भ्यां च लोम्नः। अप्। अन्तर्लोमः। ब
हिर्लोमः। पादस्य लोपोऽहस्त्यादिभ्यः। हस्त्यादिवर्जितादुपमानात् परस्य पादस्य लोपः। व्याघ्रस्ये
व पादावस्य व्याघ्रपात्। अहस्त्यादिभ्यः किं। हस्तिपादः। कुसूलपादः। संख्यासुपूर्वस्य। पादस्य
लोपः। द्विपात्। सुपात्। उद्विभ्यां काकुदस्य। उत्काकुत्। विकाकुत्। पूर्णाद्विभाषा। पू
र्णकाकुत्। पूर्णकाकुदः। सुहृद्दुर्हृदौ मित्रामित्रयोः। सुहृन्मित्रं। दुर्हृदमित्रं। नेतुर्नक्षत्रे
अब्वक्तव्यः। मृगो नेता यासां रात्रीणां ता मृगनेत्रा रात्रयः। अञ्नासिकायाः संज्ञायां नसं चास्थू पुष्यनेत्राः
लात्। नासिकान्तात् बहुव्रीहेरच् नासिशब्दश्च संनिधानं प्राप्नोति। पूर्वपदात्संज्ञायामगः। पूर्वप
दस्थान्निमित्तात्परस्य नस्य णः संज्ञायां न तु गकारव्यवधाने। द्रुरिव नासिका यस्य द्रुणसः॥

सुहृद्भ्यां हृदयस्य हृद्भावो निपात्यते ४

प्रादेर्यो नासिकाशब्दस्तदंताद्बहुव्रीहेर्नासिकाया नसादेशः

म॰ कौस ॥३९॥

खुरखराभ्यां वा नस्। खुरणाः। खरणाः। पक्षेऽपीष्यते। खुरणसः। खरणसः। उपसर्गाच्च। उन्नसः। वि
ग्रो वक्तव्यः। विगता नासिका यस्य विग्रः। ख्यश्च। विख्यः। नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां।
अहलः। अहलिः। असक्थः। असक्थिः। एवं दुःसुभ्यां शक्त्योरिति पाठांतरं। अशक्तः। अ
शक्तिः। नित्यमसिच् प्रजामेधयोः। नञ्दुःसुभ्य एव। अप्रजाः। दुःप्रजाः। सुप्रजाः। अमेधाः। दु
र्मेधाः। सुमेधाः। धर्मादनिच् केवलात्। केवलपूर्वपदाद्यो धर्मशब्दस्तदंताद्बहुव्रीहेरनिच्। क
ल्याणधर्मा। केवलात् किं। परमः स्वो धर्मो यस्येति त्रिपदे बहुव्रीहौ मा भूत्। इच् कर्मव्यतिहारे। केशाकेशि।
मुसलामुसलि। संप्रोभ्यां जानुनोर्ज्ञुः। प्रज्ञुः। संज्ञुः। ऊर्ध्वाद्विभाषा। ऊर्ध्वज्ञुः। ऊर्ध्वजानुः। धनुष
श्च। धनुरंतस्य बहुव्रीहेरनङादेशः। शार्ङ्गधन्वा। वा संज्ञायां। शतधन्वा। शतधनुः। जायाया ॥३९॥
निङ्। जायांतस्य बहुव्रीहेर्निङादेशः। लोपो व्योर्वलि। युवतिर्जाया यस्य युवजानिः। गंधस्येदुत्पु

गंधस्येत्वे तदेकांतग्रहणं। एकांतमेकदेश इव अविभागेन लक्ष्यमाण इत्यर्थः। सुगंधिः पुष्पं। सलिलं च। सुगंधिर्वायुः
सुगंधिः

तिसुसुरभिभ्यः। उद्गंधिः। पूतिगंधिः। सुरभिगंधिः। उपमानाच्च। पद्मस्येव गंधो यस्य पद्मगंधिः। वयसि
दंतस्य दतृ। संख्यासुपूर्वस्येति वृद्धिदन्। चतुर्दन्। सुदन्। अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च। वा स्यात्। कुड्
मलाग्रदंतः। कुड्मलाग्रदन्। उरःप्रभृतिभ्यः कप्। व्यूढोरस्कः। प्रियसर्पिष्कः। अर्थान्नञः। अ
नर्थकः। नञः किं। अपार्थं। इनः स्त्रियां। इन्नंताद्बहुव्रीहेः कप्। बहुदंतिका नगरी। अनिनस्मि
न्ग्रहणान्यर्थवता चानर्थकेन च तदंतविधिं प्रयोजयंतीति वचनात्। बहुवाग्मिका नगरी। शेषा
द्विभाषा। अनुक्तसमासांताद्बहुव्रीहेः कप् वा। बहुमालाकः। बहुमालो वा। महायशाः। महाय
शस्कः। अनुक्तेत्यादि किं। व्याघ्रपात्। आपोऽन्यतरस्यां। कपि ह्रस्वः। बहुमालकः। न संज्ञायां।
शेषादिति प्राप्तः कप् न। विश्वेदेवा अस्य विश्वदेवः। ईयसश्च। ईयसोत्तरपदान्न कप्। बहवः श्रे
यांसो यस्य बहुश्रेयान्। गोस्त्रियोरिति ह्रस्वे प्राप्ते। ईयसो बहुव्रीहेर्नेति वाच्यं। बहुश्रेयस्यो यस्य

उपसंख्यानं २

मक्रोस सबहुश्रेयसी। बहुव्रीहेः किं। अतिश्रेयसिः। वंदितेभ्रातुः प्रजार्थ भ्रात्रंतान्नकप्। प्रशस्तोभ्राता यस्यप्र
॥५०॥ शस्तभ्राता। वंदितेकिं मूर्खभ्रातृकः। सर्वनामसंख्ययोर्बहुव्रीहौ। पूर्वनिपातः। सर्वश्वेतः। त्रिशुक्लः।
संख्यायाअल्पीयस्याः। द्वित्राः। द्वंद्वेव। द्वादशौवाप्रियस्य। प्रियगुडः। गुडप्रियः। गड्वादेः परसप्तमी। गडुकंठः। कविन्न। वेहेगडुः। निष्ठा। निष्ठांतंबहुव्रीहौपूर्वं। कृतकृत्यः। जातिकाल सुखादिभ्यः परानिष्ठावाच्या। सारंगजग्धी। मासजाता। वाहिताग्न्यादिषु। आहिताग्निः। अग्न्याहितः। आकृतिगणोयं॥ ॥इति बहुव्रीहिः॥ ॥चार्थे द्वंद्वः। अनेकंसुबंतं चार्थेवर्तमानंवासमस्यतेसद्वंद्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थः। तत्रे श्वरंगुरुंच भजस्वेति परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वयः समुच्चयः। भिक्षामट गांचान ॥५०॥
येति। अन्यतरस्यानुषंगिकत्वेनान्वाचयः। धवखदिरौछिंधीति मिलितानामन्वयइतरे इ

स्येक २

पि

तरयोगः। संज्ञापरिभाषमितिसमूहः समाहारः। अनयोरसमर्थ्यात्समासोन। राजदंतादि षुपरं। एषुपूर्वप्रयोगार्हंपरंस्यात्। दंतानांराजाइतिराजदंतः। धर्मादिष्वनियमः। अर्थधर्मौ। धर्मार्थौ॥
दंपती। जंपती। जायापती। जायायाजंभावोदंभावश्चनिपात्यते। आकृतिगणोयं। द्वंद्वेघि। पू
र्वं। अ हरिहरौ। अजाद्यदंतं। ईशकृष्णौ। अल्पान्तरं। शिवकेशवौ। ऋतुभानांसमाक्षराणां शवौ ४॥
मानुपूर्व्येण। हेमंतशिशिरवसंताः। कृत्तिकारोहिण्यौ। समाक्षराणांकिं। ग्रीष्मवसंतौ।
लघ्वक्षरंपूर्वं। कुशकाशं। अभ्यर्हितंच। तापसपर्वतौ। वर्णानामानुपूर्व्येण। ब्राह्मणक्षत्रिय
विट्शूद्राः। भ्रातुर्ज्यायसः। युधिष्ठिरार्जुनौ। द्वंद्वश्चप्राणितूर्यसेनांगानां। एषांद्वंद्वएकवत्।
पाणिपादं। मार्दंगिकपाणविकं। रथिकाश्वारोहं। अध्ययनतोविप्रकृष्टाख्यानां। अध्य
यनेनप्रत्यासत्त्याआख्यायेषांद्वंद्वएकवत्। पदकक्रमकं। जातिरप्राणिनां। प्राणिवर्जजा

उध्यश्च इरावती च उध्येरावती। गंगा शोणं। कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रं। क्षुद्रजंतवः। एषां द्वंद्व एकवत्।

म०कौमु

॥४१॥ तिवाविनां द्वंद्व एकवत्। धानाशष्कुलि। प्राणिनां तु विट्शूद्राः। विशिष्टलिंगो नदी देशो ग्रामाः। ग्रा
मवर्जनदीदेशवाचिनां भिन्नलिंगानां द्वंद्व एकवत्। यूकालिक्षं। आनकुलात् क्षुद्रजंतवः। येषां
विरोधः शाश्वतिकः। प्राग्वत्। अहिनकुलं। गोव्याघ्रं। काकोलूकमित्यादौ परत्वाद्विभाषा
क्षितिप्राप्तं वकारेण बाध्यते। शूद्राणामनिरवसितानां। अबहिष्कृतानां शूद्राणां द्वंद्व एकव
त्। तक्षायस्कारं। पात्राद्बहिष्कृतानां तु चंडालमृतपाः। गवाश्वप्रभृतीनि च। यथोच्चारिता
निसाधूनि। दासीदासं। इत्यादि। गवाश्वं। विभाषा वृक्षमृगतृणधान्यव्यंजनपशुशकु
न्यश्ववडवपूर्वापराधरोत्तराणां। वृक्षादीनां सप्तानां द्वंद्व अश्ववडवेति द्वंद्वत्रयं च प्राग्वत्।
वृक्षादौ विशेषाणामेव ग्रहणं। प्लक्षन्यग्रोधं। प्लक्षन्यग्रोधाः। रुरुपृषतं। रुरुपृषताः। कु ॥४१॥
शकाशं। कुशकाशाः। व्रीहियवं। व्रीहियवाः। दधिघृतं। दधिघृते। गोमहिषं। गोमहिषाः। शुक

बकं। शुकबकाः। अश्ववडवं। अश्ववडवौ। पूर्वापरं। पूर्वापरे। अधरोत्तरं। अधरोत्तरे। फलसे ॥४३॥
नावनस्पतिमृगशकुनिक्षुद्रजंतुधान्यतृणानां बहुप्रकृतिरेव द्वंद्व एकवदिति वाच्यं। बद
राणि चामलकानि च बदरामलकं। नेह। बदरामलके। रथिकाश्वारोहावित्यादि। दधिप
य आदीनि। एकवचनपुं॰। दधिपयसी। इध्माबर्हिषी। निपातनाद्दीर्घः। ऋक्सामे वाङ्मन
से। आनङ् ऋतो द्वंद्वे। विद्यायोनिसंबंधवाचिनां ऋदन्तानां द्वंद्वे आनङ् उत्तरपदे। होतापोतारौ।
होतृपोतृनेष्टोद्गातारः। मातापितरौ। पुत्रेऽन्यतरस्यां। पितापुत्रौ। देवताद्वंद्वे च। इहोत्तरपदे
आनङ्। मित्रावरुणौ। वायोः प्रयोगे प्रतिषेधः। अग्निवायू। वाय्वग्नी। ईदग्नेः सोमवरु
॥४१॥ णयोः। देवताद्वंद्वे इत्येव। अग्नेः स्तुत्स्तोमसोमाः। अग्नेः परेषामेषां सस्य षः समासे। अग्नि
॥०४१॥ ष्टुत्। अग्निष्टोमः। अग्नीषोमौ। अग्नीवरुणौ। इद्वृद्धौ। वृद्धिमत्युत्तरपदे अग्नेरिदादेशो

म॰कौस
॥४२॥

देवताद्वंद्वे। अग्नीमरुतौ देवते अस्य आग्निमारुतं कर्म। अग्नीवरुणौ देवते अस्य आग्निवा
रुणं कर्म। देवताद्वंद्वेषु च। वृद्धिः। विष्णोने। आग्नावैष्णवं। दिवोद्यावा। देवताद्वंद्वे उत्त
रपदे द्यावाभूमी। मातरपितरावुदीचां। उदीचां किं। मातापितरौ। द्वंद्वाच्चुदषहांतात्स
माहारे। चवर्गांताद्दषहांताच्च द्वंद्वाट्टच् समाहारे। वाक्त्वचं। त्वक्स्रजं। शमीदृषदं।
वाक्त्विषं। छत्रोपानहं। समाहारे किं। प्रावृट्शरदौ॥ ॥इतिद्वंद्वः॥ ॥अथैकशेषः॥
॥ ॥विरूपा[illegible]णामपि समर्थानां। वक्रदंडश्च कुटिलदंडश्च वक्रदंडौ। कुटिलदं
डौ। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः। यूना सहोक्तौ गोत्रं शिष्यते गोत्रप्रत्ययमात्र
कृतं चेत्तयोः कृत्स्नं वैरूप्यं स्यात्। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वृद्धः किं। गर्गगार्ग्या
यणौ। यूना किं। गर्गगार्ग्यौ। कृत्स्नं किं। गार्ग्यवात्स्यायनौ। स्त्री पुंवच्च। यूना सहोक्तौ ॥४२॥

वृद्धा स्त्री शिष्यते तदर्थश्च पुंवत्। गार्गी च गार्ग्यायणश्च गार्ग्यौ। पुमान्स्त्रिया। सहोक्तौ शिष्यते तल्
लक्षणश्चेत्। हंसश्च हंसी च हंसौ। भ्रातृपुत्रौ स्वसृदुहितृभ्यां। भ्राता च स्वसा च भ्रातरौ। पु
त्रश्च दुहिता च पुत्रौ। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यां। अक्लीबेन सहोक्तौ क्लीबं शि
ष्यते तच्च वा एकवत्तल्लक्षण एव विशेषश्चेत्। शुक्लः पटः। शुक्ला पटी। शुक्लं वस्त्रं। तदिदं शुक्लं॥
तानीमानि शुक्लानि। पिता मात्रा। मात्रा सहोक्तौ पिता वा शिष्यते। माता च पिता च पितरौ। श्व
शुरः श्वश्र्वा। सहोक्तौ वा शिष्यते। श्वशुरश्च श्वश्रूश्च श्वशुरौ। त्यदादीनि सर्वैर्नित्यं। स
र्वैः सहोक्तौ त्यदादीनि शिष्यंते। स च देवदत्तश्च तौ। त्यदादीनां मिथः सहोक्तौ यत्परं तच्छि
ष्यते। स च यश्च यौ। पूर्वशेषोपि दृश्यत इति भाष्यं। स च यश्च तौ। त्यदादितः शेषे पुंनपुं
सकतो लिंगवचनानि। सा च देवदत्तश्च तौ। तच्च देवदत्तश्च यज्ञदत्तश्च तानि। ग्राम्यपशुसंघे

भ्रातरौ पुत्रौ। एषु सहविवक्षायां स्त्री शिष्यते॥ गाव इमाः। ग्राम्येषु किं। रुरव इमे। पशुग्रहणं किं। ब्राह्म
णाः। संघेष्वेतेषु किं। एतौ गावौ। अतरुणेषु किं। वत्सा इमे। अनेकशफेष्विति वाच्यं। अश्वा इमे॥
॥ ॥ इत्येकशेषः॥ ॥ ऋक्पूरब्धूःपथामानक्षे। ऋगाद्यंतस्य समासस्य अप्रत्ययोंताव
यवोऽक्षेया धूस्तदंतस्य न। अर्द्धर्चः। अनृच बह्वृचौ वध्येतर्येवेति। अनृक्साम। बह्वृ
र्कं। विष्णुपुरं। विमलापं सरः। द्व्यंतरुपसर्गेभ्योप ईत्। द्वीपं। अंतरीपं। समीपं। अवर्णांता
द्वा। प्रेपं। प्रापं। ऊदनोर्देशे। अनूपो देशः। राजधुरा। अक्षेतु। अक्षधूः। दृढधूः। अक्षः। सखि
पथः। रम्यपथो देशः। अच्प्रत्यन्ववपूर्वात्सामलोम्नः। प्रतिसामं। प्रतिलोमं। अवलोमं।
कृष्णोदक्पांडुसंख्यापूर्वाया भूमेरजिष्यते। कृष्णभूमः। उदक्भूमः। पांडुभूमः। द्विभूमः। त्रि
भूमः। प्रासादः। संख्याया नदीगोदावरीभ्यां च। पंचनदं। सप्तगोदावरं। अजितियोगविभा ॥४३॥

गादन्यत्रापि। पद्मनाभः। अक्ष्णोऽदर्शनात्। अचक्षुःपर्यायादक्ष्णोऽच् स्यात्। गवामक्षीव गवाक्षः। अच
तुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिं
दिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठ
श्वाः। अजंताः पंचविंशतिर्निपात्यंते। त्र्युपाभ्यां चतुरोऽजिष्यते। त्रिचतुराः। चतुर्णां समीपे उपचतुराः।
ब्रह्महस्तिभ्यां वर्चसः। ब्रह्मवर्चसं। हस्तिवर्चसं। पल्यराजभ्यां वेति वक्तव्यं। पल्यवर्चसं। अव
समंधेभ्यस्तमसः। अवतमसं। संतमसं॥ अन्ववतप्ताद्रहसः। अनुरहसं। अवरहसं। तप्तरहसं।
प्रतेरुरसः सप्तमीस्थात्॥ उरसि प्रत्युरसं। अनुगवमायामे। एतन्निपात्यते दीर्घत्वे। अनुगवं
यानं। यस्य चायाम इति समासः। उपसर्गादध्वनः। प्रगतोऽध्वानं प्राध्वो रथः। न पूजनात्। पूज
नार्थात्परेभ्यः समासांता न स्युः। सुराजा। अतिराजा। स्वतिभ्यामेव। नेह। परमराजः। किमः

स०कौस क्षेपे। कुत्सितो राजा किंराजा। किंसखा। किंगौः॥ नञस्तत्पुरुषात्। अराजा। तत्पुरुषात्किं। अधुरं श
॥४४॥ कटं। पथो विभाषा। अपथं। अपंथाः। तत्पुरुषादित्येव। अपथो देशः॥ ॥ इति समासांताः॥ ॥
॥श्रीः॥ अलुगुत्तरपदे। इत्यधिकृत्य। ओजःसहोंभस्तमसस्तृतीयायाः। ओजसाकृतमित्यादि। अं
जसा उपसंख्यानं। अंजसाकृतं। आत्मनश्च। तृतीयाया अलुक्। पूरण इति वक्तव्यं। पूरणप्रत्य
यांते उत्तरपदे इत्यर्थः। आत्मनापंचमः। वैयाकरणाख्यायां चतुर्थ्याः। आत्मन इत्येव। आत्म
नेपदं। आत्मनेभाषाः। परस्य। परस्मैपदं। परस्मैभाषाः। हलदंतात्सप्तम्याः संज्ञायां। त्वचिसारः। ग
वियुधिभ्यांस्थिरः। सस्यषः। गविष्ठिरः। युधिष्ठिरः। अरण्येतिलकाः। संज्ञायामिति समासस्य। हृ
द्युभ्यां च। हृदिस्पृक्। मध्याद्गुरौ। मध्येगुरुः। अंताच्च। अंतेगुरुः। अमूर्धमस्तकात्स्वांगादका ॥४४॥
मे। कंठेकालः। उरसिरोमा। अमूर्धमस्तकात्किं। मूर्धशिखः। मस्तकशिखः। अकामेकिं। मुखकामः।

मंथौदनसक्तुबिंदुवज्रभारहारवीवधगाहेषु च। उदमंथः। उदकमंथः॥ इकोह्रस्वोऽङ्यो गालवस्य॥
इगंतस्या ङ्यंतस्य ह्रस्वो वा उत्तरपदे। ग्रामणिपुत्रः। ग्रामणीपुत्रः। इकः किं। रमापतिः। अङ्यः किं
गौरीपतिः। ष्यङः संप्रसारणं पुत्रपत्योस्तत्पुरुषे। ष्यङंतस्य पूर्वपदस्य संप्रसारणं पुत्रपत्योः
परतः। संप्रसारणस्य। दीर्घः स्यादुत्तरपदे। कौमुदगंध्यायाः पुत्रः कौमुदगंधीपुत्रः। कौमुदगं
धीपतिः। इष्टकेषीकामालानां चिततूलभारिषु। इष्टकादीनां तदंतानां च चितादिषु ह्र
स्वः। इष्टकचितं। पक्वेष्टकचितं। इषीकतूलं। मुंजेषीकतूलं। मालभारी। ज्योतिर्ज
नपदरात्रि। यादौ प्रत्यये विवक्षिते समानस्य सः। सतीर्थ्यः। किं गुरुकः। समानतीर्थे वा
सी। तिय यत्प्रत्ययः। विभाषोदरे। सोदर्यः। समानोदर्यः। दृग्दृशवतुषु। समानस्य सः।
सदृक्। सदृशः। दृक्षे च। सदृक्षः। इदंकिमोरीश्की। दृग्दृशवतुषु। ईदृक्। ईदृशः॥
त्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु। समानस्य सः। सज्योतिः। सजनपदः इत्यादि। तीर्थे ये ॥x

म.कौ.०स कीदृक्। कीदृशः। दृक्षे च। ईदृक्षः। कीदृक्षः। अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थि
॥४६॥ तोत्सुकोतिकारकरागछेषु॥ अन्यदाशीः। अन्यदास्था। अन्यदास्थितः। अन्यदुत्सुकः। अन्यदू
तिः। अन्यद्रागः। अषष्ठीत्यादि किं। अन्यस्यान्येन वा आशीरन्याशीः। कारके छेन नार्यो नि
षेधः। अन्यस्य कारकोन्यत्कारकः। अन्यस्यायमन्यदीयः। अर्थे विभाषा। अन्यदर्थः। अ
न्यार्थः। कोः कत्तत्पुरुषेचि। अजाद्यावुत्तरपदे। कुत्सितोश्वः कदश्वः। कदन्नं। तत्पुरुषे
किं। कूष्ट्रो राजा। त्रौ च। कत्त्रयः। रथवदयोश्च। कद्रथः। कद्वदः। तृणे च जातौ। कत्तृणं।
कापथ्यक्षयोः। कापथं। काक्षः। ईषदर्थे। काम्लं। विभाषा पुरुषे। कापुरुषः। कुपुरुषः। ईषदम्लं
कवं चोष्णे। चात्कः। कवोष्णं। कोष्णं। कदुष्णं। पृषोदरादीनि यथोपदिष्टं। पृषत् उदरं पृषोद ॥४६॥
रं। तलोपः। वारिवाहको बलाहकः। पूर्वपदस्य बः। उत्तरपदादेश्च लत्वं। भवेद्वर्णाग

तत्पुरुषे कृति बहुलं। स्तंबेरमः। कर्णेजपः। शयवासवासिष्वकालात्। खेशयः। खशयः। ग्रामेवा
सः। ग्रामवासः। ग्रामेवासी। ग्रामवासी। षष्ठ्या आक्रोशे। चोरस्यकुलं। आक्रोशे किं। ब्राह्मणकुलं।
वाग्दिक्पश्यद्भ्यो युक्तिदंडहरेषु। वाचोयुक्तिः। दिशोदंडः। पश्यतोहरः। आमुष्यायणामुष्यपुत्रिका
मुष्यकुलिकेति च। देवानांप्रिय इति च मूर्खे। अन्यत्र देवप्रियः। शेपपुच्छलांगुलेषु शुनः। शुनःशे
पः। शुनःपुच्छः। शुनोलांगूलः। दिवश्च दासे। दिवोदासः। ऋतो विद्यायोनिसंबंधेभ्यः। होतुरंते
वासी। पितुरंतेवासी॥ विभाषा स्वसृपत्योः। ऋदंतात्षष्ठ्याः। मातुःपितुर्भ्यामन्यतरस्यां। आ
भ्यां स्वसुः सस्य षः समासे। मातुःष्वसा। पितुःष्वसा। मातुःस्वसा। पितुःस्वसा। लुकि पक्षे तु। मातृ
पितृभ्यां स्वसा। स्वसुः सस्य षः। मातृष्वसा। पितृष्वसा। असमासे तु। मातुःस्वसा। पितुःस्वसा॥
॥ ॥ इत्यलुक्समासः॥ ॥ घरूपकल्पचेलड्ब्रुवगोत्रमतहतेषु ङ्यो नेकाचो ह्रस्वः। भाषित

ब्राह्मणिचेली। ब्राह्मणिब्रुवा। ब्राह्मणितिगोत्रेत्यादि। चेलादीनि हात्र विषये कुत्सितवाचीनि। तैः कुत्सितानि कुत्सनैरिति समासः २

न०कोस पुंस्काद्योऽङ्गीतिस्तस्यानेकाचो ह्रस्वो घरूपकल्पप्रत्ययेषु परेषु चेलडादिषूत्तरपदेषु। ब्राह्मणि
॥४५॥ पितरा। ब्राह्मणितमा। इत्यादि। नद्याः शेषस्यान्यतरस्यां। अङ्ग्यतनद्या उयंते कानश्राघादिषु ह्र
स्वो वा। ब्रह्मबंधूतरा। ब्रह्मबंधुतरा। स्त्रीतरा। स्त्रितरा। ह्रस्वयान। लक्ष्मीतरा। उगितश्च। विदुषि
तरा। ह्रस्वाभावपक्षेपुंवत्त्व। विद्वत्तरा। पादस्य पदाज्यातिगोपहतेषु। पादाभ्यामजतीति पदाजिः।
पदातिः। अज्यतिभ्यां पादे चेति इण्प्रत्ययः। पदगः। पदोपहतः। पद्यत्यतदर्थे। पादस्य पत् दर्थे
याति। पादौ विध्यंति पद्याः शर्कराः। विध्यत्यधनुषेति यत्। अतदर्थे किं। पादार्थमुदकं पाद्यं।
पादार्घाभ्यां चेति यत्। उदकस्योदः संज्ञायां। उदमेघः। उत्तरपदस्येति वक्तव्यं। क्षीरोदः। पेषंवा
सवाहनधिषु च। उदपेषंपिनष्टि। उदवासः। उदवाहनः। उदधिर्घटः। एकहलादौ पूरयितव्ये
न्यतरस्यां। उदकुंभः। उदककुंभः। एकेति किं। उदकस्थाली। पूरयितव्ये किं। उदकपर्वतः॥ ॥४८॥
एषूत्तरपदेषु पादस्य पद इत्ययं तादेशः६

माद्रुसः सिंहो वर्णविपर्ययात्। गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरं ॥१॥ मतौ बह्वचो
नजिरादीनां। दीर्घः स्यात्। अमरावती। अनजिरादीनां किं। अजिरवती। संज्ञायामित्ये
व। नेह। वलयवती। शरादीनां च। शरावती। उपसर्गस्य घञ्यमनुष्ये बहुलं। परि
पाकः। परिपाकः। अमनुष्ये किं। निषादः। नरे संज्ञायां। विश्वानरः। मित्रे चर्षौ।
विश्वामित्रः। शुनो दंतदंष्ट्राकर्णकुंदवराहपुच्छपदेषु। श्वादंतः। अनिरंतः शरेक्षुप्लक्षा दीर्घोवाच्यः
म्रकार्ष्यखदिरपीयूक्षाभ्यो संज्ञायामपि। एभ्यो वनस्य णत्वं। प्रवणं। निर्वणमित्या
दि। विभाषौषधिवनस्पतिभ्यः। दूर्वावणं। दूर्वावनं। शिरीषवणं। शिरीषवनं। द्व्य
क्षरत्र्यक्षरेभ्यो मेव। नेह। देवदारुवनं। इरिकादिभ्यः प्रति। इरिकावणं। इरिकावनं। वाहनमा
हितात्। आरोप्य यदुह्यते तदाहितं तस्मान्निमित्तात्परस्य वाहनस्य णः। इक्षुवाहणं।
नेषो वाच्यः २

म०कौ०स पानंदेशे। पूर्वपदस्थान्निमित्तात्परस्य पानस्य णः। क्षीरपानं येषां ते क्षीरपाणाः। उशीन
॥४०॥ राः सुरापाणाः प्राच्याः। वा भावकरणयोः। क्षीरपाणं। क्षीरपानं। प्रातिपदिकांतनुम्वि
भक्तिषु च। पूर्वपदस्थान्निमित्तात्परस्य एषु स्थितस्य नस्य णो वा। माषवापिणौ। व्रीहि
वापिणौ। माषवापेण। माषवापिनौ इत्यादि। कुमति च। कवर्गान्त्युत्तरपदे प्राग्वत्। हरि व
कामिणौ। हरिकामिणि। हरिकामेण। पत्व्यवायेपि। प्रात्वेन। माषकुंभवापेणा
न। अतद्धितं इति वाच्यं। आर्द्रगोमयेण। शुष्कगोमयेण। पारस्कर प्रभृती
नि च संज्ञायां। एतानि ससुट्कानि निपात्यंते। पारस्करः। किष्किंधा। तद्
बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च। तात्पूर्वं वर्त्तेन दकारोपि बोध्यः। ॥४०॥

तद्बृहतोर्दकार तकारौ लुप्येते। करपत्योः सुट्। चोरदेवतयोरिति समुदायोपाधिः।
तस्करः। बृहस्पतिः। प्रायस्य चित्तिचित्तयोः। प्रायश्चित्तिः। प्रायश्चित्तं। वनस्पति
रित्यादि ॥ ॥ ०॥ आकृतिगणोयं॥ ॥ ०॥ ॥ इति समासाश्रयाविधिः
॥ ०॥ ॥ ०॥ ॥ ०॥ ॥श्री॥ ॥श्री॥ ॥ ०॥ ॥ ०॥ ॥ ०॥

॥४०॥

प्रयोजनमुद्दिश्यनमंदोपिप्रवर्ततइतिन्यायात् कैस्येत्यस्मिन्प्रश्ने।शब्दापिशब्दज्ञानरहिताबा
लाः।नतुस्तनपाः। इंद्रश्चंद्रःकाशकृत्स्नापिशलिःशाकटायनः।पाणिन्यमरजैनेंद्रज
यंत्यष्टौचशाब्दिकाः।१॥८२

सा॰स्या॰ श्रीगणपतयेनमः अविघ्नमस्तु ॥ प्रणम्यपरमात्मानंबालधीवृद्धिसिद्धये॥सा
१ रस्वतीमृजुंकुर्वेप्रक्रियांनातिविस्तरां १ इंद्रादयोपियस्यांतंनययुःशब्दवारिधेः॥प्र
क्रियंतस्यकृत्स्नस्यक्षमोवक्तुंनरःकथं २ तत्रतावत्संज्ञासंव्यवहारायसंगृह्यते।अइउ
ऋऌसमानाः।अनेनप्रत्याहारग्रहणायवर्णाःपरिगण्यंते।तेषांसमानसंज्ञाचविधी
यते। नैतेषुसूत्रेषुसंधिरनुसंधेयोविवक्षितत्वात्। विवक्षितस्तुसंधिर्भवतीतिनियमा
त्।लौकिकप्रयोगनिष्पत्तयेसमयमात्रत्वाच्च। ह्रस्वदीर्घप्लुतभेदाःसवर्णाः।एतेषां
सं ह्रस्वदीर्घप्लुतभेदाःपरस्परंसवर्णसंज्ञाभण्यंते।लोकाच्छेषस्यसिद्धिरितिवक्ष्यति।त
तोलोकतएवह्रस्वादिसंज्ञाज्ञातव्या।एकमात्रोह्रस्वः।द्विमात्रोदीर्घः।त्रिमात्रःप्लुतः
व्यंजनंत्वर्धमात्रकं।चाषस्तुवदतेमात्रांद्विमात्रंवायसोब्रवीत्।त्रिमात्रंतुशिखीब्रूते १
नकुलस्त्वर्धमात्रकं १ एषामन्येप्युदात्तादिभेदाः।उच्चैरुपलभ्यमानउदात्तः।नीचै

रनुदात्तः।समवृत्त्यास्वरितः।एऐओऔसंध्यक्षराणि।एषांह्रस्वानसंति।उभये
स्वराः।अकारादयःपंचचत्वारएकारादयः।उभयेस्वराउच्यंते।अवर्ज्यानामिनः।अ
वर्णवर्जाःस्वरानामिनउच्यंते।अनुक्रांतास्तावत्स्वराः।प्रत्याहारजिघृक्षयाव्यं
जनान्यनुक्रामति।हयवरल।ञणनङम।झढधघभ।जडदगब।खफछठथ।
चटतकप।शषस।अघंताभ्यां।प्रत्याहारंजिघृक्षताघंताभ्यांवितेवर्णायाह्याः।आ
दिवर्णोंत्येनगृह्यमाणस्तन्नामप्रत्याहारः।तथाहि।अकारोवकारेणगृह्यमाणोव
प्रत्याहारः।सचेउच्यते।अविभ्रुऋऌ।एऐओऔ।हयवरल।ञणनङम।झढध
घभ।जडदगब।इत्येतावत्संख्याकःसंपद्यते।चटतकपइतिचपप्रत्याहारः।झढधघ
भइतिझभप्रत्याहारः।जडदगबइतिजबप्रत्याहारः।एवंयत्रयत्रयेनप्रत्याहारेण येन
त्येसतत्रतत्रग्राह्याः।संख्यानियमस्तुनास्ति।हसाव्यंजनानि।हकारादयःस
कारांतावर्णाहसाव्यंजनानि।स्वरहीनंव्यंजनं।तेषकारःसुखमुखोच्चारणार्थत्वा

सा॰ स्या॰ दिसंज्ञकः। कार्ययित्व। प्रत्ययाद्यतिरिक्तः कस्मैचित्कार्यायोच्चार्यमाणवर्णइतिसंज्ञ
२ कोभवति। यस्येत्संज्ञातस्यलोपः। वर्णादर्शनंलोपः। वर्णविरोधालोपश्च। मित्रवदाग
मः। शत्रुवदादेशः। स्वरानंतरिताहसाःसंयोगः। कुचुटुतुपुवर्गाः। एपूकारः पंचवर्णप
रिग्रहणार्थः। अरेदोनामिनोगुणः। नामिस्थानेकाअरएओएतेगुणसंज्ञकाः। आ
रैऔवृद्धिः। आआरऐऔएतेवृद्धिसंज्ञकाः। अंत्यस्वरादिष्टिः। अंत्योयस्वरस्तदादिव
र्णष्टिसंज्ञकोभवति। क्वचित्केवलोन्त्यःस्वरएवटिसंज्ञकः। अंत्यात्पूर्वउपधा। अंत्याद्वर्
णात्पूर्वोयःसउपधासंज्ञकोभवति। असंयोगादिपरोह्रस्वोलघुः। विसर्गानुस्वार
संयोगपरोदीर्घश्चगुरुः। मुखनासिकाभ्यामुच्चार्यमाणोनुनासिकः। मुखेनैवोच्चा
र्यमाणोनिरनुनासिकः। अंइत्यनुस्वारः। अःइतिविसर्जनीयः॥ ॥इतिसंज्ञाप्रक्रि २
या॥ ॥अधुनासंधिरभिधीयते। इयंस्वरे। इवर्णोयत्वमापद्यतेस्वरेपरे। दधि
आनयइतिस्थिते। दध्य्आनयइतितावद्भवति। हसेर्हसः। स्वरात्परोरेफहका

रवर्जितोहसोहसेपरेद्विर्भवति। दध्ध्य्आनयइतितावद्भवति। इतिधकारस्यद्वित्वं। द्वि
त्वविधानोद्वावेवशिष्येते। अन्येलुप्यंते। झभेजबाः। झसानांझभेपरेजबाभवंति। इति
पूर्वधकारस्यदकारः। सवर्णत्वाद्वर्ग्यावर्गेणसवर्णइतिवचनात्। यथासंख्यंवावक्त
व्यं। स्वरहीनंपरेणसंयोज्यं। दध्यानय॥ गौरीअत्रइतिस्थिते। अर्हितिविशेषणेन
रेफस्यद्वित्वं। किंतु। राद्यपोद्विः। स्वरपूर्वाद्रेफात्परोयपोद्विर्भवति। जलतुंबिका
न्यायेनरेफस्योर्ध्वगमनं। गौर्य्यत्र। स्वरइत्यनुवर्तते। एवमन्यत्रापियत्रनसूत्राक्ष
रैःकार्यसिद्धिःस्तत्रसर्वत्रसूत्रांतरात्पदांतरादनुवृत्तिर्ज्ञातव्या। ग्रंथभूयस्त्वभया
न्नास्माभिर्लिख्यते। उवं। उवर्णोवत्वमापद्यतेस्वरेपरे। मधुअत्र। मध्वत्र। ऋरं।
ऋवर्णोरत्वमापद्यतेस्वरेपरे। पितृअर्थः। पित्रर्थः। लृलं। लृवर्णोलत्वमापद्यते
स्वरेपरे। लृअनुबंधः। लनुबंधः। एअय्। एकारअय्भवतिस्वरेपरे। नेअनं। नय
नं। ओअव्। ओकारअव्भवतिस्वरेपरे। भोअति। भवति। गवादेरवर्णागमोक्षादौ

सा॰ स्या॰ ३

गवाक्षः गवेंद्रः गवाजिनं प्रौढः

वक्तव्यः। गोअक्षः। गोइंद्रः। गोअजिनं। प्रउढः। गो अक्षश्च गवाक्षश्च गो इंद्रश्च
गवाजिने॥ स्वैरमक्षौहिणी प्रौढ एते प्रोक्ता गवादयः १ क्वचित्स्वरवद्यकारः। यथा
अध्वपरिमाणे। गोयूतिः। गव्यूतिः। ऐआय्। ऐकारायूभवति स्वरे परे। नैअकः
नायकः। औआव्। औकारा वूभवति स्वरे परे। तौ इह। ताविह। व्योर्लोपश्चापदांते।
पदांते स्थितानामयादीनां यकारवकारयोर्लोपश्चा भवति। ते आगताः। तयागताः॥
तआगताः। बटोइह। वटविह। बट इह। तौआसितं। तावासितं। ता आसितं। लो
पशिथुनर्नसंधिः। ऊंदासितुभवति। हे स खइहृति। हे सखेति। एदोतोतः। पदांतस्थि
तादेकारादोकाराच्च परस्याकारस्य लोपो भवति। ते अत्र। तेत्र। बटोअत्र। बटो
त्र। सवर्णे दीर्घः सह। सवर्णः सवर्णे परे सह दीर्घो भवति। दधी इह। दधीह। श्र
द्धा अत्र। श्रद्धात्र। सामान्यशास्त्रतो नूनं विशेषो बलवान्भवेत्। परेण पूर्वबाधो ३
वा प्रायशो दृश्यतामिह। १ अदीर्घे दीर्घतां याति नास्ति दीर्घस्य दीर्घता॥ पूर्व

दीर्घस्वरं दृष्ट्वा परलोपो न विद्यते। २ अइए। अवर्ण इवर्णे परे सह ए भवति। तव इदं
तवेदं। मम इदं ममेदं। हलादिरीषादौ टेर्लोपो वक्तव्यः। हल ईषा। हलीषा। लांग
ल ईषा। लांगलीषा। मनस् ईषा। मनीषा। अद्य औं। अद्यौं। हलीषा मांगलीषा
३ च मनीषाद्यो तथैव च॥ शाकंधुश्चैव कर्कंधुश्चैव सीमंतः कुलटस्तथा। १ पतंजलिश्च
सारंगा एते प्रोक्ता हलादयः २। उओ। अवर्ण उवर्णे परे सह ओ भवति। गंगा उ
दकं। गंगोदकं। ऋ अर्। अवर्ण ऋवर्णे परे सह अर् भवति। तव ऋधिः। तवर्धिः।
क्वचिदार्। अवर्ण ऋवर्णे परे सह आर् भवति। ऋण ऋणं। ऋणार्णं। शीत ऋतः।
शीतार्तः। ऌ अल्। अवर्ण ऌवर्णे परे सह अल् भवति। तव ऌकारः। तवल्कारः। र
लयोः सावर्ण्यं वक्तव्यं। रलयोर्डलयोश्चैव खषयोर्बवयोस्तथा। वदंत्येषां हि सा
वर्ण्यमलंकारविदो जनाः। १ परि अंकः। पर्यंकः। पल्यंकः। ए ऐ ऐ। अवर्ण एका

तवऐषः तवैषः
ऐ ऐकारे चपरे सह ऐकारो भवति। नैअकः। नायकः। तव ऐश्वर्यं। तवैश्वर्यं। ओ।
औ ओ। अवर्ण ओकारे औकारे च परे सह औकारो भवति। तव ओदनं। तवौदनं।
तव औन्नत्यं। तवौन्नत्यं। ओष्ठोत्वोर्वा। अवर्ण ओष्ठ ओत्वोः परयोः सह वा ओ भवति
बिंबओष्ठः। बिंबोष्ठः। बिंबौष्ठः। स्थूलओतुः। स्थूलोतुः। स्थूलौतुः॥ ॥इति
स्वरसंधिः॥ ॥अथ प्रकृतीभावः॥ ॥नामी। अदसो मी संधिं न प्राप्नोति
अमी आदित्याः। खेद्वित्वे। ईच ऊच एच ख्वे ईकारांत ऊकारांत एकारांतश्च स्वरा द्वि
द्वित्वे वर्तमानः संधिं न प्राप्नोति। मण्यादिवर्ज्यं। मणीवरोदसीव। दंपतीव।
जायापतीव। अग्न्यादौ संधिं न प्राप्नोति। अग्नी अत्र। वटू अत्र। माले आ
नय। औ निपातः। आकार औकार निपात एक स्वरश्च संधिं न प्राप्नोति। आ
एवं मन्यसे। नो अत्र स्थातव्यं। अ अपेहि। इ इंद्रं पश्य। उ उत्तिष्ठ। प्लुतः। प्लुतश्च

संधिं न प्राप्नोति। देवदत्ता३ एहि। यज्ञभूते३ आगच्छ। दूरादाह्वाने टेः प्लुतः। दूरा
दाह्वाने गायने रोदने विचारे च टेः प्लुतो भवति॥ ॥इति प्रकृतीभावः॥ ॥
अथ व्यंजनकार्यमुच्यते। चपा अबे जबाः। पदांते वर्तमानाश्चपा जबा भवंति स्व
रे परे। षट् अत्र। षडत्र। वाक् यथा। वाग्यथा। ञमे यमा वा। पदांते वर्तमा
नाश्चपा ञमे परे ञमा वा भवंति। वाक् मात्रं। वाङ्मात्रं। षट् मम। षण्मम। वाग्मात्रं ४
श षड् मम। चपाच्छः शः। चपादुत्तरस्य शकारस्य छो वा भवति। वाक् शूरः। वाक्छू
रः। वाग् शूरः। हो झभाः। चपादुत्तरस्य हकारस्य झभा भवंति। यद्वर्गग श्च
पस्तद्वर्गग चतुर्थो भवति। तत् हविः। तद्धविः। वाक् हरिः। वाग्घरिः। स्तोश्चुः
श्चुः। स्तोः सकार तवर्गस्य शकारेण चवर्गेण च योगे शकार चवर्गौ यथा
संख्येन भवतः। कस् चरति। कश्चरति। कस् शूरः। कः शूरः। तत् चित्रं। तच्चित्रं।

सा॰स्या॰
५

ततशास्त्रं। नशात्। शकाराद्उत्तरस्य तवर्गस्य चुत्वं न भवति। विश्नः। विश्नः प्रश्नः
ष्टुभिष्टुः। स्तोः सकारतवर्गयोः ष्टुभिः ष्टुर्भवति। कस्षष्ठः। कष्षष्ठः। कस्टीकते। कष्टी
कते। तत्टीकते। तट्टीकते। नपि। षकारे परे तवर्गस्य ष्टुत्वं न भवति। भवान्षष्ठः। भ
वान्षष्ठः। टोरंत्यात्। पदांते वर्तमानाट्टवर्गात्परस्य स्तोः ष्टुर्भवति। षट्नरः। षड्ण
रः। षण्णरः। षट्सीदंति। षट्सीदंति। तोर्लि लः। तवर्गस्य लकारे परे लकारो भव
ति। तत्लुनाति। तल्लुनाति। भवान्लिखति। भवाँल्लिखति। अंतस्था द्विप्रभेदाः
रेफवर्जिता यवलाः। सानुनासिका निरनुनासिकाश्च तत्र सानुनासिए वलका कं\\ ५
रो नकारस्य भवति। भवाँल्लिखति। नश्छते। नांतस्य पदस्य छे ते परे सगागमो
भवति। टिकितावाद्यंतयोर्वक्तव्यो। करोडित्कार्यार्थः सर्वत्र। राजन्चित्रं। रा
जंश्चित्रं। भवान्तनोति। भवांस्तनोति। कामान्तिस्त्रः। कामांस्तिस्त्रः। शे च छो।

नांतस्य पदस्य शे परे चकारागमो भवति। भवान्शूरः। भवाञ्छूरः। भवाञ्शूरः।
ङ्णो ह्रस्वाद्द्विः स्वरे। ङकारणकारनकारा ह्रस्वादुत्तरास्ते द्विर्भवंति स्वरे परे। प्रत्यङ् इदं।
प्रत्यङ्ङिदं। सुगण्इह। सुगण्णीह। राजन्इह। राजन्निह। छः। ह्रस्वादुत्तरस्य छकारो द्विर्भवति।
तव छत्रं। तवच्छत्रं। खसे चपा झसानां। झसानां खसे परे चपा भवंति। दीर्घादपि च वक्तव्यं। ह्री
छः। म्लेछः। म्लेंच्छः। मोनुस्वारः। मकारस्यानुस्वारो भवति हसे पदांते च। तम्हसति। तंहसति।
पदम्चर्या। पदंचर्या॥ मः स्वरे। अनुस्वारस्य मकार भवति स्वरे परे। तम्आगतं। फलंआनय
फलमानय। नश्चापदांते झसे। नकारमकारस्य चापदांते वर्त तंआगतं। ×मानस्यानुस्वा
रो भवति स्वरे परे। यशान्सि। यशांसि। कंसः। कम्सः। यमा यपेस्य। अनुस्वारस्य यमान
वंति यपे परे। तंकरोति। तङ्करोति। तम्तनोति। तंकरोति। संयंता। संय्यंता॥ संवत्सरः।
संव्वत्सरः। यंलोकं। यल्लोकं। ङः छंदसि। अनुस्वारस्य ङकारो भवति शषसहरेफेषु परतः।
छंदसि। हंसः। हङ्सः। संस्पृष्टः। सङ्स्पृष्टः। पश्यां शरदः। पश्याङ् शरदः॥ इति व्यंजनसं
धिस्समाप्तः॥ ॥अथ विसर्गसंधिर्निगद्यते॥ ॥विसर्जनीयस्य सः। विसर्ज

सा॰ स्या॰ नीयस्यसकारोभवतिखसेपरे। कः तनोति। कस्तनोति। कः साधुः। कस्साधुः। कुषो
६ कष्वोवा। विसर्जनीयस्यकवर्गएवसंबंधिनिखसेपरेकष्वौवास्तवतः। कः करोति।
कष्करोति। कः पठति। कष्पठति। वाचस्पत्यादयः संज्ञाशब्दानिपातात्साधवः। अ
लाक्षणिकोविधिर्निपातः। वाचस्पतिः। बृहस्पतिः। तस्करः भास्करः। नमस्कारः
अह्नोरोरात्रिषु। अह्नोविसर्जनीयस्यरोभवतिरात्र्यादिशब्दवर्जितेषुपरतः। अ
हः पतिः। अहर्पतिः। अहः गणः। अहर्गणः। रात्रिष्विति विशेषणादहोरात्रं। अतो
ऽत्युः। अकारात्परस्यविसर्जनीयस्यउकारोभवत्यति परतः। कः अर्थः। कोऽर्
थः। हबे। अकारात्परस्यविसर्जनीयस्यउकारोभवतिहबेपरे। कः गतः। कोगतः
देवः याति। देवोयाति। मनः रथः। मनोरथः। आदबेलोपश्चे। अवर्णात्परस्यविस
र्जनीयस्यलोपश्चभवत्यबेपरे। देवाः अत्र। देवाअत्र। वाताः वाताः। वातावाताः। स्व
रेयत्वंवा। अवर्णात्परस्यविसर्जनीयस्यस्वरेपरेयत्वंवाभवति। देवाः अत्र। देवा ६
यत्र। देवाअत्र। भोसः। भोभगोअघोसइत्येतस्मात्परस्य विसर्जनीयस्य

लोपस्
भवत्यबेपरे। भोः एहि। भोएहि। भगोः नमस्ते। भगोनमस्ते। अघोः याहि। अघोया
हि। नामिनोरः। नामिनः परस्यविसर्जनीयस्यरेफोभवत्यबेपरे। अग्निः अत्र। अग्निरत्र।
बटुः यजते। बटुर्यजते। रेफप्रकृतिकस्यखपेवा। रेफप्रकृतिकस्यविसर्जनीयस्यखपे
परेरेफोवाभवति। गीः पतिः। गीर्पतिः। गीष्पतिः। रः। रेफसंबंधिनोविसर्जनीयस्यरेफोभ
वत्यबेपरे। प्रातः अत्र। प्रातरत्र। रिलोपोदीर्घश्च। रेफस्यरेफेपरेलोपोभवतिपूर्वस्यचदी
र्घः। पुनः रमते। पुनारमते। शुक्तिः रूप्यात्मानभाति। शुक्तीरूप्यात्मानभाति। सैषाद्यसे
पर सशब्दोदेपशब्दाच्चस्यविसर्जनीयस्यलोपोभवतिहसेपरे। सः चरति। सचरति। एषः ह
सति। एषहसति। सैषादितिसंहिता। सैषदाशरथीरामः सैषाराजयुधिष्ठिरः। सैषकर्णोमि
हात्यागी सैषभीमोमहाबलः॥१॥ इत्यादौपादपूरणेसंध्यार्थः॥ यदुक्तंलौकिकायेहतदेव
कुलंभवेत्॥ सैषांभूम्यादद्सोपानित्यादीनामदुष्टता॥२॥ केचित्स्ववृत्तिः कचिदप्रवृत्तिः क
चिद्विभाषांकचिदन्यदेव। विधेर्विधानंबहुधासमीक्ष्यचतुर्विधंबाहुलकंवदंति॥३॥

सा॰स्या॰ वर्णागमोवर्णविपर्ययश्च द्वौचापरौवर्णविकारनाशौ ॥ धातोस्तदर्थातिशयेनयोगस्तदु
च्यतेपंचविधंनिरुक्तं ॥ ४ ॥ वर्णागमोगवेंद्रादौ सिंहेवर्णविपर्ययः ॥ षोडशादौविकारः
का स्याद्वर्णनाशःपृषोदरे ॥ ५ ॥ वर्णविकारनाशाभ्यांधातोरतिशयेनयः ॥ योगःसउच्यतेप्रा
ज्ञैर्मयूरभ्रमरादिषु ॥ ६ ॥ इतिविसर्गसंधिःसमाप्तः ॥ ॥ इतिपंचसंधिःसमाप्तः ॥ ॥
अथविभक्तिर्विभाव्यते ॥ ॥ साद्विधा । स्यादिस्त्यादिश्च । विभक्त्यंतंपदं । तत्रस्या
दिर्विभक्तिर्नाम्नोयोज्यते । अविभक्तिनाम । विभक्तिरहितंधातुवर्जितंचार्थवच्छ
ब्दरूपंनामोच्यते । कृत्तद्धितसमासाश्च । प्रातिपदिकसंज्ञा इतिकेचित् । तस्मात् ।
सि । औ । जस् । १ अम् । औ । शस् । २ टा भ्यां । भिस् ३ । ङे । भ्यां । भ्यस् ४ ङसि । भ्यां । भ्यस् ५
ङस् । ओस् । आम् ६ । ङि । ओस् । सुप् ७ तस्मान्नाम्नःपराःस्यादयःसप्तविभक्तयोभव
न्ति । तत्राप्यर्थमात्रैकत्वविवक्षायांदेवसिइतिस्थिते । इकारउच्चारणार्थः । स्रोर्विसर्गः ।
सकाररेफयोर्विसर्जनीयादेशोभवत्यधातोःपदांचेत् । देवः । द्वित्वविवक्षायांदेवऔ ।
प्रातिपदिकार्थे॰ कर्मवि॰ २

ओऔऔ । देवौ । बहुत्वविवक्षायांबहुवचनंजस् । जकारस्येत्संज्ञातस्यलोपः । प्रयोज
नंजसीतिविशेषणं । देवअस्इ॰ । दीर्घविसर्गौ देवाः । अकाराज्जसोसुक्कचिद्ध
व्यः । देवासोनित्ययाशिरा । ब्राह्मणासःपितरःसोम्यासः । द्वितीयैकवचनेदेवअम् ॰ कर्मणि
अम्शसोरस्य । समानादुत्तरयोरम्शसोरकारस्यलोपोभवत्यधातोः । देवं । देवौ । बहु
वचनेदेवशस् ॰ । शकारःशशीतिविशेषणार्थः । सोनःपुंसः । पुल्लिंगात्समानादुत्तरस्य
शसःसकारस्यनकारादेशोभवति । शशी । शशिपरेपूर्वस्यदीर्घोभवति । यदादेशस्त
कर्तृक द्वद्भवति । देवान् । तृतीयैकवचनेदेवटाइति॰ । टकारानुबंधष्टेनेतिविशेषः । टेन । अकारा
त्परष्टाइनभवति । अइए । देवेन । अद्भि । अकारआभवतिभकारेपरे । देवाभ्यां । भिस्यः ।
अकारात्परस्यभिसोभकारस्याकारस्यलोपोभवति । अइए । देवएस्इ॰ । वृद्धिवि
सर्गौ देवैः । अकारस्यभिसिछंदस्येकारादेशोवावक्तव्यः । देवेभिःसोमपीतये । भि
संप्रदानेच द्भिःकर्णेभिः । चतुर्थ्येकवचनेदेवङेइति॰ । कोङेरेङितःकार्यार्थः सर्वत्र । ङे अक । अका

अपदानेपंच

सा·स्या· रात्परस्यङे·इत्येतस्यायागमोभवति।देवाय।देवाभ्यां।देवेभ्यः।पंचम्येकवचनेदेवङ
८ सि।ङसिरत्॥ ॥ अत्यस्मिबहुले।अकारस्येत्वंभवतिसकारेभकारेबहुत्वेसति।अका सबधे
रात्परोङसिरद्भवति।देवात्।देवाभ्यां।देवेभ्यः।षष्ठ्येकवचनेदेवङस्।ङस्स्य।अका
रात्परोङसःस्यभवति।देवस्य।ओसि।अकारस्य ओसिपरेएत्वंभवति।एत्वपु
स्त्वोविसर्गः।देवयोः।देवआम्।नुडागमः।समानात्परस्यामोनुडागमोभवति उम्मयो
ट्कारस्थाननियमार्थः।टित्वादादौ।नामि।नामिपरेपूर्वस्यदीर्घोभवति।देवानां।
आधारेसप्तमी सप्तम्येकवचनेदेवङि·इतिस्थिते।अद्गुणे।देवे।देवयोः।देवसुप्।किलाविषःकृतस्य
कवर्गादिन्लात्प्रत्याहारादुत्तरस्यकेनचित्सूत्रेणकृतस्यसकारस्यषकारादेशोभव
ति।देवेषु।आमंत्रणेसिर्धिः।आमंत्रणमाभिमुखीकरणंतस्मिन्नर्थेविहितःसि ८
र्धिसंज्ञकोभवति।समानाद्धेर्लोपोधातोः।समानादुत्तरस्यधेर्लोपोभवत्यधातोः
।आभिमुख्याभिव्यक्तयेहेशब्दप्राक्प्रयोगः।हेदेव।हेदेवौ।हेदेवाः।एवंघटपट

मकुंभविप्रादयोयकारांताःसिध्यंति।अकारांतानामपिसर्वादीनांतुविशेषः।सर्व।
विश्व।उभ।उभय।अन्य।×पुल्लिंगाः×अन्यतर।इतर।डतर।डतम।कतर।कतम।समा
सिम।नेम।केर।पूर्वापर।अवर।अपर।दक्षिण।उत्तर।अधर।स्व।अंतर।त्यद्।तद्।
यद्।एतद्।इदम्।अदस्।द्वि।किं।युष्मद्।अस्मद्।एतेसर्वादयस्त्रिलिंगाः।तत्रपुल्लिं
गत्वेनरूपंज्ञेयं।सर्वः।सर्वौ।सर्वे।सर्वं।सर्वौ।सर्वान्।ष्टुनेणोनंते।षकाररेफऋ
वर्णेभ्यःपरस्यजसी।सर्वादेरकारात्परोजस्इर्भवति।अद्गुणे।नकारस्यणकारादे
शोभवतिअंतेस्थितस्यनभवति।सर्वानित्यादौ।अवकुपंतरेपि।अव्प्रत्याहारेणकव
र्गेणपवर्गेणचमध्येव्यवधानेपिभवतिनान्येन।सर्वाभ्यां।सर्वैः।चतुर्थ्येकवचनेसर्वङे·
इति।सर्वादिस्मट्।सर्वादेरकारांतात्परस्यचतुर्थ्येकवचनेस्यस्मडागमोभवति।एए
ङसिरत् ऐ।सर्वस्मै।सर्वाभ्यां।सर्वेभ्यः।पंचम्येकवचनेसर्वअत्।अतः।सर्वादेरकारांतात्पर
स्यातःस्मडागमोभवति।सर्वस्मात्।सर्वाभ्यां।सर्वेभ्यः।सर्वस्य।सर्वयोः।सुडाग
मः।सर्वादेःपरस्यामःसुडागमोभवति।सर्वेषां।ङिःस्मिन्।सर्वादेरकारात्परोङिःस्मि

३।५ङसिङ्योस्मान्नौवावक्तव्यौ। पूर्वस्मात् पूर्वात्। परस्मात्। परात्। पूर्वस्मिन्। पूर्वे। परस्मिन्। परे ३।५

सा॰ स्या॰ स्मिन्भवति। सर्वस्मिन्। सर्वयोः। सर्वेषु। हे सर्व। हे सर्वौ। हे सर्वे। एवं विश्वादीनामेक
९ शब्दपर्यंतानां रूपाणि ×। तस्मिन्बहुत्वे। किं कोत्स्त्रियः कृतस्या। ×। उतरउतमौ विहायतो प्र
त्ययौ। पूर्वादीनां तु नवानां जस इकारो वा वक्तव्यः। पूर्वे। पूर्वाः। पूर्वे पूर्वौ। पूर्वस्मिन्स्यादि
परः परौ। परे परा। परस्मिन्स्यादि। प्रथमचरमतयाल्पार्धकतिपयनेमानां जसि
वा प्रथमे। प्रथमाः। चरमे। चरमाः। शेषं देववत्। तयायडौ प्रत्ययौ। द्वितीयस्य स
र्वशब्दवद्रूपं ङिङसुवा वक्तव्यं। द्वितीयस्मै। द्वितीयाय। द्वितीयस्मात्। द्विती
यात्। द्वितीयस्मिन्। द्वितीये। एवं तृतीयशब्दः। उभशब्दो नित्यं द्विवचनां
तः। उभौ। उभौ। उभाभ्यां। उभाभ्यां। उभाभ्यां। उभयोः। उभयोः। उभयशब्दस्य
नित्यद्विवचनाभावे एकवचनबहुवचने भवतः। उभयः। उभये। उभयं। उभयान्
उभयेन। उभयैः। उभयस्मै। उभयेभ्यः। उभयस्मात्। उभयेभ्यः। उभयस्य।
उभयेषां। उभयस्मिन्। उभयेषु। हे उभयः हे उभये। अकारांतः पुल्लिंगो
मासशब्दः। मासः। मासस्यालोपो वा। मासशब्दस्याकारस्य लोपो वा। ९

इति

श्रीगणेशायनमः ॥ नत्वा वरदराजः श्रीगुरून्भट्टोजिदीक्षितान् । करोति
पाणिनीयानां मध्यसिद्धांतकौमुदीम् ॥१॥ अइउण् । ऋऌक् । एओङ् । ऐ
औच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् ।
खफछठथचटतव् । कपय् । शषसर् । हल् ॥ इति माहेश्वराणि सूत्राणि
अणादिसंज्ञार्थानि ॥ हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्सं
ज्ञकः हकारो द्विरुपात्तोयमटिशल्यपि वांछता अर्हेणाधुक्षदित्यत्र
द्वयं सिद्धं भविष्यति १ हलंत्यं हलिति सूत्रेंत्यमित्स्यात् हलंत्यं उपदे
शेंत्यं हलित्स्यात् उपदेशआद्योच्चारणं सूत्रेष्वदृष्टं पदं सूत्रांतरादनुवर्त
नीयं सर्वत्र अदर्शनं लोपः प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् तस्य लोपः

तस्येतोलोपः स्यात् णादयोणाद्यर्थाः आदिरंत्येन सहेता अंत्येनेतासहि
त आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् यथा अण् इति अइउवर्णानां संज्ञा
एवमच् हल् अलित्यादयः ऊकालोज्झ्रस्वदीर्घप्लुतः उश्च ऊश्च ऊ३श्च वः वां काल
इव कालो यस्य सोच् क्रमाद्ध्रस्वदीर्घप्लुतसंज्ञः स्यात् स प्रत्येकमुदात्तादिभेदेन
त्रिधा उच्चैरुदात्तः नीचैरनुदात्तः समाहारः स्वरितः स नवविधोपि प्रत्येकमनु
नासिकाननुनासिकत्वाभ्यां द्विधा मुखनासिकावचनोनुनासिकः मुख
सहितनासिकयोच्चार्यमाणो वर्णोनुनासिकः स्यात् तदित्थं अइउऋ एषां
प्रत्येकमष्टादश भेदाः ऌवर्णस्य द्वादश तस्य दीर्घाभावात् एचामपि द्वा
दश तेषां ह्रस्वाभावात् तुल्यास्यप्रयत्नं सवर्णं ताल्वादिस्थानमाभ्यंतर
प्रयत्नश्चेत्येतद्द्वयं यस्य येन तुल्यं तन्मिथः सवर्णं स्यात् • ऋऌवर्णयोर्मि

मध्य० २

यः सावर्ण्यं वाच्यं अकुहविसर्जनीयानां कण्ठः इचुयशानां तालु ऋटुरषा
णां मूर्धा ऌतुलसानां दन्ताः उपूपध्मानीयानामोष्ठौ ञमङणनानां
नासिका च एदैतोः कण्ठतालु ओदौतोः कण्ठोष्ठं वकारस्य दन्तोष्ठं जिह्वा
मूलीयस्य जिह्वामूलं नासिकानुस्वारस्य यत्नो द्विधा आभ्यन्तरो बा
ह्यश्च आद्यः पञ्चधा स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् तत्र स्पृष्टं प्रय सिद्धान्त०
तनं स्पर्शानां ईषत्स्पृष्टमन्तःस्थानां ईषद्विवृतमूष्मणां विवृतं स्वराणां ।
ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायां तु विवृतमेव बाह्यस्त्वेका
दशधा विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदा
त्तोऽनुदात्तः स्वरितश्चेति खरो विवाराः श्वासा अघोषाश्च हशः संवारा नादा
घोषाश्च वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः अन्ये महाप्राणाः २

वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः कादयो मावसानाः स्पर्शाः यणो
ऽन्तःस्थाः शल ऊष्माणः अचः स्वराः ≍क ≍ख इति कखाभ्यां प्रागर्धविसर्गस
दृशो जिह्वामूलीयः ≍प ≍फ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानी
यः अं अः इत्यचः परावनुस्वारविसर्गौ अणुदित्सवर्णस्य चाप्रत्ययः अवि
धीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् अत्रैवाण् परेण णकारेण कु चु
टु तु पु एते उदितः तदेवम् इत्यष्टादशानां संज्ञा तथेकारोकारौ ऋकार
स्त्रिंशतः एवं ऌकारोऽपि एचो द्वादशानां अनुनासिकाननुनासिकत्वा
भ्यां द्विधा भेदेन यवला द्विधा तेनाननुनासिकास्ते द्वयोर्द्वयोः संज्ञा परःस
न्निकर्षः संहिता वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् हलो
ऽनन्तराः संयोगः अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः सुप्तिङन्तं पदं ।

मध्य० सुबंतं तिङंतं च पदसंज्ञं स्यात् ॰ ॰इति संज्ञाप्रकरणं॰ ॰इको यणचि इ
२ कः स्थाने यणः स्यादचि संहितायां विषये सुधी उपास्य इति स्थिते तस्मि
न्निति निर्दिष्टे पूर्वस्य सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णांतरेणाव्य
वहितस्य पूर्वस्य ज्ञेयं स्थानेंतरतमः प्रसंगे सति सदृशतम आदेशः स्या
त् सुध्यु उपास्य इति जाते अनचि च अचः परस्य यरो द्वे वा स्तो न त्वचि
स्थानिवदादेशोनल्विधौ आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ
इति स्थानिवद्भावनिषेधः झलां जश् झशि इति धस्य दः संयोगांतस्य लो
पः संयोगांतं यत्पदं तस्य लोपः स्यात् अलोंत्यस्य षष्ठीनिर्दिष्टांत्यस्यादे
शः स्यात् इति लोपे प्राप्ते यणः प्रतिषेधो वाच्यः सुध्युपास्यः मद्ध्वरिः २
धात्त्रंशः लाकृतिः एचोयवायावः एचः क्रमात् अय् अव् आय् आव् एते

स्युरचि यथासंख्यमनुदेशः समानां समसंबंधी विधिर्यथासंख्यं स्या
त् हरये विष्णवे नायकः पावकः वांतो यि प्रत्यये यादौ प्रत्यये परे
ओदौतोरवावौ स्तः गव्यं नाव्यं गोर्यूतौ छंदस्युपसंख्यानं अध्वपरिमा
णे च गव्यूतिः धातोस्तन्निमित्तस्यैव यादौ प्रत्यये परे धातोरेचश्चेद्वांतादे
शस्तर्हि तन्निमित्तस्यैव नान्यस्य लव्यं अवश्लाव्यं तन्निमित्तस्य किं ओ
यते औयत क्षय्यजय्यौ शक्यार्थे यांतादेशनिपातनार्थमिदं शक्या
र्थे किं क्षेतुं जेतुं योग्यं क्षेयं पापं जेयं मनः क्रय्यस्तदर्थे केतारः क्रीणी
युरिति बुद्ध्या आपणे प्रसारितं क्रय्यं क्रेयमन्यत् क्रयणार्हमित्यर्थः अ
देङ्गुणः अदेङ्गुणसंज्ञः स्यात् तपरस्तत्कालस्य तपरस्तात्परो वा उच्चार्य
माणसमकालस्यैव संज्ञा स्यात् आद्गुणः अवर्णादचि पूर्वपरयोरेको गुणः

मध्य० ५

देशः संहितायां उपेंद्रः गंगोदकं उपदेशेऽजनुनासिक इत् उपदेशेनुनासि
को जित्संज्ञः स्यात् प्रतिज्ञानुनासिक्याः पाणिनीयाः लण्सूत्रस्थावर्णेन
सहोच्चार्यमाणो रेफो रलयोः संज्ञा उरण्रपरः ऋ इति त्रिंशतः संज्ञेत्युक्तं तत्स्था
ने योऽण् स रपरः सन्नेव प्रवर्तते कृष्णर्द्धिः तवल्कारः लोपः शाकल्यस्य
अवर्णपूर्वयोः पदांतयोर्यवयोर्लोपो वाशिपरे पूर्वत्रासिद्धं सपादसप्ताध्या
यीं प्रति त्रिपाद्यसिद्धा त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं हरइह हरि
हरयिह विष्णइह विष्णविह वृद्धिरादैच् आदैच्च वृद्धिसंज्ञः स्यात्
वृद्धिरेचि आदेचि परे वृद्धिरेकादेशः स्याद्गुणापवादः कृष्णैकत्वं गंगौघः ५
देवैश्वर्यं कृष्णौत्कंठ्यं एत्येधत्यूठ्सु अवर्णादेजाद्योरेत्येधत्योरूठि च प
रे पूर्वपरयोर्वृद्धिरेकादेशः स्यात् पररूपगुणापवादः उपैति उपैधते प्रष्ठौ

हः एजाद्योः किं उपेतः माभवान्प्रेदिधत् स्वादीरेरिणोः स्वैरं स्वैरी अक्षौह
हिण्यां अक्षौहिणी सेना प्रादूहोढोढ्येषैष्येषु प्रौहः प्रौढः प्रौढिः प्रैषः
प्रैष्यः ऋते च तृतीयासमासे सुखेन ऋतः सुखार्तः तृतीयेति किं परम
र्तः प्रवत्सतरकंबलवसनार्णदशानामृणे प्रार्णमित्यादि उपसर्गाः क्रि
यायोगे प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः प्र परा अप सं अनु अव नि
र् निर् दुर् दुस् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उ
प एते प्रादयः भूवादयो धातवः क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ।
उपसर्गादृति धातौ अवर्णांतादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादे
शः स्यात् प्रार्छति वा सुप्यापिशलेः आद्उपसर्गादृकारादौ सुब्धातौ प
रे वृद्धिर्वा स्यात् आपिशलिग्रहणं पूजार्थं अचोरहाभ्यां द्वे अचः पराभ्यां

मध्य० रेफहकाराभ्यांपरस्य यरोद्वेवास्तः इतिप्राप्ते शरोचि नद्वित्वं आर्षभीयति
५ आर्षभीयति एङिपररूपं आदुपसर्गादेङादौ धातौपरे पररूपमेकादेशःस्या
त् प्रेजते उपोषति, अचोंत्यादिटि अचांमध्येयोंत्यः सआदिर्यस्यतट्टिसं
ज्ञंस्यात् शकंध्वादिषुपररूपंवाच्यं तच्चटेः शकंधुः कर्कंधुः कुलटा सी
मंतःकेशवेशे सीमांतोन्यः मनीषा हलीषा लांगलीषा पतंजलिः सारं
गःपशुपक्षिणोः सारंगोन्यः आकृतिगणोयं एवेचानियोगे क्वेवभो
क्ष्यसे अनियोगेकिं तवैव ओत्वोष्ठयोःसमासेवा स्थूलोतुः स्थूलौतुः बिं
बोष्ठः बिंबौष्ठः समासेतिकिं तवौष्ठः ओमाङोश्च ओमिआङिचात्पररूपं
स्यात् शिवायोंनमः शिवेहि अकःसवर्णेदीर्घः अकःसवर्णेचिपरेदी ५
र्घएकादेशः स्यात् दैत्यारिः श्रीशः विष्णूदयः होतॄकारः एङःपदांतादति

पदांतादेङोतिपरेपूर्वरूपमेकादेशःस्यात् हरेव विष्णोव सर्वत्रविभाषागोः
लोकेवेदेचैङंतस्य गोरतिवाप्रकृतिभावःपदांते गोअग्रं गोग्रं एङंतस्य
किं चित्रग्वग्रं पदांतेकिं गोः अनेकाल्शित्सर्वस्य अनेकालादेशःशि
च्चसर्वस्यस्यात् इतिप्राप्ते ङिच्च ङिदनेकालप्यंत्यस्यैवस्यात् अवङ्स्फो
टायनस्य पदांते एङंतस्यगोरवङ्वाचि गवाग्रं पदांतेकिं गवि इंद्रेच गो
रवङ्स्यादिंद्रे गवेंद्रः दूराद्धूतेच दूरात्संबोधनेवाक्यस्यटेःप्लुतोवाउदात्तः प्लुतप्र
गृह्याअचिनित्यं एतेचिनित्यंप्रकृत्यास्युः एहि कृष्ण३ अत्रगौश्चरति
ह्रस्वंलघु ह्रस्वमक्षरंलघुसंज्ञंस्यात् संयोगेगुरु संयोगेपरेह्रस्वंगुरुः
स्यात् दीर्घंच दीर्घमक्षरंगुरुसंज्ञंस्यात् गुरोरनृतोनंत्यस्याप्येकैकस्यप्राच
ां दूराद्धूतेपदस्यांत्यस्य टेःऋङिन्नस्यानंत्यस्यापिगुरोर्वाप्लुतःस्यात् दे३

मध्य० ८

वदत्र देवदत्ता ३ त्र देवदत्ता ३ गुरोः किं वकारादकारस्य माभूत् अन्ततः किं के
का ३ एकैकग्रहणं पर्यायार्थं ईदूदेद्द्विवचनं प्रगृह्यं ईदूदेदंतं द्विवचनं प्रगृह्य
संज्ञं स्यात् हरी एतौ विष्णू इमौ गंगे अमू मणीवोष्ट्रस्येति इवार्थे वशब्दो वा श
ब्दो वा बाध्यः अदसो मात् अस्मात्परावीदूतौ प्रगृह्यसंज्ञौ स्तः अमी ईशाः रामकृ
ष्णावमू आसाते मात्किं अमुकेत्र असति माद्ग्रहणे एकारोप्यनुवर्तेत चादयो
सत्वे अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः प्रादयः एतेपि तथा वस्तुतः लक्ष
णं यत्र सर्वनाम प्रयुज्यते इत्थमित्युच्यते सोर्थो सेद्र्यत्वेन विवक्षितः १ निपात ए
काजनाङ् एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात् इ इंद्रः उ उमेशः ईषदर्थे
क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् १
आ एवं नु मन्यसे आ एवं किल तत् अन्यत्र ङित् ईषदुष्णं ओष्णं। ओत्

ओदंतो निपातः प्रगृह्यः अहो ईशाः संबुद्धौ शाकल्यस्येतावनार्षे संबुद्धिनिमित्त
ओकारो वा प्रगृह्यो अवैदिके इतौ विष्णो इति विष्णइति विष्णविति मय उञो
वो वा मयः परस्य उञो वो वा स्यादचि किमु उक्तं किम्वुक्तं इकोऽसवर्णे शाकल्य
स्य ह्रस्वश्च पदांता इकः प्रकृत्या वा स्युरसवर्णेचि ह्रस्वविधिसामर्थ्यान्न स्वर
संधिः चक्रि अत्र चक्र्यत्र पदांताः किं गौर्यौ न समासे वाप्यश्वः ऋत्यकः
ऋति परे पदांता अकः प्राग्वत् ब्रह्म ऋषिः ब्रह्मर्षिः पदांताः किं आर्छत् १
१ इति स्वरसंधिः स्तोः श्चुना श्चुः सकारतवर्गयोः शकारचवर्गाभ्यां योगे शका
रचवर्गौ स्तः हरिश्शेते रामश्चिनोति सच्चित् शार्ङ्गिञ्जय शात्परस्य तोर्न
विश्नः प्रश्नः ष्टुना ष्टुः स्तोः ष्टुना योगे ष्टुः स्यात् रामष्षष्ठः रामष्टीकते पेष्टा
तट्टीका चक्रिण्ढौकसे न पदांताट्टोरनाम् पदांतात् टवर्गात्परस्य स्तोः ष्टुर्न षट्सं
तः षट् ते पदांतात्किं ईट्टे टोः किं सर्पिष्टमं अनाम्नवतिनगरीणामिति वाच्यं

किम्वुक्तं २

शात्

टी २

मध्य॰ कौमु॰ ७

षड्णां

षण्णां षण्णवतिः षण्मयाः षडूनैर्वतिः षण्णगर्याः षड्णगर्याः तोःषि तवर्ग-
स्य षकारे परे न ष्टुत्वं सन्षष्ठः झलांजशोंते पदांतेझलांजशःस्युः वागीशः यरोनु
नासिकेनुनासिकोवा यरःपदांतस्यानुनासिकेपरेनुनासिकोवास्यात् एतन्मु
रारिः एतद्मुरारिः प्रत्ययेभाषायांनित्यं तन्मात्रं चिन्मयं तोर्लि तवर्गस्य ल
कारेपरेपरसवर्णःस्यात् तल्लयः विद्वाँल्लिखति नस्यानुनासिकोलँः उदःस्था
स्तंभोःपूर्वस्य उदःपरयोःस्थास्तंभोःपूर्वसवर्णःस्यात् तस्मादित्युत्तरस्य पंच
मीनिर्देशेनक्रियमाणंकार्यंवर्णांतरेणाव्यवहितस्यपरस्यज्ञेयं आदेःपरस्य बोछे
परस्ययद्विहितंतत्तस्यादेर्बोध्यं श्वासवतो [illegible] तोघोषवतोमहाप्राणस्यसस्य
वा द्वराएवथकारः झरोझरिसवर्णे हलःपरस्यझरोलोपोवास्यात्सवर्णेझरि खरि ७
च खरिपरेझलांचरस्युः इत्युदोदस्यतः उत्थानं उत्थ्थानं उत्तंभनं उत्थ

इतिसस्थपः २

तंभनं झयोहोन्यतरस्यां झयःपरस्यहस्यवापूर्वसवर्णःस्यात् नादस्यघोषस्य
महाप्राणस्यहस्यतादृशोवर्गचतुर्थः वाग्घरिः वाग्हरिः शश्छोटि पदांताज्झ
यःपरस्यशस्यछोवाटि तच्छिवः तच्शिवः पदांतात्किं विरप्शं छत्वममी
तिवाच्यं तच्छ्लोकेन तच्श्लोकेन मोनुस्वारः मांतस्यपदस्यानुस्वारोहलि हरिं
सरस्येति किं गम्यते ५ वंदे नश्चापदांतस्यझलि नस्यमस्यचापदांतस्यझल्यनुस्वारःस्यात् यशांसि
आक्रंस्यते अनुस्वारस्यययिपरसवर्णः शान्तः वापदांतस्य पदांतानुस्वा स्या
रस्ययथिपरेपरसवर्णोवास्यात् त्वङ्करोषि त्वंकरोषि मोराजिसमःक्वौ क्वि
बंतेराजतौपरेसमोमस्यमएवस्यात् सम्राट् हेमपरेवा मपरेहकारेपरेमस्य
मोवास्यात् किम्ह्मलयति किंह्मलयति यवलपरेयवलावा यवलपरेहकारे
परेमस्ययवलावास्युः किय्ँह्यः किंह्यः किव्ँह्वलयति किंह्वलयति किल्ँह्ला
दयति किंह्लादयति नपरेनः नपरेहकारेपरेमस्यनोवास्यात् किन्ह्नुते।

× नश्च । नस्य सस्य वा पदांतस्य सस्य नुस्वारः स्यात्

म
मध्य०
८

किंकुर्वे ङः सि धुट् अपरस्य सस्य धुड्वा स्यात् आद्यंतौ टकितौ टित्कितौ यस्यो
क्तौ तस्य क्रमादाद्यंतावयवौ स्तः षट्संतः षट्संतः नश्च नांतात्परस्य सस्य
धुड्वा स्यात् सन्त्सः सन्सः ङ्णोः कुक्टुक् शरि ङकारणकारयोः कुक्टुकौ वा
गमौ वा स्तः शरि परे प्राङ्क्षष्ठः प्राङ्षष्ठः सुगण्ट्षष्ठः सुगण्षष्ठः शि तु
क् पदांतस्य नस्य शे परे तुग्वा स्यात् सञ्च्छंभुः सञ्छंभुः सञ्च्शंभुः सञ्शं
भुः ङमो ह्रस्वादचि ङमुण्नित्यं ह्रस्वात्परो यो ङम् तदंतं यत्पदं तस्मात्परस्याचो
नित्यं ङमुडागमः स्यात् प्रत्यङ्ङात्मा सुगण्णीशः सन्नच्युतः समः सुटि स
मो रुः स्यात् सुटि परे अत्रानुनासिकः पूर्वस्य तु वा अत्र रुप्रकरणे रोः पूर्वस्यानु
नासिको वा स्यात् अनुनासिकात्परोनुस्वारः अनुनासिकं विहाय रोः पूर्वस्मा ८
त्परोनुस्वारागमः स्यात् खरवसानयोर्विसर्जनीयः खरि अवसाने च पदांत

× नश्छव्यप्रशान् । नांतस्य पदस्य रुर्वा स्यात् । सन्त्सः । सन्सः ४७

१४ लघुप्रशान्नुशब्दस्य

स्य रस्य विसर्गः स्यात् संपुंकानां सो वक्तव्यः सं॑स्कर्ता संस्कर्ता पुमः खय्यम्
परे अम्परे खयि पुंशब्दस्य रुः स्यात् पुं॑स्कोकिलः पुंस्कोकिलः नश्छव्यप्र
शान् अम्परे छवि नांतस्य पदस्य रुः स्यात् विसर्जनीयस्य सः खरि परे चक्रिँ
स्त्रायस्व चक्रिंस्त्रायस्व अप्रशान् किं प्रशान् तनोति पदांतस्य किं हन्ति
नॄन्पे नॄनित्यस्य रुर्वा पपरे कुप्वोः ᳲकᳲपौ च कवर्गे पवर्गे च परे विसर्गस्य ᳲकᳲ
पौ स्तस्त्वाद्विसर्गः स्यात् नॄँᳲपाहि नॄंᳲपाहि नॄँः पाहि नॄन्पाहि सोपदादौ
विसर्गस्य सः स्यादपदादौ घोः कुप्वोः पयस्पाशं यशस्कल्पं यशस्कं यशस्का
म्यति अनव्ययस्येति वाच्यं प्रातःकल्पं प्रातःकल्पं काम्ये रोरेवेति वाच्यं
नेह गीःकाम्यति गीःकाम्यति इणः षः इणः परस्य विसर्गस्य षः स्यात् पू
र्वविषये सर्पिष्पाशं सर्पिष्कल्पं सर्पिष्कं सर्पिष्काम्यति कस्कादिषु च एष्विण

मध्य० ५ उत्तरस्य विसर्गस्य षः स्यात् अत्र तु सः कःपयोरयं वादः कस्कः कौतस्कु
तः सर्पिष्कुंडिका धनुष्कपालमित्यादि आकृतिगणोयं तस्य परमाम्रेडि
तं द्विरुक्तस्य परं रूपमाम्रेडितं स्यात् कानाम्रेडिते कान्नकारस्य रुः स्या
दाम्रेडिते परे कांस्कान् कांस्कान् छे च ह्रस्वस्य छे परे तुगागमः स्यात्.
अच्छः आङ्माङोश्च तुक्छे आच्छादयति माच्छिदत् दीर्घात् छे
छे प्लुतः पदांताद्वा दीर्घात् पदांतात् छे परे तुग्वा स्यात् लक्ष्मीच्छाया लक्ष्मी
छाया इति हल्संधिः विसर्जनीयस्य सः खरि परे विसर्गस्य सः स्यात्
शर्परे विसर्जनीयः शर्परे खरि विसर्गस्य विसर्गो न त्वन्यत् कः त्सरुः
घनाघनः क्षोभणः वा शरि शरि विसर्गस्य विसर्गो वा स्यात् हरिः शेते ५
हरिश्शेते खर्परे शरि वा विसर्गलोपो वक्तव्यः हरि स्फुरति ससजुषोरुः

... हरिस्फुरति

पदांतस्य सस्य सजुषश्शब्दस्य च रुः स्यात् अतोरोरप्लुतादप्लुते अप्लुतादतः पर
स्य रोरुः स्यादप्लुते ति. शिवोर्च्यः अतः किं देवा अत्र देवास्त्र अति किं श्व आ
गंता श्वयागंता अप्लुतात्किं एहि सुस्रोता३ अत्र स्नाहि प्लुतस्यासिद्धत्वादतः
परोयं अप्लुतादिति विशेषणं तु न सामर्थ्यान्नासिद्धत्वं तपरकरणस्य तु न
सामर्थ्यं दीर्घनिवृत्त्यार्थितार्थत्वात् अप्लुते इति किं तिष्ठतु पय आ३ ग्निदत्त
हशि च अप्लुतादतःपरस्य रोरुः स्याद्धशि परे शिवो वंद्यः भोभगोअघोअ
पूर्वस्य योशि एतत्पूर्वस्य रोर्यादेशो शि परे देवा इह देवायिह भोसभगोसअ
घोस इति सांता निपाताः तेषां रुत्वे यत्वे च कृते व्योर्लघुप्रयत्नतरः शाकटा
यनस्य अशि पदांते ओतांगार्ग्यस्य पदांतस्य लघुप्रयत्नस्य यस्य नित्यं
लोपः स्यात् भो अच्युत लघुप्रयत्नपक्षे भोयच्युत पदांतस्य किं तोयं ह

मध्य० ३० लि सर्वेषां भो भगो अघो अपूर्वस्य यस्य लोपः स्यादशि हलि सर्वेषां मतेन भोदे निसं
वाः भगोनमस्ते अघोयाहि देवायांति रोसुपि अह्नो रेफादेशो न तु सुपि
अहरहः अहर्गणः असुपि किं अहोभ्यां अत्रार्हन्निति रुत्वं रूपरात्रिरथं
तरेषु रुत्वं वाच्यं अहोरूपं गतमहोरात्रिरेषा एकदेशविकृतमनन्यायेन
नाहोरात्रः एकदेशविकृतमनन्यवद्भवति अहोरथंतरं अहरादीनां प
त्यादिषु रेफो वा विसर्गापवादः अहर्पतिः गीर्पतिः धूर्पतिः पक्षे विसर्गो
पध्मानीयौ रोरि रेफस्य रेफे परे लोपः स्यात् ढ्रलोपे पूर्वस्य दीर्घोणः
ढरेफयोर्लोपनिमित्तयोः परतः पूर्वस्याणो दीर्घः स्यात् पुनारमते अ
णः किं दृढः मनस्रथ इत्यत्र रुत्वे कृते हशि चेति उत्वे रोरीति लोपे च प्राप्ते ३०
विप्रतिषेधे परं कार्यं तुल्यबलविरोधे परं कार्यं स्यात् इति लोपे प्राप्ते

१ अतो गुणे ॥ अपदान्तादकाराद्गुणे परतः पररूपमेकादेशः स्यात् । इति प्राप्ते । परत्वात्सर्वसवर्णदीर्घ [illegible]

याये बुद्धद्वेत्तौस्तः ॥ विभक्तिश्च । सुप्तिङौ विभक्तिसंज्ञौ स्तः । न विभक्तौ तुस्माः । विभ
क्तिस्थास्तवर्गसकारमकारा इतो न ॥ इति सस्य नेत्वं । रामाः । एकवचनं संबुद्धिः । संबो
धने प्रथमाया एकवचनं संबुद्धिसंज्ञं स्यात् । यस्मात्प्रत्ययविधिस्तदादि प्रत्यये ऽगं ।
यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्य रूपं तस्मिन्परे अंगसंज्ञं स्यात् । एङ्ह्र
स्वात्संबुद्धेः ॥ एङन्ताद्ध्रस्वान्ताच्चांगाद्धल्लुप्यते संबुद्धेश्चेत् ॥ हे राम । हे रामौ ।
हे रामाः । अमि पूर्वः । अकोम्यचि परे पूर्वरूपमेकादेशः स्यात् । रामम् । रामौ । लश कर्मणि
क्वतद्धिते । तद्धितवर्जप्रत्ययाद्याल्लशकवर्गा इतः स्युः । तस्माच्छसो नः पुंसि । द्वितीया
पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात् पुंसि । अट्कुप्वाङ्नुम्व्यवा
येपि । अट् कवर्ग पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यव
॥ धानेपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे । इति प्राप्ते । पदान्तस्य ॥

ता

म॰कौ॰ ॥ १० ॥

नस्यणो णः। रामान्॥ टाङसिङसामिनात्स्याः। अदंतादादीनामिनादयस्युः। णत्वं। रामेण। सु
पि च। यञादौ सुप्यतोंगस्य दीर्घः। रामाभ्यां। अतो भिस ऐस्। अतोंगात्परस्य भिस ऐस्स्या
त्। अनेकाल्शित्सर्वस्य। वृद्धिः। रामैः। ङेर्यः। सन्निपातलक्षणो विधिरनिमित्तं तद्विघा
तस्य। अतोंगात्परस्य ङेर्यादेशः॥ स्थानिवदादेशोनल्विधौ। आदेशः स्थानिवत्स्यान्न त्वला
न्यलाश्रयविधौ। इति स्थानिवत्वात्सुपि चेति दीर्घः। रामाय। रामाभ्यां। बहुवचने झल्ये चतुर्थी स्प
त्। झल्यादौ बहुवचने सुप्यतोंगस्यैकारः। रामेभ्यः। सुपि किं। पचध्वं। वावसाने। अ प्रदीने
वसाने झलां चरो वा स्युः। रामात्। रामाद्॥ रामाभ्यां। रामेभ्यः। रामस्य। ओसि च।
अतोंगस्यैकारः। रामयोः। ह्रस्वनद्यापो नुट्। ह्रस्वांतान्नद्यंतादाबंताच्चांगात्प
रस्यामो नुडागमः स्यात्॥ नामि। अजंतांगस्य दीर्घः। रामाणां। रामे। रामयोः। ए ॥१०
त्वह्लते। आदेशप्रत्यययोः। इण्कुभ्यां परस्यापदांतस्यादेशस्य प्रत्ययावयवस्य च
यः सस्तस्य मूर्धन्यादेशः। ईषद्विवृतस्य सस्य तादृश एव षः। रामेषु॥ एवंकृ

शेषे षष्ठी ३ आधारे सप्तम

अनाहन्निति रुत्वं। रूपरात्रिरथंतरेषु रुत्वं वाच्यं। हे अहो रूपं। गतमहो रात्रिरेषा। एक
देशविकृतन्यायेना होरात्रः। एकदेशविकृतमनन्यवद्भवति। अहो रथंतरं। अहरादी
नां पत्यादिषु रेफो वा। विसर्गापवादः। अहर्पतिः। गीर्पतिः। धूर्पतिः। पक्षे विसर्गोपध्मा
नीयौ। रोरि। रेफस्य रेफे परे लोपः स्यात्॥ ढ्रलोपे पूर्वस्य दीर्घोणः। ढरेफयोर्लोपनिमित्त
योः परतः पूर्वस्याणो दीर्घः स्यात्। पुनारमते। अणः किं। तृढः। मनस्+रथ इति रुत्वे उत्वे कृते ह
शि चेत्युत्वे रोरीति लोपे च प्राप्ते। विप्रतिषेधे परं कार्यं। तुल्यबलविरोधे परं कार्यं स्यात्।
इति प्राप्ते। पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वादुत्वमेव। मनोरथः। एतत्तदोः सुलो
पोकोरनञ्समासे हलि। अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समा
से। एष विष्णुः। स शंभुः। अकोः किं। एषको रुद्रः। अनञ्समासे किं। असः शिवः। ह
लि किं। एषोत्र॥ सोचि लोपे चेत्पादपूरणं। स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे स

म॰ कौ॰

॥१०

सेवपूर्यते। सेमामा वृद्धिः प्रक्रियासेषदा रात्थीरामः॥ ॥इति विसर्गसंधिः॥ ॥अ
र्थवदधातुरप्रत्ययः प्रातिपदिकं॥ धातुं प्रत्ययं प्रत्ययांतं च वर्जयित्वार्थवच्छब्दरूपं प्राति
पदिकसंज्ञं स्यात्॥ कृत्तद्धितसमासाश्च॥ कृत्तद्धितांतौ समासाश्च तथा स्युः॥ स्वौजसमौ
ट्छष्टाभ्यांभिस् ङेभ्यांभ्यस् ङसिभ्यांभ्यस् ङसोसांङ्योस्सुप्॥ सु औ जस् प्रथमा॥ अम् औट्
शस् द्वितीया॥ टा भ्यां भिस् तृतीया॥ ङे भ्यां भ्यस् चतुर्थी॥ ङसि भ्यां भ्यस् पंचमी॥ ङ
स ओसां षष्ठी॥ ङि ओस् सुप् सप्तमी ति॥ ङ्याप्प्रातिपदिकात्॥ ङ्यंतादाबंतात्प्रातिपदिका
च्च परे स्वादयः प्रत्ययाः स्युः॥ सुपः॥ सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनब
निश संज्ञास्युः॥ द्व्येकयोर्द्विवचनैकवचने॥ द्वित्वैकत्वयोरेते स्तः॥ विरामोवसानं॥ वर्णाना
मभावोवसानं स्यात्॥ रुत्वविसर्गौ॥ रामः॥ सरूपाणामेकशेष एकविभक्तौ॥ एक
विभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते॥ प्रथमयोः पूर्वसवर्णः॥
अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्॥ इति प्राप्ते॥ नादिचि॥
आदिचि परे न पूर्वसवर्णदीर्घः॥ वृद्धिरेचि॥ रामौ॥ बहुषु बहुवचनं॥ चुटू॥ प्रत

पेर

क॰ ५ बहुत्वे एतत्स्यात्

स्यादयोप्यदंताः। सर्वादीनि सर्वनामानि। सर्वादीनि शब्दरूपाणि सर्वनामसंज्ञानि
स्युः॥ सर्व॰ विश्व॰ उभ॰ उभय॰ डतर॰ डतम॰ अन्य॰ अन्यतर॰ इतर॰ त्वत्॰ त्व॰ ने
म॰ सम॰ सिम॰ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां॥
स्वमज्ञातिधनाख्यायां। अंतरंबहिर्योगोपसंव्यानयोः। त्यद्॰ तद्॰ यद्॰ एतद्॰
इदम्॰ अदस्॰ एक॰ द्वि॰ युष्मद्॰ अस्मद्॰ भवतु॰ किम्॥ जसः शी। अदंतात्सर्व
नाम्नो जसः शी स्यात्। अनेकाल्शित्सर्वस्य। सर्वे। सर्वनाम्नः स्मै। अतः
सर्वनाम्नो ङे स्मै। सर्वस्मै। ङसिङ्योः स्मात्स्मिनौ। अतः सर्वनाम्न एतयोरेतौ
स्तः। सर्वस्मात्। आमि सर्वनाम्नः सुट्। अवर्णांता[illegible]त्सर्वनाम्नो वि
हितस्यामः सुडागमः स्यात्। एत्वषत्वे। सर्वेषां। सर्वस्मिन्। शेषं रामव
त्। एवं विश्वादयोप्यदंताः॥ उभशब्दो द्विवचनांतः। उभौ २ उभाभ्यां ३ उभयोः २

असंज्ञायांकिं ॥ उत्तराःकुरवः ॥ ५

म०कौ०
११

तस्येह पाठोऽकजर्थः। डतरडतमौ प्रत्ययौ। प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः।।
नेम इत्यर्द्धे। समः सर्वपर्यायः। तुल्यपर्यायस्तु न। समानामिति ज्ञापकात्। पूर्वपरा
वरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां। एषां व्यवस्थायामसंज्ञायां सर्वना
मसंज्ञा गणसूत्रात्सर्वत्र या प्राप्ता सा जसि वा। पूर्वे। पूर्वाः। स्वाभिधेयापेक्षाव
धिनियमो व्यवस्था। व्यवस्थायां किं। दक्षिणा गाथकाः। कुशला इत्यर्थः। स्वम
ज्ञातिधनाख्यायां। ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा। स्वे।
स्वाः। आत्मीयाः। आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः। ज्ञातयोऽर्था
वा। अन्तरं बहिर्योगोपसंव्यानयोः। बाह्ये परिधानीये चार्थे अन्तरशब्दस्य प्रा
प्ता संज्ञा जसि वा। अन्तरे। अन्तरा वा गृहाः। बाह्या इत्यर्थः। अन्तरे। अन्तरा वा शा ११
टकाः। परिधानीया इत्यर्थः। अन्तरमिति गणसूत्रेऽपुरीति वक्तव्यं। अन्तरायां

याः अ

पुरि। पूर्वादिभ्यो नवभ्यो वा। एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः। पूर्वस्मात्। पूर्वात्। पू
र्वस्मिन्। पूर्वे। एवं परादीनामपि। शेषं सर्ववत्। संज्ञोपसर्जनीभूतास्तु न सर्वादयः।
सर्वो नाम कश्चित्तस्मै सर्वाय देहि। अतिक्रान्तः सर्वमतिसर्वस्तस्मै अतिसर्वाय
देहि। तृतीयासमासे। सर्वनामता न। मासपूर्वाय। तृतीयासमासार्थवाक्येऽपि न।
मासेन पूर्वाय [illegible]। उक्तसंज्ञानां वर्णाश्रमेतराणाम्। विभाषा जसि। वर्णाश्रमे
तरे। वर्णाश्रमेतराः। प्रथमचरमतयाल्पार्धकतिपयनेमाश्च। एते जस्युक्तसंज्ञा वा स्यु
स्युः। प्रथमे। प्रथमाः। तयप्प्रत्ययः। द्वितये। द्वितयाः। शेषं रामवत्। नेमे। ने
नेमाः। शेषं सर्ववत्। तीयस्य ङित्सु वा। द्वितीयस्मै। द्वितीयाय। इत्यादि। एवं तृ
तीयः। निर्जरः। जराया जरसन्यतरस्याम्। जराया जरस् स्याद्वाजादौ विभक्तौ। पदा
ङ्गाधिकारे तस्य च तदन्तस्य च। निर्दिश्यमानस्यादेशा भवन्ति। एकदेशविकृतमनन्यवत्

म० कौ०
१२

नि

रः। इति जरशब्दस्य जरस्। निर्जरसौ। निर्जरसः। इत्यादि। पक्षे हलादौ च रामवत्। विश्वपाः।
दीर्घाज्जसि च। दीर्घाज्जसि इचि च न पूर्वसवर्णदीर्घः। हे विश्वपाः। विश्वपौ। विश्वपाः। विश्वपां।
विश्वपौ। सुडनपुंसकस्य। स्वादिपंचवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य। स्वादि नि३
ष्वसर्वनामस्थाने। कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यात्। यचि भं।
यादिष्वजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भं स्यात्। आकडारा
देका संज्ञा। इत ऊर्ध्वं कडाराः कर्मधारय इत्यतः प्राग् एकस्यैकैव संज्ञा ज्ञेया या परानव
काशा च। तेन शसादावचि भसंज्ञैव न पदत्वं। आतो धातोः। आकारान्तो यो धातुस्तदन्त
स्य भस्याङ्गस्य लोपः स्यात्। अलोन्त्यस्य। विश्वपः। विश्वपाभ्यामित्यादि। एवं शंखध्मा
दयः। धातोः किं। हाहान्। आत इति योगविभागाद्धातोरप्यालोपः क्वचित्। क्तः। क्तः।
हरिः। हरी। जसि च। ह्रस्वान्तस्याङ्गस्य गुणः। हरयः। ह्रस्वस्य गुणः। संबुद्धौ। हे हरे। हरिं। १२
हरी। हरीन्। शेषो घ्यसखि। शेष इति स्पष्टार्थं। ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसं

स्यात्। जसि परे ४२ ह्रस्वस्य गुणः स्यात्२

ज्ञं स्यात्। आङो नास्त्रियां। घेः परस्याङो ना स्यादस्त्रियां। आङिति टासंज्ञा प्राचां। हरिणा।
हरिभ्यां। हरिभिः। घेर्ङिति। घिसंज्ञस्याङ्गस्य ङिति सुपि गुणः। हरये। हरिभ्यां। हरिभ्यः। गुणे
कृते। ङसिङसोश्च। एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्। हरेः। हर्योः। हरी
णां। अच्च घेः। इदुद्भ्यामुत्तरस्य ङेरौ घेरत्। हरौ। हर्योः। हरिषु। एवं रविकव्यादयः।
न अनङ् सौ। सख्युरङ्गस्यानङादेशोऽसंबुद्धौ सौ। अलोन्त्यात्पूर्व उपधा। अन्त्यादलः पू
र्वो वर्ण उपधासंज्ञः स्यात्। सर्वनामस्थाने चासंबुद्धौ। नान्तस्योपधाया दीर्घोऽसंबुद्धौ
पे ५ सर्वनामस्थाने। अपृक्त एकाल्प्रत्ययः। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्। ह
लन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसी इत्येतदपृक्तं हल् लुप्यते। प्रत्ययलोपे
प्रत्ययलक्षणं। प्रत्ययलोपे सति तदाश्रितं कार्यं स्यात्। नलोपः प्रातिपदिकान्तस्य।
प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः स्यात्। सखा। सख्युरसंबुद्धौ।
सख्युरङ्गात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्। अचो ञ्णिति। अजन्ताङ्गस्य

४ एकाल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात्। ५

पतिशब्दः समासएवे ४ ह्रस्वस्यगुणः १ एतेसंख्यासंज्ञास्युः ५

म०कौ० ११ शेर्ङित्याद्विनिालितिवप्रत्ययेपरे। सखायौ। सखायः। हिसखे। सखायं। सखायौ।
सखीन्। सख्या। सख्ये। ख्यत्यात्परस्य। खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतय
णादेशाभ्यां परस्य ङसिङसोरत उत्स्यात्। सख्युः। २। औत्। इतःपरस्य ङेरौत्।
सख्यौ। शेषं हरिवत्। पतिः समास एव। घिसंज्ञः। पत्या। पत्ये। पत्युः। पत्यौ। समा
से तु भूपतये। कतिर्बहुवचनान्तः। बहुगणवतुडति संख्या। डति च। डत्यन्ता संख्या
षट्संज्ञा स्यात्। षड्भ्यो लुक्। षट्संज्ञकेभ्यः परयोर्जश्शसोर्लुक् स्यात्। प्रत्य भ्यः ६
यस्य लुक्श्लुलुपः। लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं
स्यात्। जसि चेति गुणे प्राप्ते। न लुमताङ्गस्य। लुमताशब्देन लुप्ते तन्निमि
त्तमङ्गकार्यं न स्यात्। कति २ कतिभिः। कतिभ्यः २ कतीनां। कतिषु। अस्मद्यु १३
ष्मत्षट्संज्ञकास्त्रिषु सरूपाः। त्रिशब्दो बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः २

त्रिशब्दस्य त्रयादेशः स्यात् १॥

त्रेस्त्रयः। आमि। त्रयाणां। त्रिषु। गौणत्वेऽपि प्रियत्रयाणां। त्यदादीनामः। एषामकारोऽन्तादेशो विभ
क्तौ। द्विपर्यन्तानामेवेष्टिः। द्विशब्दो द्विवचनान्तः। द्वौ २ द्वाभ्यां ३ द्वयोः २ द्विपर्यन्तानां किं। भवान्। भव
न्तौ। पाति लोकमिति पपीः सूर्यः। पप्यौ। पप्यः। हे पपीः। पपीं। पप्यौ। पपीन्। पप्या। पपीभ्यां।
पपीभिः। पप्ये। पप्यः २ पप्योः २ पप्यां। पपी। पपीषु। एवं वातप्रम्यादयः। बह्व्यः श्रेयस्यो यस्य
सः बहुश्रेयसी। यू स्त्र्याख्यौ नदी। ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः। प्रथमलिङ्गग्रहणं
च। पूर्वस्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः। अम्बार्थनद्योर्ह्रस्वः। अम्बार्थानां न
द्यन्तानां च ह्रस्वः स्यात्संबुद्धौ। हे बहुश्रेयसि। आण्नद्याः। नद्यन्तात्परेषां ङितामाडागमः स्या
त्। आटश्च। आटोऽचि परे वृद्धिरेकादेशः स्यात्। बहुश्रेयस्यै। बहुश्रेयस्याः २ बहुश्रेयसीनां।
ङेराम्नद्याम्नीभ्यः। नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् स्यात्। बहुश्रेयस्यां। शेषं पपीवत्। प
अतिलक्ष्मीः। शेषं बहुश्रेयसीवत्। प्रधीः। अचि श्नुधातुभ्रुवां य्वोरियङुवङौ। श्नुप्रत्ययान्तस्य

म०कौ०

१४

वर्णौ। वर्णाः। तस्य धातोर्भ्रुव इत्यस्य चांगस्येयङुवङौ स्तोऽजादौ प्रत्यये परे। इति प्राप्ते। एरनेकाचोऽसंयोग

पूर्वस्य। धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदंतो यो धातुस्तदंतस्यानेकाचोऽङ्गस्य यणजादौ

दौ प्रत्यये परे। प्रध्यौ। प्रध्यः। प्रध्यं। प्रध्यौ। प्रध्यः। प्रध्या। प्रध्यै। शेषं पपीवत्। एवं ग्रामणीः। ग्र

ग्रामणीं नयतीति ग्रामण्यां। गतिश्च। प्रादयः क्रियायोगे गतिसंज्ञाः स्युः। गतिकारकेतरपूर्वस्य यण्नेष्यते।। पर४

शुद्धधियौ। नभ्रः सुधियोः। एतयोर्यण्सुपि यण्न सुधियौ। सुधिय इत्यादि। सुखमिच्छतीति सु

खीः। सुख्युः। सुतमिच्छतीति सुतीः। सुत्युः। शेषं प्रधीवत्। शंभुर्हरिवत्। एवं भान्वादयः।।

तृज्वत्क्रोष्टुः। असंबुद्धौ सर्वनामस्थाने। क्रोष्टु इत्यस्य क्रोष्टृ प्रयोक्तव्य इत्यर्थः। ऋतो ङिसर्व

नामस्थानयोः। ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च। इति प्राप्ते। ऋदुशनस्पुरुदंसोऽनेहसां

ऋतस्य३ च। ऋदंतानामुशनसादीनां चानङ् स्यादसंबुद्धौ सौ। अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृ १८

होतृपोतृप्रशास्तॄणां। अप्‌ादीनामुपधाया दीर्घोऽसंबुद्धौ सर्वनामस्थाने। क्रोष्टा। क्रोष्टा

क्रोष्टुशब्दस्त्रिजंतवद्रूपेल भते४ पेर४

स्यात्२

रौ। क्रोष्टारः। क्रोष्टारं। क्रोष्टारौ। क्रोष्टून्। विभाषा तृतीयादिष्वचि। तृतीयादिष्वजादिषु क्रो

ष्टुर्वा तृज्वत्। क्रोष्ट्रा। क्रोष्ट्रे। क्रोष्ट्रे। ऋत उत्। ऋतो ङसिङसोरति परे उदेकादेशः स रपरः

स्यात्। रात्सस्य। रेफात्संयोगांतस्य सस्यैव लोपो नान्यस्य। रस्य विसर्गः। क्रोष्टुः। क्रोष्ट्रोः। नुम

चिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन। क्रोष्टूनां। क्रोष्टरि। पक्षे हलादौ च शंभुवत्। हूहूः। हूहौ

वित्यादि। अतिचमूशब्दे तु नदीकार्यं विशेषः। हे अतिचमु। अतिचम्वै। अतिचम्वाः।२

अतिचमूनां। अतिचम्वां। खलपूः। ओः सुपि। धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदं

तो यो धातुस्तदंतस्यानेकाचोऽङ्गस्य यणजादौ सुपि। खलप्वौ। खलप्वः। एवं सुल्वादयः। स्व

भूः। स्वभुवौ। स्वभुवः। वर्षाभूः। वर्षाभ्वश्च। अस्य यण् स्यादजादि सुपि। वर्षाभ्वावित्यादि। दृन्भूः।

दृन्करपुनः पूर्वस्य भुवो यण्वक्तव्यः। दृन्भ्वौ। दृन्भ्वः। एवं करभूः। पुनर्भूः। धाता। धातारौ। धा

तारः। हे धातः। ऋवर्णान्नस्य णत्वं वाच्यं। धातॄणां। एवं नप्त्रादयः। नप्त्रादिग्रहणं व्युत्पत्तिपक्षे

स्यादवि४ इत्यकारान्ता अत्राद्ग्रोस्वयं भवन्।२

म०कौ० नियमार्थं। तेनेह न। पिता। पितरौ। पितरः। पितरं। शेषं धातृवत्। एवं जामात्रादयः। ना। नरौ। नरः। नृन्।
॥ १५ अस्य नामि वा दीर्घः। नृणां। नृणां। गोतो णित्। ओकाराद्विहितं सर्वनामस्थानं णिद्वत्। गौः। गावौ।
गावः। औतोम्शसोः। ओतोम्शसोराकार एकादेशः स्यात्। गां। गावौ। गाः। गवा। गवे। गोः २
गवोः। रायो हलि। अस्याकारादेशो हलि। राः। रायौ। रायः। राभ्यामित्यादि। ग्लौः। ग्लावौ। ग्ला
वः। ग्लौभ्यामित्यादि॥ ॥इत्यजंताः पुल्लिंगाः॥ ॥रमा। औङ आपः। आबंतादं
गादौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा। रमे। रमाः। संबुद्धौ च। आप एकारः। हे रमे २
हे रमाः। आङि चापः। आङि ओसि चापं एकारः स्यात्। रमया। रमाभ्यां। रमाभिः। याडापः॥ आ ४
आपो ङितो याट्। वृद्धिः। रमायै। रमाभ्यः। रमायाः। २ रमयोः २ रमाणां। रमायां। रमासु।
सर्वनाम्नः स्याड्ढ्रस्वश्च। आबंतात्सर्वनाम्नो ङितः स्याट् आपश्च ह्रस्वः। सर्वस्यै। सर्वस्याः २ सर्वा
सां। सर्वस्यां। शेषं रमावत्। एवं विश्वादय आबंताः। विभाषा दिक्समासे बहुव्रीहौ। सर्वना १५
मता वा। उत्तरपूर्वस्यै। उत्तरपूर्वायै। अपुरीत्युक्तेः। अंतरायै। नगर्यै। तीयस्यति वा संज्ञा॥

आपः परस्य ङितो वचनस्य याडागमः स्यात् ४

नेह। २ दिक्शब्दा न बहुव्रीहौ सर्वनामता वा स्यात्॥ २

श्री

द्वितीयस्यै। द्वितीयायै। एवं तृतीया। अंबार्थनद्योर्ह्रस्वः। हे अंब। हे अक्क। हे अल्ल। असंयुक्ता ये ड
लकास्तद्वतां ह्रस्वो न। हे अंबाडे। हे अंबाले। हे अंबिके। जरा। जरसौ। जर इत्यादि पक्षे
रमावत्। गोपाः। विश्वपावत्। मतिः। मती। मत्या। ङिति ह्रस्वश्च। इयङुवङ्स्थानौ स्त्रीश
ब्दभिन्नौ नित्यस्त्रीलिंगावीदूतौ ह्रस्वौ च इवर्णोवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे। मत्यै। मतये।
मत्याः। मतेः। इदुद्भ्यां। नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम्। मत्यां। मतौ। शेषं हरि
वत्। एवं बुद्ध्यादयः। त्रिचतुरोः स्त्रियां तिसृचतसृ। स्त्रीलिंगयोरेतयोरेतौ स्तो विभक्तौ। अचि
र ऋतः। तिसृचतसृ ऋतो रादेशोऽचि। गुणदीर्घोत्वानामपवादः। तिस्रः २ तिसृभिः
तिसृभ्यः २ आमि नुट्। न तिसृचतसृ। एतयोर्नामि दीर्घो न। तिसृणां। तिसृषु। द्वे २ द्वाभ्यां ३
द्वयोः २ गौरी। गौर्यौ। गौर्यः। गौरीम्। गौरीः। इत्यादि। एवं नद्यादयः। लक्ष्मीः। शेषं गौ
रीवत्। एवं तरी। तंत्र्यादयः। स्त्री। हे स्त्रि। स्त्रियाः। अस्य यङ्जादौ प्रत्यये परे। स्त्रियौ। स्त्रियः।
१ = अवी तंत्री तरी लक्ष्मी ह्री धी श्रीणामुणादयः। सप्तानामेव शब्दानां सुलोपो न कदाचन

ल० कौ०
१८
वाम्शसोः। आमिशसि च स्त्रियाइयङ्स्यात्। स्त्रियं। स्त्रीं। स्त्रियः। स्त्रीः। स्त्रिया। स्त्रियै। स्त्रियाः।
परत्वान्नुट्।। स्त्रीणां। स्त्रीषु। श्रीः। श्रियौ। श्रियः। नेयङुवङ्स्थानावस्त्री। इयङुवङोः स्थितिर्य
योस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री। हेश्रीः। श्रियै। श्रिये। श्रियाः। श्रियः। श्रियोः। वामि।
इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ न तु स्त्री। श्रीणां। श्रियां। श्रियां। श्रियि। धेनु
र्मतिवत्। स्त्रियां च। स्त्रीवाचीक्रोष्टुस्तृजंतवद्रूपं लभते। ऋन्नेभ्यो ङीप्। ऋदंतेभ्यो नां
तेभ्यश्च ङीप्स्यात्। क्रोष्ट्री। गौरीवत्। भ्रूः। श्रीवत्। स्वयंभूः। पुंवत्। न षट्स्वस्रादिभ्यः।
एभ्यो ङीप्टापौ न स्तः। स्वसा तिस्रश्चतस्रश्च ननांदा दुहिता तथा। याता मातेति सप्तैते
स्वस्रादय उदाहृताः।। स्वसा। स्वसारौ। स्वसारः। माता। मातरौ। पितृवत्। द्यौर्गोवत्। राः
द्योर्गोवत्। रास्पुंवत्। नौर्ग्लौवत्।। ।। इत्यजंता स्त्रीलिंगाः।। ।। अतोम्। अ १८
तोंगात्क्लीबात्स्वमोरम्। ज्ञानं। एङ्ह्रस्वादिति संबुद्धिहल्लोपः। हे ज्ञान। नपुंसकाच्च। क्ली

स्य स्यात्

बाहौङः शीः स्यात्। भसंज्ञायां। यस्येति च। ईकारे तद्धिते च परे भस्येवर्णावर्णयोर्लोपः स्यात्। इत्यलो
पे प्राप्ते। औङः श्यां प्रतिषेधो वाच्यः। ज्ञाने। जश्शसोः शिः। क्लीबात्। शि सर्वनामस्थानं।
नपुंसकस्य झलचः। झलंतस्याजंतस्य च क्लीबस्य नुमागमः स्यात् सर्वनामस्थाने। मिदचों
त्यात्परः। अचां मध्ये योंत्यस्तस्मात्परस्तस्यैवांतावयवो मिन्स्यात्। उपधायां दीर्घः। ज्ञाना
नि। पुनस्तद्वत्। शेषं पुंवत्। एवं धनफलादयः। अद्ड्डतरादिभ्यः पंचभ्यः। एभ्यः क्लीबेभ्यः
स्वमोरद्ड् आदेशः स्यात्। टेः। डिति परे भस्य टेर्लोपः। कतरत्। कतरद्। कतरे। कतरा
णि। हे कतरत्। शेषं पुंवत्। कतमत्। इतरत्। अन्यत्। अन्यतरत्। अन्यतमस्य त्वन्य
तममित्येव। एकतरात्प्रतिषेधो। एकतरं। ह्रस्वो नपुंसके प्रातिपदिकस्य।। अजं
तस्येत्येव। श्रीपं श्रीपा ज्ञानवत्। स्वमोर्नपुंसकात्। क्लीबात्स्वमोर्लुक्स्यात्। वारि। इकोचि
विभक्तौ। इगंतस्य क्लीबस्य नुमचि विभक्तौ। वारिणी। वारीणि। न लुमता स्यात्। निस्य

मं॰कौ॰
१०

त्वात्सक्षे संबुद्धिनिमित्तो गुणः। हे वारे। हे वारि। घेर्ङितीति गुणे प्राप्ते। वृद्ध्यौत्त्वतृज्वद्भावगु
णेभ्यो नुम् पूर्वविप्रतिषेधेन। वारिणे। वारिणः। वारिणोः। नुमचिरेति नुट्। वारीणां।
वारिणि। हलादौ हरिवत्। तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य। प्रवृत्तिनिमित्तैक्ये
भाषितपुंस्कमिगंतं क्लीबं पुंवद्वा स्याट्टादावचि। अ। नाद्ये। अनादिने। इत्यादि शेषं वा
रिवत्। पालनिमित्तमुपादाय पुंसि शब्दः प्रवर्तते। क्लीबवृत्तौ तदेव स्यादुक्तपुंस्कं तदुच्य
ते। पीलुर्वृक्षः। तत्फलं पीलु। तस्मै पीलुने। अत्र न पुंवत्। प्रवृत्तिनिमित्तभेदात्। अ
स्थिदधिसक्थ्यक्ष्णामनङुदात्तः। टादावचि। अल्लोपोनः। अंगावयवोऽसर्वनामस्था
स्वाप नयजादि[illegible]दिपरो योन् तस्याकारस्य लोपः[illegible]ङिश्योः। दध्ना॥ दध्ने। दध्नः। दध्नोः।
विभाषा ङिश्योः। अंगावयवोऽजादिप्रत्ययपरो योन् तस्याकारस्य लोपो वा ङिश्योः। १०
दध्नि। दधनि। शेषं वारिवत्। एवमस्थिसक्थ्यक्षि। सुधि। सुधिनी। सुधीनि। हे सुधे॥

५पीलुर्वृक्षः फलं पीलु पीलुने न तु पीलवे। वृक्षे निमित्तं पीलुत्वं तत्त्वं तत्फले पुनः।५

८५

आधी

धिने हे सुधि। सुधिनेत्यादि। मधु। मधुनी। मधूनि। हे मधु। हे मधो॥ एवमंब्वादयः। सुलु। सुलुनी।
सुलूनि। सुलुनेत्यादि। धातृ। धातृणी। धातॄणि। हे धातः। हे धातृ। धातॄणां। एवं
ज्ञातृकर्त्रादयः। एच इग्घ्रस्वादेशे। एचस्थाने इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनि। प्रद्यु
नेत्यादि। प्ररि। प्ररिणी। प्ररीणि। प्ररिणा। एकदेशविकृतमनन्यवद्भवति। प्रराभ्यां॥
प्ररीणां। सुनु। सुनुनी। सुनूनि। सुनुनेत्यादि॥ ॥ इत्यजंता नपुंसकलिंगाः॥ ॥
॥हो ढः। झलि पदांते च। लिट्। लिड्। लिहौ। लिहः। लि[illegible]भ्यामित्यादि। लिट्सु। लिट्त्सु। दा
देर्धातोर्घः। झलि पदांते चोपदेशे दादेर्धातोर्हस्य घः स्यात्॥ एकाचो बशो भष् झषंतस्य स्ध्वोः।
धात्ववयवस्यैकाचो झषंतस्य बशो भष् से ध्वे पदांते च। [illegible] व्यपदेशिवद्भावेन धात्ववयव लि॰
त्वाद्भष्भावः। धुक्। धुग्। दुहौ। दुहः। धुग्भ्यां। धुक्षु। वा द्रुहमुहष्णुहष्णिहां। एषां हस्य ना
वा घः स्यात् झलि पदांते च। ध्रुक्। ध्रुग्। ध्रुट्। ध्रुड्। द्रुहौ। द्रुहः। ध्रुग्भ्यां। ध्रुग्भ्यः। ध्रुक्षु॥

द्रुहौ ध्रुड्भ्यां ध्रुड्भ्यः

अ॰ सु॰ १ निमित्तापाये नैमित्तिकस्याप्यपायः।१

म॰ सु॰ १८

धुक्षु। एवं मुह्। धात्वादेः षः सः। स्नुट्। स्नुड्। स्नुक्। स्नुहौ। एवं स्निह्। विश्ववाट्। विश्ववाड्। इ
ग्यणः संप्रसारणम्। यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात्। वाह ऊठ्। भस्य वा
हः संप्रसारणम् ऊठ्। संप्रसारणाच्च। संप्रसारणादचि परे पूर्वरूपमेकादेशः स्यात्। एत्येधत्यूठ्सु।
वृद्धिः। विश्वौहः। इत्यादि। चतुरनडुहोराम् उदात्तः। सर्वनामस्थाने। सावनडुहः। अस्य नुम्
स्यात्सौ परे। आच्छीनद्योरिति इत आ शतादित्यधिकारात् अन्त्यात्स्वरात्परो नुम्। अतो विशेषविहि
तेनापि नुमा आम् न बाध्यते। आमा च नुम् न बाध्यते। संयोगान्तलोपः। संयोगान्तस्य लोपः। नुम्वि
धिसामर्थ्याद्वसुस्रंस्विति दत्वं न। संयोगान्तस्य लोपस्यासिद्धत्वान्न लोपो न। अनड्वान्।
अम् संबुद्धौ। चतुरनडुहोः। हे अनड्वन्। अनड्वाहौ। अनडुहः। वसुस्रंसुध्वंस्वनडु
हां दः। सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते। अनडुद्भ्यामित्यादि। सहेः साडः सः। १८
साड्रूपस्य सहेः सस्य मूर्धन्यादेशः स्यात्। तुराषाट्। तुराषाड्। तुरासाहौ। तुरासाहः।

तुराषाड्भ्यामित्यादि। दिव औत्। दिविति प्रातिपदिकस्य औत्स्यात्सौ। अल्विधित्वेन स्था
निवत्वाभावाद्ध्रस्वादिलोपो न। सुद्यौः। सुदिवौ। दिव उत्। पदान्ते। सुद्युभ्यामित्यादि। च
त्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः। षट्चतुर्भ्यश्च। एभ्य आमो नुडागमः स्यात्। रषाभ्यां
नो णः समानपदे। रषाभ्यां परस्य नस्य णः स्यात् समानपदे। चतुर्णाम्। चतुर्षु। रोः सुपि। रो
रेव विसर्जनीयः सुपि। मो नो धातोः। पदान्ते। प्रशान्। प्रशामौ। किमः कः। विभ
क्तौ। कः। कौ। के। इत्यादि। इदमो मः। सौ। त्यदाद्यत्वापवादः। इदोऽय् पुंसि। इदम इदोऽय्
सौ पुंसि। अयम्। त्यदाद्यत्वम्। अतो गुणे। अपदान्तादतो गुणे परतः पररूपमेका
देशः स्यात्। दश्च। इदमो दस्य मः स्याद्विभक्तौ। इमौ। इमे। त्यदादेः संबोधनं नास्तीत्यु
त्सर्गः। अनाप्यकः। अककारस्य इदम इदोऽन् आपि विभक्तौ। आबिति प्रत्याहारः।
अनेन। हलि लोपः। अककारस्य इदम इदो लोप आपि हलादौ विभक्तौ।। नानर्थके
आपि

म॰सु॰ १९

लोंत्यविधिरनभ्यासविकारे। आद्यंतवदेकस्मिन्। एकस्मिन्क्रियमाणं कार्यमादाविवांत
इवस्यात्। सुपि चेति दीर्घः। आभ्यां। नेदमदसोरकोः। अककारयोरिदमदसोर्भिस ऐ
स्न स्यात्। एभिः। अस्मै। एभ्यः २ अस्मात्। अस्य। अनयोः २ एषां। अस्मिन्। ए
षु। द्वितीयाटौस्स्वेनः। इदमेतदोरन्वादेशे। किंचित्कार्यं विधातुमुपात्तस्य कार्यांतरं
विधातुं पुनरुपादानमन्वादेशः। यथानेन व्याकरणमधीतमेनं छंदोध्यापयेति।
अनयोः पवित्रं कुलं। एनयोः प्रभूतं स्वमिति। एनं। एनौ। एनान्। एनेन। एनयोः २
राजा। नङिसंबुद्ध्योः। नस्य लोपो न ङौ संबुद्धौ च। हे राजन्। ङावुत्तरपदे प्रति
षेधः। अल्लोपोनः। राजानौ। राजानः। राजानं। राजानौ। राज्ञः। नलोपः सुप्स्व
रसंज्ञातुग्विधिषु कृति। सुब्विधौ स्वरविधौ संज्ञाविधौ कृति तुग्विधौ च नलोपोसि
द्धो नान्यत्र। हे राजन्नित्यादौ। इत्यसिद्धत्वादात्वमेत्त्वमैस्त्वं च न। राजभ्यां। राजभिः १९

राजभ्यः। राज्ञि। राजनि। यज्वा। यज्वानौ। यज्वानः। न संयोगाद्वमंतात्।
वमंतात्संयोगादनोकारस्य लोपो न। यज्वनः। यज्वभ्यां। ब्रह्मणः। ब्रह्मणा। इन्
हन्पूषार्यम्णां शौ। एषां शावेवोपधाया दीर्घः स्यात्। सौ च। इन्नादीनामुप
धाया दीर्घोऽसंबुद्धौ सौ परे। वृत्रहा। हे वृत्रहन्। एकाजुत्तरपदे णः। एकाजुत्त
रपदं यस्य तस्मिन्समासे पूर्वपदस्थान्निमित्तात्परस्य प्रातिपदिकांतनुम्विभ
क्तिस्थस्य नस्य णत्वं स्यात्। वृत्रहणौ। वृत्रहणः। हो हंतेर्ञ्णिन्नेषु। ञिति णि
ति प्रत्यये नकारे च परे हंतेर्हकारस्य कुत्वं स्यात्। हन्तेः। उपसर्गस्थान्निमित्ताद्धंतेर्न
स्य णः स्यात्। प्रहण्यात्। अत्पूर्वस्य। हंतेरत्पूर्वस्यैव नस्य णो नान्यस्य।
प्रघ्नंति। योगविभागसामर्थ्यादनंतरस्य विधिर्वा भवति प्रतिषेधो वेति न्या
यं बाधित्वाकुमतिवेति णोपि निवर्त्तते। वृत्रघ्न इत्यादि। एवं शार्ङ्गिन्। यश

कविसखइत्तिः कविर प्रशस्तिः कथि हिपा। किवि दैन्यदेव। विर्धविधानं बहुधा समास्य नतु विधिं वा कृत्वकं तस्मि।

म०सु०
२०
स्विन्। अर्यमन्। पूषन्। मघवा बहुलं। मघवन् शब्दस्य वा तृ इत्यंतादेशः स्यात्। ऋ इत्।
उगिदचां सर्वनामस्थानेऽधातोः। अधातोरुगितो नलोपिनोंऽचतेश्च नुम् स्यात् सर्वनाम
स्थाने। मघवान्। इह दीर्घे कर्तव्ये संयोगांतस्य लोपस्यासिद्धत्वं न भवति बहु
लग्रहणात्। मघवंतौ। मघवंतः। मघवद्भ्यां। तृत्वाभावे सुटि राजवत्। श्वयुवमघो
नामतद्धिते। अन्नंतानामेषामतद्धिते परे संप्रसारणं स्यात्। मघो
नः। मघवभ्यां। एवं श्वन्। युवन्। न संप्रसारणे संप्रसारणं। संप्रसारणे परे पूर्व
स्य यणः संप्रसारणं न। यूनः। युवभ्यामित्यादि। अर्वा। हे अर्वन्। अर्वणस्त्रसा
वनञः। नञा रहितस्यार्वन्नंतस्य तृ इत्यंतादेशो न तु सौ। अर्वन्तौ। अर्वन्तः। अर्वद्भ्यां
। पथिमथ्यृभुक्षामात्। एषामाकारोंऽतादेशः स्यात् सौ परे। इतोऽत्सर्वनामस्थाने। प
कारस्या थ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने। थो न्थः। पथिमथोस्थस्य न्थादेशः
थि
स्यात्

स्थाने र्वनामस्थाने। पन्थाः। पन्थानौ। भस्य टेर्लोपः। भस्य पथ्यादेष्टिलोपः स्यात्। पथः। पथि
पथिभ्यः। एवं मंथाः। ऋभुक्षाः। ष्णान्ता षट्। षान्ता नान्ता च संख्या षट्संज्ञा स्यात्। पंच
पंचभिः। पंचभ्यः। नुट्। नोपधायाः। नांतस्योपधाया दीर्घो नामि। नलोपः प्रातिपदिकां
भे४ तस्य। पंचानां। पंचसु। अष्टन आ विभक्तौ। हलादौ वा स्यात्। अष्टाभ्य औश्। कृताकारादष्टनो का
जश्शसोरौश्। अष्टभ्य इति वक्तव्ये कृतात्वनिर्देशो जश्शसोर्विषये आत्वं ज्ञापयति। अ
ष्टौ। अष्टाभिः। अष्टाभ्यः। अष्टानां। अष्टासु। आत्वाभावे अष्ट पंचवत्। ऋत्विग्दधृक्
ञ्चां स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च। एभ्यः क्विन् स्यात्। अञ्चेः सुप्युपपदे। युजिक्रुञ्चोः केव
पा३ लयोः। क्रुञ्चेर्नलोपाभावश्च निपात्यते। कनावितौ। कृदतिङ्। अत्र धात्वधिकारे तिङ्भि
न्नः प्रत्ययः कृत्संज्ञः स्यात्। वेरपृक्तस्य। अपृक्तस्य वेर्लोपः स्यात्। क्विन्प्रत्ययस्य कुः।
क्विन्प्रत्ययो यस्मात्तस्य कवर्गोंऽतादेशः स्यात्पदान्ते। इत्यस्यासिद्धत्वाच्चोः कुरिति कुत्वं॥

म०कौ० ऋत्विक्। ऋत्विजौ। ऋत्विजः। ऋत्विग्भ्यां। २ युजेरसमासे। युजेः सर्वनामस्थाने नुम् स्यादसमासे। सुलोपः।
२१। संयोगांतस्य लोपः। कुत्वेन नस्य ङः। युङ्। युञ्जौ। युञ्जः। युग्भ्यामित्यादि। चोः कुः। चवर्गस्य कवर्गः स्या
झलि पदांते च। सुयुक्। सुयुजौ। सुयुग्भ्यां। ३ खन्। खञ्जौ। खञ्जः। खन्भ्यां। व्रश्चभ्रस्जसृज
मृजयजराजभ्राजच्छशां षः। व्रश्चादीनां सप्तानां छशांतयोश्च षकारोंतादेशः स्यात् झलि पदां
ते च। जश्त्वचर्त्वे। राट्। राड्। राजौ। राड्भ्यां। एवं विभ्राट्। देवेट्। विश्वसृट्। परिमृट्। परौ व्रजेः
षः पदांते। परावुपपदे व्रजेः क्विप् दीर्घश्च परौ तस्य विषये षत्वमपि। परित्यज्य सर्वं व्रजतीति
ति परिव्राट्। परिव्राजौ। परिव्राजः। विश्वस्य वसुराटोः। विश्वस्य दीर्घः स्यात् वसौ राट्शब्दे
च परे। विश्वाराट्। विश्वाराजौ। विश्वाराड्भ्यां। स्कोः संयोगाद्योरंते च। पदांते झलि च यः संयो
भट्। भड्। गस्तदाद्योः सकारककारयोर्लोपः स्यात्। सस्य श्चुत्वेन शः। झलां जश् झशि। भृज्जस्य जः।
भृज्जौ। भृड्भ्यां। त्यदाद्यत्वं पररूपं। तदोः सः सावनंत्ययोः। त्यदादीनां तकारदकारयोरनंत्य
योः सः स्यात् सौ। स्यः। त्यौ। त्ये। सः। तौ। ते। यः। यौ। ये। एषः। एतौ। एते। एनं। एनौ। एनान्। २१

ह. १

एनेन। एनयोः। ङे प्रथमयोरम्। युष्मदस्मद्भ्यां परस्य ङे इत्यस्य प्रथमाद्वितीययोश्च अ
मादेशः स्यात्। मपर्यंतस्य त्वाधिकस्य। त्वाहौ सौ। युष्मदस्मदोर्मपर्यंतस्य त्वाहौ एतावा
देशौ स्तः सौ परे। शेषे लोपः। आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरंत्यस्य
लोपः स्यात्। त्वं। अहं। युवावौ द्विवचने। द्वयोरुक्तावनयोर्मपर्यंतस्य युवावौ स्तो वि
या भक्तौ। प्रथमायाश्च द्विवचने भाषायां। इह युष्मदस्मदोराकारोंतादेशः स्यात्। औङि
त्येव सुवचं। युवां। आवां। यूयवयौ जसि। अनयोर्मपर्यंतस्य यूयवयौ स्तो जसि। यूयं। यनायो
वयं। त्वमावेकवचने। एकस्योक्तावनयोर्मपर्यंतस्य त्वमौ स्तो विभक्तौ। द्वितीया
यां च। युष्मदस्मदोराकारः स्यात्। त्वां। मां। शसो न। युष्मदस्मद्भ्यां परस्य श
सो नकारः स्यात्। अमोऽपवादः। आदेः परस्य। संयोगांतस्य लोपः। युष्मान्। अस्मा
न्। योऽचि। अनयोर्यादेशोऽनादेशे आदौ विभक्तौ। युवाभ्यां। आवाभ्यां। युष्माभिः।
त्वया। मया। युष्मदस्मदोरनादेशे। अनयोरात्स्यादनादेशे हलादौ विभक्तौ। ४

भ्या

ल० कौ० सु० अस्मासि॥ तुभ्यमह्यौ ङयि। अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि। तुभ्यं। मह्यं। भ्य
सोऽभ्यम्। आभ्यां भ्यसोऽभ्यम् अम्वा आदेशः स्यात्। युष्मभ्यं। अस्मभ्यं। एकवचनस
२२ स्य च। आभ्यां पंचम्येकवचनस्य अत् स्यात्। त्वत्। मत्। पंचम्या अत्। आभ्यां पंचम्या
भ्यसोऽत् स्यात्। युष्मत्। अस्मत्। तवममौ ङसि। अनयोर्मपर्यन्तस्य तवममौ
६ स्तो ङसि। युष्मदस्मद्भ्यां ङसोऽश्। आभ्यां ङसो अश् स्यात्। तव। मम। युवयोः। आव
योः। साम आकं। आभ्यां परस्य साम आकं स्यात्। युष्माकं। अस्माकं। त्वयि। मयि।
युष्मासु। अस्मासु। युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ। पदात्पर
योरपादादौ स्थितयोः षष्ठ्यादिविशिष्टयोर्वान्नावित्यादेशौ स्तः। बहुवचनस्य वस्न
रत्नयोः सौ। उक्तविधयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः॥ तेमयावेकवचनस्य। २२
उक्तविधयोर[illegible]नयोः षष्ठीचतुर्थ्येकवचनान्तयोस्तेमे एतौ स्तः। त्वामौ द्वितीयायाः।

उक्तविधयोरनयोर्द्वितीयैकवचनान्तयोस्त्वामा एतौ स्तः। श्रीशस्त्वावतु मापीह दत्तान्ते मापि
शर्म सः। स्वामी ते मेपि स हरिः पातु वामपि नौ विभुः॥ १॥ सुखं वां नौ ददात्वीशः पतिर्वाम
पि नौ हरिः। सोऽव्याद्वो नः शिवं वो नो दद्यात्सेव्योऽत्र वः स नः॥ २॥ एकवाक्ये युष्मदस्मदा
देशा वक्तव्याः॥ एकतिङ् वाक्यं। तेनेह न। ओदनं पच तव भविष्यति। एते वान्नावादय आ
देशा अन्वादेशे वा वक्तव्याः। अन्वादेशे तु नित्यं स्युः। धाता ते भक्तोऽस्ति धाता तव भक्तो
ऽस्ति वा। तस्मै ते नम इत्येव। न चवाहाहैवयुक्ते। चादिपंचकयोगे नैते आदेशाः स्युः।
हरिस्त्वां मां च रक्षतु। कथं त्वां मां वा रक्षेदित्यादि। पश्यार्थैश्चानालोचने। अचाक्षु
षज्ञानार्थैर्धातुभिर्योगे नैते आदेशाः स्युः। चेतसा त्वां समीक्षते। आलोचने तु [illegible]
[illegible] त्वा पश्यति चक्षुषा। सपूर्वायाः प्रथमाया विभाषा। विद्यमानपूर्वात्प्रथ

म०कौ०सु मां। अस्मद्युष्मदोरन्वादेशे ते मयादेशाः स्युः। वां नौ। भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायतां सदा मां।।

२२ त्वामीतिवा। सामंत्रितं संबोधनेया म प मा नं दं तमामंत्रितं संज्ञं स्यात्। आमंत्रितं पूर्व

मविद्यमानवत्। अग्ने तव। देवास्मान्पाहि। नामंत्रिते समानाधिकरणे सामान्यवच

नं। विशेष्यं समानाधिकरणे विशेषणे आमंत्रितं परं नाविद्यमानवत्स्यात्। हरेद

यालो नः पाहि। सुपात्। सुपादौ। पादः पत्। भ शब्दांतं यदंगं तदंतं यच्छयवस्य पा

द शब्दस्य पदादेशः। सुपदः। सुपाद्भ्यां। अग्निमत्। अग्निमथौ। अग्निमद्भ्यां। अनि

दितां हल उपधायाः क्ङिति। हलंतानामनिदितामंगानामुपधायां नस्य लोपः स्या

त्किति ङिति। उगिदचामिति नुम्। संयोगांतस्य लोपः। नस्य कुत्वेन ङः। प्राङ्। प्राञ्चौ।

प्राञ्चः। अचः। लुप्तनकारस्यांचतेर्भस्याकारस्य लोपः। चौ। लुप्ताकारनकारेंचतौ २३

परे पूर्वस्याणो दीर्घः स्यात्। प्राचः। प्राचा। प्राग्भ्यामित्यादि। प्रत्यङ्। प्रत्यञ्चौ। प्र

त्यञ्चः। प्रत्यञ्चं। प्रत्यञ्चौ। प्रतीचः। प्रतीचा। प्रत्यग्भ्यां। उदङ्। उदञ्चौ। उदईत्। उ

द उत्तरस्य लुप्तनकारस्यांचतेर्भस्याकारस्य ईः स्यात्। उदीचः। उदीचा। उदग्भ्यां। समः स२

मः समि। वप्रत्ययांतेंचतौ परे समः समिरादेशः स्यात्। सम्यङ्। सम्यञ्चौ। समीचः। स

म्यग्भ्यां। सहस्य सध्रिः। नाथ हरींचतो सध्र्यङ्। तिरसस्तिर्यलोपे। अलुप्ताकारेंचतौ प्र

त्ययांते तिरसस्तिर्यादेशः। तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिरश्चः। तिरश्चा। तिर्यग्भ्यां।

नांचेः पूजायां। पूजार्थस्यांचतेरुपधाया नस्य लोपो न स्यात्। अलुप्तनकारत्वान्नालु

पा० प्तः। प्राङ्। प्राञ्चौ। नलोपाभावादलोपो न। प्राञ्चः। प्राङ्भ्यां। प्राङ्क्षु। प्राङ्षु। क्रुङ्। क्रुञ्चौ ङ्०

क्रुञ्चा। एवं पूजार्थे प्रत्यङादयः। क्रुङ्। क्रुञ्चौ। क्रुञ्चः। क्रुङ्भ्यां। पयोमुक्। प

योमुचौ। पयोमुचः। पयोमुग्भ्यां। महत् जायां। वर्तमाने पृषन्महद्बृहज्जगच्छ

५१ तृवच्च। एते निपात्यंते शतृवच्चैषां कार्यं स्यात्। उगित्वान्नुम्। सांतमहतः संयोगस्य।

२४ सांतसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने। महा
न्। महांतौ। महांतः। हे महन्। महता। महद्भ्यां। अत्वसंतस्य चाधातोः। अत्वंतस्योप
धाया दीर्घः स्याद्धातुभिन्नासंतस्य चासंबुद्धौ सौ परे। परं नित्यं च नुमं बाधित्वा
वचनसामर्थ्याद्दीर्घः। ततो नुम्। धीमान्। धीमंतौ। धीमंतः। हे धीमन्। शसादौ
महद्वत्। भातेर्डवतुः। डित्वसामर्थ्याद्भस्यापि टेर्लोपः। भवान्। भवंतौ। शत्रंत
स्य तु अत्वं तत्वाभावाद्भवतीति भवन्। उभे अभ्यस्तं। षाष्ठद्वित्वप्रकरणे ये द्वे
विहिते ते उभे समुदिते अभ्यस्तसंज्ञे स्तः। नाभ्यस्ताच्छतुः। अभ्यस्तात्परस्य शतु
र्नुम् न स्यात्। ददत्। ददतौ। जक्षित्यादयः षट्। षड्धातवोन्ये जक्षितिश्च स
प्तम एते अभ्यस्तसंज्ञाः स्युः। जक्ष जागृ दरिद्रा शास् दीधीङ् वेवीङ् चकास्तथा। २४
अभ्यस्तसंज्ञाः सप्तैते धातवो मुनिभाषिताः।१। जक्षत्। जक्षतौ। जक्षतः।

दीधीङ् दीप्तिदेवनयोः। वेवीङ् वेतिना तुल्ये। एतौ छांदसौ। २५
एवं जाग्रत्। दरिद्रत्। शासत्। चकासत्। गुप्। गुपौ। गुपः। गुब्भ्यां। त्यदादिषु दृशोनालोचने कञ्।
त्यदादिषूपपदेष्वज्ञानार्थाद्दृशेर्धातोः कञ् स्यात् क्विन्। आ सर्वनाम्नः। सर्वनाम्न आकारोंता
देशः स्याद्दृग्दृशवतुषु। तादृक्। तादृशौ। तादृशः। तादृग्भ्यां। व्रश्चेति षः। जश्त्वचर्त्वे। विट्।
विड्। विशौ। विशः। विड्भ्यां। नशेर्वा। नशेः कवर्गोंतादेशो वा स्यात्पदांते। नक्। नग्। नट्।
नड्। नशौ। नशः। नग्भ्यां। नड्भ्यां। स्पृशोऽनुदके क्विन्। अनुदके सुप्युपपदे स्पृशेः क्विन् स्या
त्। घृतस्पृक्। घृतस्पृशौ। घृतस्पृशः। दधृक्। दधृषौ। दधृषः। दधृग्भ्यां। रत्नमुट्।
रत्नमुषौ। रत्नमुषः। रत्नमुड्भ्यां। षट्। षड्। षड्भिः। षड्भ्यः। षट्चतुर्भ्यश्चेति नुट्। षण्णां।
षट्सु। पत्वं प्रति षड्भ्यामसिद्धत्वादनामादिकमेव। प्रत्ययेनिस्य ग्रहणात्। रुत्वं प्र
ति षत्वस्यासिद्धत्वात् ससजुषो रुरिति रुत्वं। र्वोरुपधाया दीर्घ इकः। रेफवांतस्य धा
तोरुपधाया इको दीर्घः स्यात्पदांते। पिपठीः। पिपठिषौ। पिपठिषः। पिपठीर्भ्यां। वा

म०कौ०सु०
२५

शरीति वा विसर्जनीयः। नुम्विसर्जनीयशर्व्यवायेऽपि। एतैः प्रत्येकं व्यवधानेऽपि इण्कुभ्यां प
रस्य सस्य मूर्धन्यादेशः स्यात्। ष्टुत्वेन पूर्वस्य षत्वं। पिपठीःषु। पिपठीष्षु। चिकीः। चिकी
र्षौ। चिकीर्षि। चिकीर्षु। सान्तेति दीर्घः। विद्वान्। विद्वांसौ। विद्वांसः। हे विद्वन्। वसोः
संप्रसारणं। वस्वन्तस्य भस्य संप्रसारणं स्यात्। पूर्वरूपत्वं। विदुषः। वसुस्रंस्विति
दत्वं। विद्वद्भ्यां। पुंसोऽसुङ्। सर्वनामस्थाने। असुङ् उच्चारणार्थः। पुमान्। हे पुमन्। उकार ५
पुमांसौ। पुमांसः। पुंभ्यां। ऋदुशनेत्यनङ्। उशना। उशनसौ। अस्य संबुद्धौ वानङ्
ङ्। नलोपश्च वा वाच्यः। हे उशन। हे उशनन्। हे उशनः। उशनोभ्यां। अनेहा। अ
नेहसौ। अनेहसः। हे अनेहः। वेधाः। वेधसौ। वेधसः। हे वेधः। वेधोभ्यां। अदस औ
सुलोपश्च। अदस औकारान्तादेशः स्यात् सौ परे सुलोपश्च। तदोरिति सस्य तः। असौ। २५
औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः। सादुत्वं च। असकौ। असुकः। त्यदाद्यत्वं पर

सन्नियोगशिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः॥

रूपं। वृद्धिः। अदसोऽसेर्दादु दो मः। अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। आन्तर
तम्यात् ह्रस्वस्य उः दीर्घस्य ऊः। अमू। जसः शी। एत ईद्बहुवचने। अदसो दात्परस्य एत ईत् स्या
द् दस्य च मो बह्वर्थोक्तौ। अमी। पूर्वत्रासिद्धमिति विभक्तिकार्यं प्राक् पश्चादुत्वमत्वे। अमुं। अ
मू। अमून्। उत्वे मत्वे कृते घिसंज्ञायां नाभावः। न मु ने। नाभावे कर्तव्ये कृते च मुभावो नासिद्धः।
अमुना। अमूभ्यां। अमीभिः। अमुष्मै। अमीभ्यः। अमुष्मात्। अमुष्य। अमुयोः। अमीषां।
अमुष्मिन्। अमीषु॥ ॥ इति हलन्ताः पुंल्लिङ्गाः॥ छ॥ नहो धः। नहो हस्य धः स्यात् झ
लि पदान्ते च। नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ। क्विबन्तेषु पूर्वस्य दीर्घः। उ
पानत्। उपानद्। उपानहौ। उपानहः। उपानद्भ्यां। उपानत्सु। क्विन्नन्तत्वात् कुत्वेन हस्य घः।
जश्त्वचर्त्वे। उष्णिक्। उष्णिग्। उष्णिहौ। उष्णिहः। उष्णिग्भ्यां। उष्णिक्षु। द्यौः। दिवौ। दि
वः। द्युभ्यां। गीः। गिरौ। गिरः। एवं पूः। चतस्रः। चतसृणां। किमः कः। टाप्। का। के। काः।

०कौमु आङिचापः।कया।सर्वावत्।यःसौ।इदमोदस्य यःस्यात्सौ।इदमोमः।इदमोमस्य मस्यात्सौ।इयं।
२६ त्यदाद्यत्वेटाप्।दश्चेतिमः।इमे।इमाः।अन्वादेशेवा।एनां।एने।एनाः।एनया।एनयोः।इमां।
इमे।इमाः।अनाप्यकः।अनया।हलिलोपः।आभ्यां३।आभिः।अस्यै।अस्याः२।अनयोः२
आसां।अस्यां।स्रक्।स्रजौ।स्रजौ।स्रजः।स्रग्भ्यां३।त्यदाद्यत्वेटाप्।स्या।त्ये।त्याः।एवंतद्।य
द्।एतद्।वाक्।वाचौ।वाग्भ्यां।अप्शब्दोबहुवचनांतः।अप्तृन्तृनितिदीर्घः।आपः।अपः।
अपोभि।।अपस्तकोरस्यात्।भोदौप्रत्ययेपरे।अद्भिः।अद्भ्यः।अपां।अप्सु।दिक्।दिग्।
दिशौ।दिशः।दिक्षु।त्यदाद्यदिष्वितिदृशेः।क्विन्विधानादन्यत्रापिकुत्वं।दृक्।दृ
ग्।दृशौ।दृशः।दृग्भ्यां।त्विट्।त्विषौ।त्विषः।त्विड्भ्यां।त्विट्सु।ससजुषोरुः।रितिरुत्वं।
सजूः।सजुषौ।सजूर्भ्यां३।शासिवसीतिषत्वस्योसिद्धत्वाद्रुत्वं।आशीः।आशिषौ। २६
आशिषः।आशीर्भ्यां।१४ असौ।उत्वमत्वे।अमू।अमूः।अमुया।अमूभ्यां।अमूभिः।

अमुष्यै।अमूभ्यः।अमुष्याः।अमुयोः।अमूषां।अमुष्यां।अमूषु।। ।।इतिहलं
ताः स्त्रीलिंगाः।। ७ ।।स्वमोर्लुक्।दत्वं।स्वनडुत्।स्वनडुही।चतुरनडुहोराम्।अ स्व
नड्वांसि।पुनस्तद्वत्।शेषंपुंवत्।वाः।वारी।वारि।वार्भ्यां।चत्वारि।किं।के।कानि।इ
दो४ दं।इमे।इमानि।अन्वादेशेनपुंसकेएनद्वक्तव्यः।एनत्।एने।एनानि।एनेन।एनयोः।
ब्रह्म।संबुद्धौनपुंसकानांनलोपोवावाच्यः।हेब्रह्मन्।हेब्रह्म।ब्रह्मणी।ब्रह्माणि।
रोसुपि स्वसुपि।अहन्नित्यस्यरुःस्यादसुपि।अहः।विभाषाङिश्योः।अह्नी।अहनी।अहानि।अहन्।
अहन्नितिसस्यरुःस्यात्सदांते।अहोभ्यां।अहोभिः।दंडी।दंडिनी।दंडीनि।सुपथि।टिलोपः।सु
नां३ पथी।सुपंथानि।ऊर्क्।ऊर्जी।ऊर्न्जि।नरजानांसंयोगः।तत्।ते।तानि।यत्।ये।यानि।एतत्।एते
एतानि।गवाक्।गवाक्शब्दस्यरूपाणिक्लीबेगतिभेदतः।असंध्यचङ्पूर्वरूपैर्नवाधि
कशतंमतं।१।स्वम्सुप्सुनवषड्जादौपृथक्स्युरवीणिजश्रसाः।चत्वारिशेषेदशकेरूपाणि।

म॰कौ॰सु॰
॥ २८ ॥

त्रिविभावयपा गामंश्चतीति विग्रहे। ऋत्विगादिना क्विन्। गतौ नलोपः। अपदुस्फोटा प्रत्यन्स्य तस्यखड़्। गो
ची। गवांचि। पुनस्तद्वत्। गोचा। गवाग्भ्यां। शकृत्। शकृती। शकृंन्ति। शकृद्भ्यां। ददत्। वा
नपुंसकस्य। अभ्यस्तात् बात्परस्य शतुर्नुम्वा स्यात् सर्वनामस्थाने। ददंति। ददति। तुद
त्। आच्छीनद्योर्नुम्। अवर्णांतात्परो यः शतुरवयवः स्तदंतस्यांगस्य नुम्वा स्याच्छीनद्योः प
रतः। तुदती। तुदंती। तुदन्ति। भात्। भांती। भाती। भान्ति। पचत्। पचंती। शप्श्यनोर्नि
त्यं। शपश्यनोरात्परो यः शतुरवयवस्तदंतस्य नित्यं नुम्स्याच्छीनद्योः परयोः। पचंति।
दीव्यत्। दीव्यंती। दीव्यन्ति। धनुः। धनुषी। सांतेति दीर्घः। नुम्विसर्जनीयेति षत्वं। ध
नूंषि। धनुषा। धनुर्भ्यां। एवं चक्षुर्हविरादयः। पयः। पयसी। पयांसि। पयोभ्यां। सुपु
म्। सुपुंसी। सुपुमांसि। अदः। विभक्तिकार्यं। उत्वमत्वे। अमू। अमूनि। शेषं पुंवत्॥ २८
॥ इति हलंतानपुंसकलिंगाः॥ ॥ स्वरादिनिपातमव्ययं। स्वरादयो निपाताश्चा

व्ययसंज्ञाः स्युः॥ स्वर्। अंतर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। यु
गपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायं। चिरं। मनाक्। ईषत्। जोषम्। तूष्णीं।
बहिस्। अवस्। समया। निकषा। स्वयं। वृथा। नक्तं। नञ्। हेतौ। इद्धा। अद्धा। सामि। वत्। ब्राह्म
णवत्। क्षत्रियवत्। सना। उपधा। सनत्। सनात्। तिरस्। अंतरा। अंतरेण। ज्योक्। कं॥
शं। सहसा। विना। नाना। स्वस्ति। स्वधा। अलं। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति।
उपांशु। क्षमा। विहायसा। दोषा। मृषा। मिथ्या। मुधा। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्।
प्रवाहुकं। आर्यहलं। अभीक्ष्णं। साकं। सार्धं। नमस्। हिरुक्। धिक्। अथ। अम्। आम्।
प्रताम्। प्रशान्। प्रतान्। प्रशान्। मा। माङ्। आकृतिगणोऽयं॥ चा। वा। ह। अह। एव।
एवं। नूनं। शश्वत्। युगपत्। भूयस्। कूपत्। सूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्।
यत्र। नह। हंत। माकिः। माकीं। नकिः। आकीं। माङ्। नञ्। यावत्। तावत्। त्वै। न्वै। द्वै। रै।
प्रवाहिके द्विपाठांतरे ४

इयं श्रु० तिर्लिंगकारकसंख्याभावपरा। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपंचैव हलंतानां यथा वाचानि २८
दिशा॥ ॥ वगाहः अवगाहः। पिधानं अपिधानं। इत्यव्ययानि।

म० कौ सु० ओषट्। वौषट्। स्वाहा। स्वधा। वषट्। नुम्। तथा। हि। खलु। किल। अथा। सुष्ठु। स्म। आदह। उप
२८ सर्गविभक्तिस्वरप्रतिरूपकाश्च। अवदत्तं। अहंयुः। अस्तिक्षीरा। अ। आ। इ। ई। उ। ऊ। ए।
ऐ। ओ। औ। पशु। शुकं। यथाकथाच। पाट्। प्याट्। अंग। है। हे। भोः। अये। द्य। विषु। एकपदे।
युत्। आतः। चादिरप्याकृतिगणः। तद्धितश्चासर्वविभक्तिः। यस्मात्सर्वा विभक्तिर्नोत्पद्यते
स तद्धितांतोप्यव्ययं स्यात्। परिगणनं कर्त्तव्यं। तसिलादयः प्राक्पाशपः। शस्प्रभृतयः प्राक्समा
सांतेभ्यः। अम्। आम्। कृत्वोर्थाः। तसिवती। नानाञाविति। तेन। हन। पचतिकल्पं। पचतिरूपं। कृ
च५ न्मेजंतः। स्वादुमिंतएजंतश्चतदंतमव्ययं। स्मारंस्मारं। जीवसे। पिबध्यै। क्त्वातोसुन्कसुनः।
एतदंतमप्यव्ययं स्यात्। कृत्वा। उदेतोः। विसृपः। अव्ययीभावश्च। अधिहरि। अव्ययादा
प्सुपः। अव्ययाद्विहितस्यापस्सुपश्च लुक् स्यात्। तत्रशालायां। अथ। विहितविशेषणान्ने
ह। अत्युच्चैस्सौ। अव्ययसंज्ञायद्यपि तदंतविधिरस्ति तथापि गुणभूतः आच्छादयत्यव्ययमालि २८
गत्वात्। सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययमिति श्रुतेः
यां२ त२ श्र२ मा१

लिंगकारकसंख्याभावपरा। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः। आपंचैवहलंतानां यथा वाचा
निशा दिशा॥ २॥ वगाहः। अवगाहः। पिधानं। अपिधानं॥ ॥ इत्यव्ययानि॥ ॥ इति सुबं
तं समाप्तं॥ ॥ छ॥ ॥ छ॥ लट्। लिट्। लुट्। लृट्। लेट्। लोट्। लङ्। लिङ्। लु
ङ्। लृङ्॥ एषु पंचमो लकारश्छंदोमात्रगोचरः। लः कर्मणि च भावे चाकर्मकेभ्यः। लका
राः सकर्मकेभ्यः कर्मणि कर्त्तरि च स्युरकर्मकेभ्यो भावे कर्त्तरि च। वर्त्तमाने लट्। वर्त्तमानक्रि
यावृत्तेर्धातोर्लट् स्यात्। अटावितौ। उच्चारणसामर्थ्याल्लस्येत्त्वं। भूसत्तायां। कर्त्तृविव
क्षायां भू ल इति स्थिते। लस्य॥ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमि
ड्वहिमहिङ्॥ एतेष्टादश लस्यादेशाः स्युः। लः परस्मैपदं॥ लादेशाः परस्मैपदसंज्ञा
स्युः। तङानावात्मनेपदं। तङ्प्रत्याहारः शानच्कानचौ चैतत्संज्ञाः स्युः। पूर्वसंज्ञापवादः। अनु
ल दात्तङित आत्मनेपदं। अनुदात्तेत उपदेशे यो ङित्तदंताद्धातोर्लस्थाने आत्मनेपदं स्यात्॥

स्वरूपेण लकारप्रदर्शने। तस्यापि च कर्मणि ल स्येत्या दिसूत्रेषु पठितानां ल्युत्यादीय तु मितिभावः। एषु पंचमो लकारश्छंदसि बोध्यः।
अप्रयोग स्य स्थाणी हलन्त्युसार्थेन तथापि अनुकार्यानुकरणयोः भावविवक्षया तवत्वाभावे न विभक्तेः लुसादन्।१८

३ अन्यथैकसंज्ञाधिकारात्प्रथमादिसंज्ञाभिरेकवचनादिसंज्ञानां न पर्यायः स्यात् अतो लक्ष्ये सादि २ ति

मध्य० कौ० स्वरितञितः कर्त्रभिप्राये क्रियाफले। स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि
२९ क्रियाफले। शेषात्कर्तरि परस्मैपदं। आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात्। तिङस्त्रीणि
त्रीणि प्रथममध्यमोत्तमाः। तिङ उभयोः पदयोः त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः। तान्येकवचनद्वि
वचनबहुवचनान्येकशः। लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि प्रत्येकमेकवचनादिसंज्ञा
नि स्युः। युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। तिङ्वाच्यकारकवाचिनि युष्म
अप्रयुज्यमाने दि प्रयुज्यमाने मध्यमः स्यात्। अस्मद्युत्तमः। तथाभूतेऽस्मद्युत्तमः। शेषे प्रथमः। भू मध्यमोत्तमयोरविषये प्रथमः
तिरिति जाते॥ तिङ्शित्सार्वधातुकं। तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः। कर्तरि शप्।
कर्त्रर्थे सार्वधातुके धातोः शप्। सार्वधातुकार्धधातुकयोः। अनयोः परयोरिगन्ताङ्गस्य गु
णः। अवादेशः। भवति। भवतः। झोऽन्तः। प्रत्ययावयवस्य झस्यान्तादेशः। अतो गुणे। भ
वन्ति। भवसि। भवथः। भवथ। अतो दीर्घो यञि। अतोऽङ्गस्य दीर्घः स्याद्यञादौ सार्वधातु २९
के। भवामि। भवावः। भवामः। स भवति। तौ भवतः। ते भवन्ति। त्वं भवसि। युवां भवथः। यूयं भ

य

परे २

म० कौ० सु० वथ॥ अहं भवामि। आवां भवावः। वयं भवामः। शेषे विभाषाकखादावषान्त उपदेशे। उपदेशे कादिरखा ति
३० दिर्षान्तश्च यो न भवति तस्मिन्धातौ उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात्। प्रणिभव
ति। प्रनिभवति। परोक्षे लिट्। भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट्। लस्य तिबादयः।
परस्मैपदानां णलतुसुस्थलथुसणल्वमाः। लिटस्तिबादीनां णलादयः स्युः। भू अ इति स्थिते। नवानां
भुवो वुगागमस्या भुवो वुग्लुङ्लिटोः। [illegible] लिटि धातोरनभ्यासस्य। लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्र
लुङ्लिटोरचि थमस्य द्वे स्तः आदिभूतादचः परस्य तु द्वितीयस्य। भूव् भूव् अ इति स्थिते। पूर्वोऽभ्यासः। अत्र ये
पूर्वोभ्याससं द्वे तयोः। हलादिः शेषः। अभ्यासस्यादिर्हल् शिष्यते। अन्ये हलो लुप्यन्ते। ह्रस्वः। अभ्या
स्यात् ५ सस्याचो॥ भवतेरः। भवतेरभ्यासस्योकारस्य अः स्याल्लिटि। अभ्यासे चर्च। अभ्यासे झलां च
ह्रस्वः स्यात् ५ र्चः स्युर्जशश्च। झशां जशः खयां चरः इति विवेकः। बभूव। बभूवतुः। बभूवुः। लिट् च। लि
डादेशस्तिङार्धधातुकसंज्ञः। आर्धधातुकस्येड्वलादेः। वलादेरार्धधातुकस्येडागम ३०
स्यात्। बभूविथ। बभूवथुः। बभूव। बभूव। बभूविव। बभूविम। अनद्यतने लुट्
तथापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचर इति विवेकोऽन्तरतम्यात्। २ धी
एव स्यात् ५ ननु सार्वधातुकसंज्ञः

डारौरसः एते क्रमात् स्युः॥ तासेरसेश्च लोपः स्यात्

ट्। भविष्यत्यनद्यतनेऽर्थे धातोर्लुट्। स्यतासी लृलुटोः। धातोरेतौ स्तो लृलुटोः परतः। श
बाद्यपवादः। लृ इति लृङ्लृटोर्ग्रहणं। आर्धधातुकं शेषः। तिङ्शिद्भ्योऽन्यो धातोरिति विहितः
प्रत्यय एतत्संज्ञः स्यात्। इट्। लुटः प्रथमस्य डारौरसः। भविता। तासस्त्योर्लोपः। रि च। स्मादौ
ये आगत प्रत्यये परे स्मि। रादौ च। भवितारौ। भवितारः। भवितासि। भवितास्थः। भवितास्थ। भ
वितास्मि। भवितास्वः। भवितास्मः। लृट् शेषे च। भविष्यदर्थाद्धातोर्लृट् क्रियायां क्रियार्थायां क्रि
स यायां सत्याम सत्यां वा। स्य इट्। भविष्यति। भविष्यतः। भविष्यंति। भविष्यसि। भविष्य
थः। भविष्यथ। भविष्यामि। भविष्यावः। भविष्यामः। लोट् च। विध्याद्यर्थेषु धातो
र्लोट्। आशिषि लिङ्लोटौ। एरुः। लोट इकारस्य उः। भवतु। तुह्योस्तातङ्ङाशि
ष्यन्यतरस्यां। आशिषि तुह्योस्तातङ् वा। अनेकाल्शित्सर्वस्य। ङिच्च। ङित्त्वस्य
काव्यकाशार्थं इति चेन्न श्रृणु। अनन्त्यार्थ ङकार युक्ता न आदि विति यस्य गुणः। भवतात्।
लोटो लङ्वत्। लोटस्तामादयः सलोपश्च। तस्थस्थमिपां तान्तन्तामः। ङि
तश्च। लुणौ तामादयः स्युः। भवतां। भवन्तु। सेर्ह्यपिच्च। लोटः सेर्हिः स्यात् सोऽपिच्च। अतो हेः।
यदा पि ङिच्चेत्य समर्थ्य पादस्य पाप्य नेन्या यङि तेन ङादि पुनरिति तो ऽर्थ इति गुण ह दि प्रतिषेध सं प्रसारण यथान्ते
लङ्वत्कार्यं येन

लोडुत्तमस्याडागमः पिच्च

भ०कौ ति तपरस्य हेर्लुक्। भव। भवतात्। भवतं। भवत। मेर्निः। लोडो मेर्निः स्यात्। आडुत्तमस्य पिच्च। हिन्योरुत्वं न। इकारोच्चारणसामर्थ्यात्। भवानि। ते प्राग्धातोः। ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः। आनि लोट्। उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः। प्रभवाणि। दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः। दुःस्थितिः। दुर्भवानि। अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्। अन्तर्भवाणि। नित्यं ङितः। सकारान्तस्य ङिदुत्तमस्य नित्यं लोपः। अलोऽन्त्यस्येति सलोपः। भवाव। भवाम। अनद्यतने लङ्। अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्। लुङ्लङ्लृङ्क्ष्वडुदात्तः। इतश्च। ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्य लोपः। अभवत्। अभवतां। अभवन्। अभवः। अभवतं। अभवत। अभवं। अभवाव। अभवाम। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्। एष्वर्थेषु धातोर्लिङ्। यासुट्परस्मैपदेषूदात्तो ङिच्च। लिङः परस्मैपदानां यासुडागमो ङिच्च। ङित्वात्कृते लोपेन ... अनुबन्धकार्येऽनल्विधाविति प्रतिषेधः इति। तेन वक्ष्यमाणा इत्यत्रोऽपि न। सुट् तिथोः। लिङस्तकार ३१

स्यात्तेवोदात्तो २

विधि अतीताया रात्रेर्यामद्वयाद्वा कृत्याव रागामिन्याश्च प्रथमयामद्वयं सोऽद्यतनस्ततोऽन्योऽनद्यतनः १

केर्डुस्यात्। ३ ... स्यात् २

थकारयोः सुट् स्यात्। लिङः सलोपोऽनन्त्यस्य। सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः। इति प्राप्ते। अतो येयः। अतः परस्य सार्वधातुकावयवस्य यास् इत्यस्य इय्। गुणः। लोपो व्योर्वलि। भवेत्। भवेतां। झेर्जुस्। लिङो झेर्जुस्। भवेयुः। भवेः। भवेतं। भवेत। भवेयं। भवेव। भवेम। लिङाशिषि। आशिषि लिङस्तिङार्धधातुकसंज्ञः। किदाशिषि। आशिषि लिङो यासुट् कित्। स्कोरिति सलोपः। क्ङिति च। गित्किन्ङिन्निमित्ते इग्लक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्तां। भूयासुः। भूयाः। भूयास्तं। भूयास्त। भूयासं। भूयास्व। भूयास्म। लुङ्। भूतार्थे धातोर्लुङ्। माङि लुङ्। सर्वलकारापवादः। स्मोत्तरे लङ् च। च्लि लुङि। शबाद्यपवादः। च्लेः सिच्। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। लुक्। गापाविहेणादेशः पिबतिर्गृह्यते। भूसुवोस्तिङि। भू सु एतयोः सार्वधातुके तिङि गुणो न। अभूत्। मा स्म भवत्। अभूतां। अभूवन्। अभूः। अभूतं। अभूत। अभूवं। अभूव। अभूम। न माङ्योगे। अडाटौ न स्तः। मा स्म भूत्। मा स्म भवत्। मा स्म भूत्

माभवान्भूत्

१। नित्यासमासेवाक्येऽसाविवक्षामपेक्षते। ६

भि॰ को ति॰ ३२ न्वोलिङ्ङ् निमित्तेल्ऌङ् क्रियातिपत्तौ। हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यदर्थे
धातोर्ल्ऌङ्। क्रियाया अनिष्पत्तौ गम्यमानायां। अभविष्यत्। अभविष्यतां। अभवि
ष्यन्। अभविष्यः। अभविष्यतं। अभविष्यत। अभविष्यं। अभविष्याव। अभविष्या
म। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यदित्यादि ज्ञेयं। प्रभवतीत्यादौ प्रादेरु
पसर्गाणामसमस्तत्वेपि संहितानित्या। तदुक्तं। संहितैकपदेनित्या धातूपसर्गयोर्नित्या
सिति। समासाद्यर्थनिर्देशश्रोपलक्षणं [illegible] गात्संयोगो भवतीत्यादौ दुःस्यत इत्ता
द्यर्थात्। उपसर्गाः स्वार्थविशेषस्य द्योतका अभवन्ति। पराभ॰ संभ॰ अनुभ॰
अभिभ॰ उद्भ॰ परिभवतीत्यत्र विलक्षणार्थावगतेः। प्रहाराहारसंहारविहा
प्रतिहार२ हारवदिति। १। अतसातत्यगमने। अतति। अतत्वादेः। अभ्यासस्यादेरतोदी २३
र्घः। आत। आततुः। आतुः। आतिथ। आतथुः। आत२। आतिव। आतिम। अति
ता। अतिष्यति। अततु। आडजादीनां। अजादेरंगस्याट् ल्ऌङ्लुङ्ल्ङ्क्षु। आतत्। आतत्।
उक्तं च उपसर्गेण धात्वर्थो बलादन्यः प्रतीयते। ५

पर।

अतात्। अतासां। लुङिसिचिइडागमे कृते। अस्तिसिचोऽपृक्ते। विद्यमानात्सिचोस्तेश्चपरस्या
पृक्तस्य हल ईडागमः। इट ईटि। इटः परस्य सस्य लोपः स्यादीटि। सिज्लोप एकादेशे सिद्धो
वाच्यः। आतीत्। आतिष्टां। सिजभ्यस्तविदिभ्यश्च। सिचोभ्यस्तादि देश्च परस्य ङित्सं
बंधिनो झेर्जुस्। आतिषुः। आतीः। आतिष्टं। आतिष्ट। आतिषं। आतिष्व। आतिष्म। आ
तिष्यत्। एवं अवरक्षणगतिकांतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छा
दीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु। अवतीत्यादि। षिधगत्यां। पुगंतलघूपधस्य
च। पुगंतस्य लघूपधस्य चांगस्येको गुणः। सार्वधातुकार्धधातुकयोः। धात्वादेः षः सः।
सेधति। षत्वं। सिषेध। सिक्कस्यस्टस्टस्त्र नस्तस्यान्येदंत्याजंतसादयः। एकाचः षोप देशाः
ष्वष्क स्विड स्वड स्वं जस्वप स्मिङः। दुंसः केवलदंसः। षकादीनां पृथक्ग्रहणात्। असंयो
गाल्लिट्कित्। असंयोगात्परोपित्लिट्कित्स्यात्। सिषिधतुः। सिषिधुः। सिषेधिथ। सिषि
धथुः। सिषिध। सिषेध। सिषिधिव। सिषिधिम। सेधिता। सेधिष्यति। सेधतु। असेधत्।

प्रोणोतेः प्रपसमस्यादि ५

सेधेत्। सिध्यात्। असेधीत्॥ असेधिष्यत्। सात्पदाद्योः। सस्य षो न। इति निषेधे प्राप्ते। उ
पसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसंजस्वंजां॥ उपसर्गस्थान्निमि
त्तादेषां सस्य षः। स्यादिष्वभ्यासेन चाभ्यासस्य। प्रतिभिन्नादुपसर्गात्सदेः सस्य षः। स्तन्सेः। सो त्रस्य सस्य
षः। अवाच्चालंबनाविदूर्ययोः॥ न अवात् स्तंभे रेतयोः अर्थयोः सस्य षः। वेश्च स्वनो भोजने।
व्यवाभ्यां स्वनतेः सस्य षो भोजने। परिनिविभ्यः सेवसित। सयसिवुसहसुट्स्तुस्वंजां। परि
निविभ्यः परेषामेषां सस्य षः। निषेधति। प्राक्सितादड्व्यवायेपि। सेवसितेत्यत्र सित
शब्दात्प्रागेव सुनोत्यादयस्तेषामड्व्यवायेपि सस्य षः स्यात्। न्यषेधत्। न्यषेधीत्। न्यषेधिष्यत्
स्थादिष्वभ्यासेन चाभ्यासस्य। प्राक्सितात् स्थादिष्वभ्यासेन व्यवायेपि षत्वं स्यात् एषा
मेव चाभ्यासस्य न तु सुनोत्यादीनां। निषिषेध॥ निषिषिधतुः। सेधतेर्गतौ। गतौ
र्थस्य सेधतेः षो न। गंगां विसेधति। एवं षिती संज्ञाने। षुट शौके॥ गद व्यक्तायां
वाचि। गदति। नेर्गदनदपतपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवह ३३

तिशाम्यतिचिनोतिदेग्धिषु च॥ उपसर्गस्थान्निमित्तात्परस्य नेर्णः गदादिषु परेषु। प्रणिगदति। कुहोश्चुः।
अभ्यासकवर्गहकारयोः चवर्गादेशः। अत उपधायाः। वृद्धिः स्यात् ञिति णिति च प्रत्यये। जगाद। ज
गदतुः। जगदुः। जगदिथ। जगदथुः। जगद। णलुत्तमो वा। णित्स्यात्। जगाद। जगद। जगदि
व। जगदिम। गदिता। गदिष्यति। गदतु। अगदत्। गदेत्। गद्यात्। अतो हलादेर्लघोः। हला
रेना देर्लघोरकारस्य वृद्धिर्वा इडादौ सिचि परस्मैपदे। अगादीत्। अगदीत्। अगदिष्यत्। णद अव्यक्ते श
ब्दे। णो नः। धात्वादेर्णस्य नः। णोपदेशास्त्वनर्द्नाटिनाथ्नाधृन्दनन्दनक्कनॄनृतः। उपसर्गादस
मासेपि णोपदेशस्य। उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः। प्रणदति।
प्रणिनदति। नदति। नदतः। ननाद। अत एकहल्मध्येऽनादेशादेर्लिटि। लिण्निमित्तादे
शादिकं न भवति यदंगं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्य एत्वमभ्यासलोपश्च
किति लिटि। नेदतुः। नेदुः। थलि च सेटि। इडन्ते थलि च प्रागुक्तं स्यात्। नेदिथ। नेदथुः।
नेद। ननाद। ननद। नेदिव। नेदिम। नदिता। नदिष्यति। नदतु। अनदत्। नदेत्। न
द्यात्। अनादीत्। अनदीत्। अनदिष्यत्। टुनदि समृद्धौ। टुरुदसंज्ञावाच्यः। श्वो

इदितो नुम्धातोः ४

मध्य०सि०

३४ तति। शर्धर्वाः खयः। शिष्यंते भ्यास्तस्य हलादिः शेषोपवादः। चुश्च्योत। इदितो वा। इदितो धातोः श्च्यु
रङ्नुपरस्मैपदे। अश्च्युतत्। अश्च्योतीत्। षकारस्तदितेरप्येयं। श्चोतति। चुश्चोत। अ
श्चुतत्। अश्चोतीत्। च्युतिर् आसेचने। च्योतति। टुनदि समृद्धौ। आदिर्ञिटुडवः। उ
पदेशेधातोराद्या एते इतस्युः। इदितो नुम्धातोः। नंदति। ननंद। नंदिता। नंदिष्यति। नंद
तु। अनंदत्। नंदेत्। इदित्वान्नलोपो न। नंद्यात्। अनंदीत्। अनंदिष्यत्। एवं कु
थिपुथिलुथिमथिमंथ्यहिंसासंक्लेशनयोः। बिदि अवयवे। भिदीति पाठांतरं। गडि
वदनैकदेशे। णदि आह्लादे। त्रदि चेष्टायां। कदि क्रदि क्लदि आह्वाने रोदने च। क्लिदि
परिदेवने। तकि कृच्छ्रजीवने। लुगि युगि बुगि वर्जने। मघि मंडने। शिघि आघ्रा
णे। मंथ विलोडने। मंथति। ममंथ। कित्वान्नलोपः। मथ्यात्। अर्च पूजायां। अर्चति।
तस्मान्नुड्द्विहलः। द्विहलो धातोर्दीर्घान्नकारात्तः परस्यनुट् स्यात्। आनर्च। आनर्चतुः। ३४
अर्चिता। अर्चिष्यति। अर्चतु। आर्चत्। अर्चेत्। अर्च्यात्। आर्चीत्। आर्चिष्यत्। एवं

नुम् अनिदितां ह०३

चु२ वा३

अर्ज्गतौ याचने च। अति अदि बंधने। वन षण संभक्तौ। वनति। न शसददवादिगुणानां।
शसिददिदवकारादीनां गुणशब्देन विहितो यो अस्तस्य च एत्वाभ्यासलोपौ न। ववनतुः।
सनति। ससान। सेनतुः। ये विभाषा। जनसनखनामात्वं यादौ क्ङिति। सायात्। सन्यात्।
व ब्रज गतौ॥ ब्रजति। वव्राज। ब्रजिता। ब्राजिष्यति। ब्रजतु। अब्रजत्। ब्रजेत्। ब्रज्यात्। व
८ जैब्रजहलंतस्याचः। एषामचो वृद्धिः सिचि परस्मैपदेषु। अब्राजीत्। अब्राजिष्यत्॥
कटे वर्षावरणयोः। कटति। चकाट। कटिता। कटिष्यति। कटतु। अकटत्। कटेत्। क
ट्यात्। ह्म्यंत क्षण श्वस जागृणिश्व्येदितां। हमयांतस्य क्षणादेर्ण्यंतस्य श्वयतेरेदित
श्च वृद्धिर्नेडादौ सिचि। अकटीत्। अकटिष्यत्। गुपू रक्षणे। गुपूधूपविच्छिपणिप
निभ्य आयः। स्वार्थे। सनाद्यंता धातवः। सनाद्यः कसेर्णिङंताः प्रत्ययाअंते येषां
ते धातुसंज्ञाःस्युः। सन् क्यच् काम्यच् क्यङ् क्यषोथाचारक्विप् णिज्यङौतथा। यगाय ईयङ्

गुप्यो आयप्रत्ययः स्यात्२

ल०कौ०ति० णिङ्क्वितिहाद्यामीसनादयः ।१। सनाद्यंताधातवः इत्संस्यानंतरं भ्व आदय इत्येवमूत्रत्रयि तुंप्र
तं । धातुबाहुडादयः । गोपायति । आयादय आर्द्धधातुके वा ॥ आर्द्धधातुकविवक्षाया
मायेयङ्क्विङीवा स्युः । कास्यनेकाच आम्वक्तव्यो लिटि । कास्प्रत्ययादाममन्त्रे लिटि ॥
अतोलोपः । आर्द्धधातुकोपदेशे यदंतं तस्यातो लोप आर्द्धधातुके । आमः । आमःपर
स्य लुक् । कृञ्चानुप्रयुज्यते लिटि । आमंता ल्लिट्परा कृभ्वस्तयोऽनुप्रयुज्यंते । तेषां द्विर्नु
त्वादिकं तत । अभ्यासे चर्च त्रतोत्प्रत्यये । प्रत्यये किं । चकार । वृद्धिः । गोपायांचकार । द्वित्वा
त्परत्वाद्यणि प्राप्ते । द्विर्वचनेऽचि । द्वित्वनिमित्ते चि अच आदेशो न द्वित्वे कर्त्तव्ये । गोपायां ४
चक्रतुः । गोपायांचक्रुः । एकाच उपदेशेऽनुदात्तात् । उपदेशे यो धातुरेकाजनुदात्तश्च त
त आर्द्धधातुकस्येण्न ॥ ऊदॄदन्तैर्यौतिरुक्ष्णुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः । वृङ्वृञ्भ्यां च वि ३८
नैकाचोऽजन्तेषु निहताः स्मृताः ।१। कान्तेषु शक्लृ एकः । चान्तेषु पच्मुच्रिच्वच्विच्सिचः षट् ।
छान्तेषु प्रच्छ् एकः । जान्तेषु त्यज्निजिर्भजभञ्जभुज्भ्रस्ज्मस्जियज्युज्रुज्रञ्जविजिर्स्वं
ञ्जसंञ्जसृजः पंचदश ॥ दान्तेषु अद्क्षुद्खिद्छिद्तुद्नुद्पद्यभिद्विद्यविनद्विन्द्श
द्सद्स्विद्यस्कंद्हदः षोडश ॥ धान्तेषु क्रुध्क्षुध्बुध्यबंधयुधरुधराधव्यधशुधसाधसि
ध्य एकादश । नान्तेषु मन्यहनौ द्वौ । पान्तेषु आप्छुप्क्षिप्तप्तिप्तृप्यदृप्यलिप्लुप्वप्श
प्स्वप्सृपस्त्रयोदश । भान्तेषु यभ्रभ्लभस्त्रयः । मान्तेषु गम्नम्यम्रमश्चत्वारः । शान्ते
षु क्रुश्दंश्दिश्दृश्मृश्रिश्रुश्लिश्विश्स्पृशो दश । षान्तेषु कृष्त्विष्तुष्द्विष्
दुष्पुष्यपिष्विष्शिष्शुष्श्लिष्य एकादश । सान्तेषु घस्वसती द्वौ । हान्तेषु दहदिहदु
हनहमिहरुहलिहवहोऽष्टौ । अनुदात्ता हलंतेषु धातवस्त्र्यधिकं शतं । गोपायांचकर्थ । गो
पायांचक्रथुः । गोपायांचक्र । गोपायांचकार । गोपायांचकृव । गोपायांचकृम । गोपायां
बभूव । गोपायामास । जुगोप । जुगुपतुः । जुगुपुः । स्वरतिसूतिसूयतिधूञूदितो वा ॥
स्वरत्यादेरूदितश्च परस्य वलादेरार्द्धधातुकस्येड् वा । जुगोपिथ । जुगोप्थ । गोपायिता ॥

म०कौ०त्ति

अगोप्सम्४ भे४

गोपिता। गोप्ता। गोपायिष्यति। गोपिष्यति॥ गोप्स्यति। गोपायतु। अगोपायत्। गोपायेत्। गोपा
३६ य्यात्। गुप्यात्। अगोपायीत्। नेटि। झलंतस्य सिचि हलंतलक्षणा वृद्धिर्न। अगोपीत्। अ
गोप्सीत्। झलो झलि। झलः परस्य सस्य लोपो झलि। अगोप्तां। अगोप्सुः। अगोप्सीः। अ
गोप्तं। अगोप्त। अगोप्सं। अगोप्स्व। गोपायिष्यत्। अगोपिष्यत्। अगोप्स्यत्। क्षि क्षये॥
क्षयति। चिक्षाय। चिक्षियतुः। चिक्षियुः। एकाच इति निषेधप्राप्ते। कृसृभृवृस्तुद्रुस्रुश्रुवो
लिटि। क्रादिभ्य एव लिटि इट् न स्यात् तदन्यस्मादनिटोपि स्यात्। अचस्तास्वत्थल्यनि
टो नित्यं। उपदेशेऽजंतो यो धातुस्तासौ नित्यानिट् ततस्थल इण्न। उपदेशेऽत्वतः। उपदेशे
अकारवतस्तासौ नित्यानिटः परस्य थल इण्न। ऋतो भारद्वाजस्य। तासौ नित्यानिट् ऋदंता
द्वा देव थलो नेट् भारद्वाजस्य मते तेन तेनात्यस्यस्यादेव। अयमत्र संग्रहः। अजंतोकारवान्वा
यस्तास्यनिट् थलि वेडयं। ऋदंत ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत्। चिक्षयिथ। चि ३६
क्षेथ। चिक्षियथुः। चिक्षिय। चिक्षाय। चिक्षय। चिक्षियिव। चिक्षियिम। क्षेता। क्षेष्यति॥

थुः१ पं२

तेपुः१ प२

क्षयतु। अक्षयत्। क्षयेत्। अकृत्सार्वधातुकयोर्दीर्घः। अजंतांगस्य दीर्घः स्यात् यादौ प्रत्यये न तु
कृत्सार्वधातुकयोः। क्षीयात्। सिचि वृद्धिः परस्मैपदेषु। इगंतांगस्य वृद्धिः परस्मैपदे सिचि।
अक्षैषीत्। अक्षेष्यत्॥ तप संतापे॥ तपति। तताप। तेपतुः। तेपिथ। ततप्थ। तप्ता॥ तप्स्य थ
ति। तपतु। अतपत्। तपेत्। तप्यात्। अताप्सीत्। अताप्तां। अतप्स्यत्। निसस्तपतावनासेवने। षः स्यात्। आसेवनं पौनःपुन्यं ततोऽन्यस्मिन्विषये। निष्टपति। क्रमु पादविक्षेपे।
वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः। एभ्यः श्यन्वा कर्तरि सार्वधातुके। पक्षे श
प्। क्रमः परस्मैपदेषु। क्रमेर्दीर्घः परस्मैपदे शिति। क्राम्यति। क्रामति। चक्राम। स्नुक्र
मोरनात्मनेपदनिमित्ते। अत्रैवेट्। क्रमिता। क्रमिष्यति। क्राम्यतु। क्रामतु। अक्राम्यत्।
अक्रामत्। क्राम्येत्। क्रामेत्। क्रम्यात्। अक्रमीत्। अक्रमिष्यत्। चमु छमु जमु झमु
अदने। ष्ठिवुक्लमुचमां शिति। अचो दीर्घः। आङि चम इति वक्तव्यं। आचामति। आङः किं॥
चमति। चिचमाति। अचमीत्। स्खल संचलने। स्खलति। चस्खाल। अतो लान्तस्य। अ

रणाम२ त्यादौ शिति२

४ आदेच उपदेशेऽशिति । ६।१।४५ । ४ आदंतादातोर्णल औ कारादेशः स्यात् ४

म० ति० तः समीपे योयोऽल्वोऽनदंतस्यांगस्याऽतो वृद्धिः परस्मैपदपरे सिचि । असखालीत् । त्सर छद्मगतौ । अत्सा
रीत् । पा पाने ॥ पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छप
३७ श्यर्छधौशीयसीदाः । पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये ॥ पिबादेशोऽदंतस्तेन न गु
णः । पिबति । आत औ णलः । पपौ । आतो लोप इटि च । अजाद्योरार्द्धधातुकयोः क्ङिदिटोः परयो
रातो लोपः । पपतुः । पपुः । पपिथ । पपाथ । पपथुः । पप । पपौ । पपिव । पपिम । पाता । पास्य
ति । पिबतु । अपिबत् । पिबेत् । एर्लिङि । घुसंज्ञानां मास्थागापापिबतिजहातिस्यतीनां च ए
त्वमार्द्धधातुके लिङि किति । पेयात् । गातिस्थेति सिचो लुक् । अपात् । अपाताम् । आतः
जुस् सिज्लुकि आदंतादेव जुस् । उस्यपदांतात् । अपदांतादकारादुसि पररूपमेकादेशः स्या
त् । अपुः । अपास्यत् । ग्लै म्लै हर्षक्षये । [illegible]यति । आदेच उपदेशेऽशिति । उपदेशे एजंत
स्य धातोरात्वं न तु शिति । जग्लौ । ग्लाता । ग्लास्यति । ग्लायतु । अग्लायत् । ग्लायेत् । वान्यस्य सं ३७
योगादेः । घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा आर्द्धधातुके किति लिङि ॥

ग्ला २

ती धातुपाठ २

ग्लेयात् । ग्लायात् । यमरमनमातां सक् च । एषां सगेभ्यः सिच इट् परस्मैपदेषु । अग्लासीत् । अग्ला
स्यत् । एवं म्लायत्यादि । धेट् पाने । धयति । दधौ । दाधा घ्वदाप् । दारूपा धातवो घुसंज्ञाः स्युर्दा
प्दैपौ विना । धेयात् । विभाषा धेट्श्व्योः । आभ्यां च्लेश्चङ् वा । णिश्रिद्रुस्रुभ्यः कर्तरि चङ् । चङि । अनभ्यासस्य धात्ववयवस्य प्र
थमस्यैकाचो द्वे स्तोऽजादेर्द्वितीयस्य । अदधत् । अदधताम् । विभाषा घ्राधेट्शाच्छासः । ए
भ्यः सिचो लुग्वा परस्मैपदे । अधात् । अधाताम् । अधुः । पक्षे इट्सकौ । अधासीत् । अधासिष्टाम् ।
दैन्य कृच्छ्रणे । धायति । द्रै स्वप्ने । द्रायति । घ्रै तृप्तौ । घ्रायति । ध्यै चिंतायाम् । ध्यायति । रै श
ब्दे । रायति । स्त्यै ष्ट्यै शब्दसंघातयोः । स्त्यायति । षोपदेशत्वात्पिस्त्वे कृते रूपं तुल्यम् । षोप
देशफलं तु तिष्ट्यासती त्यादिभाविष्यति । खै खदने । क्षै जै षै क्षये । सायति । घुमास्थे[illegible]
त्वविभाषा घ्राधेट्शाच्छासः इत्यत्र तस्य तेरेव ग्रहणं न तस्य । तेन एत्व सिज्लुकौ न । सायात् । असा
सीत् । कै गै शब्दे । [illegible] पाके । पै ओ वै शोषणे । पायात् । अपासीत् । घुमास्थेति ईत्वं
द पवादस्य एर्लिङीत्ये त्वं गातिस्थेति सिज्लुक् च न । लक्षण प्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रह

म०को०ति० णमिति। पारूपस्यत्वात्स्वलीकृतत्वात्। ष्टै वेष्टने। स्तायति। ष्णै वेष्टने। स्त्रोभायांसेसेके। स्नायति।
३८ दैप् शोधने। दायति। अप्लुत्वादेत्वसिद्धुकोन। दायात्। अदासीत्। घ्रा गंधोपादा
ने। जिघ्रति। घ्रायात्। घ्रेयात्। अघ्रासीत्। ध्मा शब्दाग्निसंयोगयोः। धमति। ष्ठाग
दि तिनिवृत्तौ। तिष्ठति। स्थौ ष्ठिवृतिषत्वे। अधितष्ठौ। उपसर्गादितिषत्वे। अधिष्ठाता। स्थेया
त्। सति हलते प्रकृतिस्तवर्गे स्यात्। नकारजावनुस्वारपंचमो झलि धातुषु। सकारजः शकारजः षकार
ह षोडिवर्गेस्तवर्गजः। सिचोलुक्। अस्थात्। म्ना अभ्यासे। मनति। दाण् दाने। प्रणि
स्र यंति। ह्वृ कौटिल्ये। ह्वरति। ऋतश्चसंयोगादेर्गुणः॥ ऋदंतस्य संयोगादेरंगस्य गुणो
अन लिटि। उपधावृद्धिः। जह्वार॥ जह्वरतुः। जह्वरुः॥ जह्वर्थ। जह्वरथुः। जह्वर। जह्वा
र। जह्वर। जह्वरिव। जह्वरिम। ह्वर्ता। ऋद्धनोस्ये। ऋतो हंतेश्च स्य इट्। ह्वरिष्यति। स्य
ह्वरेत् ह्वरतु। अह्वरत्। गुणोर्तिसंयोगाद्योः॥ अर्तेः संयोगादेः ऋदंतस्य च गुणो यक्रियाद्यार्द्ध ३८
धातुके लिङि च। ह्वर्यात्। अह्वार्षीत्। अह्वरिष्यत्। स्वृ शब्दोपतापयोः। स्वरति। स्वरती

स्या५ × किदर्थमिदं स्वत्वं णल्यपि भवति ४५

तिवेट्॥ सस्वरिथ। सस्वर्थ। वमयोस्तु स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधे पारंभसामर्थ्या
श्रु त्। श्र्युकः किति इति निषेधे प्राप्ते। क्रादिनियमान्नित्यमिट्। सस्वरिव। सस्वरिम। परत्वादृद्धनोरि
तिनित्यमिट्। स्वरिष्यति। स्मृ चिंतायां। स्मरति। ह्वृ संवरणे। ह्वरति। स्तृ गतौ। क्रादित्वान्नेट्। स
सर्थ। सस्रव। सस्रम। रिङ् शयग्लिङ्क्षु। शेयक्रियादावार्धधातुके लिङि च ऋतो रिङ्। रीङृ
तोरिङ् विधिसामर्थ्यान्न दीर्घः। स्रियात्। शीभ्रगतौ। नुपाघ्रेति शिति धौ वादेशः। धावति। ष्ठ
सेवने। ... दृशिर् प्रेक्षणे। पश्यति। विभाषा सृजि दृशोः। आभ्यां थल इड् वा स्यात्।
सृजिदृशोर्झल्यमकिति। अनयोरमागमः स्यात् झलादावकिति। दद्रष्ठ। ददर्शिथ। द्रष्टा।
षढोः कः सि। द्रक्ष्यति। दृश्यात्। इरितो वा। ऋदृशोऽङि गुणः। ऋवर्णांतानां दृशेश्च गुणः
स्यादङि। अदर्शत्। अङभावे। न दृशः। क्से वक्ष्यमाणाक्तो न। अद्राक्षीत्। अद्रक्ष्यत्।
श्रु श्रवणे। श्रुवः शृ च। श्रुवः शृ आदेशः श्नु प्रत्ययश्च कर्त्तरि सार्वधातुके। शृणोति। सार्व

म०ति० ३९ धातुरूपं पित्। अपि सार्वधातुकं ङित् स्यात्। शृणुतः। हुश्नुवोः सार्वधातुके। हुश्नुवोरनेकाचो
वोऽसंयोगपूर्वो वर्णस्य यण् स्यादजादौ सार्वधातुके। शृण्वन्ति। शृणोषि। शृणुथः। शृणु
थ। शृणोमि। लोपश्चास्यान्यतरस्यां म्वोः। असंयोगपूर्वस्य प्रत्ययोकारस्य लोपो वा म्वोः
परयोः। शृण्वः। शृणुवः। शृण्मः। शृणुमः। शुश्राव। शुश्रुवतुः। शुश्रुवुः। शुश्रोथ। शुश्रु
वथुः। शुश्रुव। शुश्राव। शुश्रव। शुश्रुव। शुश्रुम। श्रोता। श्रोष्यति। शृणोतु। शृणुता
त्। शृणुतां। शृण्वन्तु। उतश्च प्रत्ययादसंयोगपूर्वात्। असंयोगपूर्वात्प्रत्ययोऽतो हे
र्लुक्। शृणु। शृणुतात्। शृणुतं। शृणुत। गुणावादेशौ। शृणवानि। शृणवाव।
शृणवाम। अशृणोत्। अशृणुतां। अशृण्वन्। अशृणोः। अशृणुतं। अशृणु
त। अशृणवं। अशृण्व। अशृणुव। अशृणुम। अशृण्म। शृणुयात्। शृणुयातां
उस्यपदांतात्। शृणुयुः। शृणुयाः। शृणुयातं। शृणुयात। शृणुयां। शृणुयाव। शृणु

याम। श्रूयात्। अश्रौषीत्। अश्रोष्यत्। गम्लृ सृप्लृ गतौ। इषुगमियमां छः। इच्छति। गच्छति।
जगाम। गमहनजनखनघसां लोपः क्ङित्यनङि। एषामुपधाया लोपोऽजादौ क्ङिति न तु
ङि। जग्मतुः। जग्मुः। जगमिथ। जगंथ। जग्मथुः। जग्म। जगाम। जगम। जग्मिव। जग्मि
म। गमेरिट् परस्मैपदेषु। गमेः सादेरार्धधातुकस्येट् परस्मैपदेषु। गमिष्यति। गच्छतु। अ
गच्छत्। गच्छेत्। गम्यात्। पुषादिद्युताद्य्लृदितः परस्मैपदेषु। श्यन्विकरणपुषादेर्द्यु
कुं ताद्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु। अगमत्। अगमिष्यत्। सर्पति। अनु
दात्तस्य चर्दुपधस्यान्यतरस्यां। उपदेशे अनुदात्तो य ऋदुपधस्तस्याम्वा झलादाव
किति। स्रप्तौधोधः। झषः परयोस्तथोर्धः न तु दधातेः। यय बुध। बुद्धा। णमु प्रह्वत्वे श
ब्दे। नेमिथ। ननंथ। नंता। अनंसीत्। अनंसिष्टां। त्यज हानौ। त्यजति। तत्याज। तत्यजिथ।
तत्यक्थ। त्यक्ता। अत्याक्षीत्। अक्षू व्याप्तौ। अक्षोऽन्यतरस्यां। श्नुः कर्तरि सार्वधा
स्रप्ता॥ असृपत्॥ शिश्रिवां अस्य ... ॥ सरति॥ यभ मैथुने॥ यभति॥ येभिथ॥ झषस्तथो॥ ३

सि० कौमु० तुके। पक्षे त्राप्। अक्ष्णोति। अक्षति। आनक्ष। आनक्षिथ। आनष्ठ। अक्षिता॥ अष्टा। अक्षि
५० ष्यति। स्कोरिति कलोपः। षढोः कः सि। अक्ष्यति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। अक्ष्णो
त्। आक्ष्णवं। अक्ष्णुयात्। अक्ष्णुयुः। अक्ष्यात्। आक्षीत्। आक्षिष्ट। आक्षिष्टं।
तक्ष त्वक्ष तनूकरणे। तनूकरणे तक्षः। श्नुर्वा। त्वक्ष्णोति। तक्षति वा काष्ठं।
ततक्षिथ। ततष्ठ। अतक्षीत्। अतक्षिष्टां। अताक्षीत्। अताष्टां। तनूकरणे किं। वाग्भिः
नि संतक्षिति र्भर्त्सयतीत्यर्थः। रक्ष पालने। रक्षति। णिक्ष चुंबने। प्रणिक्षति। वक्ष रोषे। नि
संघात इत्येके। वक्षति। मृक्ष संघाते। म्रक्ष इत्येके। तक्ष त्वचने। त्वचनं संवरणं त्वचो ग्रहणं वा
पक्षपरिग्रह इत्येके। सूर्क्ष आदरे। सुसूर्क्ष। काक्षि वाक्षि माक्षि कांक्षायां। द्राक्षि ध्राक्षि ध्वा
क्षि घोरवाशिते च। तृष पाने। तूषति तुष्टौ। पूष वृद्धौ। मूष स्तेये। लूष रूष भूषायां। शूष प्रसवे। ५०
यूष हिंसायां। जूष च। भूष अलंकारे। जि जये। जयति। सन्लिटोर्जेः। सन्लिटोर्गिमित्ता
हिंसायां॥२

नीव

दभ्यासात्परस्य जेः कुत्वं। जिगाय। जिगयिथ। जिगेथ। जीव प्राणधारणे। जीवति। पीव मीव तीव णीव स्थौ
ल्ये। पीवति। पिपीव। मुर्व बंधने। उपधायां च। धातो रूपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दी
र्घः। मूर्वति। मुमूर्व। पुर्व पर्व मर्व पूरणे। पूर्वति। पर्वति। मर्वति। चर्व अदने। कष खष शिष जष
झष शष वष मष रुष रिष हिंसार्थाः। रोषति। रुरोष। शल इगुपधादनिटः क्सः। इगुपधो यः श
लन्तस्तस्मादनिटश्च्लेः क्सादेशः। अरुक्षत्। तीषसहलुभरुषरिषः। इच्छसादेः परस्य तादेरार्ध
धातुकस्येड् वा। रोषिता। रोष्टा। रेषिता। रेष्टा। भष भर्त्सने। इह भर्त्सनं श्वरवः। पुष पुष्टौ। पोषिता।
अनुदात्तेषु पुष्यतिः श्यना निर्देशादयमुदात्तः। अङ्विधौ दैवादिकस्य ग्रहणान्नाङ्। अपोषीत्॥
श्रिषु श्लिषु प्रुषु प्लुषु दाहे। श्रेषति। श्लेषति। प्रोषति। प्लोषति॥ ॥इति परस्मैपदप्रक्रिया॥
एध वृद्धौ॥ टित आत्मनेपदानां टेरे। टितो लस्यात्मनेपदानां टेरेत्वं स्यात्। एधते। आतो ङितः। आ
तः परस्य ङितामाकारस्य इय्। एधेते। एधन्ते। थासः से। टितो लस्य थासः सेत्स्यात्। एधसे। एधेथे। एध
ध्वे। एधे। एधावहे। एधामहे। इजादेश्च गुरुमतोऽनृच्छः। इजादिर्यो धातुर्गुरुमाननृच्छत्यन्यस्तत आम्
लिटि। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य। आम्प्रकृत्या तुल्यं अनुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं॥

म०कौ०ति०

४१

लिटस्तझयोरेशिरेच्। एकारोच्चारणं ज्ञापकं तङादेशानां टेरेत्वं नेति। तेन डारौरसान्न। एधां
चक्रे। एधांचक्राते। एधांचक्रिरे। एधांचकृषे। एधांचक्राथे। इणः षीध्वंलुङ्लिटां धोऽङ्गात्। इण
न्तादंगात्परेषां षीध्वंलुङ्लिटां धस्य ढः स्यात्। एधांचकृढ्वे। एधांचक्रे। एधांचकृवहे। एधांचकृमहे।
एधांबभूव। एधामास। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न॥ अन्यथा हि कृञ्चानुप्रयुज्यते
इतिकृन्विति वाक्यात्। एधिता। एधितारौ। एधितारः। एधितासे। एधितासाथे। धि च। धादौ
प्रत्यये सस्य लोपः स्यात्। एधिताध्वे। ह एति। तासस्त्योः सस्य हः स्यादेति परे। एधिताहे। ए
धितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यन्ते। एधिष्यसे। एधिष्येथे। एधिष्यध्वे।
एधिष्ये। एधिष्यावहे। एधिष्यामहे। आमेतः। लोट एकारस्य आम् स्यात्। एधतां। एधेतां। ए
धन्तां। सवाभ्यां वामौ। सवाभ्यां परस्य लोडेतः क्रमाद्वअमौ स्तः। एधस्व। एधेथां। एधध्वं॥
एत ऐ। लोडुत्तमस्य। एधै। एधावहै। एधामहै। आटश्च। ऐधत। ऐधेतां। ऐधन्त। ऐधथाः। ऐ ४१
धेथां। ऐधध्वं। ऐधे। ऐधावहि। ऐधामहि॥ लिङः सीयुट्। लिङः सलोपोऽनन्त्यस्य। एधेत। ए

इडिन्नरवेणिहग्ह्यतइतिमतेतु एधिध्वे ५

तां। झस्य रन्। लिङः। एधेरन्। एधेथाः। एधेयाथां। एधेध्वं। इटोऽत्। लिङादेशस्य। एधेय। एधे
वहि। एधेमहि। सुट् तिथोः। लिङस्तथोः सुट्। यलोपः। एधिषीष्ट। एधिषीयास्तां। एधिषीरन्। एधि
षीष्ठाः। एधिषीयास्थां। एधिषीध्वं। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषातां। आ
त्मनेपदेष्वनतः। अनकारात्परस्यात्मनेपदेषु झस्य अत् स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथां। ऐ
धिढ्वं। ऐधिषि। ऐधिष्वहि। ऐधिष्महि। ऐधिष्यत। ऐधिष्येतां। ऐधिष्यन्त। ऐधिष्यथाः। ऐधिष्ये
थां। ऐधिष्यध्वं। ऐधिष्ये। ऐधिष्यावहि। ऐधिष्यामहि॥ कमु कान्तौ। कमेर्णिङ्। स्वार्थे। कामयते।
अयामन्ताल्वाय्येत्न्विष्णुषु। आम् अन्त आलु आय्य इत्नु इष्णुषु परेषु णेरयादेशः स्यात्। लोपापवा
दः। कामयाञ्चक्रे। आयादय इति वा। चकमे। चकमाते। चकमिरे। चकमिषे। चकमाथे। चकमिध्वे।
चकमे। चकमिवहे। चकमिमहे। कामयितासे। कमितासे। कामयिष्यते। कमिष्यते। कामयतां।
अकामयत। कामयेत। कामयिषीष्ट। कमिषीष्ट। णिश्रिद्रुस्रुभ्यः कर्तरि चङ्। ण्यन्तात् श्र्यादि
भ्यश्च च्लेश्चङ् कर्त्रर्थे लुङि। कामि अत इति स्थिते। णेरनिटि। अनिडादौ आर्धधातुके परे णेर्लोपः।

म०कौति० ४२ णौ चङ्युपधाया ह्रस्वः। चङ्परे णौ यदंगं तस्योपधाया ह्रस्वः। चङि। अनभ्यासधात्ववयवस्यैकाचः प्र
थमस्य द्वे स्तोऽजादेर्द्वितीयस्य। सन्वल्लघुनि चङ्परेऽनग्लोपे। चङ्परे णौ यदंगं तस्य योऽभ्यासो लघु
परस्तस्य सनीव कार्यं स्यान्न तु ग्लोपे सति। सन्यतः। अभ्यासस्यात इत्सनि। दीर्घो लघोः।
लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये। अचीकमत। णिङभावपक्षे। कमेश्च्लेश्चङ् वाच्यः। अ
चकमत। अकामयिष्यत। अकमिष्यत। भाम क्रोधे। भामते। बभामे। क्षमूष् सहने। क्षमते।
चक्षमे। चक्षमिषे। चक्षंसे। चक्षमिवहे। म्वोश्च। मान्तस्य धातोर्नत्वं म्वोः परतः। चक्षण्वहे। चक्षमि
महे। चक्षण्महे। गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। गाधते। बाधृ लोडने। लोडनं प्रतिघातः। बा
धते। नाधृ नाथृ याच्ञोपतापैश्वर्याशीष्षु। आशिषि नाथ इति वाच्यं। अस्याशिष्येवात्म
नेपदं स्यात्। नाथते। अन्यत्र नाथति। नाधते। दध धारणे। दधते। देधे। स्कुदि आप्रवणे। ४२
आप्रवणमुत्प्लवनमुद्धरणं च। स्कुंदते। चुस्कुंदे। श्विदि श्वैत्ये। श्विंदते। शिश्विंदे। वदि अभि
वादनस्तुत्योः। वंदते। ववंदे। भदि कल्याणे सुखे च। भंदते। मदि स्तुतिमोदमदस्वप्नकांतिगतिषु।

वादख्य क्ले शब्दे। ३

मंदते। स्पदि किंचिच्चलने। स्पंदते। मुद हर्षे। मोदते। मुमुदे। उर्दि माने क्रीडायां च। उर्दते। ऊर्दांचक्रे।
कुर्द खुर्द गुर्द गुद क्रीडायामेव। कूर्दते। खूर्दते। गूर्दते। गोदते। जुगुदे। षूद क्षरणे। सुषूदे। ह्रा
द अव्यक्ते शब्दे। ह्रादते। जह्रादे। ह्लादी सुखे च। ह्लादते। स्वाद आस्वादने। स्वादते। पर्द
कुत्सिते शब्दे। गुदरवे इत्यर्थः। पर्दते। यती प्रयत्ने। यतते। येते। श्रथि शैथिल्ये। श्रंथते।
ग्रंथि कौटिल्ये। ग्रंथते। कत्थ श्लाघायां। कत्थते। श्लोकृ संघाते। संघातो ग्रंथः। स चेह ग्रथ्य
मानस्य व्यापारो ग्रंथितुर्वा। आद्येऽकर्मको द्वितीये सकर्मकः। श्लोकते। शकि शंकायां। शंक
ते। शशंके। अकि लक्षणे। अंकते। आनंके। वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क
मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः। वंकते। श्वंकते। त्रंकते। ढौक
ते। डुढौके। त्रौकते। तुत्रौके। सुधातुष्ठिवुष्वष्कतीनां सत्वनिषेधः। ष्वष्कते। षष्वष्के। वस्क
ते। मस्कते। टेकते। टीकते। तेकते। तीकते। रंघते। लंघते। श्लाघृ कत्थने। श्लाघते। शश्ला
घे। पचि व्यक्तीकरणे। पंचते। ऋज गतिस्थानार्जनोपार्जनेषु। अर्जते। नृद्विधोऋकार

म०कौ०ति०
४३

कृदेशे रेफो हलं तेन गर्ह्यते। तेन नह्रि हलता न्तुट्। ऋजि भृजी भर्जने। ऋंजते। आनृंजे। भ
र्जते। एजृ भ्रेजृ भ्राजृ दीप्तौ। एजते। भ्रेजते। बिभ्रेजे। भ्राजते। बभ्राजे। वेष्ट वेष्टने। वेष्ट
ते। विवेष्टे। चेष्ट चेष्टायां। चेष्टते। चिचेष्टे। स्फुट विकसने। स्फोटते। पुस्फुटे। टुवेपृ कंपने।
वेपते। कपि चलने। कंपते। भिक्ष भिक्षायां अलाभे लाभे च। भिक्षते। दीक्ष मौंड्येज्योप
नयननियमव्रतादेशेषु। दीक्षते। दिदीक्षे। भाष व्यक्तायां वाचि। भाषते। वर्षु स्नेहने॥
वर्षते। ईह चेष्टायां। ईहते। गर्ह गल्ह कुत्सायां। गर्हते। गल्हते। काशृ दीप्तौ। काशते। ऊह वि
तर्के। ऊहते। कथमिमं नु रूपमपूहिति पंडितो जन इति। अनुदात्तेत्त्वलक्षणमात्मनेप
दमनित्यं। अनुदात्तेतश्च हलादेः इत्यादिज्ञापकात्। तेन ऊहयति यदि भानुः स्फायति
नौकसंधिरित्यादि सिद्धमित्याहुः। अय गतौ। अयते। उपसर्गस्यायतौ। अयतावुपस
र्गस्थरेफस्य लत्वं स्यात्। प्लायते। पलायते। दयायासश्च॥ एभ्य आम्लिटि। अयांचक्रे॥ ४३

६

अयिता। अयिष्यते। अयितां। आयत। अयेत। अयिषीष्ट। विभाषेटः॥ इणः परो य इट् ततः परेषां
षीध्वंलुङ्लिटां धस्य ढो वा स्यात्। अयिषीध्वं। अयिषीढ्वं। आयिष्ट। आयिढ्वं। आयिध्वं। आयि
ष्यत। द्युत दीप्तौ। द्योतते। द्युतिस्वाप्योः संप्रसारणं। अभ्यासस्य। दिद्युते। द्योतिता। द्योतिष्य
ते। द्योततां। अद्योतत। द्योतेत। द्योतिषीष्ट। द्युद्भ्यो लुङि। द्युतादिभ्यः परस्मैपदं वा लुङि॥
पुषादिसूत्र। अद्युतत्। अद्योतिष्ट। अद्योतिष्यत। एवं श्विता वर्णे। ञिमिदा स्नेहने॥ ञि
ष्विदा स्नेहनमोचनयोः। मोहनयोरित्येके। ञिक्ष्विदा चेत्येके। रुच दीप्तावभिप्रीतौ च। घुट परिवर्तने।
शुभ दीप्तौ। क्षुभ संचलने। णभ तुभ हिंसायां। स्रंसु ध्वंसु भ्रंसु अवस्रंसने। ध्वंसु गतौ च। स्रंभु विश्वा
से। वृतु वर्तने। वर्तते। ववृते। वर्तिता। वृद्भ्यः स्यसनोः। वृतादिभ्यः पंचभ्यो वा परस्मैपदं स्यसनोः।
न वृद्भ्यश्चतुर्भ्यः। वृत वृध शृध स्यंद्भ्यः सादेरार्धधातुकस्येण्न तङानयोरभावे। वर्त्स्यति। वर्ति
ष्यते। वर्ततां। अवर्तत। वर्तेत। वर्तिषीष्ट। अवृतत्। अवर्तिष्ट। अवर्त्स्यत्। अवर्तिष्यत। एवं वृधु

नलोपः प्रसमन्त। ३

अनिदितां०। अङि नलोपः प्रसमन्त। ४

अप्रसिद्धं बहिरंगमंतरंगे। अंतरंगेकार्यकर्तव्ये बहिरंगं असिद्धं। अल्पाश्रितं अंतरंगं बह्वाश्रितं बहिरंगं।

स॰कौति॰ हृद्धेरा। स्यन्दू शब्दकुत्सायां। स्यंदू प्रस्रवणे। स्यंदते। सस्यंदे। सस्यंदिषे। सस्यंत्से। सस्यंध्वे दि। सस्यंध्वे। स्यंदिता

४४ स्यंता। वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदित्त्वलक्षणमंतरंगमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यान्न

वृद्भ्य इति निषेधः। स्यत्स्यति। स्यंदिष्यते। स्यंत्स्यते। स्यंदिषीष्ट। स्यंत्सीष्ट। द्युद्भ्यो लुङि इति परस्मैपदप

न क्षे ऽङ्। अस्यदत्। अस्यंदिष्ट। अस्यंत्त। अस्यंत्स्यतां। अस्यंत्स्यत। अस्यंदिष्यत। अस्यत्स्य

त। अनुविपर्यभिनिभ्यः स्यंदतेरप्राणिषु। एभ्यः परस्याप्राणिकर्तृकस्य स्यंदतेः सस्य षो वा। अ

नुष्यंदते। अनुस्यंदते वा जलं। अप्राणिषु किं। अनुस्यंदते हस्ती। कृपू सामर्थ्ये। कृपो रो लः। कृप इति ६

स्वरूपं स्य ल न कृपेः ऋकारस्यावयवो यो रः रेफसदृशस्तस्य लृकारसदृशः स्यात्॥ कल्पते।

चक्लृपे। चक्लृपिषे। चक्लृप्से। इत्यादि स्यंदतिवत्। लुटि च क्लृपः। लुटि स्य सनोश्च कृपेः परस्मैपदं वा

स्यात्। तासि च क्लृपः। कृपेः परस्य तासेः सादेरार्धधातुकस्य वेण्न तङानयोरभावे। कल्प्तासि। कल्पि

तासे। कल्प्तासे। कल्प्स्यति। कल्प्स्यते। कल्पिष्यते। कल्पिषीष्ट। लिङ्सिचावात्मनेपदेषु। इकः ४४

समीपाद्धलः परौ झलादी लिङ्सिचौ आत्मनेपदपरौ किद्वत्स्तः। क्लृप्सीष्ट। अक्लृपत्। अकल्पिष्ट।

अक्लृप्त। अकल्प्स्यत्। अकल्पिष्यत। अकल्प्स्यत॥ द्युतादयः समाप्ताः॥ दद दाने। ददते। ददे। ददाते। द

ददिरे। ददिता। ददिष्यते। ददतां। अददत। ददेत। ददिषीष्ट। अददिष्ट। अददिष्यत। त्रपूष् लज्जायां।

त्रपते। तृफलभजत्रपश्च। एषामत एत्वमभ्यासलोपश्च किति लिटि सेटि थलि च। त्रेपे। त्रपिता। त्रप्ता। त्र

पिष्यते। त्रप्स्यते। त्रपतां। अत्रपत। घट चेष्टायां। घटते। जघटे। व्यथ भयसंचलनयोः। व्यथते। व्य

थो लिटि। अभ्यासस्य संप्रसारणं स्यात्। हलादिः शेषापवादः। विव्यथे। प्रथ प्रख्याने। प्रथते। पप्र

थे। प्रस विस्तारे। प्रसते। पप्रसे। म्रद मर्दने। म्रदते। स्खद स्खदने। स्खदनं विद्रावणं। स्खद

ते। क्षप रूपायां गतौ। कपते। त्वरा संभ्रमे। त्वरते। टुभ्राजृ दीप्तौ टुभ्राशृ टुभ्लाशृ दीप्तौ। भ्राजते। ४८

फणां च सप्तानां। फणराजभ्राजभ्राशभ्लाशस्यमुस्वनां एषां वा एत्वाभ्यासलोपौ स्तः किति

लिटि सेटि थलि च। भ्रेजे। बभ्राजे। बाभ्राशेति रूपद्वयं। भ्राश्यते। भ्राशे। भ्रेशे। बभ्राशे।

भ्लाश्यते। भ्लाशते। भ्लेशे। बभ्लाशे। रमु क्रीडायां। रमते। रेमे॥ ॥इत्यात्मनेपदप्रक्रि

या॥ ॥श्रिञ् सेवायां। श्रयति। श्रयते। शिश्राय। शिश्रिये। श्रयितासि। श्रयितासे। श्रयि

जंभीजृंभिगात्रविनामे॥ रधिजभोरचि। नुम्। जंभते। जजंभे॥२

ष्यति। श्रयिष्यते। श्रयतु। श्रयतां। अश्रयत्। अश्रयत। श्रयेत्। श्रयेत। श्रीयात्। श्रयिषीष्ट। ४६।
अशिश्रियत्। अशिश्रियत। अश्रयिष्यत्। अश्रयिष्यत। भृञ् भरणे। भरति। भरते। बभार। बभ्र
तुः। बभ्रुः। बभर्थ। बभ्रव। बभ्रम। बभ्रे। बभ्रृषे। भर्त्तासि। भर्त्तासे। ऋद्धनोः स्ये भरिष्यति। भ्रियात्॥
उश्च। ऋवर्णात्परो झलादि लिङ् आत्मनेपदपरसिचौ सेतौ कितौ स्तः। भृषीष्ट। भृषीयास्तां। अभा
र्षीत्। ह्रस्वादंगात्। सिचो लोपो झलि। अभृत। अभरिष्यत्। अभरिष्यत। हृञ् हरणे। हरति। ह
रते। जहार। जहर्थ। जह्रिव। जह्रिम। जह्रे। जह्रिषे। हर्त्ता। हरिष्यति। धृञ् धारणे। धरति।
त्र धरते। णीञ् प्रापणे। नयति। नयते। डुपचष् पाके। पचति। पचते। पपाच। पेचिथ। पपक्थ। पेचे।
पक्ता। भज सेवायां। भजति। भजते। भेजे। भक्ता। भक्ष्यति। भक्ष्यते। अभाक्षीत्। अभ
क्त। अभक्ष्यत। यज देवपूजासंगतिकरणदानेषु। यजति। यजते। लिट्यभ्यासस्योभयेषां। वच्या ४५
दीनां ग्रह्यादीनां चाभ्यासस्य संप्रसारणं लिटि। इयाज। वचिस्वपियजादीनां किति। वचिस्वप्यो

अने ९४ संप्रसारणं तदाश्रितं कार्यं च बलवत्
दी

श्यु
र्यजादीनां च संप्रसारणं किति। यजिवपिवहिश्विवसिर्वेञ्व्येह्वेश्व्यादि ...यति श्वेवयजाद्याःस्युरिमेन
व ॥१॥ ईजतुः। ईजुः। इयजिथ। इयष्ठ। ईजे। यष्टा। यक्ष्यति। यक्ष्यते। इज्यात्। यक्षीष्ट॥ अयाक्षीत्। अ
यष्ट। वह प्रापणे॥ वहति। वहते। उवाह। ऊहतुः। ऊहुः। उवहिथ। झषस्तथोर्धोधः। ढो ढे लोपः। सहिवहोरोद
वर्णस्य। ढलोपे। उवोढ। ऊहे। वोढा॥ वक्ष्यति॥ अवाक्षीत्। अवोढां। अवाक्षुः। अवाक्षीः। अवोढं। अवोढ।
अवाक्षं। अवाक्ष्व। अवोढ्व। अवक्षातां। अवक्षत। अवोढाः। अवक्षाथां। अवोढ्वं। अवक्षि। अवक्ष्व
हि। अवक्ष्महि। डुवप् बीजसंताने। बीजसंतानं क्षेत्रे विकरणं। गर्भाधानं च। अयं छेदनेपि। केशा
न्वपति। वपते। उवाप। ऊपे। वप्ता। उप्यात्। वप्सीष्ट। प्रण्यवाप्सीत्। अवप्त। वेञ् तंतुसंताने॥
वयति। वयते॥ वेञो वयिः। वा स्याल्लिटि। इकारश्चारणार्थः। उवाय। ग्रहिज्यावयिव्यधिवष्टिवि
चतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च॥ चात्किति संप्रसारणं॥ ॥इति यस्य प्राप्ते॥ लिटि व
यो यः। वयो यस्य संप्रसारणं न लिटि॥ ऊयतुः। ऊयुः। वश्चास्यान्यतरस्यां किति। वयो यस्य वो वा स्यात् कि
ति लिटि॥ ऊवतुः। ऊवुः। ययप्त्या सा च भावात्। अङ्गिनित्यमिट्॥ उवयिथ॥ स्थानिवत्त्वान्नत्वान्तरङ्ग।

म०कौ०ति०
४६

ऊये। ऊवे। वयो देशाभावे॥ वेञः॥ वेञो न संप्रसारणं लिटि। ववौ। ववतुः। ववुः। ववियथ। ववाथ। ववे। व
वाते। वाता। ऊयात्। वासीष्ट। अवासीत्। अवासिष्टां। अवास्त। व्येञ् संवरणे। व्ययति। व्ययौ। न
व्यो लिटि। आत्वं न॥ परमपि हलादिशेषं बाधित्वाय यमरमनमातां सगिटौ व्यस्य संप्रसारणं। उभ
येषांग्रहणसामर्थ्यात्॥ न्ये अथा वव्यादीनां ग्रह्यादीनां चानुवृत्त्येव सिद्धे किं तेन॥ विव्याय॥
विव्यतुः। विव्युः॥ इडत्यर्तिव्ययतीनां॥ अदत्रर्तिव्येञ्भ्यः स्थलो नित्यमिट्॥ विव्ययिथ। विव्या
थ। विव्यय। विव्ये। व्याता। वीयात्॥ व्यासीष्ट। अव्यासीत्। अव्यास्त॥ ह्वेञ् स्पर्द्धायां शब्दे च॥
ह्वयति। ह्वयते। अभ्यस्तस्य च। अभ्यस्तीभविष्यतो ह्वयः संप्रसारणं। जुहाव। जुहुवे। ह्वाता।
लिपिसिचिह्वश्च। ह्वेञ्। आत्मनेपदेष्वन्यतरस्यां। अह्वत। अह्वतां। अह्वत। अह्वास्त। रा
जृ दीप्तौ॥ राजति। राजते। रेजतुः। राजतुः। रेजे। रराजे। हिक्क अव्यक्ते शब्दे॥ हिक्कति। हि ४६
क्कते। अञ्चु गतौ याचने च॥ अंचति। अंचते। अचु इत्येके। अचि इत्यपरे। दुयाचृ याञ्चायां॥

आतोलोपइटिच

याचति। याचते। बुधिर् बोधने। बोधति। बोधते। अबुधत्। अबोधीत्। अबोधिष्ट। खनु अ
वदारणे। खनति। खनते। चखान। चख्नतुः। चख्ने। खायात्। खन्यात्। चीवृ आदानसं
वरणयोः। चीवति। चीवते। चायृ पूजानिशामनयोः॥ चायति। चायते। व्यय गतौ। व्ययति।
व्ययते। दाशृ दाने। दाशति। दाशते। भेषृ भये। गतावित्येके। भेषति। भेषते। अस गतिदी
प्त्यादानेषु। असति। असते। आस। आसे। अयं षान्तोपि। स्पश बाधनस्पर्शनयोः। स्प
र्शनं ग्रथनं। स्पशति। स्पशते। लष कान्तौ। वाभ्राशेति श्यन्वा। लष्यति। लष्यते। लषति।
लषते। चष भक्षणे। चषति। चषते। छष आदानसंवरणयोः। छषति। छषते। दासृ दाने।
दासति। दासते। धावु गतिशुद्ध्योः। धावति। धावते॥ ॥ इति भ्वादयः॥ ॥
ऋतेरीयङ्। स्वार्थे॥ ऋतिः सौत्रः। जुगुप्सायामिति बहवः। कृपायामित्येके। ऋतीयते। ऋ
तीयांचक्रे। आर्द्धधातुके आयादय इति इयङभावपक्षे शेषात्कर्त्तरि परस्मैपदं॥ आन
र्त। अर्तितास्यादि। अद भक्षणे। अदिप्रभृतिभ्यः शपः। लुक् स्यात्। अत्ति। अत्तः। अद

मध्य० कौ० सि० ति। अत्सि। अत्थः। अत्थ॥ अद्मि। अद्वः। अद्मः। लिट्यन्यतरस्यां। अदो घस्लृ वा स्यात्। ज
४७ घास। उपधालोपः। घस्य चर्त्वं। शासिवसिघसीनां च। इण्कुभ्यामेषां सस्य षः। जक्षतुः।
जक्षुः॥ घसस्थलि नित्यमिट्। जघसिथ। आद। आदतुः। आदुः। आदिथ। अत्ता।
अत्स्यति। अत्तु। अत्तात्। अत्तां। अदन्तु। हुझल्भ्यो हेर्धिः। होर्झलन्तेभ्यश्च हेर्धिः स्यात्। अ
द्धि। अत्तात्। अत्तं। अत्त। अदानि। अदाव। अदाम॥ अदः सर्वेषां। अदोऽपृक्तसार्वधातु
कस्याट् स्यात्। आदत्। आत्तां। आदन्। आदः। आत्तं। आत्त। आदं। आद्व। आद्म। अ
द्यात्। अद्यातां। अद्युः। अद्यात्। अद्यास्तां। अद्यासुः। लुङ्सनोर्घस्लृ। अदो घस्लृ स्या
त् लुङि सनि च॥ अङ्। अघसत्। आत्स्यत्। हन हिंसागत्योः॥ हन्ति। अनुदात्तोपदेश
वनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति। अनुनासिकान्तानामेषां वनतेश्च लो
पः स्याज्झलादौ क्ङिति परे [illegible]॥ यमिरमिनमिगमिहनिमन्यतयोऽनुदात्तोपदेशाः। तनुक्ष ४७
णुक्षिणुऋणुतृणुघृणुवनुमनुतनोत्यादयः। हतः। घ्नन्ति। हंसि। हथः। हथ। हन्मि॥

वमोर्वा॥ उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णः स्यात्॥ प्रहण्मि। प्रहन्मि। हन्वः। हन्मः। जघान।
जघ्नतुः। जघ्नुः। अभ्यासाच्च। हन्तेर्हस्य कुत्वं। जघनिथ। जघंथ। जघ्नथुः। जघ्न। जघान।
जघन। जघ्निव। जघ्निम॥ हंता। हनिष्यति। हंतु। हतात्। हतां। घ्नंतु। हन्तेर्जः॥ हौ। अ
सिद्धवदत्राभात्॥ इतऊर्ध्वमापादपरिसमाप्तेराभीयं समानाश्रये तस्मिन्कर्तव्ये
तदसिद्धं॥ इति जस्यासिद्धत्वान्न हेर्लुक्॥ जहि। हतात्॥ हतं। हत। हनानि। हना
व। हनाम। अहन्। अहतां। अघ्नन्। अहन्। अहतं। अहत। अहनं। अहन्व। अ
हन्म। हन्यात्। आर्धधातुके इत्यधिकृत्य॥ हनो वध लिङि। लुङि च। अतो लोपः। व
ध्यात्। वध्यास्तां। अवधीत्। अहनिष्यत्। यु मिश्रणामिश्रणयोः। उतो वृद्धिर्लुकि
हलि। लुग्विषये उतो वृद्धिः पिति हलादौ सार्वधातुके। यौति। युतः। युवन्ति। यौषि।
युथः। युथ। यौमि। युवः। युमः। युयाव। यविता। यविष्यति। यौतु। युतात्। अयौ

मं॰कौति ॥ त् ॥ अपुतां । अपुवन् । पुयात् ॥ इह वृद्धिर्न ॥ भाष्येपि [illegible] ङि [illegible] पिन्नेतिख्या ख्या
५८ त् । युयातौ । युयुः । यूयात् । यूयास्तां । यूयासुः । अयावीत् । अयविष्यत् । या प्राप
णे ॥ याति । यातः । यांति । ययौ । याता । यास्यति । यातु । अयात् । अयातां । अयुः ।
यायात् । यायास्तां । यायासुः । एवं वा गतिगंधनयोः ॥ भा दीप्तौ । ष्णा शौचे । श्रा पाके ।
द्रा कुत्सायां गतौ । प्सा भक्षणे । पा रक्षणे । रा दाने । ला आदाने । दाप् लवने । ख्या प्रक
थने । अयं सार्वधातुक एव प्रयोक्तव्यः । विद ज्ञाने । विदो लटो वा । वेत्तेर्लटः परस्मै
पदानां णलादयो वा । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म ।
पक्षे । वेत्ति । वित्तः । विदन्ति । उषविदजागृभ्योन्यतरस्यां । एभ्यो लिट्याम्वा । वि
देरदंतत्वप्रतिज्ञानादामि न गुणः । विदांचकार । विवेद । वेदिता । वेदिष्यति । [illegible] ५८
[illegible] शाकटायनस्यैव । आदंता [illegible] उस्यात् । अयुः । अयान् । यापात् । यायातां ।

यायुः ॥ यायात् ॥ यायास्तां ॥ यायासुः ॥ एवं वा गतिगंधनयोः ॥ भा दीप्तौ ॥ ष्णा शौचे । श्रा पाके ।
द्रा कुत्सायां गतौ ॥ प्सा भक्षणे ॥ पा रक्षणे ॥ रा दाने । ला आदाने । दाप् लवने । ख्या प्रक
थने ॥ अयं सार्वधातुक एव प्रयोक्तव्यः ॥ विद ज्ञाने । विदो लटो वा । वेत्तेः परस्मैपदा
नां णलादयो वा ॥ वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । वि [illegible] । विद्म ।
पक्षे वेत्ति । वेत्तः । विदंति । उषविदजागृभ्यो न्यतरस्यां ॥ एभ्यो लिट्याम्वा । विदेरदंत
त्वप्रतिज्ञानादामि न गुणः ॥ विदांचकार ॥ विवेद । वेदिता । वेदिष्यति । विदांकुर्वंत्वित्य
न्यतरस्याम् ॥ वेत्तेर्लोट्यां गुणाभावो लोटो लुक् लोडंत करोत्यनुप्रयोगश्च वा
निपात्यते पुरुषवचने न विवक्षिते । तनादिकृञ्भ्य उः ॥ शपोपवादः । विदांकरोतु ।
अत उत्सार्वधातुके । उप्रत्ययांतस्य कृञोत उत्सार्वधातुके क्ङिति । विदांकुरुतात् । अशितिनपर
तनादित्वादेव सिद्धे कृञ्ग्रहणं गणकार्यस्यानित्यत्वे लिंगं । तेन न विश्वसेदविश्वस्त इत्यादि सिद्धं । णसामर्थ्या
गुणः

आभीयत्वेनत्वकोसिद्धत्वाद्धुत्वं

म० कौ० ति० ४८ विदांकुरुतां ॥ विदांकुर्वन्तु । विदांकुरु । विदांकरवाणि । वेत्तु । अवेत् । अवित्तां । अविदुः । द
श्च ॥ धातोर्दस्य पदान्तस्य सिपि रुर्वा ॥ अवेः । अवेत् ॥ विद्यात् ॥ विद्यातां । विद्यात् । वि
द्यास्तां । अवेदीत् । अवेदिष्यत् । अस भुवि । अस्ति । श्नसोरल्लोपः ॥ श्नस्यास्तेश्चातो
लोपः सार्वधातुके क्ङिति । स्तः ॥ सन्ति । असि । स्थः । स्थ । अस्मि । स्वः । स्मः । अस्ते
र्भूः । आर्धधातुके । बभूव । भविता । भविष्यति ॥ अस्तु । स्तात् । स्तां । सन्तु । घ्वसो
रेद्धावभ्यासस्य लोपश्च । घोरस्तेश्चैत्वं स्यात् हौ अभ्यासलोपश्च ॥ आभीयत्वेन
एत्वस्य असिद्धत्वाद्धेर्धिः ॥ श्नसोरितिअल्लोपः । एधि । स्तात् । स्तं । स्त । असानि ।
असाव । असाम । आसीत् । आस्तां । आसन् । स्यात् । स्यातां । स्युः । भूयात् ॥
अभूत् । अभविष्यत् ॥ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । उपसर्गेणः प्रादु ४८

रश्चपरस्यास्तेः सस्य षो यकारेऽचि परे ॥ निष्यात् । प्रादुःष्यात् । निषन्ति । प्रादुःषन्ति । य
च्परे किं । अभिस्तः । तुरुस्तुशम्यमः सार्वधातुके । एभ्यः सार्वधातुकस्य ह
लादेः पित ईड् वा स्यात् । नाभ्यस्तस्येत्यतोनुवृत्तिसंभवे पुनः सार्वधातुकग्रहण
मपिदर्थं । रवीति । रौति । रुवीतः । रुतः । हलादेः किं । रुवन्ति । तिङः किं । राम्यति । सा
र्वधातुके किं । आशिषि रूयात् ॥ विध्यादौ तु रुयात् । रुवीयात् । अरावीत् । अ
रविष्यत् । तु इति सौत्रो धातुर्गतिवृद्धिहिंसासु । तवीति । तौति । तुवीतः । तुतः ।
तुताव । तोता । तोष्यति । णु स्तुतौ । नौति । नुनाव । नविता । टुक्षु शब्दे । क्षौति ।
चुक्षाव । क्षविता । क्ष्णु तेजने । क्ष्णौति । क्ष्णविता । ष्णु प्रस्रवणे । स्नौति । सुष्णा
व । स्नविता । षू प्रसवैश्वर्ययोः । प्रसवोऽभ्यनुज्ञानं । सौति । सूतः । सुषाव । सो
ता । असौषीत् । कु शब्दे । कौति । चुकाव । कोता । इण् गतौ । एति । इतः । इय

म०कौति०
५०

[illegible]। अजादौ प्रत्यये। यंति। अभ्यासस्यासवर्णे। अभ्यासस्य इउवर्णयोरियङुवङौ
स्तोऽसवर्णेऽचि। अचो ञ्णिति। इयाय। दीर्घ इणः किति। इणोऽभ्यासस्य दीर्घः किति लि
टि। ईयतुः। ईयुः। इययिथ। एता। एतौ। आयन्। इयात्। ईयात्। एर्लिङि। उपस
र्गात्परस्य इणोऽणो ह्रस्वः स्यात् आर्धधातुके किति लिङि। निरियात्। उभय
त आश्रये नांतादिवत्। अभीयात्। अणः किं। समेयात्। इणो गा लुङि। गातिस्थे
ति सिचो लुक्। अगात्। अगुः। अगातां। ऐष्यत्। इक् स्मरणे। अयमधिपूर्व एव॥
अधीगर्थदयेशां कर्मणीति लिंगात्। इण्वदिक इति वक्तव्यं। अधियंति। अध्यगा
त्। केचित्वार्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः। तन्मते यण् न तथा च भट्टिः ५०
ससीतयोराघवयोरधीयन्निति। वी गतिव्याप्तिप्रजनकांत्यसनखादनेषु। प्रजने

ननेगर्भग्रहणं। असनं क्षेपणं। वेति। वीतः। वियंति। वेषि। वेमि। वीहि। अवेत्। अवीतां।
अवियन्। अटि सस्तने कानुत्वाद्यणिति केचित्। अव्यन्। अपरे कौशापिथात्वं तत्रं प्र
क्लिष्यते। एतु। इतः। इयंति। ईयात्। एषीत्। वच परिभाषणे। वक्ति। वक्तः। अयमंति
परो न प्रयुज्यते। बहुवचनपर इत्यन्ये। झिपर इत्यपरे। वक्षु। वग्धि। वच्यात्। उच्यात्।
अस्यतिवक्तिख्यातिभ्योऽङ्। ङ्लेः। वच उम्। अङि। अवोचत्। अवक्ष्यत्। मृजू शुद्धौ। मृ
जेर्वृद्धिः। मृजेरिको वृद्धिः स्याद्धातुप्रत्यये। मार्ष्टि। मृष्टः। क्ङिजोः संदेवेष्यते। मार्जंति।
मृजंति। ममार्ज। ममृजतुः। ममार्जतुः। ममार्जिथ। ममार्ष्ठ। मार्जिता। मार्ष्टा। मा
र्ष्टु। मृड्ढि। अमार्ट्। अमार्जं। अमार्जीत्। अमासीत्। अमार्स्यत्। रुदिर् अश्रुविमो
चने। रुदादिभ्यः सार्वधातुके। रुदस्वपश्वसअनसजक्ष एभ्यो वलादेः सार्वधातुकस्येट्।
धातुप्रत्यये किं। मृष्टः। मृजौ।

म०कौ०ति०
५१

रोदिति। रुदितः। होपरत्वादिड्विधित्वज्ञा। रुदिहि। रुदभ्यू पंचभ्यः॥ हल्ङ्यादेःपितःसार्वधा
तुकस्यापृक्तस्य ईट् स्यात्। अडू[illegible]र्ग्यगाल्बवेयोः। अरोदीत्। अरोदत्। अरुदि
तां। अरुदन्। अरोदीः। अरोदः। प्रलिप्रत्ययविशेषापेक्षाभ्यामडीड्भ्यामंतरंग
त्वाद्याद्युट्। असिद्धं बहिरंगमंतरंगे। रुद्यात्। अरुदत्। इरितोवा। अरोदीत्। अ
रोदिष्यत्। ञिष्वप्शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुष्वपिथ।
सुष्वप्थ। सुविनिर्दुर्भ्यः सुपिसूतिसमाः। एभ्यसुप्यादेःसस्यषः। एवंधा
तुरुपसर्गेण युज्यते। किंतिल्लिटिपरत्वात्संप्रसारणे षत्वंवृक्षते द्वित्वं। पूर्व
त्रासिद्धीयमद्विर्वचने। सुषुषुपतुः। सुषुषुपुः। असकितिर्गुद्धित्वे अभ्यासस्य सं
प्रसारणं। षत्वस्यासिद्धत्वात्ततः पूर्वं हलादिःशेषः। नित्यत्वाच्च। ततः सुपिरू ५२

स्व
पाभावान्नषः। सुसुष्वाप। सुष्वप्ता। अस्वपीत्। अस्वपत्। स्वप्यात्। सुप्यात्। सुषु
प्यात्। अस्वाप्सीत्। श्वसप्राणने। श्वसिति। श्वसितः। श्वसिता। अश्वसीत्। अश्व
सत्। श्वस्यात्। श्वस्यातां। श्वस्यात्। श्वस्यासां। ह्म्यंतेतिनवृद्धिः। अश्वसीत्॥
अनच। अनिति। आन। अनिता। आनीत्। आनत्। अनितः। उपसर्गस्थान्नि
मित्तात्परस्यनस्यणः। प्राणिति। जक्षभक्षहसनयोः। जक्षिति। जक्षितः। अद
भ्यस्तात्। दस्यअंतापवादः। जक्षति। अजक्षीत्। अजक्षत्। अजक्षितां। सिज
भ्यस्तविदिभ्यश्च। अजक्षुः। जागृनिद्राक्षये। जागर्ति। जागृतः। जाग्रति।
जागरांचकार। जजागार। जाग्रो विचिण्णल्ङित्सु। जागर्तेर्गुणःस्याद्विचिण
ल्ङिद्भ्योन्यस्मिन्वृद्धिविषये। प्रतिषेधविषयेच। जजागरतुः। जागरिता।
३ जागृइदसदस्य ययणःप्रान्नेः। नसार्वधातुक गुणबाधते। नंसिचिवृद्धिः। नंजागर्गिमिगुणः। ऋत्रकतेहलंतलक्षणवृद्धिप्राप्ता। नेटिनिषिद्धा।
३ अतोल्लोहलादेरितिबाधित्वात्नोल्ङीं नस्यातिप्राप्ता। ह्म्यंतेतिनिषिध्यते। तदागुणःगुणोवृद्धिर्गुणोवृद्धिःप्रतिषेधोविकल्पनं। पुनर्वृद्धिनि

म०ति० ५२

अजागः॥ अजागृतां॥ जुसि वा॥ अजादौ जुसि द्वयं नांगस्य गुणः॥ अजागरुः।
अजादौ किं। जागृयुः। आशिषि तु जागर्यात्। जागर्यास्तां। जागर्यासुः। अजागरी र्या
त्। दरिद्रा दुर्गतौ। दरिद्राति। इद्दरिद्रस्य। हलादौ क्ङिति सार्वधातुके। दरिद्रि
तः। श्नाभ्यस्तयोरातः। अनयोरातो लोपः क्ङिति सार्वधातुके। दरिद्रति। अने
कात्वादाम्। दरिद्रांचकार। आत औ णल इत्यत्र आ इत्येव सिद्धे औविधानं
दरिद्रातेरालोपे कृते श्रवणार्थं। अत एव ज्ञापकादाम्नेत्येके। ददरिद्रौ। दरि
द्रातेरार्धधातुके विवक्षिते आलोपो वाच्यः। लुङि वा। सनि ण्वुलि ल्युटि च
न। दरिद्रिता। अदरिद्रात्। अदरिद्रितां। अदरिद्रुः। दरिद्र्यात्। दरिद्र्या ५२
त्। अदरिद्रीत्। इट्सकौ। अदरिद्रासीत्। वकास्तृ दीप्तौ॥ वकास्ति। वका

स्तः। वकासति। वकासांचकार। वकासिता। धि चेति सलोपः। सिचएवेत्येके॥ वकाद्धि।
वकाधीत्येव भाष्यं। तिप्यनस्तेः। पदांतस्य सस्य दः स्यात् तिपि न त्वस्तेः। अवकात्। अवका
सुः। सिपि धातो रुर्वा। पदांतस्य धातोः सस्य रुर्वा स्यात्। पक्षे दः। अवकाः। अवका
त्। शासु अनुशिष्टौ। शास्ति। शास इदङ्हलोः। शास उपधाया इत्स्यादङि हला
शासिवसीनां दौ क्ङिति च। शिष्टः। शासति। शशास। शशासतुः। शास्तु। शिष्टात्। शिष्टां। शासतु।
शाहौ॥ शासः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्धत्वाद्धेर्धिः॥ शाधि। अशा
त्। अशिष्टां। अशासुः। अशाः। अशात्। शिष्यात्। सर्तिशास्त्यर्तिभ्यश्च। ए
भ्यश्च्लेरङ् कर्तरि लुङि। अशिषत्। अशासिष्यत्। शीङ् स्वप्ने। शीङः सार्व
धातुके गुणः। क्ङिति चेत्यस्यापवादः॥ शेते। शयाते। शीङो रुट्। शीङः पर

म०कौ०ति०

स्यऽदिशास्यानोरुडागमः स्यात्। शेरते। शेषे। शयाथे। शेध्वे। शये। शेवहे। शेमहे॥ शिश्ये
शयिता। शेतां। अशेरत। शयीत। शयीयातां। शयीरन्। शयिषीष्ट। अशयिष्ट। अ
शयिष्यत। इङ् अध्ययने। इङिकावध्युपसर्गतो न व्यभिचरतः। अधीते। अधीया
ते। अधीयते। गाङ्लिटि। इङः। अधिजगे। अध्येता। अध्येष्यते। अधीतां। अधीष्व
अधीयाथां। अधीध्वं। अध्ययै। अध्ययावहै। अध्ययामहै। अध्यैत। अध्यैयातां। अ परतात् इयङ् ततः आट् ततः इटः
ध्यैयत। अध्यैथाः। अध्यैयाथां। अध्यैध्वं। अध्यैयि। अध्यैवहि। अध्यैमहि। अधी
यीत। अधीयीयातां। अध्येषीष्ट। विभाषा लुङ्लृङोः। इङो गाङ् वा। गाङ्कुटादिभ्यो इ
ऽञ्णिन्ङित्। गाङादेशात् कुटादिभ्यश्च ञ्णिद्भिन्नः प्रत्ययो ङित् स्यात्॥ घुमास्था गापाज
हातिसां हलि। एषामात ईत्स्याद्धलादौ क्ङित्यार्धधातुके। अध्यगीष्ट। अध्येष्ट। अ ५३
५ अध्युग्रमस्य गुणायादेशयोः कृतयोरुपसर्गस्य यण् पूर्वधातुरुपसर्गेणेति दर्शनेनान्तरङ्गत्वाद्गुणात्प्रथमं स
वर्णदीर्घः प्राप्तः। ऐरध्ययनेरन्नामितिनिर्देशान्न भवति। ५

ध्यगीष्यत। अध्यैष्यत। ईर गतौ कम्पने च। ईर्ते। ईर्षे। ईरांचक्रे। ईरिता। ईर्ष्व। ईर्ध्वं। ऐरिष्ट॥ ईड
स्तुतौ। ईट्टे। ईड्से। ईडजनोर्ध्वे च। ईशीडजनां से ध्वे [illegible] इत्यनयोः सार्वधातुकयोरिट् स्या
त्। योगविभागो वैचित्र्यार्थः। ईडिषे। ईडिध्वे। एकदेशविकृतस्यानन्यत्वात्। ईडिष्व। ई
डिध्वं। विकृतिग्रहणेन प्रकृतेरग्रहणात्। ऐड्ढं। ईश ऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे।
आस उपवेशने। आस्ते। आसांचक्रे। आस्स्व। आध्वं। आसिष्ट। आङः शासु इच्छायां॥
आशास्ते। आशासाते। वस आच्छादने। वस्ते। वस्से। वध्वे। ववसे। वसिता। णिसि
चुंबने। निंस्ते। णिञ्जि शुद्धौ। निंक्ते। निंक्षे। निञ्जिता। वृजी वर्जने। वृक्ते। वृजीत। इ
दित्त्वान्नुम्। वृंक्ते। पृची संपर्चने। पृक्ते। षूङ् प्राणिगर्भविमोचने। सूते। सुषुवे। सु
षुविषे। सोता। सविता। सुवै। सविषीष्ट। सोषीष्ट। असविष्ट। असोष्ट। चक्षिङ् व्य
क्तायां वाचि। अयं दर्शनेऽपि। इकारोऽनुदात्तः। नुम् न भवति। अनेनेदिति व्याख्यानात्॥

६

श्री

म॰ कौ॰ ति॰ वेष्टे। वक्षाते। आर्द्धधातुके। चक्षिङः ख्याञ् स्यात्। वा लिटि॥ अत्र भाष्ये ख्यादिरय
५४ मादेशः। असिद्धकाण्डे शस्य यो वेति स्थितं। जित्वात्पदद्वयं। चख्यौ। चख्ये।
चक्शौ। चक्शे। चवक्षे। ख्याता। क्शाता। ख्यास्यति। ख्यास्यते। क्शास्यति। क्शास्यते। चष्टां। अचष्ट। चक्षीत। वान्यस्य सं॰ ख्यायात्। ख्येयात्। क्शायात्। क्शेयात्। ख्यासीष्ट। ख्येसीष्ट। क्शासीष्ट। क्शेसीष्ट। अख्यत्। अख्यत। अक्शासीत्। अक्शास्त॥ वर्जने क्शाञ्नेष्यते। समचक्षिष्टेत्यादि। दुह प्रपूरणे। दोग्धि। दुग्धः। दुहन्ति। धोक्षि। दुग्धे। दुहाते।
दुहते। धुक्षे। दुहाथे। दुग्ध्वे। दुहे। दुह्वहे। दुह्महे। दुदोह। दोग्धा। धोक्ष्य ५४

ति। धोक्ष्यते। दोग्धु। दुग्धात्। दुग्धां। दुहन्तु। दुग्धि। दुग्धात्। दुग्धं। दुग्ध। दोहा
नि। दुग्धां। दुहातां। दुहतां। धुक्ष्व। दुहाथां। धुग्ध्वं। दोहै। दोहावहै। अधोक्।
अदुग्धां। अदुहन्। अदोहं। अदुग्ध। अदुहातां। अदुहत। अधुग्ध्वं। दुह्यात्। दुहीत। धुक्षीष्ट। अधुक्षत्। लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये। क्सस्य लुग्वा स्याद्दन्त्ये तङि। अधुक्षत। अदुग्ध। क्सस्याचि। अ
आदौ तङि क्सस्याचो लोपः। अधुक्षातां। अधुक्षन्त। अधुक्षथाः। अदुग्धाः। अधुक्षाथां। अधुक्षध्वं। अधुग्ध्वं। अधुक्षि। अधुक्षावहि। अदुह्वहि।
अधुक्षामहि। अधोक्ष्यत्। अधोक्ष्यत। एवं। दिह उपचये। लिह आस्वादने॥

लोढः ढो ढे लोपः
ढ्रलोपे पूर्वस्य॰

म॰कौ॰ति॰
५५
लेढि। लीढः। लिहंति। लिक्षि। लीढे। लिहाते। लिहते। लिक्षे। लिहाथे। लीढ्वे॥
लीढात्। लीढां। लिहंतु। लीढि। लीढां। लिहानि। अलेट्। अलीढ। ब्रूञ् व्यक्तायां
वाचि। ब्रुवः पंचानामादित आहो ब्रुवः॥ ब्रुवो लटस्तिबादीनां पंचानां णला
दयः पंच वा स्युर्ब्रुवश्चाहादेशः। आह। आहतुः। आहुः। आहत्थ। झलि। चर्त्वं
आत्थ। आहथुः। ब्रुव ईट्॥ ब्रुवो हलादेः पित ईट्। ब्रवीति। ब्रूतः। ब्रुवंति। ब्रूते
ब्रुवाते। ब्रुवते। ब्रुवो वचिः। आर्धधातुके। उवाच। ऊचतुः। ऊचुः। उवचिथ। उ
वक्थ। ऊचे। वक्ता। वक्ष्यति। वक्ष्यते। ब्रवीतु। ब्रूतात्॥ ब्रूतां। ब्रूहि। ब्रवाणि। ५५
ब्रूतां। ब्रवै। अब्रवीत्। अब्रूत। ब्रूयात्। ब्रुवीत। उच्यात्। वक्षीष्ट। अवोच

त्। अवोचत। अवक्ष्यत्। चर्करीतं च। चर्करीतमिति यङ्लुगंतं तददादौ बोध्यम्॥ ५६
ऊर्णुञ् आच्छादने। ऊर्णोतेर्विभाषा। वृद्धिर्हलादौ पिति सार्वधातुके। ऊर्णौ
ति। ऊर्णोति। ऊर्णुतः। ऊर्णुवंति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। ऊर्णोतेराम्
नेति वाच्यं। नंद्राः संयोगादयः। अचः परास्संयोगादयो नदरा द्विर्न भ
वंति। नुशब्दस्य द्वित्वं। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः। विभाषोर्णोः। इडा
दिप्रत्ययो ङिद्वा स्यात्। ऊर्णुनुविथ। ऊर्णुनविथ। ऊर्णुविता। ऊर्णविता॥
५६ ऊर्णोतु। ऊर्णौतु। ऊर्णवानि। गुणोऽपृक्ते। ऊर्णोतेर्गुणस्स्यादपृक्ते हला
दौ पिति सार्वधातुके। वृद्ध्यपवादः। और्णोत्। और्णोः। ऊर्णुयात्। ऊ

ऊर्णोतेः

अस्त्सार्वधा०

र्णुयातां। ऊर्णुयात्। ऊर्णूयास्तां। ऊर्णविषीष्ट। ऊर्णुविषीष्ट। और्णुवीत्। और्णुवि
ष्टां। ऊर्णोतेर्विभाषा। इडादौ परस्मैपदे सिचि वृद्धिः। पक्षे गुणः। और्णवीत्।
और्णविष्टाम्। और्णवीत्॥ ॥ इत्यदादिः॥ ॥ हु दानादनयोः। जुहो
त्यादिभ्यः श्लुः॥ शपः। श्लौ। धातोर्द्वे स्तः। जुहोति। जुहुतः। हुश्नुवोरिति यण्। जु
ह्वति। भीह्री। भृहुवां श्लुवच्च। एभ्यो लिट्याम्वा स्यादामि श्लाविव कार्यं च। जुहवां
चकार। जुहाव। होता। होष्यति। जुहोतु। जुहुतात्। जुहुतां। जुह्वतु। जुहु
धि। जुहवानि। अजुहोत्। अजुहुतां। अजुहवुः। जुहुयात्। हूयात्। अहौ
षीत्। अहोष्यत्। ञिभी भये। बिभेति। भियोऽन्यतरस्यां। इः स्यात् हलादौ क्ङिति ५६

सार्वधातुके। बिभीतः। बिभितः। बिभ्यति। बिभयांचकार। बिभाय। भेता। भेष्यति। बिभे
तु। बिभितात्। बिभीतात्। बिभीयात्। भीयात्। अभैषीत्। अभेष्यत्। ह्री लज्जा
याम्। जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयांचकार। जिह्राय। ह्रेता। ह्रेष्यति।
जिह्रेतु। अजिह्रेत्। जिह्रीयात्। ह्रीयात्। अह्रैषीत्। अह्रेष्यत्। पॄ पालन
पूरणयोः॥ अर्तिपिपर्त्योश्च। अभ्यासस्य इः श्लौ। पिपर्ति। उदोष्ठ्यपूर्वस्य॥
अंगावयवौष्ठ्यपूर्वो य ॠत् तदंतस्यांगस्य उः। हलि च॥ रेफवांतस्य धातोरुपधाया
इको दीर्घो हलि॥ पिपूर्त्तः। पिपुरति। गुणवृद्धी परत्वादिमं बाधेते। पिपर्षि। पपा
र। शृदृप्रां ह्रस्वो वा। किति लिटि। पप्रतुः। पप्रुः। ऋच्छत्यॄतां॥ तौदादिक ऋच्छे
र्धातोर्ॠतां च गुणो लिटि॥ पपरतुः। पपरुः। वृतो वा। वृङ्वृभ्यामॄदंताद्वेटो दी

इत्यन्ये। यमिति केचित्। पिपर्ति। पिपृतः। पिप्रति। पिपर्यात्। आशिषि प्रियात्। अपार्षीत्। पाणि
नीयमतेन तु। नरो दस्ती पिपृतमित्यत्र छान्दसत्वमेव शरणम्।

म० कौ० ति०
५७

वीवास्यान्न लिटि। परिता। परीता। परिष्यति। परीष्यति। पिपर्तु। अपिपः। अपिपृतां।
अपिपरुः। पिपृयात्। पूर्यात्। अपारीत्। सिचि च परस्मैपदेषु। अत्र इटो न
दीर्घः। अपारिष्टां। अपरिष्यत्। अपरीष्यत्॥ ओहाक् त्यागे। जहाति। जहा
तेश्च। इच्चास्याहलादौ क्ङिति सार्वधातुके। जहितः। ईहल्यघोः। श्नाभ्यस्तयो
रात ईत्सार्वधातुके क्ङिति हलि। जहीतः। जहति। जहौ। हाता। हास्यति।
जहातु। जहितात्। जहीतात्। आ च हौ। जहातेश्चा इदीतौ। जहाहि॥
जहिहि। जहीहि। अजहात्। अजहुः। लोपो यि। जहातेरालोपो यादौ
सार्वधातुके। जह्यात्। एर्लिङि। हेयात्। अहासीत्। अहास्यत्। ऋ गतौ। ५८
अभ्यासस्येति यङ्। इयृतः। इय्रति। आर। आरतुः। इडत्यर्तीति नित्यमिट्।

सर्तिशास्त्यर्तिभ्यश्च। च्लेः अङ्

ऋदृशोऽङि गुणः

आरिथ। आर्त्ता। अरिष्यति॥ इयर्तु। इयराणि। ऐयः। ऐयृतां। ऐयरुः। इयृया
त्। अर्यात्। आरत्। आरिष्यत्॥ माङ् माने शब्दे च। भृञामित्। भृञ् माङ् ओहा
ङ् एषामभ्यासस्येत्स्यात् श्लौ॥ मिमीते। मिमाते। मिमते। ममे। माता। मास्यते। मिमी
तां। अमिमीत। मिमीत। मासीष्ट। अमास्त। अमास्यत॥ ओहाङ् गतौ॥ जिहीते
जिहाते। जिहते। जहे। हाता। हास्यते। जिहीतां। अजिहीत। हासीष्ट। अहा
स्त। अहास्यत॥ डुभृञ् धारणपोषणयोः। बिभर्ति। बिभृतः। बिभ्रति। बिभृते। बि
भ्राते। बिभ्रते। बिभरांचकार। बिभार। बभर्थ। बभृव। बिभरांचक्रे। बभ्रे। भर्ता। भ
रिष्यति। भरिष्यते। बिभर्तु। बिभराणि। बिभृतां। अबिभः। अबिभरुः।
अबिभृत। बिभृयात्। बिभ्रीत। भ्रियात्। भृषीष्ट। अभार्षीत्। अभृत। अभ

म॰कौमु॰
५८

घुसोरितिएत्वाभ्यासलोपौस्तः

रिष्यत्। अभरिष्यत॥ डुदाञ् दाने। ददाति। दत्तः। ददति। दत्ते। ददाते। ददते। ददौ।
ददे। दाता। दास्यति। दास्यते। ददातु। देहि। दत्तां। अददात्॥ अदत्त। दद्यात्। ददी-
त। देयात्। दासीष्ट। अदात्। अदातां। अदुः। स्थाघ्वोरिच्च॥ अनयोरिदन्तादेशः
सिच्च कित् आत्मनेपदेषु॥ अदित। अदास्यत्। अदास्यत॥ डुधाञ् धारणपोषणयोः॥
दानेप्यके। दधाति। दधस्तथोश्च। द्विरुक्तस्यझषन्तस्यधाञोबशोभष्तथयोस्ध्वो-
श्चपरतः। धत्तः। दधति। दधासि। धत्थः। धत्ते। धत्से। धद्ध्वे। धेहि॥ णिजिर् शौ-
चपोषणयोः॥ णिजां त्रयाणां गुणः श्लौ॥ णिज्विजिविषामभ्यासस्य गुणः स्यात् श्लौ।
नेनेक्ति। नेनिक्तः। नेनिजति। निनेज। निनेजे। नेक्ता। नेक्ष्यति। नेक्ष्यते। नेनेक्तु। ५८
नेनिग्धि। नाभ्यस्तस्याचि पिति सार्वधातुके। लघूपधगुणो न। नेनिजानि।

अनेनेक्। अनेनिक्तां। अनेनिजुः। अनेनिजं। अनेनिक्त। नेनिज्यात्। नेनिजीत।
निज्यात्। निक्षीष्ट। अनिजत्। अनैक्षीत्। अनिक्त। अनेक्ष्यत्। अनेक्ष्यत। एवं वि-
जिर् पृथग्भावे। विष्लृ व्याप्तौ॥ वेवेष्टि॥ लृदित्वादङ्। अविषत्। तङि क्सः। अजादौ
क्सस्याचीति अलोपः। अविक्षत। अविक्षातां॥ ॥ इति जुहोत्यादिः॥ ॥ दि-
वु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु॥ दिवादिभ्यः श्य-
न्। शपोपवादः॥ हलि चेति दीर्घः॥ दीव्यति। दिदेव। देविता। देविष्यति। दीव्यतु।
अदीव्यत्। दीव्येत्। दीव्यात्॥ अदेवीत्। अदेविष्यत्। एवं षिवु तन्तुसंताने। नृ-
ती गात्रविक्षेपे। नृत्यति। ननर्त्त। नर्तिता। सेऽसिचि कृतचृतछृदतृदनृतः। एभ्यः
सिचि भिन्नस्य सादेरार्द्धधातुकस्येड्वा॥ नर्तिष्यति। नर्त्स्यति। नृत्यात्। अनर्ती-
त्। त्रसी उद्वेगे। वा भ्राशेति श्यन् वा। त्रस्यति। त्रसति। तत्रास। वा जॄभ्रमुत्रसां।

म॰कौमु॰
५१
गषाप्राधेडिलिसि
लुङ्

एषां किति लिटि सेटि थलि च एत्वाभ्यासलोपौ वा ॥ त्रेसतुः ॥ तत्रसतुः ॥ त्रेसिथ । तत्रसिथ । त्रसिता ।
शो तनूकरणे । ओतः श्यनि । लोपः । श्यति । श्यतः । श्यन्ति । शशौ । शशतुः । शशुः । शाता । शास्य
ति । अशात् । अशाताम् । इट्सकौ । अशासीत् । अशासिष्टाम् । छो छेदने । छ्यति । षो अन्तकर्मणि ॥
स्यति । ससौ । दो अवखण्डने ॥ द्यति । ददौ । देयात् । अदात् । व्यध ताडने ॥ विध्यति । विव्या
ध । विविधतुः । विव्यद्ध । विव्यधिथ । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सी
त् ॥ पुष पुष्टौ ॥ पुष्यति ॥ पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । पुषादीत्यङ् आपरस्मैप
दात् । अपुषत् । शुष शोषणे ॥ शुष्यति । शुशोष । अशुषत् । णश अदर्शने । नश्यति ।
ननाश । नेशतुः । रधादिभ्यश्च ॥ रधनशतृपदृपद्रुहमुहष्णुहष्णिहएभ्यो वला
देरार्धधातुकस्य वेट् ॥ नेशिथ ॥ मस्जिनशोर्झलि ॥ नुम् ॥ ननंष्ठ ॥ नेशिव । नेश्व ।
नशिता । नंष्टा । नशिष्यति । नंक्ष्यति । नश्येत् । नश्यात् । अनशत् । प्रणश्यति । न ॥५१॥
शेः षान्तस्य । णत्वं न । प्रनष्टा । अन्तर्ग्रहणं भूतपूर्वप्रतिपत्त्यर्थम् । प्रनंक्ष्यति ॥ रध हिंसा
संराध्योः ॥ रध्यति ॥ रधिजभोरचि । नुम् । ररन्ध । ररन्धतुः । ररन्धिथ । ररद्ध । ररन्धिव ॥

५४

रध्व । नेड्वलिटि रधेः ॥ लिड्वर्जे इटि रधेर्नुम् न स्यात् । रधिता । रद्धा । रधिष्यति । रत्स्यति । अङि
नुम । अनिदितामिति नलोपः । अरधत् । तृप प्रीणने ॥ तृप्यति । अनुदात्तस्य चर्दुपधस्यान्य
तरस्यां इति अम् । ततर्प्थ । ततर्पिथ । ततृप्थ । तर्पिता । तर्प्ता । त्रप्ता । स्पृशमृशकृषतृपदृपां
च्लेः सिज्वा वाच्यः ॥ अतर्पीत् । अतार्प्सीत् । अत्राप्सीत् । अतृपत् । दृप हर्षमोहनयोः । दृप्य
तीत्यादि । रधादित्वाद्वैकल्पिकेमौ विद्धावमर्थमनुदात्तता । द्रुह जिघांसायां । वा द्रुहेति घः । पक्षे ढः ।
दुद्रोग्ध । दुद्रोढ । दुद्रोहिथ । द्रोहिता । द्रोग्धा । द्रोढा । द्रोहिष्यति । ध्रोक्ष्यति । अद्रुहत् । मुह
वैचित्त्ये । वैचित्त्यं मात्विकः । मुह्यति । मुमोहिथ । मुमोग्ध । मुमोढ । मोहिता । मोग्धा । मोढा । मो
हिष्यति । ढत्वघत्वयोस्तुल्यं रूपं । मोक्ष्यति । अमुहत् । ष्णुह उद्गिरणे । स्नुह्यति । सुस्नोह ।
सुस्नोहिथ । सुस्नोग्ध । सुस्नोढ । सुस्नुहिव । सुस्नुह्व । स्नोहिता । स्नोग्धा । स्नोढा । स्नोहि
ष्यति । स्नोक्ष्यति । अस्नुहत् । ष्णिह प्रीतौ ॥ स्निह्यति । सिष्णेह । स्नेहिता । स्नेग्धा । स्नेढा ॥
अस्निहत् । शम् । रधादयः समाप्ताः ॥ तुष प्रीतौ । तुष्यति । दुष वैकृत्ये ॥ श्लिष आलिंगने ॥

म॰कौति॰ श्लिष्यति। श्लिषआलिंगने। ल्लेकूसः। आश्लिक्षत्कन्यांदेवदत्तः। आलिंगनेकिं। समश्लिषत्जतुकाष्टं।
॥६०॥ अट्प्रत्ययाँसत्ताविहश्लिषिः। क्रुधक्रोधे। क्रुध्यति। क्रोद्धा। क्षुधबुभुक्षायां॥ क्षुध्यति। क्षोद्धा। शुधशौ
चे। शुद्ध्यति। शोद्धा। षिधुसंराद्धौ। सिध्यति। सेद्धा। शमुउपशमे। शमामष्टानांदीर्घःश्यनि। श
मुतमुदमुश्रमुभ्रमुक्षमुक्लमुमदां॥ प्रविशाम्यति। शेमतुः। शेमिथ। शमिता। अशमत्। तमुकांक्षा
यां। ताम्यति। तमिता। अतमत्। दमुउपशमे। उपशमइतिण्यंतस्यतेनसकर्मकोयं। नतुशमिवद
कर्मकः। दाम्यति। दमिता। अदमत्। श्रमुतपसिखेदेच। श्राम्यति। अश्रमत्। भ्रमुअनवस्था
ने। वाभ्राशेतिश्यन्वा। भ्राम्यति। भ्रमति। अभ्रमत्। क्षमूसहने॥ क्षाम्यति। चक्षमिथ। चक्षंथ।
चक्षमिव। चक्षण्व। क्षमोष्व॥ क्षमिता। क्षन्ता। अयोन्विषित्। ष्वादिस्तुषित्। अषितः। क्षाम्यतेः
क्षांतिः। क्षमूषः। क्षमते। क्षमा। क्लमुग्लानौ। क्लाम्यति। ष्ठिवुक्लमुचिनिदीर्घः। क्लामति। क्लमि
ता। अक्लमत्। मदीहर्षे। वृत्। माद्यति। अमदत्। असुक्षेपणे। अस्यति। आस। असिता। ॥६१॥
अस्यतेस्थुक्॥ अङि। आस्थत्। यसुप्रयत्ने॥ यसोनुपसर्गात्॥ संयसश्च। श्यन्वा। यस्यति।
वृत्२

यसति। संयस्यति। संयसति। अनुपसर्गात्किं। प्रयस्यति। जसुमोक्षणे। जस्यति। तसुउपक्षये।
दसुच। तस्यति। अतसत्। दस्यति। अदसत्। वसुस्तंभे। वस्यति। ववास। ववसतुः। नशसदेतिनिषे
धः। वशादिस्यमितिमतेनतु। वेसतुः। वेसुः। व्युषविभागे। व्युष्यति। बिसप्रेरणे। बिस्यति। अबि
सत्। कुसउत्सर्गे। कुस्यस्यति। मुसखंडने। मुस्यति। मसीपरिमाणे। परिणामोविकारः। लुट
विलोडने। उचसमवाये। उच्यति। अभ्यासस्यासवर्णे॰। उवोच। ऊचतुः। ऊचुः। भृशुभ्रंशुअधः
पतने। भृश्यति। बभर्श। अभृशत्। न्लोपः। भ्रश्यति। बभ्रंश। अभ्रशत्। कृशतनूकरणे।
ति कृश्यति। ञितृषपिपासायां। तृष्यति। हृषतुष्टौ। अनडोभोवादिकादृषेःशेः॥ हृष्यति। रुष
अहृषत्। रुषरिषहिंसायां। तीषेनिवेट्। रोषिता। रोष्टा। रेषिता। रेष्टा। कुपक्रोधे। कु
प्यति। गुपव्याकुलत्वे। गुप्यति। लुभगार्ध्ये। गार्ध्यमाकांक्षा। लोभिता। लोब्धा।
लोभिष्यति। श्वादेरवकरणात्लोभनीत्याद्यः॥ क्षुभसंचलने। क्षुभ्यति। क्लिदू
आर्द्रीभावे॥ क्लिद्यति। चिक्लेदिथ। चिक्लेत्थ। चिक्लिदिव। चिक्लिद्व। क्लेदिता। क्लेत्ता। ञिमि

म०कौ०ति० दास्त्रिहने। भिदेर्गुणः। भिदेर्गुणोस्यात्इत्संज्ञकशकारादौप्रत्यये। मेद्यति। आमिदत्त। ञि
॥६५॥ ष्विदास्त्रेहनमोचनयोः। श्विद्यति। ऋधुवृद्धौ। ऋध्यति। आनर्ध। गृधुअभिकांक्षायां।
गृध्यति। अगृधत्। षूङ्प्राणिप्रसवे। सूयते। सुषुवे। क्रादिनियमान्नित्यमिट्। सुषुविषे।
सुषुविवहे। सोता। सविता। दूङ्परितापे। दूयते। दीङ्क्षये। दीयते। दीङोयुडचिक्ङिति।
दीङःपरस्याजादेःक्ङितआर्धधातुकस्ययुट्। वुग्युटावुवङ्यणोःसिद्धौवक्तव्यौ। दिदी असिद्धवदत्राभात्
ये। मिमीनातिः। मिनोतिदीङांल्यपिच। एषामात्वंल्योपवादाशित्याङ्निमित्ते। दाता। दास्य
ते। अदास्त। डीङ्विहायसागतौ। डीयते। पीङ्पाने। पीयते। माङ्माने। मायते। म
मे। जनीप्रादुर्भावे। ज्ञाजनोर्जा। शिति। जायते। जज्ञे। अस्त्रोपोनः। जनिता। जनि
ष्यते। दीपजनबुधपूरिताथिप्यायिभ्योन्यतरस्याम्। एभ्यश्च्लेश्चिण्वाएकवचनेतशब्दे
परे। चिणोलुक्। चिणःपरस्यलुक्। जनिवध्योश्च। नवृद्धिश्चिणिशितिकृतिच। अजनि। ॥६१॥
अजनिष्ट। दीपीदीप्तौ। दीप्यते। दिदीपे। अदीपि। अदीपिष्ट। पदगतौ। पद्यते। पेदे॥

अपदस्तंत्रस्य देवदृष्टुधस्यवान्यतरस्यां। स्त्वद्धिहंशीकोल्यगरू

पत्ता। पत्स्यते। पत्सीष्ट। चिण्तेपदः। ह्लेः। अपादि। अपत्सातां। अपत्सत। विदसत्तायां। विद्यते। वे
त्ता। बुधअवगमने। बुध्यते। बोद्धा। भोत्स्यते। भुत्सीष्ट। अबोधि। अबुद्ध। अभुत्सातां। युधसंप्र
हारे। युध्यते। युयुधे। योद्धा। अयुद्ध। सृजविसर्गे। सृज्यते। ससृजिषे। स्रष्टा। स्रक्ष्यते। सृक्षीष्ट। लिङ्सिचावात्मनेपदे
असृष्ट। असृक्षातां। मीङ्हिंसायां। मीयते। रीङ्श्रवणे। लीङ्श्लेषणे। विभाषालीयतेः। लीयतेरिति
यकानिर्देशोनतुश्यना। लीलीङोरात्वंस्यादेज्विषयेल्यपिच। लेता। लाता। लेष्यते। लास्यते। येण्यि
षयोकं। स्त्रिजन्त्वीश्चेच। लिल्ये। व्रीङ्वृणोत्यर्थे। व्रीयते। विव्रिये। मृषतितिक्षायां। मृष्यति। मृष्य
ते। ममर्ष। ममर्षिथ। ममृषे। ममृषिषे। मर्षितासि। मर्षितासे। मर्षिष्यते। मर्षिष्यति। णहबंधने॥
नह्यति। नह्यते। ननाह। ननद्ध। नेहे। नद्धा। नत्स्यति। अनात्सीत्। अनद्ध। रंजरागे॥ रज्यति। र
ज्यते। रंक्ता। शपआक्रोशे॥ शप्यति। शप्यते। शकविभाषितोमर्षणे। विभाषितइत्युभयपदी
त्यर्थः। शक्यति। शक्यते। हरिं दुद्रुक्षुं भक्तः। शशाक। शेकिथ। शशक्थ। शेके। शक्ता। शक्ष्यति।
शक्ष्यते। पुषादित्वादङ्। अशकत्। अशक्त। सिद्धाय मिशेके। नन्मते नानिङ्के पुल्लदित्यहितः।

मः कौ ति० शकिता।शकिष्यति।शकिष्यते॥ ॥इतिदिवादिः॥ ॥षुञ् अभिषवे।स्वादिभ्यःश्नुः॥शपापवादः।
॥६२॥ सुनोति।सुनुतः।हुश्नुवोरितियण्।सुन्वंति।लोपश्चास्यान्यतरस्यांम्वोः।सुन्वः।सुनुवः।सुनुते।सुन्वा
ते।सुन्वते।सुन्वहे।सुनुवहे।सुषाव।सुषुवे।सोता।सुनु।सुनवानि।सुनवै।सुनुयात्।सूयात्।
स्तुसुधूञ्भ्यःपरस्मैपदेषु।सिचइट्।असावीत्।असोष्ट।अभिषुणोति।अभ्यषुणोत्।सुनोतेःस्य
सनोः।सस्यषोन।विसोष्यति।षिञ् बंधने।विसिनोति।चिञ् चयने।चिनोति।चिनुते।विभाषा
चेः।अभ्यासाच्चेःकुत्वंवासनिलिटिच।चिकाय।चिचाय।चिक्ये।चिच्ये।चेता।अचैषीत्।अचे
ष्ट।स्तृञ् आच्छादने।स्तृणोति।स्तृणुते।तस्तार।तस्तरतुः।तस्तरे।गुणोर्त्तिइतिगुणः।
स्तर्यात्।ऋतश्चसंयोगादेः।ऋदंतात्संयोगादेर्लिङ्सिचोरिड्वातङि।स्तरिषीष्ट।स्तृषीष्ट।अ
स्तरिष्ट।अस्तृत।ह्रस्वादंगात्।सिचोलोपःझलि।धुञ् कंपने।धुनोति।धुनुते।दुधाव।
दुधुवे।अधौषीत्।अधोष्ट।धूञ् कंपने।धूनोति।धूनुते।स्वरतीतिवेट्।दुधविथ॥ ॥६२॥
दुधोथ।किति लिटि।श्र्युकःकिति।श्रिञएकाचउगंताच्चकितीण्न।इतिप्राप्ते।क्रादिनिय
गि तीर

मान्नित्यमिट्।दुधुविव।अधावीत्।अधाविष्ट।अधोष्ट।कृञ् हिंसायां।कृणोति।कृणुते।चकार।
चकर्थ।चक्रे।क्रियात्।कृषीष्ट।अकार्षीत्।अकृत।वृञ् वरणे।वृणोति।वृणुते।बभूथाततंथजगृ
भ्मववर्थेतिनिगमे।एषांभाषायांइडभावोनिपात्यते।तेनभाषायांथलीट्।ववरिथ।ववृव।वव
वहे।वरिता।वरीता।लिङ्सिचोरात्मनेपदेषु।वृङ्वृञ्भ्यामृदंताच्चपरस्यो लिङ्सिचोरिड्वात
ङि।नलिङि॥वृतोलिङ्इटोनदीर्घः।वरिषीष्ट।वृषीष्ट।अवारीत्।अवारिष्ट।अवरीष्ट।
अवृत।दुदु उपतापे।दुनोति।हिगतौवृद्धौच।हिनुमीना।उपसर्गस्थान्निमित्तात्परस्य
तेयान्नस्यणः।प्रहिणोति।हेरचङि।अभ्यासात्परस्यहिनोतेर्हस्यकुत्वंनतुचङि।जिघा
य।आप्लृव्याप्तौ॥आप्नोति।आप्नुतः।आप्नुवंति।आप्नुवः।आप्नुहि।लृदित्वादङ्।आप
त्।शक्लृशक्तौ॥अशकत्।राधसाधसंसिद्धौ॥राध्नोति।राधोहिंसायां।एत्वाभ्यासलो
पौस्तः।किति लिटि च लिट्सेटि।अपरेधतुः।अपरेधुः।रेधिथ।राद्धा।साध्नोति।ससाध।
साद्धा।असात्सीत्।असाद्धां।ञिधृषाप्रागल्भ्ये।धृष्णोति।दधर्ष।धर्षिता।दंभुदंभने॥

म०कौ०ति०
॥६३॥

दभ्नोति। ददंभ। श्रंथिग्रंथिदंभिस्वंजीनां लिटः कित्वं वा। कित्वपक्षे नलोपः। तस्याभीयत्वादसि
द्धत्वेनैत्वाभ्यासलोपयोरप्राप्तौ। दंभेश्च। एत्वाभ्यासलोपौ स्तः॥ देभतुः। ददंभतुः। दंभिता। द
भ्यात्। तृप प्रीणने। क्षुभ्नादिषु च। नणत्वं। तृप्नोति। अशूङ् व्याप्तौ संघाते च। अश्नुते। अश्नु
ते श्च। दीर्घादभ्यासावर्णात्परस्य नुट्। आनशे। अशिता। अष्टा। अशिष्यते। अक्ष्यते॥
अश्नुवीत। अक्षीष्ट। अशिषीष्ट। अशिष्ट। ~~[illegible]~~ आष्ट। आक्षातां॥ ॥
॥इति स्वादयः॥ ॥तुद व्यथने। तुदादिभ्यः शः। शपोऽपवादः। तुदति। तुदते। तुतोद। तु
तोदिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त। णुद प्रेरणे। नुदति। नुदते। नुनोद। नोत्ता।
भ्रस्ज पाके। ग्रहिज्या। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति। भृज्जते। भ्रस्जो रो
पधयोरमन्यतरस्यां। भ्रस्जे रेफस्योपधायाश्च स्थाने रमागमो वार्धधातुके। मित्वाद श्री ४
न्त्यादचः परः। स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः। बभर्ज। बभर्जतुः। बभर्जिथ। ॥६३॥
बभर्ष्ठ। बभर्ज। बभर्जे। रमाभावे। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जिथ। स्कोरिति सलोपः।

स्कोः संयोगाद्योरन्ते च। व्रश्चेति षः ✓

व्रश्चेति षः। बभ्रष्ठ। बभर्जे। बभर्जे। बभर्जे। बभ्रज्जे। भर्ष्टा। भ्रष्टा। भर्क्ष्यति। भ्रक्ष्यति। क्ङितिरमाग
मं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन। भृज्ज्यात्। भृज्ज्यास्तां। भृज्ज्यासुः। भर्क्षीष्ट। भ्रक्षी
ष्ट। अभाक्षीत्। अभ्राक्षीत्। अभर्ष्ट। अभ्रष्ट। कृष विलेखने। कृषति। कृषते। चकर्ष। चकृषे॥
अनुदात्तः। क्रष्टा। कर्ष्टा। कृषीष्ट। अक्राक्षीत्। अकार्क्षीत्। अकृक्षत्। अकृष्ट। अकृक्षा
तां। अकृक्षत। अकृक्षत। अकृक्षातां। अकृक्षत। मिल संगमे। मिलति। मिलते। मिमेल। मे
लिता। अमेलीत्। मुच्लृ मोक्षणे। शे मुचादीनां। मुच् लुप विद लिप सिच कृत खिद पिशां नु
म्। मुंचति। मुंचते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षातां। लुप्लृ छेदने।
लुंपति। लुंपते। लोप्ता। अलुपत्। अलुप्त। विद्लृ लाभे। विंदति। विंदते। विवेद। विविदे। व्या
घ्रभूतिमते सेट्। वेदिता। भाष्यमते। परिवेत्ता। षिच क्षरणे। सिंचति। सिंचते। असिचत्।
लिपिसिचिह्वश्च। आत्मनेपदेष्वन्यतरस्यां। असिचत। असिक्त। लिप उपदेहे। उपदेहो वृद्धिः। लिंपति। लिंप
ते। लेप्ता। अलिपत्। अलिपत। अलिप्त। कृती छेदने। कृंतति। चकर्त। कर्तिता। कर्तिष्यति। ससिचिकृत०

म०कौ०ति० कर्त्स्यति। अकर्त्तीत्। खिद परिघाते। खिन्दति। चिखेद। खेत्ता। पिश अवयवे। पिंशति। पेशिता। अ

॥६४॥ व्रश्चू छेदने। वृश्चति। वव्रश्च। वव्रश्चिथ। वव्रष्ठ। व्रश्चिता। व्रष्टा। व्रश्चिष्यति। व्रक्ष्यति। वृश्च्यात्। अ

व्रश्चीत्। अव्राक्षीत्। व्यच व्याजीकरणे। विचति। विव्याच। विविचतुः। व्यचिता। व्यचिष्यति। विच्या

त्। अव्याचीत्। अतो हलादेर्लघोः। अव्यचीत्। व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते। अ

नसीति पर्युदासेन कृन्मात्रविषयत्वात्। उछि उञ्छे। उञ्छः कणश आदानं कणिशाद्यर्जनं शि

लमिति यादवः। उञ्छति। ऋछ गतीन्द्रियप्रलयमूर्त्तिभावेषु। ऋच्छति। ऋच्छत्यृतामिति गुणः।

द्विहल्ग्रहणस्यानेकहल्उपलक्षणत्वान्नुट्। आनर्छ। आनर्छतुः। ऋच्छिता। उज्झ उत्सर्गे।

उज्झति। लुभ विमोहने। लुभति। लोभिता। लोब्धा। लोभिष्यति। तृप तृम्फ तृप्तौ। तृपति॥

ततर्प। तर्पिता। अतर्पीत्। तृम्फति। शे तृम्फादीनां नुम्वाच्यः। आदिशब्दः प्रकारे। तेनये ऽ श्री राम

त्र नकारानुषक्तास्ते तृम्फादयः॥ ततृम्फ। तृफ्यात्। मृड सुखने। मृडति। ममर्ड। मृडिता। ॥६४॥

शुन गतौ। शुनति। इषु इच्छायां। इच्छति। एषिता। एष्टा। एषिष्यति। इष्यात्। ऐषीत्। कु

तीषसहेति वेट्

स्फुट विकसने। स्फुटति। स्फुटिता।

टकौटिल्ये। गाङ्कुटादिभ्यो ञ्णिन्ङित्। चुकुटिथ। चुकोट। चुकुट। कुटिता। पुट संश्लेषणे। पुटति। पु

टिता। स्फुर स्फुल संचलने। स्फुरति। स्फुलति। स्फुरतिस्फुलत्योर्निर्निविभ्यः। षत्वं वा। निस्फु

रति। निष्फुरति। णू स्तवने। परिणूतगुणोदयः। नुवति। नुनाव। नुविता। टुमस्जो शुद्धौ। म

ज्जति। ममज्ज। मस्जिनशोर्झलीति नुम्। मस्जेरन्त्यात्पूर्वो नुम्वाच्यः संयोगादिलोपः। ममङ्क्थ।

ममज्जिथ। मङ्क्ता। मंक्ष्यति। अमांक्षीत्। अमाङ्क्ताम्। अमांक्षुः। रुजो भंगे। रुजति। रोक्ता।

रोक्ष्यति। अरौक्षीत्। भुजो कौटिल्ये। रुजिवत्। विश प्रवेशने। विशति। मृश आमर्शने।

आमर्शनं स्पर्शः। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। षद्लृ विशरणगत्यवसादनेषु। पा शा

घ्रा ध्मा स्था म्ना दाण् इति सीदादेशः। सीदतीत्यादि। शद्लृ शातने। शदेः शितः। शिद्भाविनोस्मात्त

नौ ङावेवास्तः। शीयते। शीयताम्। अशीयत। शीयेत। शशाद। शत्ता। शत्स्यति। अशदत्। अश

त्स्यत्। कॄ विक्षेपे। ऋत इद्धातोः। किरति। चकार। चकरतुः। चकरुः। करिता। करीता। की

र्यात्। अकारीत्। किरतौ लवने। उपात्किरतेः सुट् छेदने ऽर्थे। उपस्किरति। प्रतिस्किरति।

अडभ्यासव्यवायेपि सुट् कात्पूर्व इति वक्तव्यं। उपास्किरत्। उपचस्कार। हिंसायां प्रतेश्च। उपात्प्रतेः प्रतिकरतेः सुट् हिंसायां। उपस्किरति

वि

म०कौ०ति० ॥९५॥

गॄ निगरणे। अचि विभाषा। गिरतेरेफस्य लोऽजादौ प्रत्यये। गिरति। गिलति। जगार। जगाल।
जगरिथ। जगलिथ। गरिता। गरीता। गलीता। प्रच्छ ज्ञीप्सायां। ग्रहिज्या। पृच्छति। पप्रच्छ।
पप्रच्छतुः। पप्रच्छुः। प्रष्टा। प्रक्ष्यति। अप्राक्षीत्। मृङ् प्राणत्यागे। म्रियतेर्लुङ्लिङोश्च।
लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्र। रिङ्शयग्लिङ्क्षु। रिङ्। इयङ्। म्रियते।
ममार। ममर्थ। मम्रिव। मर्ता। मरिष्यति। मृषीष्ट। अमृत। पृङ् व्यायामे। प्रायेणायं व्या
ङ्पूर्वः। व्याप्रियते। व्यापप्रे। व्यापर्ता। व्यापरिष्यते। व्यापृत। व्यापृषातां। जुषी
सं३॥ प्रीतिसेवनयोः। जुषते। जुजुषे। ओविजी भयचलनयोः। प्रायेणायं उत्पूर्वः। उद्विजते॥
विज इट्। विजेः परस्य इडादिप्रत्ययो ङिद्वत्। उद्विजिता। उद्विजिष्यते। ओलजी ओल
स्जी व्रीडने। लजते। लेजे। लज्जते। ललज्जे॥ ॥इति तुदादयः॥ ॥[illegible]॥ रु
धिर् आवरणे॥ रुधादिभ्यः श्नम्। शपोपवादः। रुणद्धि। श्नसोरल्लोपः। णस्यासिद्ध ॥९५॥
त्वादनुस्वारः। परसवर्णः। तस्यासिद्धत्वाण्णत्वं न। नपदांतेति निषेधेनानुस्वारपरसवर्णयो

[illegible] र्लोपो न स्थानिवत्। रुंधः। रुंधंति। रुणत्सि। रुंधः। रुंध। रुणध्मि। रुंध्वः। रुंध्मः। रुंधे।
रुंधाते। रुंधते। रुंत्से। रुंधाथे। रुंद्धे। रुंध्वहे। रुंध्महे। रुरोध। रुरुधे। रोद्धा। रोत्स्यति। रोत्स्यते।
रुणद्धु। रुंधात्। रुंधां। रुंधंतु। रुंद्धि। रुणधानि। रुणधाव। रुंधां। रुंधातां। रुंधंतां। रुंत्स्व। रु
णधै। रुणधावहै। अरुणत्। अरुंधां। अरुंधन्। अरुणत्। अरुणः। दश्च। अरुंधं। अ
रुणधं। अरुंध्व। अरुंध। अरुंधातां। अरुंधत। रुंध्यात्। रुध्यात्। रुंधीत। रुत्सीष्ट। अ
रुधत्। अरौत्सीत्। अरुद्ध। अरोत्स्यत्। अरोत्स्यत। भिदिर् विदारणे। छिदिर् द्वैधीक
रणे। युजिर् योगे। रिचिर् वि[illegible]रेचने। रिणक्ति। रिरेच। रेक्ता। अरिणक्। अ
रिचत्। अरैक्षीत्। अरिक्त। विचिर् पृथग्भावे। विनक्ति। विवेक्त। क्षुदिर् संप्रेषणे। क्षु
णत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्। अक्षौत्सीत्। अक्षुत्त। उछृदिर् दीप्तिदेवनयोः। छृण
त्ति। छृन्ते। चच्छर्द। सेऽसिचीति वेट्। चच्छृदिषे। चच्छृत्से। छर्दिता। छर्दिष्यति। छर्त्स्यति।

म०कौति० अछृदत्। अछर्दीत्। अछर्दिष्ट। उतृदिर् हिंसानादरयोः। तृणत्ति। तृन्ते। कृती वेष्टने। कृणत्ति।
॥६६॥ कर्तिता। अकर्तीत्। तृह हिसि हिंसायां। तृणह् इम्॥ तृहः श्नमि कृते इम् स्यात् हलादौ पिति। तृणे
ढि। तृण्ढः। ततर्ह। तर्हिता। अतृणेट्। श्नान्नलोपः। श्नमः परस्य नस्य लोपः स्यात्। हिनस्ति। जि
हिंस। हिंसिता। उंदी क्लेदने। उनत्ति। उन्तः। उंदंति। उंदांचकार। औनत्। औन्तां। औंद
न्। औनः। औनदं। अंजू व्यक्तिम्रक्षणकांतिगतिषु। अनक्ति। अंक्तः। अंजंति। आ
नंज। आनंजिथ। आनंक्थ। अंजिता। अंक्ता। अङ्ग्धि। अनजानि। आनक्। अंजेः सि
चि। अंजेः सिचो नित्यमिट्। आंजीत्। तंचू संकोचने। तनक्ति। तंक्ता। तंचिता। ओवि
जी भयचलनयोः। विनक्ति। विंक्तः। विज इडिति ङित्त्वं। विविजिथ। विजिता। अविनक्।
अविजीत्। शिष्लृ विशेषणे। शिनष्टि। शिंष्टः। शिषंति। शिनक्षि। शिंष्ठ। शिशेषिथ। ॥६६॥
शेष्टा। शेक्ष्यति। हेर्धिः। शिंढि। शिनषाणि। अशिनट्। शिंष्यात्। शिष्यात्॥

शिण्ड्ढि
झरो झरि सवर्णे

इंधि अशिषत्। अशेक्ष्यत्। एवं पिष्लृ संचूर्णने। भंजो आमर्दने। भनक्ति। बभंजिथ। बभंक्थ। भंक्ता
भुज पालनाभ्यवहारयोः। भुनक्ति। भोक्ता। भोक्ष्यति। अभुनक्। भुजोऽनवने। तङानौ स्तः। ओदनं भुं
क्ते। अनवने किं। महीं भुनक्ति। ञिइंधी दीप्तौ। इंद्धे। इंधाते। इंधते। इंत्से। इंधांचक्रे। इंधिता। इंधां।
इंधातां। इंधतां। इनधै। ऐंध। ऐंधातां। ऐंधत। ऐंधाः। विद विचारणे। विंत्ते। वेत्ता॥ ॥इति
रुधादिः॥ ॥तनु विस्तारे॥ तनादिकृञ्भ्य उः॥ शपोऽपवादः। तनोति। तनुते। ततान। तेने। त
निता। तनिष्यति। तनिष्यते। तनोतु। तनुतां। तनेह नयूयमतनिष्ट। तनवै। अतनोत्। अत
नुत। अतनुयात्। तन्वीत। तन्यात्। तनिषीष्ट। अतानीत्। अतनीत्। तनादिभ्यस्तथासोः।
तनादेः सिचो वा लुक् तथासोः। थासा साहचर्यादेकवचनं तशब्दो गृह्यते। तेनेह न यूयमतनि
त२ ष्ट। अतत। अतनिष्ट। अतथाः। अतनिष्ठाः। अतनिष्यत। अतनिष्यत। षणु दाने। सनो
ति। सनुते। ये विभाषा। सायात्। सन्यात्। जनसनखनां सञ्झलोः। एषामाकारो झलादौ

अनुदात्तोपदेश॰ नस्य लोपः।२

मकोति॰ सनिटलादो क्ङिति च। असात। असनिष्ट। असाथाः। असनिष्ठाः। क्षणु हिंसायां। क्षणोति।
॥६७॥ क्षणुते। ह्म्यंतेतिनवृद्धिः। अक्षणीत्। अक्षत। अक्षणिष्ट। अक्षथाः। अक्षणिष्ठाः। क्षिणुच।
उप्रत्ययेलघूपधगुणोवा। क्षिणोति। क्षेणोति। अक्षेणीत्। अक्षित। अक्षेणिष्ट। तृणु अद
ने। तृणोति। तर्णोति। तृणुते। तर्णुते। डुकृञ् करणे। करोति। अत उत्सार्वधातुके। कुरुतः।
ख४ नभकुर्छुरां। भस्य कुर्छुरोरुपधाया न दीर्घः। कुर्वन्ति। नित्यं करोतेः। प्रत्ययोकारस्य नित्यं लो
पो म्वोः। कुर्वः। कुर्मः। कुरुते। चकार। चकर्थ। चकृव। चक्रे। कर्ता। करिष्यति। करिष्यते। करोतु।
कुरुतां। अकरोत्। अकुरुत। ये च। कृञ उलोपो यादौ प्रत्यये परे। कुर्यात्। कुर्वीत। क्रि
रिङ्शयग्लिङ्क्षु यात्। कृषीष्ट। अकार्षीत्। अकृत। ह्रस्वादंगात्। सिचो लोपो लिङि से। अकरिष्यत्। संपरिभ्यां क
रोतौ भूषणे। समवाये च। सुट्। संस्करोति। अलंकरोतीत्यर्थः। संस्कुर्वंति। संघीभवंतीत्यर्थः। ॥६७॥
संपूर्वस्य क्वचिदभूषणेपि सुट्। संस्कृतं भक्षा इति ज्ञापकात्। उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु।

च। कृञः सुट् स्यात्प्रागुक्तयोरर्थयोः। प्रतियत्नो गुणाधानं। विकृतमेव वैकृतं विकारः। वाक्याध्याहार
आकांक्षितैकदेशपूरणं। उपस्कृता कन्या। उपस्कृता ब्राह्मणाः। एधोदकस्योपस्कुरुते। उपस्कृ
तं भुंक्ते। उपस्कृतं ब्रूते। वनु याचने। वनुते। ववने। वनिता। मनु अवबोधने। मनुते। मेने।
मनिता। मनिष्यते। मनुतां। अमनुत। मन्वीत। मनिषीष्ट। अमत। अमनिष्ट। अमथाः। अम
निष्ठाः॥ ॥इति तनादिः॥ डुक्रीञ् द्रव्यविनिमये। क्र्यादिभ्यः श्ना। शपोपवादः। क्रीणा
ति। ई हल्यघोः। श्नाभ्यस्तयोरातः। क्रीणंति। क्रीणासि। क्रीणीथः। क्रीणीथ॥ क्री
णामि। क्रीणीवः। क्रीणीते। क्रीणाते। क्रीणते। क्रीणीषे। क्रीणाथे। क्रीणीध्वे। क्रीणे। क्रीणी
वहे। चिक्राय। चिक्रियतुः। चिक्रियुः। चिक्रेथ। चिक्रयिथ। चिक्रिये। क्रेता। क्रेष्यति। क्रेष्यते।
क्रीणातु। क्रीणीतात्। क्रीणीतां। क्रीणातां। क्रीणतां। क्रीणीयात्॥ क्रीणीत। क्रीयात्। क्रे
षीष्ट। अक्रैषीत्। अक्रेष्ट। अक्रेष्यत। अक्रैषीत्। प्रीञ् तर्पणे कांतौ च। प्रीणाति। प्रीणीते॥
ष्य

मध्यसि॰कौ॰ ||९८||

श्रीञ् पाके। श्रीणाति। श्रीणीते। मीञ् हिंसायां। प्रमीणाति। प्रमीणीते। मीनातिर्णल्वं। ममौ। मिम्यतुः। मिमिथ। ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। यमरमनमातां।
अमासिष्टां। अमास्त। षिञ् बंधने। सिनाति। सिनीते। सिषाय। सिष्ये। सेता। स्कुञ् आप्रवणे।
स्तंभुस्तुंभुस्कंभुस्कुंभुस्कुञ्भ्यश्नुश्च। चात्श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्काव।
चुस्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तंभ्वादयश्चत्वारः सौत्राः सर्वे रोधनार्थाः परस्मैपदि
नः। हलः परस्यश्नः शानज्झौ। स्याद्धौ॥ स्तभान। स्कभान। स्कभान। पक्षे स्तभ्नुहि इत्यादि॥
स्तभ्नाति। स्तभ्नोति। स्तुभ्नाति। स्तुभ्नोति। स्कभ्नाति। स्कभ्नोति। स्कुभ्नाति। स्कुभ्नोति।
स्तभान। जॄस्तंभुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च॥ अस्तभत्। अस्तभत्। अस्तंभीत्। युञ् बं
धने। युनाति। युनीते। योता। क्नूञ् शब्दे। क्नूनाति। क्नूनीते। क्नविता। द्रूञ् हिंसायां। द्रूणा ||९८||
ति। द्रूणीते। पूञ् पवने। प्वादीनां ह्रस्वः। पूञ्लूञ्स्तॄञ्कॄञ्वॄञ्धूञ्शॄदॄजॄझॄधॄनॄकॄऋगॄज्यारीलीव्लीप्लीनां चतुर्विंशतेर्नांशिति। पुनाति। पुनीते। पविता। लूञ् छेद
ने लुनाति लुनीते। स्तॄञ् आच्छादने स्तृणाति स्तृणीते तस्तार तस्तरे स्तरिता स्तरीता स्तृ
णीयात् स्तृणीत स्तीर्यात् स्तरिषीष्ट लिङ्सिचोरिति वेट् न लिङि स्तीर्षीष्ट सिचि च पर
स्मैपदेषु। अस्तारीत्। अस्तारिष्टां। अस्तारिषुः। अस्त[illegible]ष्ट। अस्तरीष्ट। अस्तीर्ष्ट।
कॄञ् हिंसायां। कृणाति। कृणीते। चकार। चकरे। वॄञ् वरणे। वृणाति। वृणीते। ववार। स्कच्छत्यृतां गुणः
ववरे। वरिता। वरीता। उदोष्ठ्यपूर्वस्य। वूर्यात्। वरिषीष्ट। वूर्षीष्ट। अवारीत्। अवारिष्टां। अव
रिष्ट। अवारीष्ट। अवूर्ष्ट। धूञ् कंपने। धुनाति। धुनीते। दुधविथ। दुधोथ। दुधुविव। धो
ता। धविता। स्तुसुधूञ्भ्यः परस्मैपदेषु। अधावीत्। अधविष्ट। अधोष्ट। ग्रह उपादाने।
गृह्णाति। गृह्णीते। जग्राह। जगृहे। ग्रहोऽलिटि दीर्घः। एकाचो ग्रहेर्विहितस्येटो दीर्घो न
तु लिटि। जग्रहिथ। ग्रहीता। गृह्णातु। गृहाण। गृह्यात्। ग्रहीषीष्ट। ह्म्यंतेति न वृद्धिः। अ

म०सिति०

॥८९॥

ग्रहीत। अग्रहीष्टां। अग्रहीष्ट। अग्रहीषातां। कुष निष्कर्षे। कुष्णाति। कोषिता। निरः कुषः। वलादेरार्ध
धातुकस्येड्वा। निष्कोषिता। निष्कोष्टा। निरकोषीत्। निरकुक्षत्। अश भोजने। अश्नाति। आश।
अशिता। अशिष्यति। अश्नातु। अशान। ज्ञा अवबोधने। जानाति। जज्ञौ। पॄ पालनपूरण
योः। पृणाति। शॄ हिंसायां। शृणाति। शृदृप्रांह्रस्वोवालिटिह्रस्वपक्षेयण। शश्रतुः। शशरतुः॥
दॄ विदारणे। दृणाति। ददार। ददरतुः। दद्रतुः। जॄ वयोहानौ। जृणाति। मुष स्तेये। मुष्णाति। मो
षिता। [illegible]। पुष पुष्टौ। पुष्णाति। पोषिता। बंध बंधने। बध्नाति। बबंधिथ। बबंध। बंधा। भ बबंद्ध
न्त्स्यति। क्लिश विबाधने। क्लिश्नाति। क्लेशिता। क्लेष्टा। अक्लेशीत्। अक्लिक्षत्। वृङ् संभक्तौ। वृणी अक्लिक्षत
ते। ववे। ववृषे। ववृढ्वे। वरिता। वरीता। अवरिष्ट। अवरीष्ट। अवृत॥ ॥६॥
॥ इति क्र्याद्यः॥ ॥ चुर स्तेये। सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण ॥८९॥
चुरादिभ्यो णिच्॥ स्वार्थे। पुगंतेति गुणः। सनाद्यंता धातवः॥ तिप् शबादि। गुणायादेशौ॥

चोरयति। णिचश्च। णिजंतादात्मनेपदं कर्त्तृगामिनि क्रियाफले। चोरयते। चोरयामास। चोरयिता। चोर्या
त्। चोरयिषीष्ट। णिश्रीति चङ्। णौचङीति ह्रस्वः। द्वित्वं। हलादिः शेषः। दीर्घो लघोरित्यभ्यासस्य दीर्घः।
अचूचुरत्। अचूचुरत। चिति स्मृत्यां। चिंतयति। अचिचिंतत्। चिंतेति पठित्वा इदित्करणं णिचः पाक्षि
कत्वे लिंगं। तेन चिंत्यादित्यादौ न लोपो न। चिंतति। चिंतितेत्यादि। यत्रि संकोचे। यंत्रयति। यंत्रेति प
ठित्वा शक्यं। यत्तु इदित्करणं यंत्रतीति माधवेनोक्तं। तच्चिंत्यं। एवं। कुद्रि अनृतभाषणे। तत्रि कुटुंब
धारणे। मत्रि गुप्तपरिभाषणे। तंत्रयते। मंत्रयते। एतौ आत्मनेपदिनौ। स्फुडि परिहासे। स्फुंडयति।
पीड अवगाहने। भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्यां। एषामुपधाया ह्रस्वो वा चङ्प
रे णौ। अपीपिडत्। अपिपीडत्। प्रथ प्रख्याने। प्राथयति। अत्स्मृदृत्वरप्रथम्रदस्तॄस्पशां॥ ए
षामभ्यासस्याकारश्चङ्परे णौ। इत्वापवादः। अपप्रथत्। पृथ प्रक्षेपे। पर्थयति। उर्ऋत्। उपधा
या ऋवर्णस्य ऋद्वा चङ्परे णौ। इररामिरांपवादः। अपीपृथत्। अपपर्थत्। लुंट स्तेये। लुंटय
ति। अलुलुंटत्। तड आघाते। ताडयति। अतीतडत्। मडि भूषायां हर्षे च। मंडयति। अममंडत्॥

स॰कौ॰ति॰ चु॰ भडि कल्याणे। भंडयति। अबभंडत्। छर्द्द वमने। छर्दयति। अचच्छर्दत्। बुद संचोदने। बोदयति। अबू
॥७०॥ बुदत्। पाल रक्षणे। पालयति। अपीपलत्। पूज पूजायां। पूजयति। अपूपुजत्। कृत संशब्दने।
उपधायाश्च। धातोर्ऋतइत्त्वं रपरत्वं। उपधायां चेति दीर्घः। कीर्त्तयति। अचीकृतत्। अचिकीर्त्तत्।
म्लेछ अव्यक्तायां वाचि। म्लेछयति। अमिम्लेछत्। ईड स्तुतौ। ईडयति। पिडि संघाते। पिंडयति॥
रुष रोषे। रोषयति। अरूरुषत्। तुल उन्माने। तोलयति। अतूतुलत्। शुल्ब माने। शुल्बयति।
अशुशुल्बत्। घुषिर् अविशब्दने। घोषयति। अजूघुषत्। पट पुट लुट तुजि मिजि पिजि लुजि
भजि लघि त्रसि पिसि कुसि दशि कुशि घट घटि बृहि बर्ह बल्ह गुप धूप विछ चीव पुथ लोकृ
लोचृ णद कुप तर्क वृतु वृधु भाषार्थाः॥ पाये घटेति। पाटयति। लोकयति। तुंजयति। एवं परेषां।
घाटयति। घंटयति। नाग्लोपि शास्वृदितां। णिचि अग्लोपिनः शास्तेः ऋदितां चोपधाया ह्रस्वो न
चङ्परे णौ। अलुलोकत्। अलुलोचत्। वर्त्तयति। वर्द्धयति। आधृषाद्वा॥ इत ऊर्ध्वं विभाषितणि ॥७०॥ श्रीराम
चो धृष धातुमभिव्याप्य। युज पृच संयमने। योजयति। योजति। अयोजीत्। पर्चयति। पर्चति।

पर्चिता। अपर्चीत्। अर्च पूजायां। षह मर्षणे। साहयति। स एवायं नागः सहति कलभेभ्यः परिभवं॥
वृञ आवरणे। वारयति। वरति। वरते। जॄ वयोहानौ। जारयति। जरति। शिष असर्वोपयोगे। शेषयति।
शेषति। शेष्टा। अशिक्षत्। तप दाहे। तापयति। तपति। तप्ता। तृप तृप्तौ। तर्पयति। तर्पति। हिसि हिं
सायां। हिंसयति। हिंसति। अर्ह पूजायां। णिलोपः। द्विर्वचनेचीति णिच स्थानिवद्भावाद् द्वि
तीयस्येति हिशब्दस्य द्वित्वं॥ रेफस्य नंद्राद्रिति निषेधः। युत्वं जश्च। आर्जिहत्। छद अपवारणे।
स्वरितेत्। छादयति। छदयति। छदते। धू कंपने। धूञ्प्रीञोर्नुग्वक्तव्यः। णौ। धूनयति। धव
ति। धवते। प्रीञ तर्पणे। प्रीणयति। प्रयति। प्रयते। वद परिभाषणे। वादयति। वदति। वक्ता। अ
वादीत्। मान पूजायां। मानयति। मानति। मानिता। भू प्राप्तौ। आत्मनेपदी। भावयते। भवते।
णित्स्वनियोगे नैवात्मनेपदमित्येके। भवति। मार्ग अन्वेषणे। धृष प्रहसने। धर्षयति। धर्षति।
अथादंताः॥ कथ वाक्यप्रबंधे। अल्लोपः। अचः परस्मिन्पूर्वविधौ॥ परनिमित्तो ऽजादेशः स्था
निवत्स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्त्तव्ये। इति स्थानिवत्त्वान्नोपधावृद्धिः॥ कथयति।

मध्य०कौति०

॥७१॥

अग्लोपित्वादीर्घसन्वद्भावौन। अचकथत्। गण संख्याने। गणयति। ई च गणः। गणेः अभ्यासस्य
ईत्स्याच्चात्स्वाङ्परे णौ। अजीगणत्। अजगणत्। रच प्रतियत्ने। रचयति। अररचत्। कल गतौ
संख्याने च। कलयति। अचकलत्। मह पूजायां। महयति। सूच पैशुन्ये। सूचयति। अषोपदे
शत्वान्न षः। असुसूचत्। कुमार क्रीडायां॥ कुमारयति। अचुकुमारत्। ऊन परिहाणे। ऊन
यति। ओः पुयण्ज्यीति सूत्रे पयण्परे इति वक्तव्ये वर्गप्रत्याहारग्रहणं लिंगं णिचि अन आदेशो
न द्वित्वे कर्तव्ये॥ यत्र द्विरुक्ताव् अभ्यासोत्तरखंडस्याद्योऽत्र प्रक्रियायां परिनिष्ठितरूपे वा अवर्णो
लभ्यते तत्रैवायन्निषेधः ज्ञापकस्य सजातीयापेक्षत्वात्। तेनार्बिकीर्त्तदित्यादि सिद्धं। प्र
कृते तु नशब्दस्याद्वित्वं तत उत्तरखंडे अल्लोपः। औननत्। ध्वन शब्दे। ध्वनयति। अदध्वनत्।
सूत्र वेष्टने। सूत्रयति। मूत्र प्रस्रवणे। मूत्रयति। अदंतत्वसामर्थ्याण्णिच्विकल्पः। मूत्र
ति। आगर्वादात्मनेपदिनः। पद गतौ॥ पदयते। अपपदत। गृह ग्रहणे। गृहयते। मृग ॥७१॥
अन्वेषणे। मृगयते। शूर वीर विक्रांतौ॥ शूरयते। वीरयते। गर्व माने॥ गर्वयते॥ ॥इतिचुरा

ओः पुयण्ज्यपरे इति किं आदेशः अचि आदेशो नाद्वित्वे कर्तव्ये। वाडि।
णिच्क इत्यस्मिन्णि। इति। अवीवशति। आवारेशः। दीर्घो लघोः। णौ चङ्युपधाया ह्रस्वः ४

मूङ् बंधने ४ रुदिर् ४ छिदिर् द्वैधीकरणे ४

दिः॥ ॥छ॥ ॥स्वतंत्रः कर्ता॥ क्रियायां स्वातंत्र्येण विवक्षितोऽर्थः कर्ता स्यात्। तत्प्रयोजको हेतुश्च॥
कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च। हेतुमति च॥ प्रयोजकव्यापारे प्रेरणादौ वाच्ये धातोर्णिच्॥ भवंतं
षद्ॡ पतने ४ प्रेरयति॥ भावयति॥ ओः पुयण्ज्यपरे। सनि परे यदंगं तदवयवस्याभ्यासो उतुर्इत्स्यात् पवर्ग यण्ज
कारे ष्ववर्णपरेषु परतः॥ अबीभवत्। अपीपवत्। मूङ्। अमीमवत्॥ अयीयवत्। अरीरवत्। अली
लवत्। अजीजवत्। पुयण्ज्यीति किं। नुनावयिषति। अपरे किं। बुभूषति॥ स्रवतिशृणोतिद्रवति
प्रवतिप्लवतिच्यवतीनां वा। एषामभ्यासोकारस्येत्वं वा सनि अवर्णपरे धात्वक्षरे परे। असिस्रवत्॥
असुस्रवत्। इत्यादि। अवर्णपरे किं। शुश्रूषते। णिचि अंतादिमिच्। परत्वादिद्रूपप्राप्तायां ण्यल्लोपा
वियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेनेति णिलोपः॥ नारयति। णौ चङ्युपधाया ह्रस्वः। दीर्घो ल
घोरिति दीर्घः॥ नवार्ग्लोपित्वाद्दीर्घयोरप्यसंभवः। ण्यात्कृतिनिर्देशात्। अनूनुरत्। दु ओश्वि गतिवृद्ध्योः॥ ॥णौ च संश्चङोः॥ सन्परे चङ्परे णौ श्वयतेः संप्रसारणं वा। संप्रसारणं तदाश्रितं च कार्यं बलवदिति वचनात् संप्रसारणम्। अशूशवत्। अल्लघुत्वान्न दीर्घः। अशिश्वयत्॥ स्तंभुसिवुसहां चङि॥

णिजाति:

पुमि०

सर्व०

सुमंतोमिसुण।णो यहीतिक्रव

म०कौ०ति० उपसर्गनिमित्तएषांसस्यषोनस्याच्चाडि।अवातस्तंभत।पर्यसीषिवत्।न्यसीषदत॥स्वापेश्चडि॥एषं
॥ ७२ ॥ तस्यस्वापेश्चडिसंप्रसारणं॥असूषुपत॥हनस्तोंसिलोः॥हन्तेस्तकारांतादेशस्यात्।णिचलिवर्जि
हाहेतोर्जि० तेञितिणिति।घातयति॥ ॥अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातांपुक्णौ॥स्थापयति।क्नोपयति।नियंते एषांपुक्स्याजो
रित।उपधायाश्चङ्परेणौ।अतिष्ठिपत।घ्रापयति।जिघ्रतेर्वा॥उपधाया इत्वं चङ्परेणौ॥अजिघ्रि
सोतनसूतरोध पत।अजिघ्रपत॥ ॥शाछासाह्वाव्यावेपांयुक्॥णौ॥शाययति।अशीशयत।ह्वाययति॥ ॥ इति विकल्पः॥
क्रन्दने५ ह्नःसंप्रसारणं॥सन्यश्चङ्परस्यणौ॥ ॥काण्यादीनांवा॥चङ्परेणौ उपधाया इत्वावा॥एषंनाः
वातक्रमेण कणरणभणश्रणलुपहेठः षट्भाष्ये॥ह्नयिवाणिलोटिलोपयश्च्चाराधिकाःन्यासे॥वाणि
लोटिअप्यन्यत्र॥ ॥ह्रलंकाण्यादयो द्वादश॥अजूहवत्।अजुहाववत्।पाययति॥पलोपः
पिबतेरीच्चाभ्यासस्य॥ ॥पिबतेरुपधायालोपःस्यादभ्यासस्यईदंतादेशश्चङ्परेणौ।अ
पीप्यत्।पातेर्णौलुग्वक्तव्यः॥पुकोपवादः॥पालयति। ॥वोविधूनने जुक्॥णौ॥वाजयति॥ ॥ ७२ ॥
कंपेकिं।केशान्वापयति॥ शदेरगतौतः॥णौ।शातयति॥गतौतुगाः।शादयतिगोविंदः॥

गमयतीत्यर्थः॥रुहःपोन्यतरस्यां॥णौ॥रोपयति॥रोहयति॥दोषोणौ॥ दुष्यतेरुपधायाऊत्स्याणौ॥
दूषयति॥वाचित्तविरागे॥ चित्तविरागअप्रीतता॥चित्तंदूषयति॥दोषयतिवाकामः॥उभौसाभ्यासस्य॥
साभ्यासस्यानितरुभौनकारोणत्वंप्राप्नुतोनिमित्तेसति॥प्राणिणत्॥णोगमिरबोधने॥इणः गमयति।
बोधनेतु।प्रत्याययति॥घटचेष्टायां॥घटादयोमितः॥जनीजृष्क्नसुरंजोमंताश्च॥मितः॥ज्वलह्व
लह्मलनमामनुपसर्गाद्वा॥एषांमित्वंवा॥ ॥ग्लास्नावनुवमांच॥अनुपसर्गादेषांमित्वंवा॥नका
म्यमिचमां॥अमंतत्वात्प्राप्तंमित्वन्न॥यमोऽपरिवेषणे॥मित्वन्न॥स्खदिरवपरिभ्यांच॥मित्व
न्न॥मितांह्रस्वः॥घटादीनांज्ञपादीनांचणौउपधायाह्रस्वः॥घटयति॥ज्ञपज्ञानेज्ञापनेच॥
ज्ञपयति॥अजीघटत॥अजिज्ञपत॥रभेरशब्लिटोः॥नुमनि॥लभेश्च॥अररंभत्॥अलल
त्॥ईर्ष्ययति॥ईर्ष्यतेस्तृतीयस्येतिवक्तव्यं॥तृतीयस्यैवव्यंजनस्यतृतीयंकानद्वितीयंर्थः॥अरेघ
स्य द्वित्वंवार्ण्यतुमिदं॥द्वितीयेतुअजादेर्द्वितीयस्येत्यस्यापवादतयासनंतप्रवर्तते॥ऐर्ष्यि
यत्॥ऐर्षिष्यत्॥द्वितीयव्याख्यायांणिजंतात्कृडिषएवाभ्यासेश्रूयतेहलादिःशेषात्॥द्वित्वं

द्वितीयस्यैव ॥ तृतीयाभावेन प्रकृतवार्त्तिका[illegible]प्रवृत्तेः ॥ धातोः कर्मणः समानकर्तृकादिच्छायां
वा ॥ इषिकर्मणो धातोरिषिणैककर्तृकात्सन्वेच्छायां ॥ इट् ॥ सन्यङोः ॥ सनंतस्य यङंतस्य च प्रथमस्य
काचो द्वे स्तोऽजादेस्तु द्वितीयस्य ॥ सन्यतः ॥ पठितुमिच्छति पिपठिषति ॥ कर्मणः किं ॥ गमनेनेच्छति ॥
समानकर्तृकात्किं ॥ शिष्याः पठंत्वितीच्छति गुरुः ॥ वा ग्रहणाद्वाक्यमपि ॥ शैषिकान्मतुबर्थीयाच्छै
षिको मतुबर्थिकः ॥ सरूपप्रत्ययो नेष्टः सन्नंतान्न सनिष्यते ॥ १ ॥ तेन पिपठिषितुमिच्छतीति वाक्य
मेव ॥ लुङ्सनोर्घस्लृ ॥ (अदः ॥) सस्यार्धधातुके ॥ सस्य तः स्यात्सादावार्धधातुके ॥ अत्तुमिच्छति जिघ
त्सति ॥ एकाच इति नेट् ॥ अज्झनगमां सनि ॥ अजंतानां हंतेरजादेशगमेश्च दीर्घो झलादौ
सनि ॥ इको झल् ॥ इगंताज्झलादिः सन्कित् ॥ कर्तुमिच्छति चिकीर्षति ॥ जिघांसति ॥ सनि [illegible]
च ॥ इणो गमिर्न तु बोधने ॥ जिगमिषति ॥ बोधने तु प्रतीषिषति ॥ इङश्च ॥ जिगांसते ॥ अधिजि
गांसते ॥ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ एभ्यः संश्च क्त्वा च कित्स्यात् ॥ रुरुदिषति ॥ विविदि ॥ ७३ ॥
षति ॥ मुमुषिषति ॥ सनिग्रहगुहोश्च ॥ ग्रहेर्गुहेरुगंताच्च सन इण्न ॥ जिघृक्षति ॥ हलंताच्च ॥

हलंताच्च ॥ एकाचो बशो भष्झषंतस्य स्ध्वोः ॥ पठितः कः सि

इक्समीपाद्धलः परो झलादिः सन्कित् ॥ गुहू संवरणे ॥ जुघुक्षति ॥ सुषुप्सति ॥ किरश्च पंचभ्यः ॥
कॄगॄदृङ्धृङ्प्रच्छिभ्यः सन इट् ॥ पिप्रच्छिषति ॥ चिकरिषति ॥ जिगरिषति ॥ जिगलिषति ॥ अच
टो दीर्घो नेष्टः ॥ पूर्ववत्सनः ॥ सनः पूर्वो यो धातुस्तेन तुल्यं सनंतादप्यात्मनेपदं स्यात् ॥ दिद
रिषते ॥ दिधरिषते ॥ बुभूषति ॥ सनीवंतर्धभ्रस्जदंभुश्रिस्वृयूर्णुभरज्ञपिसनां ॥ इवंतेभ्य
ऋधादिभ्यश्च सन इड्वा ॥ च्छ्वोः शूडनुनासिके च ॥ सतुक्कस्य छस्य वस्य च श्च ऊठ् एतावा
देशौ स्तोऽनुनासिके क्वौ झलादौ क्ङिति च ॥ यण् द्वित्वं ॥ दुद्यूषति ॥ दिदेविषति ॥ स्तौतिण्यो
रेव षण्यभ्यासात् ॥ अभ्यासेणः परस्य स्तौतिण्यंतयोरेव सस्य षो षभूते सनि नान्यस्य ॥ तुष्टूष
ति ॥ राधसाधसन्यपि द्वा ॥ सिषाधयिषति ॥ स्तौतिण्योः किं ॥ सुस्यूषति ॥ सिसेविषति ॥ आ
प्ज्ञप्यृधामीत् ॥ एषामच ईत्स्यात्सादौ सनि ॥ अत्र लोपोऽभ्यासस्य ॥ सनि मीमेत्या
रभ्य यदुक्तं तत्राभ्यासलोपः ॥ आप्तुमिच्छति ईप्सति ॥ अर्द्धितुमिच्छति ॥ ईर्त्सति ॥ अ
र्दिधिषति ॥ बिभ्रक्षति ॥ बिभ्रज्जिषति ॥ बिभ्रक्षति ॥ बिभर्क्षति ॥ दंभ इच्च ॥ दंभेरच

[illegible]

इत्येवं विभाषेणाश्रितेत्वा डिः सिकः परस्य गुणः ३

म०कौ ति ॥७५॥

इत्स्या त्वादीन्नसादोसनि ॥ हलंतादित्यत्र हलु ग्रहणं जातिपरं ॥ तेन सनः कित्वान्नलोपः ॥ धीप्सति ॥
धिप्सति ॥ दिदंभिषति ॥ शिश्रीषति ॥ शिश्रयिषति ॥ सुस्मूर्षति ॥ सिस्वरिषति ॥ युयूषति ॥
यियविषति ॥ ऊर्णुनुषति ॥ ऊर्णुनुषति ॥ ऊर्णुनविषति ॥ बुभूर्षति ॥ बिभरिषति ॥ दी
प्साति ॥ जिज्ञपयिषति ॥ जनसनखनां सञ्झलोः आत्वं ॥ सिषासति ॥ सिसनिषति ॥ आशं
कायां सन्वक्तव्यः ॥ श्वा मुमूर्षति ॥ तनिपतिदरिद्रातिभ्यः सनो वेड्वाच्यः ॥ तनोतेर्विभाषा
॥ उपधायादीर्घो ऊलादोसनि ॥ तितांसति ॥ तितंसति ॥ तितनिषति ॥ क्तलंपिपतिषति ॥
सनिमीमाघुरभलभशकपतपदामवद्दस ॥ एषां अवईस्यात्सोदोसनि ॥ अभ्यासलो
पः ॥ पित्सति ॥ दिदरिद्रिषति ॥ दरिद्रासति ॥ मुचोकर्मकस्य गुणोवा ॥ मादोसनि ॥
अभ्यासलोपः ॥ मोक्षते ॥ मुमुक्षते ॥ वावात्सं स्वयमेव ॥ अकर्मकस्य किं ॥ मुमुक्षति ॥ ॥७४॥
वत्सं तसं कुल्लः ॥ इतिइट्सनिवा ॥ वृदृत्भ्यां ऋदंताच्च सनइड्वा स्यात् ॥ विवरिषते ॥ वि
वरीषते ॥ वुवूर्षते ॥ विवरिषति ॥ विवरीषति ॥ तितरिषति ॥ तितरीषति ॥ तितीर्षति ॥

तितइच्छा

अमितस्तूदि
त्रापयिषति

तस्माव्यस्थजाद

स्मिपूङ्रंज्वशांसानि ॥ स्मिपूङ् ऋ अंज अश एभ्यः सन् इट् ॥ सिस्मयिषते ॥ पिपविषते ॥ इहरिक्तश
दस्याद्दित्वं ॥ अरिरिषति ॥ अंजिजिषति ॥ अशिशिषते ॥ गुप गोपने ॥ तिज निशाने ॥ कित निवासे रो
गापनयने च ॥ मान पूजायां ॥ बध बंधने ॥ दान खंडने ॥ शान तेजने ॥ गुप्तिज्किद्भ्यः सन् ॥ मान्ब
धदान् शान्भ्योदीर्घश्चाभ्यासस्य ॥ अत्र द्वयोः र्भ्यः सन् मानादीनामभ्यासस्येकारस्य दीर्घश्च ॥ गु
पेर्निंदायां ॥ तिजेः क्षमायां ॥ कितेर्व्याधि प्रतीकारे निग्रहे अपनयने नाशि संशये च ॥ मानेर्जिज्ञासा शने
यां ॥ बधेश्चित्तविकारे ॥ दानेरार्जवे ॥ शानेर्निशाने ॥ गुपिप्रभृतयः किति भिन्नान्निंदाद्यर्थका
वानुदात्ते नोनुबंधकस्य केवलेऽवगितार्थत्वात्स नन्तात्पदव्यवस्था धातोरित्यविहित त्वोस्सनोऽ
नार्धधातुकत्वं तेनेट् गुणौ न ॥ जुगुप्सते ॥ तितिक्षते ॥ चिकित्सति ॥ मीमांसते ॥ बीभत्सते ॥
दीदांसति ॥ दीदांसते ॥ शीशांसते ॥ णिचितु गोपाययति ॥ गोपयते ॥ इत्यादि ॥ धातोरेकाचो ह
लादेः क्रियासमभिहारे यङ् ॥ पौनःपुन्यभृशार्थवद्योत्ये धातोरेकाचो हलादेर्यङ् ॥ गुणो
यङ्लुकोः ॥ अभ्यासस्यैङ् ङितत्वादात्मनेपदं ॥ पुनः पुनरतिशयेन वा भवति ॥ बोभूयते ॥ बोभू
धान शानो स्वरितेता एते नित्यं सनंताः ॥ अर्थांतरे त्वननुबंधकाश्चुरादयः ॥ अ ५

गुणोयङ्गियङ्लुकोः २ शीशांसति २ शो २ ॥ ७ ॥ इति सनंतप्रक्रिया ॥ ७ ॥

म० कौमु० यांचक्रे॥ अबोभूयिष्ट॥ धातोः किं॥ आर्धधातुकत्वं यथा स्यात्॥ तेन ध्रुवो व विरित्यादि॥ एकाचः किं॥
॥७५॥ पुनः पुनः॥ जागर्ति॥ हलादेः किं॥ भृशमीक्षते॥ नित्यं कौटिल्ये गतौ॥ गत्यर्थात्कौटिल्ये एव यङ्
ङ् क्रियासमभिहारे॥ दीर्घोऽकितः॥ अकितोऽभ्यासस्य दीर्घो यङ्लुकोः॥ कुटिलं व्रजति॥ वाव्रज्य
ते॥ यस्य हलः॥ हलः परस्य यस्य लोपः आर्धधातुके॥ आदेः परस्य॥ अतो लोपः॥ वाव्रजांच
क्रे॥ वाव्रजिता॥ रीगृदुपधस्य च॥ ऋदुपधस्य धातोरभ्यासस्य रीगागमो यङ्लुकोः॥ वरीवृ
त्यते॥ वरीवृतांचक्रे॥ वरीवृतिता॥ क्षुभ्नादिषु च॥ णत्वं न॥ नरीनृत्यते॥ जरीगृह्यते॥ रीगृत्व
दिति वाच्यं॥ वरीवृश्च्यते॥ लुपसदचरजपजभदहदशगॄभ्यो भावगर्हायां॥ एभ्यो धात्वर्थ
गर्हायामेव यङ्॥ गर्हितं लुम्पति लोलुप्यते॥ सासद्यते॥ चरफलोश्च॥ अनयोरभ्यासस्या
तोऽनुक् यङ्लुकोः॥ नुगित्यनेनानुस्वारो लक्ष्यते॥ स च पदान्तवद्वाच्यः॥ वा पदान्तस्येति
यथा स्यात्॥ उत्परस्यातः॥ चरफलोरभ्यासात्परस्यात उत्स्याद्यङ्लुकोः॥ हलि चेति दीर्घः॥ ॥७५॥
चंचूर्यते॥ पम्फुल्यते॥ पंफुल्यते॥ जपजभदहदशभंजपशां च॥ एषामभ्यासस्य

नुक् यङ्लुकोः॥ गर्हितं जपति॥ जंजप्यते इत्यादि॥ ग्रो यङि॥ गिरते रेफस्य लत्वं यङि॥ गर्हितं निगि
रति जेगिल्यते॥ सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः॥ सोसूच्यते॥ सोसूत्र्यते॥
मोमूत्र्यते॥ अटाट्यते॥ यङि च॥ अन्तःसंयोगादृतो गुणो यङि॥ यकारपरस्य रेफस्य न
द्वित्वनिषेधः॥ अरार्यते इति भाष्योदाहरणात्॥ अरारिता॥ अशाशूर्यते॥ ऊर्णोनूयते॥ सि
चो यङि॥ सस्य षो न॥ निससिच्यते॥ न कवतेर्यङि॥ अभ्यासस्य चुत्वं॥ कोकूयते॥ कौति कु ॥ न
वत्योस्तु चोकूयते॥ हन्तेर्हिंसायां घ्नीभावो वाच्यः॥ जेघ्नीयते॥ हिंसायां किं॥ नुगतो
ऽनुनासिकान्तस्य॥ अदन्ताभ्यासस्य यङ्लुकोः॥ जंघन्यते॥ अयाङ्क्ङिति॥ शीङः॥ शा
शय्यते॥ स्वापिस्यमिव्येञां यङि॥ संप्रसारणं॥ सोषुप्यते॥ सेसिम्यते॥ वेवीयते॥ न वशः॥
संप्रसारणं न॥ वावश्यते॥ चायः की॥ यङि च॥ चेकीयते॥ ई घ्राध्मोः॥ जेघ्रीयते॥ देध्मीय
ते॥ नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दां॥ एषामभ्यासस्य नीग्यङ्लुकोः॥ अकित इत्यु
क्तेर्न दीर्घः॥ नलोपः॥ वनीवच्यते॥ सनीस्रस्यते॥ दनीध्वस्यते॥ बनीभ्रस्यते॥ चनीकस्य

अभिदितोह०   पतर

ति ॥ पनीपत्यते ॥ पनीपद्येत ॥ वनीस्कन्द्यते ॥ यङोऽचि च ॥ यङोऽचि प्रत्यये लुक् स्यात् ॥ नकारान्तं विना
ष्फिक् चित् ॥ अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति ॥ ततः प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वं ॥ अभ्या
सकार्यं ॥ धातुत्वाल्लडादयः ॥ शेषात्कर्तरि परस्मैपदं ॥ चर्करीतं चेत्यदादौ पाठाच्छपो लुक् ॥ यङो वा ॥
यङन्तात्परस्य हलादेः पितः सार्वधातुकस्य ईड् वा स्यात् ॥ भूसुवोस्तिङीति निषेधो यङ्लुकि भाषायां च ॥ बो
भूतु तेतिक्ते इति छन्दसि निपातनात् ॥ बोभवीति ॥ बोभोति ॥ बोभूतः ॥ बोभुवति ॥ बोभवी
षि ॥ बोभोषि ॥ बोभूथः ॥ बोभूथ ॥ बोभवीमि ॥ बोभोमि ॥ बोभूवः ॥ बोभूमः ॥ बोभवांचका
र ॥ बोभवांबभूव ॥ बोभवामास ॥ बोभविता ॥ बोभविष्यति ॥ बोभवीतु ॥ बोभोतु ॥ बोभूता
त् ॥ बोभूतां ॥ भुसुवोरिति गुणः ॥ अबोभवुः ॥ बोभूयात् ॥ बोभूयातां ॥ बोभूयुः ॥ बोभूया
त् ॥ बोभूयास्तां ॥ बोभूयासुः ॥ गातिस्थेति सिचो लुक् ॥ यङो वेतीट्पक्षे ॥ गुणं बाधित्वा
नित्यत्वाद्वुक् ॥ अबोभूवीत् ॥ अबोभोत् ॥ अबोभोत् ॥ अबोभूतां ॥ अबोभूवुः ॥ अबोभ ॥ ७६ ॥
विष्यत् ॥ जङ्गमीति ॥ जङ्गन्ति ॥ अनुदात्तेत्यनुनासिकलोपः ॥ जङ्गतः ॥ जङ्गमति ॥ म्वोश्च ॥
४ बोभवतु ॥ बोभूहि ॥ बोभवानि ॥ अबोभवीत् ॥ अबोभोत् ॥ ४ गमहनजनखनघसां लोपः ॥
४ अबोभूतां ॥ ४

जङ्गन्मि ॥ जङ्गन्वः ॥ शिपा शपानुबन्धेन निर्दिष्टं यद्गणेन च ॥ यत्रैकाज्ग्रहणं चैव पञ्चैतानि न य
ङ्लुकि ॥ इति वचनान्नेड् गणनिषेधः ॥ जङ्गमिता ॥ अनुनासिकलोपस्याभीयत्वेनासिद्धत्वा
न्नेर्लुक् ॥ जङ्गहि ॥ मो नो धातोः ॥ अजङ्गन् ॥ अनुबन्धनिर्देशान्न च्लेरङ् ॥ हन्तेति नवृद्धिः ॥ २
अजङ्गमीत् ॥ रुग्रिकौ च लुकि ॥ ऋदुपधस्य धातोरभ्यासस्य रुक् रिक् रीक् स्युर्यङ्लुकि ॥ ॥
ऋतश्च ॥ ऋदन्तस्य धातोरपि तथा ॥ वर्वर्तीति ॥ वरिवृतीति ॥ वरीवृतीति ॥ वर्वर्त्ति ॥ वरिवर्त्ति ॥
वरीवर्त्ति ॥ वर्वृतः ३ वर्वृतति ३ वर्वर्तांमास ३ वर्वर्तिता ३ गणनिर्दिष्टत्वान्न वृद्भ्यश्चतुर्भ्य इ
ति न ॥ वर्वर्तिष्यति ३ अवर्वर्तीत् ३ ॥ अवर्वर्त् ॥ ३ सिपि दश्चेति रुत्वपक्षे अवर्वाः ॥ ३ गणनि ॥ मोरदा०
र्दिष्टत्वान्नेट् ॥ अवर्वर्त्तिष्ट ॥ ३ चर्करीति ॥ चरिकरीति ॥ चरीकरीति ॥ चर्कर्त्ति ॥ चरिकर्त्ति ॥ च
रीकर्त्ति ॥ चर्कृतः ॥ ३ चर्कृति ३ चर्करांचकार ॥ ३ चर्करिता ॥ अचर्करीत् ॥ ३ अचर्कः ॥ ३
चर्कृयात् ॥ ३ आशिषि रिङ् ॥ चर्क्रियात् ३ अचर्कारीत् ॥ ऋतश्चेति तपरत्वान्नेह ॥ ३

नाभ्यस्तस्याचि पिति सार्वधातुके लघूपधगुणो न

म०कौ०ति० विक्षिपे ॥ वाकर्त्रि ॥ वाकरीति ॥ वाकीर्त्तः ॥ वाकिरति ॥ वाकीर्हि ॥ वाकरीमि ॥ अवाकीरीत् ॥ अवाकः ॥ अ
॥ ७७ ॥ वाकीर्त्ताम् ॥ अवाकरुः ॥ अवाकारीत् ॥ अवाकारिष्टाम् ॥ नातर्त्ति ॥ नातरीतीत्यादि ॥ ॥ ७ ॥ इति णि
च् सन्नन्त यङ्लुगन्ताः ॥ ॥ ८ ॥ सुप आत्मनः क्यच् ॥ इषिकर्मण एषितुरात्मसंबंधिनः सुबन्ता
दिच्छायामर्थे क्यच्वा ॥ सुपो धातुप्रातिपदिकयोः ॥ एतयोरवयवस्य सुपो लुक् स्यात् ॥ क्यचि च ॥
अवर्णस्य ई स्यात् ॥ आत्मनः पुत्रमिच्छति पुत्रीयति ॥ मान्तप्रकृतिकसुबन्ताद् व्ययाच्च क्यच् न ॥ किमिच्छ
ति ॥ इदमिच्छति ॥ स्वरिच्छति ॥ अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु ॥ क्यजन्तानि
पात्यन्ते ॥ अशनायति ॥ उदन्यति ॥ धनायति ॥ बुभुक्षादौ किम् ॥ अशनीयति ॥ धनीयति ॥
अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि ॥ एषां क्यचि असुक् स्यात् ॥ अश्ववृषयोर्मैथुनेच्छा
याम् ॥ अश्वस्यति वडवा ॥ वृषस्यति गौः ॥ क्षीरलवणयोर्लालसायाम् ॥ क्षीरस्यति बालः ॥ लवण ॥ ७७ ॥
स्यति उष्ट्रः ॥ सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ ॥ दधिस्यति ॥ दध्यस्यति ॥

वायो इतिवाच्यं

नलोपः प्रा०र्दर्शितः सि० नलोपः सुप्स्वर० वाः कुरितिन

नः क्ये ॥ क्यचि क्यङि च नान्तमेव पदं नान्यत् ॥ नलोपः ॥ राजीयति ॥ नान्तमेवेति किम् ॥ वाच्यति ॥ हलि च ॥ गीर्यति ॥
पूर्यति ॥ धातोरित्येव ॥ नेह ॥ दिवमिच्छति ॥ दिव्यति ॥ क्यस्य विभाषा ॥ हलः परयोः क्यच्क्यङोर्लोपो वा
आर्धधातुके ॥ आदेः परस्य ॥ अतो लोपः ॥ तस्य स्थानिवद्भावाल्लघूपधगुणो न ॥ समिधिता ॥ समि
धिता ॥ काम्यच्च ॥ उक्तविषये काम्यच् ॥ पुत्रमात्मन इच्छति पुत्रकाम्यति ॥ पुत्रकाम्यिता ॥ उपमाना
दाचारे ॥ उपमानात्कर्मणः सुबन्तादाचारार्थे क्यच् ॥ पुत्रमिवाचरति पुत्रीयति ॥ छात्रम् ॥ विष्णूय
ति द्विजम् ॥ सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः ॥ आचारे ॥ अतो गुणे ॥ कृष्ण इवाचरति कृष्णति ॥ स्व
इवाचरति स्वति ॥ सस्वौ ॥ अनुनासिकस्य क्विझलोः क्ङिति ॥ अनुनासिकान्तस्योपधाया दीर्घः क्वौ
झलादौ क्ङिति ॥ इदमिवाचरति इदामति ॥ राजेवाचरति राजानति ॥ इन्हन्निति नियमान्नेहोप
धादीर्घः ॥ पन्था इवाचरति पथिनति ॥ कर्त्तुः क्यङ् सलोपश्च ॥ उपमानात्कर्त्तुः सुबन्तादाचारे क्यङ्वा
सान्तस्य कर्त्तुर्वा नकस्य लोपो वा ॥ क्यङन्तेत्युक्तेः प्रयोगवाक्यं ॥ सन्नियोगशिष्टानां सह वा प्रवृत्तिः

नर्त्ति

म॰कौ॰नि सत्त्वान्निवृत्तिरिति ककारसलोपयोः सत्येव प्रवृत्तिः॥ लोपश्च व्यवस्थितः॥ ओजसोऽप्सरसो नित्यमितरेषां विभा
॥७८॥ षया॥ कृष्ट इवाचरति कृष्टायते॥ ओजायते॥ अप्सरायते॥ यशायते॥ यशस्यते॥ विद्वायते॥ विद्वस्य
ते॥ अवगल्भक्लीबहोडेभ्यः क्विब्वा॥ वाग्रहणात्क्यङपि॥ अवगल्भादयः प्रथमान्ता॥ क्विप्स
न्नियोगेनानुदात्तत्वमनुनासिकत्वं वा प्रत्ययस्य प्रतिज्ञायते॥ तेन तङ्॥ अवगल्भते॥ क्लीबते॥ हो
डते॥ भूतपूर्वगत्यनेकाच आम् एतद्वार्त्तिकारंभसामर्थ्यात्॥ अवगल्भां चक्रे॥ क्लीबां चक्रे॥ होडां च
क्रे॥ उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये निष्कृष्य क्रियते॥ तेन गल्भस्या
डागमः॥ अवागल्भत॥ अवागल्भिष्ट॥ लोहितादिडाज्भ्यः क्यष्॥ लोहितादिभ्यो डाजन्तेभ्यश्च
भवत्यर्थे क्यष्॥ वा क्यषः॥ क्यषन्तात्परस्मैपदं॥ अलोहितो लोहितो भवति॥ लोहितायति॥
लोहितायते॥ ननु उच्चारणसामर्थ्यात् क्याम्यवद्व क्यषोऽपि ककारः कुतो न श्रूयते॥ तस्य भाष्ये ॥७८॥
प्रत्याख्यानात्॥ पटपटायति॥ पटपटायते॥ कष्टाय क्रमणे॥ चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे

क्यङ् स्यात्॥ कष्टाय क्रमते कष्टायते॥ पापं कर्तुमुत्सहत इत्यर्थः॥ सत्रकक्षकष्टकृच्छ्रगहनेभ्यः कण्वचिकी
र्षायामिति वक्तव्यं॥ कण्वं पापं॥ पापं चिकीर्षति सत्रायते॥ कक्षायते॥ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः॥
रोमन्थतपोभ्यां कर्मभ्यां क्रमेण वर्तनायां चरणे चार्थे क्यङ् स्यात्॥ रोमन्थं वर्तयति॥ रोमन्थायते॥
हनुचलन इति वक्तव्यं॥ चर्वितस्याकृष्य पुनश्चर्वणे इत्यर्थः॥ नेह॥ कीटो रोमन्थं वर्तयति॥ अपानप्रदे
शान्निःसृतं द्रव्यमिह रोमन्थः॥ तदभ्यवहरतीत्यर्थ इति कैयटः॥ वर्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ॥
विरकार्यं तपसः परस्मैपदं च॥ तपश्चरति तपस्यति॥ बाष्पोष्मभ्यामुद्वमने॥ बाष्पमुद्वमति॥ बाष्पायते॥ ऊष्मा
यते॥ फेनाच्चेति वक्तव्यं॥ फेनायते॥ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे॥ एभ्यः कर्मभ्यः करोत्य
र्थे क्यङ्॥ शब्दं करोति॥ शब्दायते॥ सुदिनदुर्दिननीहारेभ्यश्च॥ सुदिनायते॥ प्रातिपदिकाद्धात्वर्थे
बहुलमिष्ठवच्च॥ प्रातिपदिकाद्धात्वर्थे णिच् स्यादिष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपवि
न्मतुब्लोपयणादिलोपप्रस्थस्फाद्यादेशभसंज्ञास्तद्वण्णावपि स्युः॥ पटुमाचष्टे पटयति॥ पर
त्वाद्वृद्धौ सत्यां टिलोपः॥ अपीपटत्॥ ... इत्यत्र भाष्ये तु वृद्धौ टिलोपो बलीयानिति स्थितं॥ अप

चीवराणपर्जयति परिधत्ते इत्यर्थः ३ भांडानि समाचिनोति राशीकरोतीत्यर्थः २

म० कौ० ति० पटत् ॥ पुछभांडचीवराण्णिङ् ॥ पुछादुदसने व्यसने पर्यसने च ॥ विविधं विरुद्धं वोत्क्षेपणं व्यसनं ॥
॥ ७९ ॥ उत्पुछयते ॥ विपुछयते ॥ परिपुछयते ॥ भांडात्समाचयने ॥ संभांडयते ॥ समभभांडत ॥ चीवरादर्जने
र्जने [illegible] ने परिधाने च ॥ संचीवरयते भिक्षुः ॥ मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्ते
भ्यो णिच् ॥ कृञर्थे ॥ मुंडं करोति मुंडयति ॥ व्रताद्भोजन तन्निवृत्त्योः ॥ पयः शूद्रान्नं वा व्रतयति ॥
वस्त्रात्समाछादने ॥ संवस्त्रयति ॥ हल्यादिभ्यो ग्रहणे ॥ हलिकल्योरदंतत्वं च निपात्यते ॥
हलिं कलिं वा गृह्णाति हलयति कलयति ॥ महद्धलं हलिः ॥ कृतं गृह्णाति कृतयति ॥ तूस्तानि विहंति
वितूस्तयति ॥ तूस्तं केशा इत्येके ॥ जटीभूताः केशा इत्यन्ये ॥ सत्यार्थवेदानामापुक्च ॥ सत्या
पयति ॥ अर्थापयति ॥ वेदापयति ॥ पाशं विमुंचति विपाशयति ॥ रूपं पश्यति रूपयति ॥ वीणयोप
गायति ॥ उपवीणयति ॥ तूलेनानुकुष्णाति अनुतूलयति ॥ तृणं गृह्णाति अनुघट्टयतीत्यर्थः ॥ ॥
श्लोकैरुपस्तौति ॥ उपश्लोकयति ॥ सेनयाभियाति अभिषेणयति ॥ लोमान्यनुमार्ष्टि ॥ अनु
लोमयति ॥ त्वचं संवरणेऽपनायदंत् ॥ त्वचं गृह्णाति त्वचयति ॥ वर्मणा संनह्यति ॥ संवर्मयति ॥ वर्ण

तत्करोति तदाचष्टे ४ पापमित्यन्ये ५ [illegible] अभ्यषेणयत्

परत्वात् वृद्धौ सत्यां मा भवानिदिधृषद्वृद्धिर्वा णौ वलुप्यते अतः सन्वद्भावदीर्घत्वे न अतूतुलत

सिध्यति सैन्याभिः [illegible] अवरकलत

धातुभ्यः किं प्रातिपदिकेभ्यो मा भूत् ४ क्विबाहि किं द्वारयः धातवः प्रातिपदिकानि च ४
२ मंतु अपराधे रोष इत्येके । मंतूयति । त्रिरिति वंड्वः वल्गु माधुर्ये योः वल्गूयति । इति किं ड्वरयः ४

गृह्णाति वर्णयति ॥ चूर्णैरवध्वंसते अवचूर्णयति ॥ कुंडिमाख्यत् ॥ औजिढत् ॥ इत्वादीनामसिद्धत्वात्
ढ्रलिशाद्धस्य द्वित्वं पूर्वत्रासिद्धीयमद्वित्वे इति तु अजिनसिपुकं ढि इत्यस्य द्वित्वमित्यन्ये ॥ औडिढत् ॥
उंढमाख्यत् ॥ औजढत् ॥ औडढत् ॥ ॥ इति नामधातुप्रक्रिया ॥ ॥ कंड्वादिभ्यो यक् ॥ एभ्यो
धातुभ्यो नित्यं यक् स्यात्स्वार्थे ॥ कंडूञ् गात्रविघर्षणे ॥ कंडूयति ॥ कंडूयते ॥ इत्यादि ॥ कर्तरि कर्म
व्यतिहारे ॥ क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं ॥ व्यतिलुनीते ॥ अन्यस्य योग्यं लवनं करोतीत्य
र्थः ॥ नगतिहिंसार्थेभ्यः ॥ व्यतिगच्छंति ॥ व्यतिघ्नंति ॥ प्रतिषेधे हसादीनामुपसंख्यानं ॥ हसादयो
हसप्रकाराः शब्दक्रियाः ॥ व्यतिहसंति ॥ व्यतिजल्पंति ॥ हरतेरप्रतिषेधः ॥ संप्रहरंते राजानः ॥ इ
तरेतरान्योन्योपपदाच्च ॥ परस्परोपपदाच्चेति वक्तव्यं ॥ इतरेतरस्यान्योन्यस्य परस्परस्य वा व्य
तिलुनंति ॥ नेर्विशः ॥ निविशते ॥ परिव्यवेभ्यः क्रियः ॥ परिक्रीणीते ॥ विक्रीणीते ॥ अवक्रीणीते ॥
विपराभ्यां जेः ॥ विजयते ॥ पराजयते ॥ क्रीडोऽनुसंपरिभ्यश्च ॥ नादाङः ॥ अनुक्रीडते ॥ संक्रीडते ॥
परिक्रीडते ॥ आक्रीडते ॥ समोऽकूजने ॥ संक्रीडते ॥ कूजने तु ॥ संक्रीडति चक्रं ॥ आगमेः क्षमायां ॥

नप्रतिहन्यतइत्यर्थः

म०कौति

॥८०॥

एधांतस्येदयग्रहणं ॥ आगमयस्व तावत् ॥ मा त्वरिष्ठा इत्यर्थः ॥ शिक्षेर्जिज्ञासायां ॥ धनुषि शिक्षते ॥ धनुर्विषयज्ञा
नेशक्तो भवितुमिच्छतीत्यर्थः ॥ वृत्तिसर्गतायनेषु क्रमः ॥ वृत्तिरप्रतिबंधः ॥ ऋचि क्रमतेऽस्य बुद्धिः ॥ सर्ग उत्साहः ॥
अध्ययनाय क्रमते ॥ क्रमंतेऽस्मिन् शास्त्राणि स्फीतानि भवंतीत्यर्थः ॥ आङ उद्गमने ॥ आक्रमते सूर्यः ॥ उद्यतेइत्यर्थः
ज्योतिरुद्गमन इति वाच्यं ॥ नेह ॥ आक्रामति धूमो हर्म्यतलात् ॥ वेः पादविहरणे ॥ साधु विक्रमते वाजी ॥ प्रो
पाभ्यां समर्थाभ्यां ॥ प्रारंभे अनयोस्तुल्यार्थता ॥ प्रक्रमते ॥ उपक्रमते ॥ समर्थाभ्यां किं ॥ प्रक्रामति गच्छ
तीत्यर्थः ॥ उपक्रामति ॥ आगच्छतीत्यर्थः ॥ अनुपसर्गाद्वा ॥ क्रामति ॥ क्रमते ॥ अपह्नवे ज्ञः ॥ शतमप क्रमःपरस्मैप०
पजानीते ॥ अपलपतीत्यर्थः ॥ अकर्मकाच्च ॥ सर्पिषो जानीते ॥ सर्पिषोपायेन प्रवर्त्तत इत्यर्थः ॥ स
मवप्रविभ्यः स्थः ॥ संतिष्ठते ॥ वितिष्ठते ॥ आङः प्रतिज्ञायां ॥ शब्दं नित्यमातिष्ठते ॥ नित्यत्वेन प्रतिजानी
त इत्यर्थः ॥ प्रकाशनस्थेयाख्ययोश्च ॥ गोपी कृष्णाय तिष्ठते ॥ आशयं प्रकाशयतीत्यर्थः ॥ संशय्य
कर्णादिषु तिष्ठते यः कर्णादीन् निर्णेतृत्वेनाश्रयतीत्यर्थः ॥ उदोऽनूर्ध्वकर्मणि ॥ मुक्तावुत्तिष्ठते ॥ अनूर्ध्वे ॥
किं ॥ पीठादुत्तिष्ठति ॥ उपान्मंत्रकरणे ॥ आग्नेय्याग्नीध्रमुपतिष्ठते ॥ मंत्रकरणे किं ॥ भर्त्तारमुपतिष्ठ
मुपसंख्यानं

उपश्लिष्यतीत्यर्थः

ति यौवनेन ॥ उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यं ॥ आदित्यमुपतिष्ठते ॥ गंगा यमुना
मुपतिष्ठते ॥ रथिकानुपतिष्ठते ॥ मित्रीकरोतीत्यर्थः ॥ पंथाः स्रुघ्नमुपतिष्ठते ॥ प्राप्नोतीत्यर्थः ॥ वा
मित्रत्वकरणं लिप्सायां ॥ भिक्षुकः प्रभुमुपतिष्ठते उपतिष्ठति वा ॥ उद्विभ्यां तपः ॥ अकर्मकादित्येव ॥ उत्तपते ॥ वि
तपते ॥ दीप्यत इत्यर्थः ॥ स्वांगकर्मकाच्चेति वक्तव्यं ॥ उत्तपते वितपते पाणिं ॥ नेह ॥ सुवर्णमुत्तपति ॥
आङो यमहनः ॥ आयच्छते ॥ आहते ॥ अकर्मकात्स्वांगकर्मकादित्येव नेह ॥ परस्य शिर आहंति ॥
आत्मनेपदेष्वन्यतरस्याम् ॥ हनो वधादेशो वा लुङि ॥ आवधिष्ट ॥ आवधिषातां ॥ आवधिषत ॥ ह
नः सिच् ॥ कित् ॥ अनुनासिकलोपः ॥ आहत ॥ आहसातां ॥ आहसत ॥ यमो गंधने ॥ सिच्कि
त् ॥ गंधनं सूचनं ॥ परदोषाविष्करणम् ॥ उदायत ॥ गंधने किं ॥ उदायंस्त पादं ॥ आकृष्टवानित्य
र्थः ॥ समो गम्यृच्छिभ्यां ॥ अकर्मकाभ्यामित्येव ॥ संगच्छते ॥ वा गमः ॥ परोक्षलोदीलिङ्सिचौ कि
तौ स्तः ॥ संगंसीष्ट ॥ संगसीष्ट ॥ समगत ॥ समगंस्त ॥ समृच्छिष्यते ॥ अकर्मकाभ्यां किं ॥ ग्रामं स
ङ्गच्छति ॥ विदिप्रच्छिस्वरतीनामुपसंख्यानं ॥ वेत्तेरेव ग्रहणं ॥ संवित्ते ॥ संविदाते ॥ वेत्तेर्विभाषा ॥

म॰कौ॰ति

॥८१॥ वेत्तेः परस्य झादेशस्यातो रुडागमः स्यात्॥ संविद्रते॥ संविदते॥ संस्खलते॥ संस्वरते॥ अथास्मिन्नकर्मकाधिकारे वहनिगम्यादीनां कथमकर्मकतेति चेत्॥ शृणु॥ धात्वर्थान्तरवृत्तेर्धात्वर्थेनोपसंग्रहात्॥ प्रसिद्धेरविवक्षातः कर्मणोकर्मिका क्रिया॥ वहति भारं॥ नदी वहति॥ स्यंदत इत्यर्थः॥ जीवति॥ नृत्यति॥ प्रसिद्धेर्यथा॥ मेघो वर्षति॥ कर्मणोऽविवक्षातो यथा॥ हिताम्नयः संशृणुते स किंप्रभुः॥ सम्माननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः॥ [illegible] नयतेर्वाच्याः॥ इतरे प्रयोगोपाधयः॥ तथाहि॥ शास्त्रे नयते॥ शास्त्रस्थं सिद्धांतं शिष्येभ्यः प्रापयतीत्यर्थः॥

स तेन युक्तिशिष्यसमाननं फलितं॥ [illegible]॥ उत्संजने॥ दंडमुन्नयते॥ उपरि क्षिपतीत्यर्थः॥ [illegible] आचार्यकरणे॥ माणवकमुपनयते विधिना आत्मसमीपं प्रापयति॥ उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रियते॥ [illegible] माणवकमुपनयते॥ ज्ञाने॥ तत्त्वं नयते॥ निश्चिनोतीत्यर्थः॥ [illegible]॥ कर्मकरानुपनयते भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः॥ [illegible]॥ विगणनं कर ॥८१॥ ण्रादेर्निर्यातनं॥ करं विनयते॥ राज्ञे देयं भागं परिशोधयतीत्यर्थः॥ शतं विनयते॥ धर्मार्थं विनियु

अकर्मकादिनिवृत्तं॰

ङ्क्त इत्यर्थः॥ उपसर्गादस्यत्यूह्योर्वेति वाच्यं॥ बंधं निरस्यति निरस्यते॥ समूहति समूहते॥ उपसर्गाद्ध्रस्व ऊहतेः॥ यादोऽभ्युह्य... कीति॥ ब्रह्म समुह्यात्॥ अग्निं समुह्यात्॥ निसमुपविभ्यो ह्वः॥ निह्वयते॥ स्पर्धायामाङः॥ कृष्णश्चाणूरमाह्वयते॥ स्पर्धायां किं॥ पुत्रमाह्वयति॥ उदश्चरः सकर्मकात्॥ धर्ममुच्चरते॥ उल्लंघ्य गच्छतीत्यर्थः॥ समस्तृतीयायुक्तात्॥ रथेन संचरते॥ दाणश्च सा चेच्चतुर्थ्यर्थे॥ समो दाणस्तृतीयांतेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे॥ दास्या संयच्छते कामी॥ उपाद्यमः स्वकरणे॥ स्वकरणं स्वीकारः॥ भार्यामुपयच्छते॥ विभाषोपयमने॥ यमः सिच् किद्वा विवाहे॥ रामः सीतामुपायत॥ उपायंस्त वा॥ उदवोढेत्यर्थः॥ ज्ञाश्रुस्मृदृशां सनः॥ सनंतानामेषां स्यात्॥ धर्मं जिज्ञासते॥ शुश्रूषते॥ सुस्मूर्षते॥ दिदृक्षते॥ नानोर्ज्ञः॥ पुत्रमनुजिज्ञासति॥ प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ प्रयुंक्ते॥ उपयुंक्ते॥ स्वराद्यंतोपसर्गादिति वाच्यं॥ उद्युंक्ते॥ नियुंक्ते॥ अयज्ञपात्रेषु किं॥ द्वंद्वं न्यंचि यज्ञपात्राणि प्रयुनक्ति॥ समः क्ष्णुवः॥ संक्ष्णुते शस्त्रं॥ गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः॥ गंधनं हिंसा॥ उत्कुरुते॥ सूचयतीत्यर्थः॥ अवक्षेपणं भर्त्सनं॥ श्येनो वर्तिकामुदाकुरुते॥ भर्त्सय

भक्तनगमांसनि॰ उदोक्षारसि॰स्य॰४

तइत्यर्थः॥ हरिमुपकुरुते सेवते॥ परदारान्प्रकुरुते॥ तेषु सहसा प्रवर्त्तते॥ एधोदकस्योपस्कुरुते॥ गुणमाध
त्ते॥ कथाः प्रकुरुते॥ प्रकथयतीत्यर्थः॥ शतं प्रकुरुते धर्मार्थं विनियुंक्ते॥ एषु किं॥ कटं करोति॥ ७
॥७॥ इत्यात्मनेपदप्रक्रिया॥ ॥७॥ शेषात्कर्त्तरि परस्मैपदं॥ श्वि श्वयति॥ विभाषा श्वेः॥ संप्रसा
रणं लिटि लिङि यङि च॥ शुशाव॥ शुशुवतुः॥ श्वयतेर्लिड्यभ्यासलक्षणप्रतिषेधः॥ शिश्वाय॥ शिश्वियतुः॥
शूयात्॥ जृस्तंश्वित्यङ्वा॥ श्वयतेरः॥ अङि॥ अश्वत्॥ विभाषा धेट्श्व्योरिति चङ्॥ अशिश्वियत्॥
अश्वयीत्॥ अनुपराभ्यां कृञः॥ कर्त्तृगे फले गंधनादौ च परस्मैपदं स्यात्॥ अनुकरोति॥
पराकरोति॥ अभिप्रत्यतिभ्यः क्षिपः॥ क्षिप प्रेरणे॥ स्वरितेत्॥ अभिक्षिपति॥ प्राद्वहः॥ प्रवहति॥
परेर्मृषः॥ परिमृष्यति॥ व्याङ्परिभ्यो रमः॥ विरमति॥ उपाच्च॥ यज्ञदत्तो देवदत्तमुपरमति॥ उप
रमयतीत्यर्थः॥ अंतर्भावितण्यर्थोयं॥ विभाषाकर्मकात्॥ उपाद्रमेः परस्मैपदं॥ उपरमति॥ उप
रमते॥ निवर्त्तत इत्यर्थः॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ एभ्यो ण्यंतेभ्यः परस्मैपदं स्या ॥८२॥
त्॥ णिचश्चेत्यस्यापवादः॥ बोधयति पद्ममित्यादि॥ योधयति काष्ठानि॥ नाशयति दुःखं॥

कंपने चलिरिति घटादित्वान्मित्संज्ञा ४

जनयति सुखं॥ क्रीङ्जीनां णौ॥ एषामिच आत्वं॥ अध्यापयति॥ प्रावयति॥ प्रापयतीत्यर्थः॥ द्रावय
ति विलापयतीत्यर्थः॥ स्रावयति स्यंदयतीत्यर्थः॥ णौ च संश्चङोः॥ सन्परे चङ्परे णौ इङो गाङ्वा स्या
त्॥ अध्यजीगपत्॥ अध्यापिपत्॥ क्रापयति॥ जापयति॥ निगरणचलनार्थेभ्यश्च॥ निगारयति॥
आशयति॥ भोजयति॥ चलयति॥ कंपयति॥ अदेः प्रतिषेधः॥ आदयते देवदत्तेन॥ अणावकर्मका
च्चित्तवत्कर्तृकात्॥ ण्यंतात्परस्मैपदं॥ शेते कृष्णस्तं गोपी शाययति॥ न पादम्याङ्यमाङ्यसपरि
मुहरुचिनृतिवदवसः॥ एभ्यो ण्यंतेभ्यः परस्मैपदं न स्यात्॥ पाययते॥ दमयते॥ आयामय
ते॥ आयासयते॥ परिमोहयते॥ रोचयते॥ नर्त्तयते॥ वादयते॥ वासयते॥ धेट उपसंख्यानं॥
धापयते॥ अकर्त्रभिप्राये शेषात्कितिपरस्मैपदं स्यादेव॥ वत्सान्पाययति पयः॥ ॥ इति प
दव्यवस्था॥ ॥ भावकर्मणोः॥ लस्यात्मनेपदं॥ सार्वधातुके यक्॥ धातोर्भावकर्मवाचिनि॥
भावः क्रिया॥ सा च॥ धातुत्वेन सकलधातुवाच्या॥ भावार्थकलकारेणानूद्यते॥ युष्मदस्मद्भ्यां
सामानाधिकरण्याभावात्प्रथमपुरुषः॥ तिङ्वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न

म०कौति द्विवचनादिकं त्वेकवचनमेवोत्सर्गतः॥ बाधकाभावाद्द्योनियम उत्सर्गः॥ त्वयामया चान्यैश्च भूयते
॥८३॥ ॥बभूवे॥ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च॥ उपदेशेया
दन्तानां हनादीनां च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीना
मिडागमश्च॥ चिण्वद्भावपक्षेऽयमिट्॥ चिण्वद्भावाद्वृद्धिः॥ भाविता॥ भविता॥ भाविष्य
ते॥ भविष्यते॥ भूयतां॥ अभूयत॥ भूयेत॥ भाविषीष्ट॥ भविषीष्ट॥ चिण्भावकर्मणोः॥ च्लेः चिण्भा
वकर्मवाचिनि तपरे॥ अभावि॥ अभाविष्यत॥ अकर्मकोऽप्युपसर्गवशात्सकर्मकः॥ अनुभूयते॥
आनंदश्चैत्रेण त्वया मया च॥ अनुभूयंते त्वमनुभूयसे॥ अहमनुभूये॥ अन्वभावि॥ अन्वभा
विषातां॥ अन्वभाविषत॥ णिलोपः॥ भाव्यते॥ भावयांचक्रे॥ भावयांबभूवे॥ भावयामासे॥
चिण्वदिट् आभीयत्वेनासिद्धत्वाण्णिलोपः॥ भाविता॥ भावयिता॥ भाविष्यते॥ भावयि
ष्यते॥ भाव्यतां॥ अभाव्यत॥ भाव्येत॥ भाविषीष्ट॥ भावयिषीष्ट॥ अभावि॥ अभाविषातां॥ अ ॥८३॥
भावयिषातां॥ बुभूष्यते॥ बुभूषांचक्रे॥ बुभूषिता॥ बुभूषिष्यते॥ बोभूय्यते॥ अकृत्सार्वधा
यडः लुक् तस्तौ च॥ बोभूयते बोभविता॥
बोभवांचक्रे॥

स्म२

तुकयोर्दीर्घः॥ स्तूयते विष्णुः॥ स्ताविता॥ स्तोता॥ स्ताविष्यते॥ स्तोष्यते॥ अस्तावि॥ अस्ताविषातां॥ अस्तोषा
तां॥ ऋगोतेश्च गुणः॥ अर्यते॥ स्मर्यते॥ ऋच्छतीति गुणः॥ आरिसेर॥ परत्वान्नित्यत्वाच्च गुणोऽरपरे कृते जंतत्वा
न्नौत्वपि॥ उपदेशग्रहणाच्चिण्वदिट्॥ आरिता॥ आर्ता॥ स्मारिता॥ स्मर्ता॥ न्लोपः॥ स्रस्यते॥ इदितस्तु
नंद्यते॥ इज्यते॥ तनोतेर्यकि॥ आदेतादेशो वा॥ तायते॥ तन्यते॥ तपोऽनुतापे च॥ तपश्च्लेश्चिण्न कर्म
पापकृत्ये ते कर्त्तर्यनुतापे च॥ अन्वतप्त पापेन॥ घुमास्थेतीत्वं॥ दीयते॥ धीयते॥ ददे॥ आतो युक् चिण्कृतोः॥
तद्भ्यास्यात् आदन्तानां युगागमः स्याच्चिणि ञ्णिति कृति च॥ दायिता॥ दाता॥ दायिषीष्ट॥ दासीष्ट॥ अदायि॥ अदा
तद्रूपत्यर्थः यिषातां॥ स्फायोर्वः॥ इत्त॥ अदिषातां॥ शम्यते मोहो मुकुंदेन॥ चिण्णमुलोर्दीर्घोऽन्यतरस्यां॥
चिण्परे णमुल्परे णौ मितामुपधायाः॥ शामिता॥ शमिता॥ शामयिता॥ शामिष्यते॥ शमि
ष्यते॥ शामयिष्यते॥ शम्यंतत्वा भाविशम्यते मुनिना॥ नोदात्तोपदेशस्य मान्तस्यानाचमेः॥ उपधा
याः वृद्धिर्न स्याच्चिणि ञ्णिति कृति च॥ अशमि॥ अदमि॥ उदात्तोपदेशस्येति किं॥ अगामि॥ मान्
तस्येति किं॥ अवादि॥ अनाचमेः किं॥ आचामि॥ अनाचमि॥ कमिवमी नामिति वाच्यौ॥ अकामि॥

४ प्रधानेकर्मण्याख्येयेलादीनाहुर्द्विकर्मणां। अप्रधानेदुहादीनांण्यंतेकर्तुश्चकर्मणः ॥४१॥

म०कौ०ति
॥८–४॥

अबामि ॥ भज्यते ॥ भंजेश्चचिणि ॥ नलोपोवा ॥ अभाजि ॥ अभंजि ॥ लंभ्यते ॥ विभाषाचिण्णमुलोः ॥ लम्भेर्नुम् ॥ अलंभि ॥ अलाभि ॥ यदाकर्मैवकर्तृत्वेनविवक्षितंतदासकर्मकाणामप्यकर्मकत्वात्कर्त्तरिभावेचलः ॥ कर्मवत्कर्मणातुल्यक्रियः ॥ कर्मस्थयाक्रिययातुल्यक्रियःकर्त्ताकर्मवत्स्यात् ॥ कार्यातिदेशोयं ॥ तेनयगात्मनेपदचिण्चिण्वदिटः स्युः ॥ पच्यतेफलं ॥ भिद्यतेकाष्ठं ॥ अपाचि ॥ अभेदि ॥ भावे ॥ भिद्यतेकाष्ठेन ॥ सकर्मकानांप्रतिषेधोवक्तव्यः ॥ अन्योन्यंस्पृशतः ॥ अजाग्रामंनयति ॥ दुहिपच्योर्बहुलंसकर्मकयोरितिवाच्यं ॥ नदुहस्नुनमांयक्चिणौ ॥ एषांकर्मकर्त्तरियक्चिणौन ॥ शप् ॥ तस्यलुक् ॥ गौःपयोदुग्धे ॥ अचःकर्मकर्त्तरि ॥ अजंतानांचिण्वाकर्मकर्त्तरितशब्देपरे ॥ अकारि ॥ अकृत ॥ दुहश्च ॥ तथा ॥ अदोहि ॥ पक्षेक्सः ॥ लुग्वेतिपक्षेलुक् ॥ अदुग्ध ॥ अधुक्षत ॥ उदुंबरःफलंपच्यते ॥ कुषिरजोःप्राचांश्यन्परस्मैपदंच ॥ अनयोःकर्मकर्त्तरिनयक् किंतुश्यन्परस्मैपदंचात्मनेपदापवादः ॥ कुष्यति ॥ कुष्यतेपादः ॥ रज्यति ॥ रज्यतेवस्त्रं ॥ यग्विषये ॥८–४॥
तुनास्यप्रवृत्तिः ॥ कोषिषीष्ट ॥ रंक्षीष्ट ॥ ॥ इतिभावकर्मप्रक्रिया ॥ ॥ अभिज्ञावचने

कृतस्यास्मरणेकर्तुरत्यंतापह्नवेपिवा। नानादेरभावेपित्रिषुक्वचिल्लट्परोक्षता॥

लृट् ॥ स्मृतिबोधिन्युपपदेभूतानद्यतनेधातोर्लृट् ॥ लङोपवादः ॥ वसनिवासे ॥ स्मरसिकृष्णगोकुलेवत्स्यामः ॥ एवंबुध्यसेचेतसे इत्यादिप्रयोगेपि ॥ नयदि यद्योगेउक्तेन ॥ अभिजानासियद्वने अभुंक्ष्महि ॥ विभाषासाकांक्षे ॥ उक्तविषयेलृड्वा लक्ष्यलक्षणभावेनसाकांक्षश्चेद्धात्वर्थः ॥ स्मरसिकृष्णवनेवत्स्यामस्तत्रगाश्चारयिष्यामः ॥ वासोलक्षणं ॥ चारणंलक्ष्यं ॥ पक्षेलङ् ॥ परोक्षेलिट् ॥ चकार ॥ उत्तमपुरुषेचित्तविक्षेपादिनापारोक्ष्यं ॥ सुप्तोहंकिलविललाप ॥ अत्यंतापह्नवेलिड्वक्तव्यः ॥ कलिंगेष्वासीः ॥ नाहंकलिंगांजगाम ॥ प्रश्नेचासन्नकाले ॥ आसन्नकालेपृच्छ्यमानेर्थेलिड्विषयेलङ्लिटौस्तः ॥ आगच्छत्किं ॥ जगामकिं ॥ आसन्नकालेकिं ॥ कंसंजघानकिं ॥ लट्स्मे ॥ लिटोपवादः ॥ यजतिस्मयुधिष्ठिरः ॥ अपरोक्षेच ॥ भूतानद्यतनेलट्स्यात्स्मयोगे ॥ एवंस्मपिताब्रवीति ॥ ननौपृष्टप्रतिवचने ॥ भूतेलट् ॥ अकार्षीःकिं ॥ ननुकरोमिभोः ॥ नन्वोर्विभाषा ॥ अकार्षीःकिं ॥ नकरोमि ॥ कृतिन ॥ अशमि ॥ अदमि ॥ उदात्तोपदेशस्येतिकिं ॥ अगमि ॥ मान्तस्येतिकिं ॥ अवादि ॥ अनाचमेःकिं ॥ आचामि ॥ अवामि ॥ कमिवमीनामितिवाच्यं ॥ अकामि ॥

अनासन्नेतुकिं
मेरुघानकिं

म॰कौति ॥८५॥

अलाभि ॥ भज्यते ॥ भंजेश्च चिणि ॥ नलोपो वा ॥ अभाजि ॥ अभंजि ॥ लभ्यते ॥ विभाषा चिण्णमुलोः ॥ लभेर्नुम् ॥
अलंभि ॥ अलाभि ॥ यदा कर्मैव कर्तृ कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात् कर्तरि भावे च लः ॥
कर्मवत्कर्मणा तुल्यक्रियः ॥ नाकार्षं ॥ अहं नु करोमि ॥ अहं न्वकार्षं ॥ पुरि लुङ्चास्मे ॥ पुरायोगे भूतानद्य
तने वा लुङ् वा लङ् लट् न तु स्मयोगे ॥ पक्षे यथाप्राप्तं वसंतीह पुरा छात्राः अवात्सुः ॥ अवसन् ॥ ऊषुर्वा ॥ अस्मे
किं ॥ यजति स्म पुरा ॥ भविष्यतीत्यनुवर्त्तमाने ॥ यावत्पुरा निपातयोर्लट् ॥ यावद्भुंक्ते ॥ पुरा भुंक्ते ॥
निपातयोः किं ॥ यावद्दास्यते तावद्भोक्ष्यते ॥ करणे भूयो तेपुरायास्यति ॥ विभाषा कदा कर्ह्योः ॥ लट्
स्यात् ॥ कदा कर्हि वा भुंक्ते भोक्ष्यते भोक्ता वा ॥ वर्त्तमानसामीप्ये वर्त्तमानवद्वा ॥ वर्त्तमाने ये प्रत्यया उ
क्तास्ते वर्त्तमानसमीपे भूते भविष्यति च वा स्युः ॥ कदा आगतोसि ॥ अयमागच्छामि ॥ आगमं वा ॥ क
दा गमिष्यसि ॥ एष गच्छामि ॥ गमिष्यामि वा ॥ आशंसायां भूतवच्च ॥ भविष्यत्काले भूतवद्वर्त्तमानव
च्च प्रत्यया वा स्युराशंसायां ॥ देवश्चेदवर्षीद्वर्षति वर्षिष्यति ॥ धान्यमवाप्स्म वपामः ॥ वप्स्यामो वा ॥ ॥८५॥
क्षिप्रवचने लृट् ॥ क्षिप्रपर्यायोपपदे पूर्वविषये लृट् ॥ सुष्टिश्चेत् क्षिप्रमाशु त्वरितं वा यास्यति शी

अप्राप्तस्यार्थस्य प्राप्तुमिच्छा आशंसा ३

घ्रं वप्स्यामः ॥ आशंसावचने लिङ् ॥ आशंसावाचिन्युपपदे भविष्यति लिङ्
दुपेयाद्दाशंसे अधीयीय ॥ आशंसे क्षिप्रमधीयीय ॥ हेतुहेतुमतोर्लिङ् वा स्यात् ॥ कृष्णं नमेच्चेत्सु
खं यायात् ॥ कृष्णं नंस्यति चेत्सुखं यास्यति ॥ भविष्यत्येवेष्यते ॥ नेह ॥ हंतीति पलायते ॥ इ
६ च्छार्थेषु लिङ्लोटौ ॥ इच्छामि भुंजीत भुंक्तां वा भवान् एवं कामये प्रार्थये ॥ कामप्रवेदन ॥६॥
नेह ॥ इच्छन्करोति ॥ लिङ् ॥ समानकर्तृकेषु इच्छार्थेषु ॥ भुंजीयेतीच्छति ॥ विधिनिमं
त्र ॥ विधिः प्रेरणं ॥ भृत्यादेर्निकृष्टस्य प्रवर्त्तनं यजेत ॥ निमंत्रणं नियोगकरणं आवश्यके
ऊ नादौ दौहित्रादेः प्रवर्त्तनं ॥ इह भुंजीत ॥ आमंत्रणं कामचारानुज्ञा ॥ इहासीत ॥ अधीष्टः सत्का
रपूर्वको व्यापारः ॥ पुत्रमध्यापयेत् ॥ संप्रश्नः संप्रधारणं ॥ किं भो वेदमधीयीय उत तर्कं ॥ प्रा
र्थनं याच्ञा ॥ भो भोजनं लभेय ॥ एवं लोट् ॥ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥ प्रैषो विधिः ॥
अतिसर्गः कामचारानुज्ञा ॥ ... प्राप्तकालार्थे ॥ भवान्यजतां ॥ अर्हे कृत्य
तृचश्च ॥ वा लिङ् ॥ त्वं कन्यां वहेः ॥ ... ॥ शक्तौ लिङ् स्यात् ॥ वा ... त्वं भारं वहेः ॥

स०कौति ॥८६॥

धातुसंबंधेप्रत्ययाः॥धात्वर्थानांसंबंधे [illegible] त्यया उक्तास्ततोन्यत्रापिस्युः॥तिङंतवाच्यक्रिया
याःप्राधान्यात्तदनुरोधेनगुणभूतानां [illegible] प्रत्ययाः॥वसन्ददर्श॥भूतेलङ्॥अतीतवासकर्त
कर्तृकंदर्शनमित्यर्थः॥सोमयाज्यस्यपुत्रोभविता॥सोमेनयक्ष्यमाणायःपुत्रस्तत्कर्तृकंभवनं॥
क्रियासमभिहारेलोट्लोटोहिस्वौवाचतध्वमोः॥पौनःपुन्यंभृशार्थवृत्याद्धातोर्लोट्स्यात्तस्य
चहिस्वौस्तस्तिङापवादः॥तौचहिस्वौक्रमेणपरस्मैपदात्मनेपदसंज्ञौस्तः॥इदंसंज्ञौस्नतध्व
मोर्विषयेतुहिस्वौवास्तः॥पुरुषैकवचनसंज्ञेतुनानयोरतिदिश्येतेहिस्वविधिसामर्थ्यात्॥
तेनसकलपुरुषवचनविषयपरस्मैपदिभ्योहिःकर्तरि॥आत्मनेपदिभ्यःस्वोभावकर्मक
र्तृषु॥समुच्चयेन्यतरस्यां॥अनेकक्रियासमुच्चयेद्योत्येप्रागुक्तंवास्यात्॥यथाविध्यनुप्रयो
गःपूर्वस्मिन्॥आद्येलोड्विधानेलोट्प्रकृतिभूतएवधातुरनुप्रयोज्यः॥समुच्चयेसामा
न्यवचनस्य॥समुच्चयेलोड्विधौसामान्यार्थस्यधातोरनुप्रयोगःस्यात्॥अन्वेष्यामोवा॥ ॥८५॥
यायथात्तडादयस्तिबादयश्च॥ततःसंख्याकालयोःपुरुषविशिष्टप्रमाश्चलरितिवायास्यतिश्री॥

तांसा३

यासमभिहारेद्वेवाच्ये॥याहियाहीतियाति॥पुनःपुनरतिशयेनवायाती
त्मानंयानंयातीत्यस्य॥इतिशब्दस्तुअभेदान्वयेतात्पर्यंग्राहयति॥एवंयातः॥यांति॥या
याथ॥यातयातेतियूयंयाथ॥(या)याहियाहीत्ययासीत्॥यास्यतिवा॥अधीष्वअधीष्वेत्यधीते॥ध्वंवि
षयेपक्षेअधीध्वमधीध्वमितियूयमधीध्वे॥समुच्चयेतुसक्तून्पिबधानाखादेत्यभ्यवहरति॥अ
र न्नंभुंक्ष्वदधिकमास्वादस्वेत्यभ्यवहरति॥ [illegible] तध्वमास्तुपिबधानाखादतेत्यभ्यवहरथ॥भुंग्ध्वं॥
धं आस्वादध्वमित्यभ्यवहरध्वे॥पक्षेहिस्वौ॥अत्रसमुच्चीयमानविशेषाणामनुप्रयोगार्थंनसामान्ये
नाभेदान्वयः॥पक्षेसक्तून्पिबति॥धानाःखादति॥अन्नंभुंक्तेदधिकमास्वादतेएतेन॥पुरीम
वस्कंदलुनीहिनंदनंमुषाणरत्नान्हरामरांगनाः॥विग्रह्यचक्रेनविमुंद्विषाबलीयइत्थमस्त्वा
स्थ्यमहःदिवंदिवं॥इतिव्याख्यातं॥अवस्कंदनलवनादिरूपाभूतानद्यतनपरोक्षा
एककर्तृकाअस्वास्थ्यक्रियेत्यर्थात्॥इहपुनःपुनश्चस्कंदेत्यादिरर्थइतितुव्याख्यानंभ्रममूलं

म॰कौति
॥९७॥

मेव॥द्वितीयस्तू त्रे क्रियासमभिहारेइत्यस्यानुवृत्तेः॥लोडंतस्य द्वित्वंपरस्मैपदे ॥पुरीमवस्कंदे त्यादिमध्यमंपुरुषैकवचनमित्यपिकेषांचित्‌भ्रमएव॥पुरुषवचनेइत्यनेनयुक्तत्वात्‌॥ ॥७॥
॥७॥ ॥७॥ ॥इतिलकारार्थप्रक्रिया॥ ॥ ७ ॥शुभमस्तु॥ ॥श्रीकृष्णराम॥
॥ॐ

स्यामीवा॥
प्रमाभुत्वरितंवायास्यातिशी

[redacted]

वक्ष्यमाण एवस्यापवादः २

श्रीगणेशायनमः॥ ॥समर्थानांप्रथमाद्वा। इदमधिक्रियते प्राग्दिशइतियावत्। प्राग्दीव्यतो
ऽण्। तेनदीव्यतीत्यतः प्रागणधिक्रियते। अश्वपत्यादिभ्यश्च। एभ्योऽण्स्यात्प्राग्दीव्यतीयेष्वर्थे
षु। अश्वपतेरपत्यादि आश्वपतं। गाणपतं। दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः। प्राग्दीव्य
तीयेष्वर्थेषु। दितेरपत्यादि दैत्यः। अदितेरादित्यस्यवा आदित्यः। यणोमयोद्वेवाच्ये। मय
इतिपंचमीयणइतिषष्ठीतिपक्षेयस्यद्वित्वं। हलोयमांयमिलोपः। वास्यात्। इत्यसतिलोपे
द्वित्वेसतित्रियंरूपं। असतिलोपेद्वित्वलोपयोर्वाद्वियं। द्वित्वाभावेलोपेसतिएकयं।
प्राजापत्यः। देवाद्यञञौ। दैव्यं। दैवं। बहिषष्टिलोपोयञ्च। बाह्यः। ईकक्च। कितित्र। च्च
तद्धितेआवामादेरचोवृद्धिः। बाहीकः। गोरजादिप्रसंगेयत्। गोरपत्यादिगव्यं। उत्सादि
भ्योऽञ्। औत्सः॥ ॥इत्यपत्यादिविकारांतार्थाःप्रत्ययाः॥ ॥स्त्रीपुंसाभ्यांनञ्
स्नञौभवनात्। धान्यानांभवनइत्यतःप्रागर्थेष्वाभ्यामेतौस्तः। स्त्रैणः। पौंस्नः।

म० त०

॥१॥ तस्यापत्यं। षष्ठ्यंतात्कृतसंधेः समर्थादपत्येर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः। ओर्गुणः।
उवर्णांतस्य भस्य गुणस्तद्धिते। ओरोदिति वक्तव्ये गुणोक्तिः संज्ञापूर्वको विधिरनित्य इति ज्ञाप
यितुं। तेन स्वायंभुवमित्यादि सिद्धं। उपगोरपत्यमौपगवः। आश्वपतं। दैत्यः। औत्सः। स्त्रै
णः। पौंस्नः। अपत्यं पौत्रप्रभृति गोत्रं। अपत्यत्वेन विवक्षितं पौत्रादि गोत्रसंज्ञं स्यात्। ए
को गोत्रे। गोत्रे एक एवाप्रत्ययः स्यात्। उपगोर्गोत्रापत्यमौपगवः। गर्गादिभ्यो यञ्। गोत्राप
त्ये। गर्गस्य गोत्रापत्यं गार्ग्यः। वात्स्यः। यञञोश्च। गोत्रे यद्यञंतमञंतं च तदवयवयोरे
तयोर्लुक् स्यात् तत्कृते बहुत्वे न तु स्त्रियां। गर्गाः। वत्साः। गोत्रेऽलुगचि। अजादौ प्राग्दीव्यती
ये विवक्षिते गोत्रप्रत्ययस्यालुक् स्यात्। गर्गाणां छात्राः। वक्ष्यमाणो वृद्धाच्छः। आ
पत्यस्य च तद्धितेऽनाति। हलः परस्यापत्ययस्य लोपस्तद्धिते न त्वाकारे। गार्गीयाः॥ ॥१॥

नतु गोत्रसंज्ञं २
प्राग्दीव्यतः किं॥ गर्गेभ्यो हितं गार्गीयं। अचि किं। गर्गेभ्य आगतं गर्गरूप्यं। जीवति तु वंश्ये युवा। वंश्ये पित्रादौ जी
वति पौत्रादेर्यदपत्यं चतुर्थादि तद्युवसंज्ञमेव स्यात्। गोत्राद्यून्यस्त्रियां। यून्यपत्ये विवक्षिते गोत्रप्रत्ययांतादे
व प्रत्ययः स्यात् स्त्रियां तु न युवसंज्ञा। यञिञोश्च। गोत्रे यौ यञिञौ तदंतात्फक्। आयनेयीनीयियः
फढखछघां प्रत्ययादीनां। प्रत्ययादेः फस्य आयन्। ढस्य एय्। खस्य ईन्। छस्य ईय्। घस्य इय् स्युः।
गर्गस्य युवापत्यं गार्ग्यायणः। अत इञ्। अपत्यार्थे। दाक्षिः। बाह्वादिभ्यश्च। बाहविः। औडुलोमिः।
औडुलोमी। लोम्नोपत्येषु बहुष्वकारो वक्तव्यः। बाह्वादीञोपवादः। उडुलोमाः। आकृतिगणो
यं। अनृष्यानंतर्ये बिदादिभ्योऽञ्। ये त्वत्रानृषयस्तेभ्योऽपत्येऽन्यत्र तु गोत्रे। बिदस्य गोत्रं बैदः। स्य
बैदौ। बिदाः। पौत्रः। पौत्रौ। यञञोश्चेति सूत्रे प्रवराध्याय प्रसिद्धं गोत्रं। तेनेह न। पौत्राः। एवं दौ
९ हित्रादयः। शिवादिभ्योऽण्। अपत्ये। शैवः। गांगः। ऋष्यंधकवृष्णिकुरुभ्यश्च। ऋषिभ्यः। वासिष्ठः। वै ऋष्यो मंत्रदृश दः। २
श्वामित्रः। अंधकेभ्यः। श्वाफल्कः। वृष्णिभ्यः। वासुदेवः। कुरुभ्यः। नाकुलः। साहदेवः। मातु
गोत्र इति निवृत्तं २

सकौ०त ॥२॥ रुत्संख्यासंभद्रपूर्वायाः। संख्यादिपूर्वस्य मातृशब्दस्य उदादेशः स्यादण्प्रत्ययश्च। द्वैमातुरः।
सं मातुरः। भाद्रमातुरः। स्त्रीभ्यो ढक्। स्त्रीप्रत्ययान्तेभ्यो ढक्। वैनतेयः। कन्यायाः कनीन च। चादण्।
कानीनो व्यासः। कर्णश्च। राजश्वशुराद्यत्। राज्ञो जातावेव। ये चाभावकर्मणोः। यादौ तद्धिते प्र ते
कृत्या स्यान्न तु भावकर्मणोः। राजन्यः। जातावेवेति किं। अन्। प्रकृत्याणि परे। राजनः। श्वशुर्यः।
क्षत्राद्घः। क्षत्रियः। जातावित्येव। क्षात्रिरन्यः। रेवत्यादिभ्यष्ठक्। ठस्येकः। अंगात्परस्य ठ
स्येकादेशः। रैवतिकः। गोत्रे कुंजादिभ्यश्च्फञ्। व्रातच्फञोरस्त्रियां। व्रातवाचिभ्यश्च्फञंते
भ्यश्च स्वार्थे ञ्यप्रत्ययः स्यात्। कौंजायन्यः। कौंजायन्यौ। बहुत्वे लुग्वक्ष्यते। ब्राध्नायन्यः।
नडादिभ्यः फक्। गोत्र इत्येव। नाडायनः। चारायणः। अनंतरो नाडिः। अश्वादिभ्यः फञ्। गो
त्रे। आश्वायनः। इतश्चानिञः। इकारांताद्व्यचोपत्ये ढक् न त्विञंतात्। दौलेयः। नैधेयः। आ ॥२॥
त्रेयः। आत्रेयौ। अत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। एभ्यो गोत्रप्रत्ययस्य तत्कृते ब

एषामिनङ्स्यौ।२

हुत्वे लुक् स्यान्न तु स्त्रियां। अत्रयः। भृगवः। कुत्साः। वसिष्ठाः। अंगिरसः। शुभ्रादिभ्यश्च। ढक् स्या
दपत्ये। शौभ्रेयः। कल्याण्यादीनामिनङ्। स्या ढक्। काल्याणिनेयः। बांधकिनेयः। कुलटाया वा। ॥३॥
इनङ्मात्रं विकल्प्यते ढक् तु नित्यः पूर्वेणैव। कौलटिनेयः। कौलटेयः। सती भिक्षुकी च कुलटा।
चटकाया ऐरक्। चटकादिति वाच्यं। प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति सिध्यति।
चटकस्य चटकाया वा अपत्यं चाटकैरः। स्त्रियामपत्ये लुग्वक्तव्यः। तयोरेव स्त्र्यपत्यं चटका॥
गोधाया ढ्रक्। गौधेरः। शुभ्रादित्वात् ढक्। गौधेयः। क्षुद्राभ्यो वा। अंगहीनाः शीलहीना
श्च क्षुद्रास्ताभ्यो वा ढ्रक्। पक्षे ढक्। काणेरः। काणेयः। दासेरः। दासेयः। पितृष्वसुश्छ
ण्। अणोपवादः। पैतृष्वस्रीयः। ढकि लोपः। पितृष्वसुर्लोपो ढकि। एतेन ऐव ज्ञापकात्
ढक्। पैतृष्वसेयः। मातृष्वसुश्च। पितृष्वसुर्यदुक्तं तदस्यापि स्यात्। मातृष्वस्रीयः।
मातृष्वसेयः। कुलात्खः। कुलीनः। तदंतादपि। उत्तरसूत्रे अपूर्वपदादिति लिंगात्॥ आ

मकौ०त
॥३॥

च्चकुलीनः। अपूर्वपदादन्यतरस्यां यड्ढकञौ॥ कुलादित्येव। पक्षे खः। कुल्यः। कौलेयकः। कु
लीनः। महाकुलादञ्खञौ। वास्तः। पक्षे खः। माहाकुलः। माहाकुलीनः। दुष्कुलाड्ढक्। वा पक्षे
खः। दौष्कुलेयः। दुष्कुलीनः। स्वसुश्छः। स्वस्रीयः। भ्रातुर्व्यच्च। वा छः। भ्रातृव्यः। भ्रात्री
यः। मनोर्जातावञ्यतौ षुक् च। समुदायार्थो जातिः। मानुषः। मनुष्यः। तस्येगाणउपसंख्या
नं। षपूर्वहन्धृतराज्ञामणि ऐषामणि तद्धिते ऽनोकारलोपः। ताक्ष्णः। तिकादिभ्यः फिञ्। फि
तैकायनिः। वृद्धिर्यस्याचामादिस्तद्वृद्धं। यस्य समुदायस्याचां मध्ये आदिर्वृद्धिस्तद्वृद्धसंज्ञ
कं स्यात्। उदीचां वृद्धादगोत्रात्। आम्रगुप्तायनिः। प्राचां तु आम्रगुप्तिः। प्राचामवृद्धात्फिन्ब
हुलं। ग्लुचुकायनिः। जनपदशब्दात्क्षत्रियादञ्। जनपदक्षत्रिययोर्वाचकादञपत्ये।
पांचालः। क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत्। पांचालानां राजा पांचा ॥३॥
लः। पूरोरण्। पौरवः। पाण्ड्या डोर्ड्यण्। पांड्यः। वृद्धेत्कोसलाजादाञ्ञ्यङ्। वृद्धात्।
वरूवः

आंबष्ठ्यः। इत्। आवंत्यः। कौसल्यः। अजादस्यापत्यं आजाद्यः। कुरुनादिभ्यो ण्यः। कौरव्यः। नै
षध्यः। तेतद्राजाः। अञादयस्तद्राजसंज्ञाः स्युः। तद्राजस्य बहुषु तेनैवास्त्रियां। बहुष्वर्थेषु त
द्राजस्य लुक् तत्कृते बहुत्वे न तु स्त्रियां। पंचाला इत्यादि। कंबोजाल्लुक्। तद्राजस्य। कंबोजः।
कंबोजौ। कंबोजादिभ्य इति वक्तव्यं। चोलः। शकः। केरलः। यवनः। अणिञोरनार्षयोर्गुरूपो
त्तमयोः ष्यङ् गोत्रे। त्र्यादीनामंत्यमुत्तमं। तस्य समीपमुपोत्तमं। गोत्रे यावणिञौ विहितौ अ
नार्षौ तदंतयोर्गुरूपोत्तमयोः प्रातिपदिकयोः स्त्रियां ष्यङादेशः। यङश्चाप्। कुमुदगं
धस्य गोत्रापत्यं स्त्री कौमुदगंध्या। वाराह्या। अनार्षयोः किं। वासिष्ठी। गुरूपोत्तमयोः किं।
औपगवी। गोत्रे किं। अहिच्छत्रे जाता आहिच्छत्री॥ ॥इत्यपत्याधिकारः॥ ॥तेनर
क्तं रागात्। कषायेण रक्तं वस्त्रं काषायं। मांजिष्ठं। रागात् किं। देवदत्तेन रक्तं वस्त्रं। ला
क्षारोचनाट्ठक्। लाक्षिकः। रौचनिकः। शकलकर्दमाभ्यामुपसंख्यानं। शाकलिकः। का

मकौ० त ॥४॥

कार्दमिकः। नील्या अन्। नील्या रक्तं नीलं। पीतात्कन्। पीतकं। हरिद्रामहारजनाभ्यामञ्। हारि
द्रं। माहारजनं। नक्षत्रेण युक्तः कालः। तिष्यपुष्ययोर्नक्षत्राणि यलोपः। पुष्येण युक्तं पौषमहः।
लुबविशेषे। पूर्वेण विहितस्य लुप् षष्टिदंडात्मकस्य कालस्यावांतरविशेषश्चेन्न गम्यते। अद्य
पुष्यः। दृष्टं साम। तेनेत्येव। वसिष्ठेन दृष्टं वासिष्ठं साम। वामदेवाड्ड्यड्ड्यौ। वामदेवेन दृष्टं
वामदेव्यं। परिवृतो रथः। वस्त्रेण परिवृतो वास्त्रो रथः। तत्रोद्धृतममत्रेभ्यः। शरावे उद्धृतः शा
राव ओदनः। संस्कृतं भक्षाः। सप्तम्यंतादण्स्यात्संस्कृतेर्थे यत्संस्कृतं भक्षाश्चेत्ते स्युः। भ्राष्ट्रे
षु संस्कृता भ्राष्ट्रा भक्षाः। शूलोखाद्यत्। अणोपवादः। शूले संस्कृतं शूल्यं मांसं। उख्यं। दध्न
ष्ठक्। दध्नि संस्कृतं दाधिकं। सास्मिन्पौर्णमासीति। इति शब्दात्संज्ञायामिति लभ्यते। पौषी
पौर्णमासी अस्मिन्पौषो मासः। सास्य देवता। इंद्रो देवतास्येति ऐंद्रं हविः। पाशुपतं। बार्हस्पत्यं। ॥४॥
त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता। मंत्रस्तुत्या च। ऐंद्रो मंत्रः। कस्येत्। कशब्दस्य इकारः स्या

दणस्य सन्नियोगेन। यस्येति लोपात्परत्वादादिवृद्धिः। को ब्रह्मा देवतास्य कायं हविः। श्रीर्देवतास्य
श्रायं। शुक्राद्घन्। शुक्रियं। सोमाट्ट्यण्। सौम्यं। वाय्वृतुपित्रुषसो यत्। वायव्यं। ऋतव्यं। री
ङृतः। अकृद्यकारेऽसार्वधातुके यकारे च्वौ च ऋदंतांगस्य रीङादेशः। यस्येति च। पित्र्यं। उषस्यं।
द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च। चाद्यत्। द्यावापृथि
वीयं। द्यावापृथिव्यं। शुनासीरीयं। शुनासीर्यं। महाराजप्रोष्ठपदाट्ठञ्। माहाराजिकं। प्रौ
ष्ठपदिकं। देवताद्वंद्वे च। अत्र पूर्वोत्तरपदयोराद्यचोर्वृद्धिर्ञिति णिति किति च। आग्निमा
रुतं। नेंद्रस्य परस्य। सोमेंद्रः। परस्य किं। ऐंद्राग्नः। दीर्घाच्च वरुणस्य। न वृद्धिः। ऐंद्रावरुणः।
दीर्घात्किं। आग्निवारुणीमनड्वाहीं। पितृव्यमातुलमातामहपितामहाः। एते निपात्यंते।
पितुर्भ्राता पितृव्यः। मातुर्भ्राता मातुलः। मातुः पिता मातामहः। पितुः पिता पितामहः। त
स्य समूहः। काकानां समूहः काकं। भिक्षादिभ्योऽण्। भैक्षं। गर्भिणीनां समूहो गार्भिणं।

सकौ० त
॥५॥

इह भस्याढ इति पुंवद्भावे कृते। इनण्यनपत्ये। अनपत्यार्थे अणि इन् प्रकृत्या। तेन न स्तद्धित इति टि
लोपो न। युवतीनां समूहो यौवनं। शत्रंतादनुदात्तादेरञि यौवतं। गोत्रोक्षोष्ट्रोरभ्रराजराजन्य
राजपुत्रवत्समनुष्याजाद्वुञ्। ग्लुचुकायनीनां समूहो ग्लौचुकायनकं। औक्षकमित्यादि। आ
पत्यस्य चेति यलोपप्राप्तौ प्रकृत्या अके राजन्यमनुष्ययुवानः। राजन्यकं। मानुष्यकं। वृद्धा
ञ च्चेति वक्तव्यं। वार्द्धकं। केदाराद्यञ्च। चाद्वुञ्। केदार्यं। केदारकं। गणिकायाश्च वक्तव्यः।
गाणिक्यं। ठञ्कवचिनश्च। चात्केदारादपि। कवचिनां समूहः कावचिकं। केदारिकं। ग्राम
जनबंधुभ्यस्तल्। ग्रामता। जनता। बंधुता। तलंतं स्त्रियां। गजसहायाभ्यां चेति वक्तव्यं।
गजता। सहायता। अह्नः खः क्रतौ समूहे (वक्तव्यः) अहीनः। अचित्तहस्तिधेनोष्ठक्। इसुसुक्तां
तात्कः। इस उस उक् तत एतदंतात्परस्य ठस्य कः। साक्तुकं। हास्तिकं। धैनुकं। केशाश्वा ॥५॥
भ्यां यञ्छावन्यतरस्यां। पक्षे ठगणौ। कैश्यं। कैशिकं। आश्वीयं। आश्वं। पाशादिभ्यो यः।

पाश्या। तृण्या। धूम्या। वन्या। वात्या। खलगोरथात्। खल्या। गव्या। रथ्या। इनित्रकट्यचश्च।
खलादिभ्यः क्रमात्स्युः। खलिनी। गोत्रा। रथकट्या। खलादिभ्य इति वक्तव्यं। डाकिनी। कुटुंबिनी।
आकृतिगणोयं। तदस्यां प्रहरणमिति क्रीडायां णः। दंडः प्रहरणमस्यां क्रीडायां दांडा। मौष्टा।
घञः सास्यां क्रियेति ञः। घञंता क्रियावाचिनः प्रथमांतादस्यामित्यर्थे स्त्रीलिंगे ञप्रत्य
यः। श्येनतिलस्य पाते ञे। अनयोर्मुमस्यात् ञप्रत्यये परे पातशब्दे उत्तरपदे। श्येनंपा
ता मृगया। तैलंपाता स्वधा। श्येनतिलस्य किं। दंडपातोस्यां दांडपाता तिथिः। तदधीते तद्वे
द। न य्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच्। पदांताभ्यां यवाभ्यां परस्य न वृद्धिः किंतु ताभ्यां पू
र्वौ क्रमादैचावागमौ स्तः। व्याकरणमधीते वेत्ति वा वैय्याकरणः। क्रमादिभ्यो वुन्। क्रम
कः। पदकः। शिक्षकः। मीमांसकः। क्रतूक्थादिसूत्रांताट्ठक्। क्रतुविशेषवाचिनामिवेह ग्र
हणं। तेभ्यो मुख्यार्थेभ्यो वेदितरि तत्प्रतिपादकग्रंथपरेभ्यस्त्वध्येतरि। आग्निष्टोमिकः।

मकौ०त वाजपेयिकः।उक्थं सामविशेषः।तल्लक्षणग्रंथविशेषोलक्षणयोक्थं।तदधीते तद्वेद वा औक्थि
॥६॥ कः।मुख्यार्थान्नत्यशब्दानुगणो नेष्यते।नैय्यायिकः।वार्त्तिकः।लोकायतिकः।सूत्रांतात्कु
अकल्पादेरेवेष्यते।सांग्रहसूत्रिकः।अकल्पादेः किं।काल्पसूत्रः।विद्यालक्षणकल्पांता
च्चेति वक्तव्यं।वायसविद्यिकः।गौलक्षणिकः।पाराशकल्पिकः।अंगक्षत्रधर्मत्रिपूर्वा
द्यः॥ द्विद्यांतान्नेति वक्तव्यं।आंगविद्या त्रविद्यः।धार्मविद्यः।त्रिविधा विद्या त्रिविद्या तामधीते
वेत्ति वा त्रैविद्यः।तदस्मिन्नस्तीति देशे तन्नाम्नि।उदुंबराः संत्यस्मिन्देशे औदुंबरो देशः॥
तेन निर्वृत्तं।कुशांबेन निर्वृत्ता कौशांबी नगरी।तस्य निवासः।शिबीनां निवासो देशः शैबः।
अदूरभवश्च।विदिशाया अदूरभवं वैदिशं।वुञ्छणकठजिलसेनिरढञ्ण्ययफक्फि
ञिञ्यकठकोरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्ण ॥६॥
सुतंगमप्रगदिन्वराहकुमुदादिभ्यः।सप्तदशभ्यः सप्तदश क्रमात्स्युश्चातुरर्थ्या॥अरीह

णादिभ्यो वुञ्।अरीहणेन निर्वृत्तं आरीहणकं।कृशाश्वादिभ्यश्छण्।कार्शाश्वीयः।ऋश्यादि
भ्यः कः।ऋश्यकं।कुमुदादिभ्यष्ठच्।कुमुदिकं।काशादिभ्य इलः।काशिलः।तृणादिभ्यः सः।
तृणासं।प्रेक्षादिभ्य इनिः।प्रेक्षी।अश्मादिभ्यो रः।अश्मरा।सख्यादिभ्यो ढञ्।साखेयं।
संकाशादिभ्यो ण्यः।सांकाश्यं।बलादिभ्यो यः।बल्यं।पक्षादिभ्यः फक्।पाक्षायणः।पथः
पंथच।पांथायनः।कर्णादिभ्यः फिञ्।कार्णायनिः।सुतंगमादिभ्य इञ्।सौतंगमिः।प्रगदि
न्नादिभ्यो ञ्यः।प्रगदिन्।प्रागद्यः।वराहादिभ्यः कक्।वाराहकः।कुमुदादिभ्यष्ठक्।कौमु
दिकः।जनपदे लुप्।जनपदे वाच्ये चातुरर्थिकस्य लुप्।लुपि युक्तवद्व्यक्तिवचने।लुपि
सति प्रकृतिवल्लिंगवचने स्तः।पंचालानां निवासो जनपदः पंचालाः।कुरवः।अंगाः।वंगाः।
कलिंगाः।वरणादिभ्यश्च।अजनपदार्थ आरंभः।वरणानामदूरभवं नगरं वरणाः।शर्क
राया वा।अस्माच्चातुरर्थिकस्य लुप् स्यात्।ठक्छौ च।शर्करायाया एतौ स्तः।कुमुदादौ वरा

म०कौ०त
॥७१॥

हा दीवपाठसामर्थ्यात्पक्षे ठञ्कको । वायग्रहणसामर्थ्यात्पक्षे औत्सर्गिकोऽण् । तस्य लुग्विकल्पः ।
षड्रूपाणि । शर्करा । शार्करं । शार्करिकं । शार्करीयं । शर्करिकं । शार्करकं । नद्यां मतुप् । चातुरर्थिकः ।
इक्षुमती । कुमुदनडवेतसेभ्यो ड्मतुप् । [illegible] झयः । मतोर्मस्य वः । कुमुद्वान् । नड्वान् । मा
दुपधायाश्च मतोर्वोऽयवादिभ्यः । मवर्णावर्णांतान्मवर्णावर्णोपधाच्च यवादिवर्जितात्परस्य
मतोर्मस्य वः । वेतस्वान् । नडशादाड्ड्वलच् । नड्वलः । शाड्वलः । शिखाया वलच् । शिखावलं
नगरं । उत्करादिभ्यश्छः । उत्करीयं । नडादीनां कुक्च । नड्कीयं । क्रुंचा ह्रस्वत्वं च ।
क्रुंचकीयः । तक्षन्नलोपश्च । तक्षकीयः ॥ ७ ॥ ॥ इति चातुरर्थिकाः ॥ ॥ शेषे । अप
त्यादिचतुरर्थ्यंतादन्योऽर्थः शेषस्तत्राणादयः स्युः । चक्षुषा गृह्यते चाक्षुषं रूपं । श्रावणः श
ब्दः । औपनिषदः पुरुषः । दृषदि पिष्टाः दार्षदाः सक्तवः । उलूखले क्षुण्ण औलूखलो यावकः । ॥७१॥
अश्वैरुह्यते आश्वो रथः । चतुर्भिरुह्यते चातुरं शकटं । चतुर्दश्यां दृश्यते चातुर्दशं रक्षः ।

घुर
तस्य विकार इत्यतः प्राक् शेषाधिकारः । राष्ट्रावारपाराद्घखौ । आभ्यां घखौ स्तः । राष्ट्रे जातादि राष्ट्रि
यः । अवारपारीणः । इह प्रकृतिविशेषात् घादयः ष्ट्युल्तान्ता उच्यंते । तेषां जातादयोऽर्थविशेषाः सम
र्थविभक्तयश्च वक्ष्यंते । ग्रामाद्यखञौ । ग्राम्यः । ग्रामीणः । नद्यादिभ्यो ढक् । नादेयं । माहेयं ।
वाराणसेयं । दक्षिणापश्चात्पुरसस्त्यक् । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः । द्युप्रागपागुदक्प्रती
चो यत् । दिव्यं । प्राच्यं । उदीच्यं । प्रतीच्यं । अव्ययात्त्यप् । अमेहक्वतसित्रेभ्य एव । अमात्यः । इह
त्यः । क्वत्यः । ततस्त्यः । तत्रत्यः । त्यब्नेर्ध्रुवे । नित्यः । निसो गते । ह्रस्वात्तादौ तद्धिते । ह्रस्वादिणः सस्य
षः तादौ तद्धिते । निर्गता वर्णाश्रमेभ्यो निष्ट्याश्चंडालादिः । अरण्यान्णः । आरण्याः सुमनसः । दूरा
देत्यः । दूरेत्यः । उत्तरादाहञ् । औत्तराहः । ऐषमोह्यःश्वसोऽन्यतरस्यां । एभ्यस्त्यब्वा । पक्षे वक्ष्य
माणौ ट्युट्युलौ । ऐषमस्त्यं । ऐषमस्तनं । ह्यस्त्यं । ह्यस्तनं । श्वस्त्यं । श्वस्तनं । पक्षे शौव
स्तिकं वक्ष्यते । वृद्धाच्छः । शालीयः । त्यदादीनि च । वृद्धसंज्ञानि स्युः । तदीयः । वा नामधेयस्य

मकौ० त
॥८॥

वृद्धसंज्ञा वक्तव्या। देवदत्तीयः। दैवदत्ताः॥ भवतष्ठक्छसौ। वृद्धाद्भवत एतौ स्तः। भावत्कः। सिति च। तद्धिते
पूर्वपदस्यात्। जश्त्वं। भवदीयः। वृद्धादित्यनुवृत्तेः। शत्रंतादपि न। भावतः। काश्यादिभ्यष्ठञ्ञिठौ।
इकार उच्चारणार्थः। काशिकी। काशिका। वैदिकी। वैदिका। आपदादिपूर्वपदात्कालांतात्। आप
आपत् दादिराकृतिगणः। आपत्कालिकी। धन्वयोपधाद्वुञ्। धन्वविशेषवाचिनो यकारोपधा
च्च देशवाचिनो वुञ् स्यात्। ऐरावतं धन्व ऐरावतकः। सांकाश्यकांपिल्यशब्दौ वुञ्छण
दिसूत्रेण ण्यांतौ। सांकाश्यकः। कांपिल्यकः। नगरात्कुत्सनप्रावीण्ययोः॥ कुत्सिते प्रवीणे
च जाते शेषप्रत्ययार्थे नगरशब्दाद्वुञ्॥ नागरकश्चौरः। शिल्पी वा। एतयोः किं। नागरा ब्रा
ह्मणाः। अरण्यान्मनुष्ये। वुञ् स्यात्। औपसंख्यानिकणोऽपवादः। पथ्यध्यायन्यायवि
हारमनुष्यहस्तिष्विति वक्तव्यं। आरण्यकः पंथाः अध्यायो न्यायो विहारो हस्ती वा। ग ॥८॥
र्त्तोत्तरपदाच्छः। देश इत्येव। वृकगर्त्तीयं। गहादिभ्यश्च। गहीयः। युष्मदस्मदोरन्यतरस्यां

खञ्च। चाच्छः पक्षे अण्। युवयोर्युष्माकं वा युष्मदीयः। अस्मदीयः। तस्मिन्नणि च युष्माकास्मा
कौ। युष्मदस्मदोरेतावादेशौ स्तः। यौष्माकीणः। आस्माकीनः। यौष्माकः। आस्माकः। तवक
ममकावेकवचने। एकार्थवाचिनोर्युष्मदस्मदोस्तवकममकौ स्तः खञ्यणि च। तावकीनः।
तावकः। मामकीनः। मामकः। छे तु। प्रत्ययोत्तरपदयोश्च। मपर्यंतयोरनयोरेकार्थवाचिनो
स्त्वमौ स्तः प्रत्यये उत्तरपदे च। त्वदीयः। मदीयः। त्वत्पुत्रः। मत्पुत्रः। मध्यान्मः। मध्यमः॥
असांप्रतिके॥ मध्यशब्दादकारप्रत्ययः सांप्रतिकेर्थे। उत्कर्षापकर्षहीनो मध्यो वैयाक
रणः। मध्यं दारु। नातिह्रस्वं नातिदीर्घमित्यर्थः। द्वीपादनुसमुद्रं यञ्। समुद्रसमीपे यो
द्वीपस्तद्विषयाद्द्वीपशब्दाद्यञ् स्यात्। द्वैप्यं। द्वैप्या। कालाट्ठञ्। मासिकं। सांवत्सरिकं। अ
व्ययानां भमात्रे टिलोपः। सायंप्रातिकः। पौनःपुनिकः। कथं तर्हि शार्वरस्य तमसो निषिद्धये इति
कालिदासः। अनुदितौषसरागा इति भारविः। समानकालीनं प्राक्कालीनमित्यादि च।

मको०त अपभ्रंशाः स्थौल्यादिति प्रामाणिकाः। तत्र जात इति यावत्कालाधिकारः। श्राद्धे शरदः। ठञ् ऋत्वणोऽपवा
॥१॥ दः। शारदिकं श्राद्धं। विभाषा रोगातपयोः। शारदिकः शारदो वा रोगः आतपो वा। निशाप्रदोषाभ्यां
च ठञ्। नैशिकं नैशं। प्रादोषिकं प्रादोषं। श्वसस्तुट् च। श्वसः ठञ् स्यात्तस्य तुट् च। द्वारादीनां च। द्वारं।
स्वल्कः श। स्वस्ति। स्फयकृत्। स्वादु। मृदु। श्वस्। श्वन्। स्व। एषां न वृद्धिरैजागमश्च। शौवस्तिकं।
५५ संधिवेलाद्यृतुनक्षत्रेभ्योऽण्। संधिवेलायां भवं सांधिवेलं। ग्रैष्मं। तैषं। संधिवेला। संध्या।
अमावास्या। त्रयोदशी। चतुर्दशी। पंचदशी। प्रतिपत्। प्रावृष एण्यः। प्रावृषेण्यः। वर्षाभ्यष्ठक्।
वर्षासु साधु वार्षिकं वासः। सर्वत्राण् च तलोपश्च। हेमंतादण् तलोपश्च। तकारात्पूर्वे ऽत्व
पं। हैमनं। हैमंतं। सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च। सायमित्यादिभ्यश्चतु
र्भ्योऽव्ययेभ्यश्च कालवाचिभ्यः ट्युट्युलौ स्तस्तयोस्तुट् च। सायंतनं। चिरंतनं। प्राह्णे ॥१॥
प्रगयोरेदंतत्वं निपात्यते। प्राह्णेतनं। प्रगेतनं। दोषातनं। दिवातनं। चिरपरुत्परारिभ्य

स्त्नो वक्तव्यः। चिरत्नं। परुत्नं। परारित्नं। अग्रादिपश्चाड्डिमच्। अग्रिमं। आदिमं। पश्चिमं। अंताच्च।
अंतिमं। विभाषा पूर्वाह्णापराह्णाभ्यां। आभ्यां ट्युट्युलौ वा स्तस्तयोस्तुट् च पक्षे ठञ्। पूर्वाह्णेतनं।
अपराह्णेतनं। पौर्वाह्णिकं। आपराह्णिकं। तत्र जातः। सप्तम्यंतात् समर्थाज्जात इत्यर्थेऽणाद
यो घादयश्च स्युः। स्रुघ्ने जातः स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीण इत्यादि। प्रावृषष्ठप्।
एण्यस्यापवादः। प्रावृषिकः। प्रायभवः। तत्रेत्येव। स्रुघ्ने प्रायेण बाहुल्येन भवति स्रौघ्नः। संभूते। स्रुघ्ने संभ त्यप
वति स्रौघ्नः। कोशाड्ढञ्। कौशेयं वस्त्रं। तत्र भवः। स्रुघ्ने भवः स्रौघ्नः। औत्सः। राष्ट्रियः। अवारपारीण इत्यादि।
दिगादिभ्यो यत्। दिश्यं। वर्ग्यं। शरीरावयवाच्च। दंत्यं। कंठ्यं। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। दार्तेयं। क
लशिर्घटः। तत्र कालशेयं। ग्रीवाभ्योऽण् च। चाड्ढञ्। ग्रैवेयं। ग्रैवं। गंभीराञ्ञ्यः। गंभीरे भवं गांभीर्यं। अव्य
यीभावाच्च। परिमुखं भवं पारिमुख्यं। परिमुखादिभ्य एवेष्यते। नेह। औपकूलः। अंतःपूर्वपदाट्ठञ्। अव्ययी
भावादित्येव। वेश्मनि अंतर्वेश्मं तत्र भवं आंतर्वेश्मिकं। आंतर्गणिकं। अध्यात्मादेष्ठञिष्यते। अध्यात्मं भवं

मकौ०त ॥१०॥ आध्यात्मिकं। अनुशतिकादीनां च। एषामुभयपदवृद्धिः ञिति णिति किति च। आधिदैविकं। आधिभौतिकं। ऐह
॥१०॥ लौकिकं। आकृतिगणोयं। जिह्वामूलाङ्गुलेश्छः। जिह्वामूलीयं। अङ्गुलीयं। वर्गान्ताच्च। कवर्गीयं। ततआ
गतः। स्रुघ्नादागतः स्रौघ्नः। ठगायस्थानेभ्यः। शुल्कशालाया आगतः शौल्कशालिकः। विद्यायोनिसंबं
धेभ्यो वुञ्। औपाध्यायिकः। पैतामहकः। ऋतष्ठञ्। वुञोपवादः। होतृकं। मातृकं। भ्रातृकं। पितुर्यच्च।
चाट्ठञ्। रीङृतः। यस्येति लोपः। पित्र्यं। पैतृकं। गोत्रादङ्कवत्। बिदेभ्य आगतं बैदं। गार्गं। दाक्षं। औपग
वकं। हेतुमनुष्येभ्योन्यतरस्यां रूप्यः। समादागतं समरूप्यं। पक्षे गहादित्वाच्छः। समीयं। देव
दत्तीयं। देवदत्तरूप्यं। मयट् च। सममयं। देवदत्तमयं। प्रभवति। हिमवतः प्रभवति हैमवती गंगा।
विदूराञ्ञ्यः। विदूरात्प्रभवति वैदूर्यो मणिः। दंत्यमध्योयं शाद्वलवत्। नतु तन्डूलन्त्र ईत्यमध्यः।
तन्वर्थासंगतिः। बालवायाद्धि असौ प्रभवति विदूरे तु संस्क्रियते। सत्यं। अत एव समाहितं भाष्ये ॥१०॥
बालवायो विदूरं चेति। बालवायशब्दः प्रत्ययं लभते विदूरादेशं च। स्वेचिपगितिनादेशेनानुरूप

प्रोक्ताल्लुक्। प्रोक्तप्रत्ययान्तात्परस्य अध्येतृवेदितृप्रत्ययस्य लुक्।

निष्क्राम

स्थानी आक्षिप्यते। तद्गच्छति पथिदूतयोः। स्रुघ्नं गच्छति स्रौघ्नः पंथा दूतो वा। अभिनिष्क्रामति द्वारं। स्रुघ्नमभिनिष्क्रामति
स्रौघ्नं कान्यकुब्जद्वारं। अधिकृत्य कृते ग्रंथे। शारीरकमधिकृत्य कृतो ग्रंथः। शारीरकीयः। शारीरकं भा
ष्यमिति तु अभेदोपचारात्। सोस्य निवासः। स्रुघ्नो निवासोस्य स्रौघ्नः। तेन प्रोक्तं। पाणिनिना प्रोक्तं पा
णिनीयं। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोः। णिनिः स्यात्। पाराशर्येण प्रोक्तं भिक्षुसूत्र
मधीयते पाराशरिणो भिक्षवः। शैलालिनो नटाः। कर्मन्दकृशाश्वादिनिः। कर्मन्देन प्रोक्तं भिक्षुसूत्र
मधीयते कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः। उपज्ञाते। पाणिनिना उपज्ञातं पाणिनीयं। तस्ये
दं। उपगोरिदमौपगवं। सामिधामाधानेषेण्यण्। सामिधेन्यो मंत्रः। रथाद्यत्। रथ्यं चक्रं। पत्रपू
र्वादञ्। अश्वरथस्येदमाश्वरथं। हलसीराट्ठक्। हालिकं। सैरिकं। गोत्रचरणाद्वुञ्। औपगवकं।
चरणाद्धर्माम्नाययोरिति वक्तव्यं। काठकं। संघाङ्कलक्षणेष्वञ्यञिञामण्। घोषग्रहणमपि
कर्तव्यं। अञ्। बैदः। संघोंको घोषो वा। बैदं लक्षणं। यञ्। गार्गः। गार्गं। इञ्। दाक्षः। दाक्षं।

म.कौ.त परंपरासंबंधोंकः। साक्षात्तुलक्षणं॥ ॥इतिशैषिकाः॥ ॥तस्यविकारः। अश्मनोविकारेटि
॥११॥ लोपः। अश्मनोविकारआश्मः। भस्मनः। मार्त्तिकः। अवयवेचप्राण्योषधिवृक्षेभ्यः। चाद्विकारे।
मयूरस्यविकारोवयवोवामायूरः। मौर्वंकांडंभस्मवा। पैप्पलं। त्रपुजतुनोःषुक्। आभ्यामणि
तयोःषुक्। त्रापुषं। जातुषं। ओरञ्। दैवदारवं। अनुदात्तादेश्च। अञ्। कापित्थं। पलाशादिभ्यो
वा। अञ्। पालाशं। खादिरं। शाम्याः [illegible] ट्लञ्। शामीलं। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः।
प्रकृतिमात्रान्मयड्वास्यादिक्कार्षयवयोः। आश्ममयं। आश्मनं। अभक्ष्येत्यादिकिं। मौद्गःसूपः।
कार्पाससमाच्छादनं। नित्यंवृद्धशरादिभ्यः। आम्रमयं। शरमयं। एकाचोनित्यं। वाङ्मयं। गोश्च
पुरीषे। गोमयं। एण्याढञ्। ऐणेयं। एणस्यतु ऐणं। गोपयसोर्यत्। गव्यं। पयस्यं। फलेलु
क्। विकारावयवप्रत्ययस्य। लुक्तद्धितलुकि। उपसर्जनस्त्रीप्रत्ययस्य। आमलक्याःफलं ॥११॥
आमलकं। प्लक्षादिभ्योऽण्। विधिसामर्थ्यान्नलुक्। प्लाक्षं। न्यग्रोधस्यचकेवलस्य। अस्यन

वृद्धिरैजागमश्च। नैयग्रोधं। जंब्वावा। अण्फले। जांबवं। पक्षेओरञ्। तस्यलुक्। जंबु। पं। लुप्च। वा
जंब्वाःफलप्रत्ययस्य। लुपियुक्तवत्। जंबूः। फलपाकशुषामुपसंख्यानं। व्रीहयः। मुद्गाः। पुष्पमूले
षुबहुलं। मल्लिकायापुष्पंमल्लिका। जातीविदार्याःमूलंविदारी। बहुलग्रहणान्नेह। पाटलानिपु
ष्पाणि। साल्वानि। बाहुलकात्क्वचिल्लुक्। अशोकं। करवीरं। हरीतक्यादिभ्यश्च। फलप्रत्ययस्य
लुक्। हरीतक्यादीनांलिंगमेवप्रकृतिवत्। हरीतक्याःफलानिहरीतक्यः॥ ॥इतिप्राग्दीव्यती
याः॥ ॥प्राग्वहतेष्ठक्। तद्वहतीत्यतः प्राक्ठगधिक्रियते। तदाहेतिमाशब्दादिभ्यउपसंख्या
नं। माशब्दःकारीतियआहसमाशब्दिकः। आहौप्रभूतादिभ्यः। प्रभूतमाहप्राभूतिकः। पा
र्याप्तिकः। पृच्छतौसुस्नातादिभ्यः। सुस्नातंपृच्छतिसौस्नातिकः। सौखशायनिकः। अनुशति
कादिः। गच्छतौपरदारादिभ्यः। पारदारिकः। गौरुतल्पिकः। तेनदीव्यतिखनतिजयतिजितं। अ
क्षैर्दीव्यतिखनतिजयतिजितंवाआक्षिकः॥ संस्कृतं। दध्नासंस्कृतंदाधिकं। मारीचिकं। तरति॥

सकौ०त ॥१२॥

उडुपेन तरति औडुपिकः। गोपुच्छाट्ठञ्। गोपुच्छिकः। नौद्व्यचष्ठन्। नाविकः। घटिकः। चरति। हस्ति
ना चरति हास्तिकः। दध्ना चरति दाधिकः। पर्पादिभ्यः ष्ठन्। पर्पेण चरति। पर्पिकः। येन पीठेन पंग
वश्चरंति स पर्पः। अश्विकः। रथिकः। श्वगणाट्ठञ्च। वात् ष्ठन्। श्वगणेन चरति श्वागणिकः। वेत
नादिभ्यो जीवति। वैतनिकः। विभाषा विवधात्। ष्ठन्। पक्षे ठक्। विवधेन हरति विवधिकः
वैवधिकः। एकदेशविकृतत्वाद्वीवधेऽपि। वीवधिकः। वैवधिकः। विवधवीवधशब्दौ। उभयतोब
द्धशिक्ये स्कंधवाह्ये काष्ठे वर्तेते। निर्वृत्तेऽक्षद्यूतादिभ्यः। अक्षद्यूतेन निर्वृत्तं आक्षद्यूतिकं वैरं।
संसृष्टे। दध्ना संसृष्टं दाधिकं। लवणाल्लुक्। लवणेन संसृष्टो लवणः सूपः। मुद्गादण्। मौद्ग
ओदनः। उञ्छति। बदराण्युञ्छति बादरिकः। रक्षति। समाजं रक्षति सामाजिकः। शब्ददर्दुरं क
रोति। शाब्दं करोति शाब्दिकः। दार्दुरिकः। पक्षिमत्स्यमृगान् हंति। स्वरूपस्य पर्यायाणां विशेषा ॥१२॥
णां च ग्रहणं। मत्स्यपर्याये पुमीनस्यैव। पक्षिणो हंति पाक्षिकः। शाकुनिकः। मायूरिकः। मा

त्सिकः॥ मैनिकः॥ शाकुलिकः॥ मार्गिकः॥ हारिणिकः॥ सारंगिकः॥ धर्मं चरति॥ धार्मिकः॥
अधर्माच्चेति वक्तव्यं॥ आधर्मिकः॥ तदस्य पण्यं॥ अपूपाः पण्यमस्य आपूपिकः॥ लव
णाट्ठञ्॥ लावणिकः॥ शिल्पं॥ मृदंगवादनं शिल्पमस्य मार्दंगिकः॥ प्रहरणं॥ असिः
प्रहरणमस्य आसिकः॥ धानुष्कः॥ शक्तियष्ट्योरीकक्॥ शाक्तीकः॥ याष्टीकः॥ अस्ति
नास्ति दिष्टं मतिः॥ अस्ति परलोक इत्येवं मतिर्यस्य स आस्तिकः॥ नास्तीति मतिर्यस्य
स नास्तिकः॥ दिष्टमिति मतिर्यस्य दैष्टिकः॥ शीलं॥ अपूपभक्षणं शीलमस्य आपूपिकः॥
छत्रादिभ्यो णः॥ गुरोर्दोषाणामावरणं छत्रं॥ तच्छीलमस्येति छात्रः॥ तत्र नियुक्तः॥
आकरे नियुक्त आकरिकः॥ निकटे वसति नैकटिको भिक्षुः॥ ॥ इति ठगधिकारः॥ ॥ प्रा
ग्घितायत्॥ तस्मै हितमित्यतः प्राक् यदधिक्रियते। तद्वहति रथयुगप्रासंगं। रथं वहति रथ्यः।
युग्यः। प्रासंग्यः। धुरो यड्ढकौ। धुर्यः। धौरेयः। हलसीराट्ठक्। हलं वहति हालिकः। सैरिकः। वि

मकौ०त
॥१३॥

धनुष्यधनुषा। द्वितीयांतादर्थाद्विध्यतीत्यर्थे यत्। नचेत्तद्धनुः करणं। पादौ विध्यंति पद्याः शर्कराः। नौवयो
धर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु। नावा तार्यं नाव्यं
जलं। वयसा तुल्यो वयस्यः। धर्मेण प्राप्यं धर्म्यं। विषेण वध्यो विष्यः। मूलेन आनाम्यं मूल्यं। मूलेन
समो मूल्यः। सीतया समितं सीत्यं क्षेत्रं। तुलया संमितं तुल्यं। तत्र साधुः। सामसु साधुः सामन्यः।
अग्र्यः। कर्मण्यः। शरण्यः। सभाया यः। सभ्यः॥ ॥इति यतोवधिः॥ ॥ प्राक्क्रीताच्छः। तेन क्रीतमि
त्यतः प्राक् छोऽधिक्रियते। उगवादिभ्यो यत्। प्राक्क्रीतादित्येव। उवर्णांताद्गवादिभ्यो यत्। छस्यापवादः।
नाभि नभं च। नभ्योऽक्षः। नभ्यमंजनं। रथनाभावेवेदं। शुनः संप्रसारणं वा च दीर्घत्वं। शुन्यं। शू
न्यं। ऊधसोऽनङ् च। ऊधन्यः। कंबलाच्च संज्ञायां। यत्। कंबल्यं। ऊर्णापलशतं। संज्ञायां किं। कं
बलीया ऊर्णा। विभाषा हविरपूपादिभ्यः। आमिक्ष्यं दधि। आमिक्षीयं। पुरोडाश्यास्तंडुलाः॥ ॥१३॥
पुरोडाशीयाः। अपूप्यं। अपूपीयं। तस्मै हितं। वत्सेभ्यो हितो वत्सीयो गोधुक्। शंकव्यं दारु। गव्यं।

हविष्यं। शरीरावयवाद्यत्। कंठ्यं। नस्यं। अजाविभ्यां थ्यन्। अजथ्या यूथिः। अविथ्या। आत्मन्विश्वजन
भोगोत्तरपदात्खः। आत्माध्वानौ खे। प्रकृत्यास्तः। आत्मने हितं आत्मनीनं। विश्वजनीनं। कर्मधार
यादेवेष्यते। अन्यत्र विश्वजनीयं। पंचजनादुपसंख्यानं। पंचजनीनं। मातृभोगीणः। आचार्याद
णत्वं च। आचार्यभोगीनः। छयोः पूर्णोवधिः। प्राग्वतेष्ठञ्। तेन तुल्यमित्यतः प्राक् ठञधिक्रियते।
आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्। तदर्हतीत्येतदभिव्याप्य ठञधिकारमध्ये ठञोपवादष्ठग
धिक्रियते गोपुच्छादीन्वर्जयित्वा। असमासे निष्कादिभ्यः। आर्हादित्येव तेन क्रीतमिति यावदनु
वर्तते। निष्कादिभ्योऽसमासे ठगार्हीयेष्वर्थेषु। निष्केण क्रीतमित्यादि नैष्किकं। समासे तु ठञ्। प
रिमाणांतस्यासंज्ञाशाणयोः। उत्तरपदवृद्धिर्ञिति दे। परमनैष्किकं। शताच्च ठन्यतावशते।
शत्यं। शतिकं। अशते किं। संख्याया अतिशदंतायाः कन्। आर्हीयेष्वर्थेषु। शतं परिमाणमस्य
शतकः संघः। बहुकः। त्यंताया मा भूत्। सप्ततिकः। शदंतायाः। चात्वारिंशत्कः। वतोरिड्वा। वत्वंता

मकौ॰त
॥१४॥

कनइड्वा। तावत्कः। तावतिकः। कंसाट्टिठन्। कंसिकः। अर्द्धाच्च। अर्धिकः। अध्यर्धपूर्वद्विगोर्लुगसंज्ञा
यां। अध्यर्द्धपूर्वाद्द्विगोश्च परस्याहर्ईयस्य लुक्। अध्यर्धकंसं। द्विकंसं। संज्ञायां तु पांचकपालिकं।
तेन क्रीतं। ठञ्। गोपुच्छेन क्रीतं गोपुच्छिकं। साप्ततिकं। प्रास्थिकं। ठक्। नैष्किकं। तस्येश्वरः। सर्वभू
मिपृथिवीभ्यामणञौ। अनुशतिकादीनां च। सर्वभूमेरीश्वरः सार्वभौमः। पार्थिवः। तदस्य प
रिमाणं। प्रस्थं परिमाणमस्य प्रास्थिकः राशिः। स्तोमे डविधिः। पंचदश परिमाणमस्य पंच
दशः। सप्तदशः। सोमयागेषु छंदोगैः क्रियमाणा पृष्ठ्यादिसंज्ञिका × मंत्राः। स्तुतिः स्तोमः।
पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतं। एते रूढशब्दा निपा
त्यंते। तदर्हति। श्वेतच्छत्रमर्हति श्वैतच्छत्रिकः। दंडादिभ्यः। एभ्यो यत्। दंडमर्हति दंड्यः। अ
र्घ्यः। वध्यः। तेन निर्वृत्तं। अह्ना निर्वृत्तमाह्निकं॥ ॥इति ठञ्ठकोर्विधिः॥ ॥तेन तु ॥१४॥
ल्यं क्रिया चेद्वतिः। ब्राह्मणेन तुल्यं ब्राह्मणवत्। अधीते। क्रिया चेत्किं। गुणतुल्ये मा भूत्। पु

तलंतं स्त्रियां

त्रेण तुल्यः स्थूलः। तत्र तस्येव। मथुरायामिव मथुरावत् स्रुघ्ने प्राकारः। चैत्रस्येव चैत्रवत् मैत्रस्य गा
वः। तस्य भावस्त्वतलौ। प्रकृतिजन्यबोधे प्रकारो भावः। गोर्भावो गोत्वं। गोता। त्वांतं क्लीबं। आ च ॥१४॥
त्वात्। ब्रह्मणस्त्वः इत्यंतः प्राक् त्वतलावधिक्रियेते। अपवादैः सह समावेशार्थमिदं। चकारो नञ्स्न
ञ्भ्यामपि समावेशार्थः। स्त्रिया भावः स्त्रैणं। स्त्रीत्वं। स्त्रीता। पौंस्नं। पुंस्त्वं। पुंस्ता। पृथ्व्यादि
भ्य इमनिज्वा। इमनिज्वा। वा वचनमणादिसमावेशार्थं। र ऋतो हलादेर्लघोः। इष्ठेमेयस्सु।
टेः। लोप इष्ठेमेयस्सु। पृथुमृदुभृशकृशदृढपरिवृढानामेव रत्वं। पृथोर्भावः प्रथिमा॥
पार्थवं। म्रदिमा। मार्दवं। वर्णदृढादिभ्यः ष्यञ्च। चादिमनिच्। शौक्ल्यं। शुक्लिमा। दार्ढ्यं। द्रढि
मा। गुणवचनब्राह्मणादिभ्यः कर्मणि च। चाद्भावे। जडस्य भावः कर्म वा जाड्यं। मौढ्यं। ब्राह्म
ण्यं। आकृतिगणोऽयं। चतुर्वर्णादीनां स्वार्थ उपसंख्यानं। चातुर्वर्ण्यं। चातुराश्रम्यं। त्रैस्व
र्यं। षाड्गुण्यं। सैन्यं। सान्निध्यं। औपम्यं। त्रैलोक्यमित्यादि। स्तेनाद्यन्नलोपश्च। नेतिसं

मं०कौत ॥१५॥ घातग्रहणं स्तेनस्य भावः कर्म्म वा स्तेयं। सख्युर्यः। सख्यं। कपिज्ञात्योर्ढक्। कापेयं। ज्ञातेयं। पत्यंत
पुरोहितादिभ्यो यक्। सैनापत्यं। पौरोहित्यं। राजासे। राजशब्दो ऽसमासे यक् लभत इत्यर्थः। रा
ज्ञो भावः कर्म वा राज्यं। समासे तु ब्राह्मणादित्वात् ष्यञ्। आधिराज्यं। प्राणभृज्जातिवयोवच
नोद्गात्रादिभ्यो ऽञ्। प्राणभृज्जाति। आश्वं। वयोवचनं। कौमारं। औद्गात्रं। औन्नेत्रं। सौष्ठवं।
हायनांतयुवादिभ्यो ऽण्। द्वैहायनं। त्रैहायनं। यौवनं। स्थाविरं। श्रोत्रियस्य यलोपश्च। श्रौ
त्रं। कुशलनिपुणचपलपिशुनकुतूहलक्षेत्रज्ञाः युवादिषु ब्राह्मणादिषु च पठ्यंते। कौशल्यं
कौशलमित्यादि। इगंताच्च लघुपूर्वात्। शुचेर्भावः कर्म वा शौचं। मौनं। योपधाद्गुरूपोत्तमाद्वु
ञ्। रमणीयकं। आभिधानीयकं। सहायाद्वा। साहाय्यं। साहायकं। द्वंद्वमनोज्ञादिभ्यश्च। शै
क्षोपाध्यायिका। मानोज्ञकं॥ ॥इति नञ्स्नञोरधिकारः॥ धान्यानां भवने क्षेत्रे खञ्। मुद्गा ॥१५॥
नां भवनं क्षेत्रं मौद्गीनं। व्रीहिशाल्योर्ढक्। व्रैहेयं। शालेयं। यवयवकषष्टिकाद्यत्। यव्यं। य

वक्यं। षष्टिक्यं। विभाषा तिलमाषोमाभंगाणुभ्यः। यत्। पक्षे खञ्। तिल्यं। तैलीनं। माष्यं। माषी
णं। उम्यं। औमीनं। भंग्यं। भांगीनं। अणव्यं। आणवीनं। तत्सर्वादेः पथ्यंगकर्मपत्रपात्रं व्याप्नोति
सर्वादेः पथ्याद्यंताद्द्वितीयांतात् खः। सर्वपथीनः। सर्वान्पथो व्याप्नोति सर्वपथीनः। सर्वांगीणः। सर्वकर्मीणः
सर्वपत्रीणः। सर्वपात्रीणः। हैयंगवीनं संज्ञायां। नवनीते निपातोयं। तस्य पाकमूले पील्वा
दिकर्णादिभ्यः कुणब्जाहचौ। पीलूनां पाकः पीलुकुणः। कर्णस्य मूलं कर्णजाहं। पक्षात्तिः।
मूले इति वर्त्तते। पक्षस्य मूलं पक्षतिः। तेन वित्तश्चुंचुप्चणपौ। यकारः प्रत्यययोरादौ लुप्त
निर्दिष्टः। तेन चस्य नेत्वं। विद्यया वित्तः विद्याचुंचुः। विद्याचणः। वेःशालच्छंकटचौ। क्रि
या विशिष्टसाधनवाचकात् स्वार्थे। विस्तृतं। विशालं। विशंकटं। संप्रोदश्च कटच्। संकटं। प्र
कटं। उत्कटं। नाद्धिकटं। अलाबूतिलोमाभंगाभ्यो रजस्युपसंख्यानं। अलाबूनां रजः
अलाबूकटं। तिलकटं। गोष्ठजादयः स्थानादिषु पशुनामभ्यः। गवां स्थानं गोगोष्ठं। अश्वगोष्ठं।

मकौ०त संघाते कटच्। अवीनां संघातः अविकटः। विस्तारे पटच्। अविपटः। द्वित्वे गोयुगच्। द्वौ उष्ट्रौ उष्ट्र
॥१६॥ गोयुगं। षट्त्वे षड्गवच्। अश्वषड्गवं। स्नेहे तैलच्। तिलतैलं। सर्षपतैलं। अवात्कुटारच्च। चात्कटच्।
अवाचीनः। अवकुटारः। अवकटः। नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः। अवादित्येव। नतं
नमनं नासिकायास्तत्संबन्धात् अवटीटं। अवनाटं। अवभ्रटं। तद्योगान्नासिका अवटीटा। पुरुषोऽवटी
टः। उपाधिभ्यां त्यकन्नासन्नारूढयोः। पर्वतस्यासन्नं स्थलं उपत्यका। आरूढं स्थलमधि
त्यका। कर्मणि घटोऽठच्। कर्मणि घटते कर्मठः। तदस्य संजातं तारकादिभ्य इतच्। तारकाः
संजाता अस्य तारकितं नभः। पंडितः। आकृतिगणोऽयं। प्रमाणे द्वयसज्दघ्नञ्मात्रचः। ऊ
रू प्रमाणमस्य ऊरुद्वयसं। ऊरुदघ्नं। ऊरुमात्रं। प्रथमश्च द्वितीयश्च ऊर्ध्वमाने मतौ मम।
ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्व ॥१६॥
तः। पुरुषहस्तिभ्यामण् च। पुरुषः प्रमाणमस्य पौरुषं। पुरुषद्वयसं। यत्तदेतेभ्यः परिमा

णे वतुप्। यत्परिमाणमस्य यावान्। तावान्। एतावान्। किमिदंभ्यां वो घः। आभ्यां वतुप् वस्य घः
इदंकिमोरीश्की। दृग्दृशवतुषु। कियान्। इयान्। किमः संख्यापरिमाणे डति च। चाद्वतुप् वस्य
घः। का संख्या येषां ते कति। कियंतः। संख्याया अवयवे तयप्। पंच अवयवा अस्य पंचतयं। द्वि
त्रिभ्यां तयस्यायज्वा। द्वयं। द्वितयं। त्रयं। त्रितयं। उभादुदात्तो नित्यं। उभयं। तदस्मिन्नधिक
मिति दशान्ताड्डः। एकादश अधिका अस्मिन्नेकादशं। शतसहस्रयोरेव। नेह। एकादशाधिका
अस्यां विंशत्यां। प्रकृतिप्रत्ययार्थयोः समानजातीयत्वे एवेष्यते। नेह। एकादश माषा अ
धिका अस्मिन् सुवर्णशते। शदन्तविंशतेश्च। डः स्यादुक्तेऽर्थे। त्रिंशदधिका अस्मिन् त्रिंशं शतं।
विंशं। तस्य पूरणे डट्। संख्याया इत्येव। एकादशानां पूरण एकादशः। नान्तादसंख्यादेर्मट्।
डटो मडागमः। पंचानां पूरणः पंचमः। नान्तात्किं। विंशः। असंख्यादेः किं। एकादशः। षट्क
तिकतिपयचतुरां थुक्। डटि। षण्णां पूरणः षष्ठः। कतिथः। कतिपयशब्दस्यात एव डट्। क

ता

सकौ०त तिपयथट्। चतुर्थः। चतुरश्छयतावाद्यक्षरलोपश्च। तुरीयः। तुर्यः। बहुपूगगणसंघस्य तिथुक्।
॥१७॥ डटि। बहुतिथः। वतोरिथुक्। डटि। यावतिथः। द्वेस्तीयः। डटोऽपवादः। द्वयोः पूरणो द्वितीयः। त्रेः
संप्रसारणं च। तृतीयः। इह हलोऽन्तेति दीर्घो न। द्वितीयत्तृतीयेति निर्देशात्। विंशत्यादिभ्यस्तम
डन्यतरस्यां। डटः। विंशतितमः। विंशः। एकविंशतितमः। एकविंशः। नित्यं शतादिमासार्धमास
संवत्सराच्च। शतस्य पूरणः शततमः। एकशततमः। मासादेरत एव डट्। मासतमः। षष्ट्या
देश्चासंख्यादेः। षष्टितमः। संख्यादेस्तु विंशत्यादिभ्य इति विकल्प एव। एकषष्टः। एकष
ष्टितमः। मतौ छः सूक्तसाम्नोः। मत्वर्थे छः। अछावाकशब्दोऽस्तिन्नस्मिन्न अछावाकीयं सूक्तं।
वारवंतीयं साम। श्रोत्रियंश्छंदोऽधीते। श्रोत्रियः। वेत्यनुवृत्तेः। छांदसः। श्राद्धमनेन भुक्त
मिनिठनौ। श्राद्धी। श्राद्धिकः। पूर्वादिनिः। पूर्वं कृतमनेन पूर्वी। सपूर्वाच्च। कृतपूर्वी। इ ॥१७॥
ष्टादिभ्यश्च। इष्टमनेन इष्टी। अधीती। अनुपद्यन्वेष्टा। अनुपदं न्वेष्टा। अनुपदी गवां। ने
म

भूमनिंदाप्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवंति मतुबादयः।१

साक्षाद्द्रष्टरि संज्ञायां। साक्षाद्द्रष्टा साक्षी। तदस्यास्त्यस्मिन्निति मतुप्। गावोऽस्यास्मिन्वा संति गोमा
न्। तसौ मत्वर्थे। तांतसांतौ भसंज्ञौ स्तो मत्वर्थे प्रत्यये। संप्रसारणं। विदुष्मान्। गुणवचनेभ्यो मतुपो लुगि
ष्टः। शुक्लो गुणोऽस्यास्ति शुक्लः पटः। कृष्णः। प्राणिस्थादातो लजन्यतरस्यां। चूडालः। चूडावान्। प्राणिस्था
त्किं। शिखावान्दीपः। प्राण्यंगादेव। नेह। मेधावान्। सिध्मादिभ्यश्च। लच्वा। सिध्मलः। सिध्मवान्।
वातदंतबलललाटानामूङ् च। वातूलः। दंतूलः। दंतुलः। बलूलः। ललाटूलः। वत्सांसाभ्यां कामब
ले। लच् स्यात् यथासंख्यं कामवति बलवति चार्थे। वत्सलः। अंसलः। फेनादिलच्च। वाल्लश्। अन्यतर
स्यां ग्रहणं मतुप्समुच्चयार्थमनुवर्तते। फेनिलः। फेनलः। फेनवान्। लोमादिपामादिपिच्छादिभ्यः
शनेलचः। लोमादिभ्यश्शः। लोमशः। लोमवान्। रोमशः। रोमवान्। पामादिभ्यो नः। पामनः। अंगात्कल्याणे।
अंगना। लक्ष्म्या अच्च। लक्ष्मणः। पिच्छादिभ्य इलच्। पिच्छिलः। पिच्छवान्। उरसिलः। उरस्वान्। प्र
ज्ञाश्रद्धार्चावृत्तिभ्यो णः। प्राज्ञो व्याकरणे। प्राज्ञः। श्राद्धः। आर्चः। वृत्तेश्च। वार्त्तः। तपःसहस्राभ्यां विनीनी।

सकौ॰त ॥१८॥ विनीन्यो रिकारो नकारपरित्राणार्थः। तपस्वी। सहस्री। अण् च। तापसः। साहस्रः। ज्योत्स्नादिभ्य उप
संख्यानं। ज्योत्स्नः। तामिस्रः। सिकताशर्कराभ्यां च। सैकतो घटः। शार्करः। देशे लुबिलचौ च। चान्
मतुप्। प्रच। सिकताः सन्त्यस्मिन्देशे सिकता। सिकतिलः। सैकतः। सिकतावान्। एवं शर्करेत्या
दि। दंत उन्नत उरच्। उन्नता दंता यस्य स दंतुरः। ऊषसुषिमुष्कमधो रः। ऊषरः। सुषिरः। मुष्को
ऽः। मुष्करः। मधुरः। रप्रकरणे खमुखकुंजेभ्य उपसंख्यानं। खरः। मुखरः। कुंजो हस्तिहनुः। कुं
जरः। नगपांसुपांडुभ्यश्च। नगरः। पांसुरः। पांडुरः। कच्छ्वा ह्रस्वत्वं च। कच्छुरः। द्युद्रुभ्यां मः। द्युमः।
द्रुमः। केशाद्वोन्यतरस्यां। प्रकृतेनान्यतरस्यांग्रहणेन मतुपि सिद्धे पुनर्ग्रहणादिनिठनोः स
मावेशार्थं। केशवः। केशी। केशिकः। केशवान्। अन्येभ्योपि दृश्यते। मणिवः। नागविशेषः।
हिरण्यवो निधिविशेषः। अर्णसो सलोपश्च। अर्णवः। गांड्यजगात्संज्ञायां। ह्रस्वदीर्घ ॥१८॥
योर्यणा तंत्रेण निर्देशः। गांडीवं। गांडिवं। अजगवं पिनाकः। कांडांडादीरन्नीरचौ। कांडीरः।

अन्येभ्योपि दृश्यते। भ्रातृवलः। पुत्रवलः २

आंडीरः। रजःकृष्यासुतिपरिषदो वलच्। रजस्वला। कृषीवलः। वल इति दीर्घः। आसुतीवलः। परि
षद्वलः। दंतशिखात्संज्ञायां। दंतावलो हस्ती। शिखावलः केकी। अत इनिठनौ। दंडी। दंडिकः। व्रीह्या
दिभ्यश्च। व्रीही। व्रीहिकः। तुंदादिभ्य इलच्च। चादिनिठनौ मतुप् च। तुंदिलः। तुंदी। तुंदिकः। तुंदवान्।
रूपादाहतप्रशंसयोर्यप्। आहतं रूपमस्यास्तीति रूप्यः कार्षापणः। प्रशस्तं रूपमस्यास्तीति
रूप्यो गौः। अन्येभ्योपि दृश्यते। हिम्याः पर्वताः। गुण्याः ब्राह्मणाः। अस्मायामेधास्रजो वि
निः। यशस्वी। यशस्वान्। मायावी। व्रीह्यादिपाठात् मायी। मायिकः। स्रग्वी। शृंगवृंदाभ्यामा
रकन्। शृंगारकः। वृंदारकः। फलबर्हाभ्यामिनच्। फलिनः। बर्हिणः। हृदयाच्चालुरन्यतरस्यां।
हृदयालुः। हृदयी। हृदयिकः। हृदयवान्। शीतोष्णतृप्रेभ्यस्तदसहने। शीतं न सहते शीतालुः।
उष्णालुः। तृप्रं पुरोडाशः। तं न सहते तृप्रालुः। तप पर्वमरुद्भ्यां। पर्वतः। मरुत्तः। ऊर्णाया
युस्। ऊर्णायुः। वाचो ग्मिनिः। वाग्मी। आलजाटचौ बहुभाषिणि। कुत्सित इति वक्तव्यं। कु

मकौ०न ॥१९॥ क्षितं बहु भाषते वा वाचालो वाचाटः । यस्तु सम्यग्बहु भाषते स वाग्मी । स्वस्वा । स्वामिन्नैश्वर्ये । ऐश्व
र्यवाचकात्स्वशब्दान्मत्वर्थे आमिनिच् । स्वामी । अर्शआदिभ्योऽच् । अर्शांस्यस्य विद्यन्ते अर्शसः
। आकृतिगणोऽयं ॥ वातातीसाराभ्यां कुक् । वातकी । अतीसारकी ॥ पिशाचाच्च । पिशाच
की । हस्ताज्जातौ । हस्ती । वर्णाद्ब्रह्मचारिणि । वर्णी । कंशंभ्यां बभयुस्तितुतयसः । कमित्युदकसु
खयोः । शमिति सुखे । आभ्यां सप्त प्रत्ययाः स्युः । युस्यसोः सकारः पदत्वार्थः । कंबः । कंभः । कंयुः । कं
तिः । कंतुः । कंतः । कंयः । एवं शंवइत्यादि । तुंदिवलिवटेर्भः । तुंदिभः । वलिभः । वटिभः । अहंशुभ
मोर्युस् । अहंयुः अहंकारवान् । शुभंयुः शुभान्वितः ॥ ॥ इति मत्वर्थीयाः ॥ ॥ प्राग्दि
शो विभक्तिः । दिक्शब्देभ्य इत्यतः प्राग्वक्ष्यमाणाः प्रत्यया विभक्तिसंज्ञाः स्युः ॥ अथ स्वार्थि
काः ॥ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः । किमः सर्वनाम्नो बहुशब्दाच्चेति प्राग्दिशोऽधिक्रि ॥१९॥
यते । पंचम्यास्तसिल् । पंचम्यंतेभ्यः किमादिभ्यस्तसिल् स्याद्वा । कुतिहोः । किमः कुः स्या

त्तादौ हादौ च विभक्तौ । कुतः कस्मात् । इदम इश् । प्राग्दिशीये । इतः । अन् । एतदः प्राग्दिशीये । अनेकाल्
त्वात्सर्वादेशः । अतः । अमुतः । यातः । यतः । ततः । बहुतः । द्व्यादेस्तु । द्वाभ्यां । पर्यभिभ्यां च । तसिल् ।
परितः । सर्वत इत्यर्थः । अभितः उभयत इत्यर्थः । सप्तम्यास्त्रल् । कुत्र । यत्र । बहुत्र । इदमो हः ।
त्रलोपवादः । इह । किमोत् । वा स्यात् । क्वाति । किमः क्व । कुत्र । इतराभ्योऽपि दृश्यंते । पंचमी सप्तमीत
रविभक्त्यंतादपि तसिलादयो दृश्यंते । दृशिग्रहणाद्भवदादियोगएव । स भवान् । ततो भवान् ।
तत्र भवान् । तं भवंतं । ततो भवंतं । तत्र भवंतं । एवं दीर्घायुः । देवानांप्रियः । आयुष्मान् । सर्वैकान्य
किंयत्तदः काले दा । सप्तम्यंतेभ्य एभ्यः कालार्थे दा स्यात् । सर्वस्य सोऽन्यतरस्यां दि । दाप्राग्दि
शीये सर्वस्य सो वा । सर्वस्मिन्काले सदा । सर्वदा । अन्यदा । कदा । यदा । तदा । काले किं । सर्वत्र
देशे । इदमो र्हिल् । सप्तम्यंतात् । हस्यापवादः । एतेतौ रथोः । इदम एत इत् एतौ स्तो रेफादौ थकारादौ

मकौ०त च प्राग्दिशीयेपरे। अस्मिन्काले एतर्हि। काले किं। इह देशे। अधुना। इदमः निपात्यते। इदानींच। इ
॥२०॥ दमो दानीं प्रत्ययः काले। इदानीं। तदो दाच। तदा। तदानीं। अनद्यतने र्हिलन्यतरस्यां। कर्हि। कदा।
यर्हि। यदा। तर्हि। तदा। एतदः। एतेतौ रथोः। रेफादौ थकारादौ च प्राग्दिशीये। एतस्मिन्का
ले एतर्हि। सद्यः परुत्परार्यैषमः परेद्यव्यद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरध
रेद्युरुभयेद्युरुत्तरेद्युः॥ एते निपात्यंते। द्युश्चोभयाद्वक्तव्यः। उभयद्युः। प्रकारवचने थाल्।
प्रकारवृत्तिभ्यः किमादिभ्यस्थाल् तेन प्रकारेण तथा। इदमस्थमुः। थालोपवादः। एतदोपि
वाच्यः। अनेन एतेन वा प्रकारेण इत्थं। किमश्च। केन प्रकारेण कथं॥ ॥इतिप्राग्दि
शीयाः४॥ ॥दिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः। सप्तम्यां ॥२०॥
द्यंतेभ्यो दिशि रूढेभ्यः दिग्देशकालवृत्तिभ्यः स्वार्थेऽस्तातिः। पूर्वाधरावराणामसिपुरधव

श्चैषां। एभ्यो अस्तात्यर्थे असिः तद्योगे चैषां क्रमात्पुरधवश्चादेशाः स्युः॥ अस्तातिच। पूर्वादीनां
पुरादयः स्युः। पूर्वस्यां पूर्वस्याः पूर्वा वा दिक्। पुरः। पुरस्तात्। अधः। अधस्तात्। अवः। विभाषावरस्य। अ
स्तातावव्। अवस्तात्। अवरस्तात्। एवं देशे काले च। दिशि रूढेभ्यः किं। ऐंद्र्यां वसति। सप्तम्याद्यं
तेभ्यः किं। पूर्वं ग्रामं गतः। दिगादिवृत्तिभ्यः किं। पूर्वस्मिन्गुरौ वसति। अस्तातिरिति ज्ञापकादसिर
स्तातिं न बाधते। दक्षिणोत्तराभ्यामतसुच्। अस्तातेरपवादः। दक्षिणतः। उत्तरतः। विभाषापरा
वराभ्यां। परतः परस्तात्। अवरतः। अवरस्तात्। अंचेर्लुक्। अंचत्यंताद्दिक्शब्दादस्तातेर्लुक्।
प्राक्। उदक्। उपर्युपरिष्टात्। निपातावेतौ। पश्चात्। तथा। उत्तराधरदक्षिणादातिः। उत्तरात्। दा।
अधरात्। दक्षिणात्। एनबन्यतरस्यामदूरेपंचम्याः। उत्तरादिभ्य एनब्वास्यादवध्यवधिमतोः
सामीप्ये पंचम्यंतात्तु न। उत्तरेण। अधरेण। दक्षिणेन। पक्षे यथास्वं प्रत्ययाः। इह केचिदुत्त
रादीननुवर्त्यादिक्छब्दमात्रेनेपमाहुः। पूर्वेण ग्रामं। दक्षिणाच्च। अस्तातेर्विषये॥
दे

मकौ० त ॥२१॥ दक्षिणादीवसति। अपंचम्याइत्येव। दक्षिणादागतः। आहि च दूरे। दक्षिणाहि। दक्षि
णा। उत्तराच्च। उत्तराहि। उत्तरा। संख्याया विधार्थे धा। क्रियाप्रकारे वर्त्तमानात्संख्याशब्दात्स्वार्थे
धा स्यात्। चतुर्धा। एकाद्धो ध्यमुञन्यतरस्यां। एकध्यं। एकधा। द्वित्र्योश्च धमुञ्। आभ्यां धा इत्य
स्य धमुञ्वा। द्वैधं। द्विधा। त्रैधं। त्रिधा। एधाच्च। द्वेधा। त्रेधा। याप्ये पाशप्। कुत्सितो भिषक्पाशः। ती भिषक्
यादिकः स्वार्थे वा वाच्यः। द्वितीयीकः। द्वितीयः। न विद्यायाः। द्वितीया विद्येत्येव। एकादाकिनि
चासहाये। चाल्लुकौ। एकः। एकाकी। एककः। भूतपूर्वे चरट्। आढ्यो भूतपूर्वः। आढ्यचरः।
षष्ठ्या रूप्य च। षष्ठ्यंताद्भूतपूर्वेर्थे रूप्यः स्याच्चरट् च। कृष्णस्य भूतपूर्वो गौः कृष्णरूप्यः। कृष्ण
चरः। अतिशायने तमबिष्ठनौ। अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामति
शयेनाढ्य आढ्यतमः। लघुतमो लघिष्ठः। तिङश्च। तिङंतादतिशये द्योत्ये तमप्स्या ॥२१॥
त्। तरप्तमपौ घः। किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे। किम एदंतात्तिङोऽव्ययाच्च यो घस्तद
एतौ घसंज्ञौ स्तः

मुः
तादाम्स्यान्न तु द्रव्यप्रकर्षे। किंतमां। पचतितमां। उच्चैस्तमां। द्रव्यप्रकर्षे तु। उच्चैस्तमस्तरुः। द्विवचनविभज्यो
ध पपदे तरबीयसुनौ। द्वयोरेकस्यातिशये द्योत्ये सुप्तिङंतादेतौ स्तः। पूर्वयोरपवादः। अयमनयोरतिशयेन
लघुः लघुतरो लघीयान्। उदीच्याः प्राच्येभ्यः पटुतराः पटीयांसः। अजादी गुणवचनादेव। इष्ठन्नीय
सुनौ। नेह। पाचकतरः। पाचकतमः। प्रशस्यस्य श्रः। अस्य श्र आदेशः स्यादजाद्योः। प्रकृत्यै
काच्। इष्ठादिष्वेकाच्प्रशस्यस्य स्यात्। श्रेष्ठः। श्रेयान्। ज्य च। प्रशस्यस्य ज्यादेशः इष्ठेयसोः। ज्येष्ठः।
ज्यादादीयसः। आदेः परस्य। ज्यायान्। वृद्धस्य च। आदेशः स्यादजाद्योः। ज्येष्ठः। ज्यायान्। अंतिकबा
ढयोर्नेदसाधौ। अजाद्योः। नेदिष्ठः। नेदीयान्। साधिष्ठः। साधीयान्। स्थूलदूरयुवह्रस्वक्षि
प्रक्षुद्राणां पृथ्वादित्वात् ह्रसिमा। क्षेपिमा। यणादिपरं पूर्वस्य च गुणः। एषां यणादि लुप्यते पूर्व पर
स्य च गुणः इष्ठादिषु। स्थविष्ठः। दविष्ठः। यविष्ठः। ह्रसिष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवमीयसुन्। ह्र
स्वक्षिप्रक्षुद्राणां पृथ्वादित्वाद्ध्रसिमा। क्षेपिमा। क्षोदिमा। प्रियस्थिरस्फिरोरुबहुलगु
रुवृद्धतृप्रदीर्घवृंदारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रप्द्राघिवृंदाः। प्रियादीनां क्रमात् प्रादयः स्युः
प्रा

मकौ०त इष्ठादिषु। प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रपिष्ठः। द्राघिष्ठः। वृंदिष्ठः। एवमी
॥२२॥ यसुन्। प्रियोरुबहुलगुरुदीर्घाणांपृथ्वादित्वात्प्रेमेत्यादि। बहोर्लोपो भू च बहोः। बहोः परयोरिमे
यसोर्लोपः स्याद्बहोश्च भूरादेशः। भूमा। भूयान्। इष्ठस्य यिट् च। बहोः परस्य इष्ठस्य लोपः यिडा
गमश्च। भूयिष्ठः। विन्मतोर्लुक्। इष्ठेयसोः। अतिशयेन स्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशये
लगवान् नत्वग्विष्ठः। त्वचीयान्। प्रशंसायां रूपप्। सुबन्तात्तिङन्ताच्च। प्रशस्तः पटुः पटुरूपः। पचतिरू
पं। ईषदसमाप्तौ कल्पब्देश्यदेशीयरः। ईषदूनो विद्वान् विद्वत्कल्पः। विद्वद्देश्यः। विद्वद्देशी
यः। पचतिकल्पं। विभाषा सुपो बहुच् पुरस्तात्तु। ईषदूनः पटुः बहुपटुः। पटुकल्पः। सुपः किं।
यजतिकल्पं। प्रागिवात्कः। इवे प्रतिकृतावित्यतः प्राक् काधिकारः। अव्ययसर्वनाम्नामकच्प्रा
प क्टेः। प्रागिवादः। तिङश्चेत्यनुवर्तते। कस्यापवादः। कान्ताव्ययस्य दादेशोऽकच्च। अज्ञाते। क ॥२२॥
स्यायमश्वोऽश्वकः। उच्चकैः। नीचकैः। सर्वके। पचतकि। धकित्। कुत्सिते। कुत्सितोऽश्वोऽ
प्रकारवचने जातीयर्। प्रकारवति चायं थाल् तु प्रकारमात्रे। पटुप्रकारः पटुजातीयः। ३

श्वकः। अल्पे। अल्पं तैलं तैलकं। ह्रस्वे। ह्रस्वो वृक्षो वृक्षकः। अस्मिन्प्रकरणे हलादौ प्रत्यये द्विती
यादचः परस्य लोपो वा वाच्यः। देवदत्तकः। देवकः। लोपः पूर्वपदस्य च। दत्तकः। विनापि प्रत्ययं पू
र्वोत्तरपदयोर्लोपो वा वाच्यः। सत्यभामा। भामा। सत्या। कुटीशमीशुंडाभ्यो रः। ह्रस्वा कुटी कुटी
रः। शमीरः। शुंडारः। कुत्वा डुपच्। ह्रस्वा कुतूः कुतुपः। कृत्तिः स्नेहपात्रं ह्रस्वा सा कुतुपः। यु
मान्। कासूगोणीभ्यां ष्टरच्। आयुधविशेषः कासूः ह्रस्वा सा कासूतरी। गोणीतरी। वत्सोक्षा
श्च श्वर्षभेभ्यश्च तनुत्वे। वत्सतरः। उक्षतरः। ऋषभतरः। किंयत्तदो निर्धारणे द्वयोरेकस्य डतर
च्। अनयोः कतरो वैष्णवः। यतरः। ततरः। वा बहूनां जातिपरिप्रश्ने डतमच्। जातिपरिप्र
श्न इति प्रत्याख्यातमाकरे। कतमो भवतां कठः। यतमः। ततमः। वाग्रहणमकजर्थं। एका
च्च प्राचां। डतरच् डतमच् स्यात्। न अनयोरेकतरो मैत्रः। एषामेकतमः॥ ॥इति प्रागि
वीयाः॥ ॥इवे प्रतिकृतौ। कन् स्यात्। अश्व इव प्रतिकृतिः। अश्वकः। शर्करादिभ्योऽण् शा

मकौ०त ॥२३॥

खेवशारव्यः। जघन्यः। अग्र्यः। शरण्यः। कुशाग्राच्छः। कुशाग्रीयः। तत्प्रकृतवचनेमयट्। प्राचुर्ये
ण प्रस्तुतं प्रकृतं तस्य वचनं प्रतिपादनं। भावे अधिकरणे वा ल्युट्। आद्ये प्रकृतमन्नं अन्नमयं।
अपूपमयं। द्वितीये अन्नमयो यज्ञः। अपूपमयं पर्व। संख्यायाः क्रियाभ्यावृत्तिगणने कृत्व
सुच्। अभ्यावृत्तिर्जन्मक्रियाजन्मगणनकृतेः संख्यायाः स्वार्थे कृत्वसुच्। पंचकृत्वो भुंक्ते। दं
संख्यायाः किं। भूरिवारान्भुंक्ते। द्वित्रिचतुर्भ्यः सुच्। कृत्वसुचोपवादः। द्विर्भुंक्ते॥ त्रिर्भुंक्ते।
रात्सस्य। चतुः। एकस्य सकृच्च। सकृदादेशः वा सुच्। सकृद्भुंक्ते। देवतान्तात्तादर्थ्ये य
त्। तदर्थ एव तादर्थ्यं। अत एव स्वार्थे ष्यञ्। अग्निदेवतायै इदं अग्निदेवत्यं। पितृदेवत्यं।
पादार्घाभ्यां च। पादार्थमुदकं पाद्यं। अर्घ्यं। अतिथेर्ञ्यः। अतिथये इदं आतिथ्यं। नवस्य
नू आदेशः त्नप्तनप्खाश्च प्रत्ययाः। स्वार्थे। नूत्नं। नूतनं। नवीनं। भागरूपनामभ्यो ॥२३॥
धेयः। भागधेयं। रूपधेयं। नामधेयं। आग्नीध्रसाधारणादञ्। आग्नीध्रं। साधारणं।

देवात्तल्। देव एव देवता। अवेः कः। अविरेव अविकः। यावादिभ्यः कन्। याव एव यावकः। मणि
कः। सर्वप्रातिपदिकेभ्यः स्वार्थे कन्। बहुतरकं। मृदस्तिकन्। मृदेव मृत्तिका। सस्नौ प्रशंसायां।
कृपोपवादः। प्रशस्ता मृत्। मृत्सा। मृत्स्ना। प्रज्ञादिभ्यश्च। अण् स्यात्। प्रज्ञ एव प्राज्ञः। दैवतः।
बांधवः। पूगाञ्ञ्योऽग्रामणीपूर्वात्। स्वार्थे। इवार्थे निवृत्तः। नानाजातीया अनियतवृत्तयोऽर्थ
कामप्रधानाः संघाः पूगाः। लौहितध्वज्यः। ञ्यादयस्तद्राजाः। तद्राजस्येति लुक्। लोहित
ध्वजाः। व्रातेति ञ्यः। कापोतपाक्यः। कपोतपाकाः। कौंजायनाः। ब्राध्नायनाः इत्यादि। ब
ह्वल्पार्थान्मंगलामंगलवचनं। नेह। बहूनि ददात्यनिष्टेषु। अल्पमाभ्युदयिकेषु। संख्यै
कवचनाच्च वीप्सायां। द्वौ द्वौ ददाति द्विशः। माषं माषं माषशः। प्रस्थशः। परिमाणशब्द
तावेकार्था एव। संख्यैकवचनात्किं। घटं घटं ददाति। वीप्सायां किं। द्वौ ददाति। कारकादि
त्येव। द्वयोः। स्वामी। प्रतियोगे पंचम्यास्तसिः। प्रतिना कर्मप्रवचनीयेन योगे या पंचमी वि

सकौ०त

॥२४॥ हितादंतात्तसिः। प्रद्युम्नः कृष्णतः प्रति। आद्यादिभ्य उपसंख्यानं। आदौ। आदितः। मध्यतः। पृष्ठतः।
पार्श्वतः। आकृतिगणोयं। स्वरेण स्वरतः। वर्णतः। कृभ्वस्तियोगे संपद्यकर्तरि च्विः। अभूततद्भाव इति वक्त
व्यं। विकारात्मतां प्राप्नुवत्यां प्रकृतौ वर्तमानात् विकारशब्दात्स्वार्थे च्विर्वा स्यात्करोत्यादिभिर्योगे। अ
स्य च्वौ। इत्। अकृष्णः कृष्णः संपद्यते तं करोति कृष्णीकरोति। ब्रह्मीभवति। गंगीस्यात्। अव्ययस्य च्वा
वीत्वं नेति वाच्यं। दोषाभूतमहः। दिवाभूता रात्रिः। क्यच्व्योश्च। हलः परस्य आपत्यस्य यस्य लोपः क्य
च्व्योः परे। गार्गीभवति। च्वौ च। दीर्घः। शुचीभवति। पटूस्यात्। अरुर्मनश्चक्षुश्चेतोरहोरजसां लोप
श्च। वा च्विः। अरूकरोति। उन्मनीकरोति। उच्चक्षूकरोति। विचेतीकरोति। विरहीकरोति। विरजीकरोति। विभा
षा साति कार्त्स्न्ये। च्विविषये सातिर्वा स्यात्साकल्ये। सात्पदाद्योः। कृत्स्नं शस्त्रमग्निः संपद्यते।
अग्निसाद्भवति। अग्नीभवति। कार्त्स्न्ये किं। एकदेशेन शुक्लीभवति पटः। अभिविधौ सं ॥२५॥
पदा च। संपदा च कृभ्वस्तियोगे सातिर्वा अभिव्याप्तौ। पक्षे कृभ्वस्तियोगे च्विः। संपदा तु वाक्यमेव।

अग्निसात्संपद्यते अग्निसाद्भवति शस्त्रं। अग्नीभवति। जलसात्संपद्यते जलीभवति लवणं। त
दधीनवचने। साति कृभ्वस्तिभिः संपदा च योगे। राजसात्करोति राजाधीनमित्यर्थः। देये त्रा च।
तदधीने देये त्रा स्यात्साति च कृभ्वादियोगे। विप्राधीनं देयं करोति विप्रत्राकरोति। विप्रत्रा संप
द्यते। पक्षे विप्रसात्करोति। देये किं। राजसाद्भवति राष्ट्रं। देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वि
तीयासप्तम्योर्बहुलं। एभ्यो द्वितीयान्तेभ्यः सप्तम्यन्तेभ्यश्च त्रा स्यात्। देवत्रा वंदे। रमेव। बहुलो
क्तेरन्यत्रापि। बहुत्रा जीवतो मनः। अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच्। द्व्यजवरं न्यूनं
न तु ततो न्यूनं। अनेकाजिति यावत्। तादृशमर्धं यस्य तस्मात् डाच् कृभ्वस्तिभिर्योगे। डाचि ब
हुलं द्वे भवत इति डाचि विवक्षिते द्वित्वं। नित्यमाम्रेडिते डाचीति वक्तव्यं। डाच्परं यदाम्रेडितं त
स्मिन्परे पूर्वपरयोर्वर्णयोः पररूपं स्यात्। इति तपयोः पः। पटपटाकरोति। अव्यक्तानुक
रणात् किं। दृषत्करोति। द्व्यजवरार्धात् किं। श्रत्करोति। अवरेति किं। खरटखरटाक

सपत्रानिष्पत्रादतिव्यथने सपत्राकरोति मृगं सपुंखशरप्रवेशनेन सपत्रं करोतीत्यर्थः

सकौ०त रोति। अनितौ किं। पटितिकरोति। कृञोद्वितीयतृतीयशंबबीजात्कृषौ। द्वितीयादिभ्यो डाच्कृञ्
॥२५॥ एवयोगे। बहुलो कौरव्य कानुकरणादन्यस्यडाचिनाद्वित्वं। द्वितीयं तृतीयं कर्षणं करोति द्विती
याकरोति तृतीयाकरोति। शंबाकरोति। बीजाकरोति। संख्यायाः गुणांतायाः। द्विगुणा
करोतिक्षेत्रं। समयाच्च यापनायां। कृषावितिनिवृत्तं। समयाकरोति। कालं यापयती
त्यर्थः। निष्पत्राकरोति। सपुंखस्यशरस्यापरपार्श्वे निर्गमानात्निष्पत्रं करोतीत्यर्थः।
अतिव्यथने किं। सपत्रं निष्पत्रं करोति भूतलं। निष्कुलान्निष्कोषणे। निष्कुलाकरोति दाडि
मं। निर्गतं कुलमंतरवयवानां समूहो यस्मादिति बहुव्रीहिः डाच्। सुखप्रियादानुलो
म्ये। सुखाकरोति। प्रियाकरोति गुरुं। अनुकूलाचरणेनानंदयतीत्यर्थः। दुःखात्प्रातिलो ॥२५॥
म्ये। दुःखाकरोति स्वामिनं। पीडयतीत्यर्थः। शूलात्पाके। शूलाकरोति। शूलेन पचतीत्यर्थः।

सस्वा सत्यादशपथे। करोति भांडं वणिक्। कृतव्यमिति तथ्यं। करोतीत्यर्थः। शपथे तु सत्यं करोति
विप्रः। मद्रात्परिवापणे। मद्रशब्दो मंगलार्थः। परिवापणं मुंडनं। मद्राकरोति कुमारं। मां
गल्यमुंडनेन संस्करोतीत्यर्थः। भद्राच्चेति वक्तव्यं। भद्राकरोति। अर्थः प्राग्वत्। परिवापणे किं।
भद्रं करोति। मद्रं करोति॥ ॥छ ॥इतितद्धितप्रक्रिया॥ ॥छ॥ सर्वस्य द्वे इत्यधिकृ
त्य। परेर्वर्जने। परिपरि वंगेभ्यो वृष्टो देवः। उपर्यध्यधसः सामीप्ये। उपर्युपरि ग्रामं। ग्रा
मस्योपरिष्टात्समीपदेशे इत्यर्थः। अध्यधिसुखं। सुखस्योपरिष्टात्समीपकाले दुःख
मित्यर्थः। अधोधो लोकं। लोकस्याधस्तात्समीपदेश इत्यर्थः। वाक्यादेरामंत्रितस्या
सूयासंमतिकोपकुत्सनभर्त्सनेषु। सुंदरसुंदर वृथा ते सौंदर्यं। देवदेव वंद्योसि। दु
र्विनीत दुर्विनीत इदानीं ज्ञास्यसि। धानुष्क धानुष्क वृथा ते धनुः। चोरचोर घातयिष्या

मकौ॰ त
॥२८॥

मित्वी॥ सर्वकबहुव्रीहिवत्॥ द्विरुक्त एकशब्दो बहुव्रीहिवत्। तेन सुब्लोपः पुंवद्भावो। एकैकम
क्षरं। एकैकया आहुत्या॥ आबाधे च॥ पीडायां द्विरुक्तः बहुव्रीहिवच्च। गतगतः। गतगता। प्र
कारे गुणवचनस्य। सादृश्ये द्योत्ये गुणवचनस्य द्वे स्तः तच्च कर्मधारयवत्। पटुपट्वी। प
टुपटुः। पटुसदृशः। ईषत्पटुरिति यावत्॥ आनुपूर्व्ये द्वे वाच्ये। मूले मूले स्थूलः।
संभ्रमेण प्रवृत्तौ यथेष्टमनेकधा प्रयोगो न्यायसिद्धः। सर्प। २। बुध्यस्व। २ सर्प। २ बुध्यस्व
॥ कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये। समासवच्च बहुलं। बहुलग्रहणादन्यपरयोर्न स
मासवत्। इतरशब्दस्य तु नित्यं। असमासवद्भावे पूर्वपदस्थस्य सुपः सुर्वक्तव्यः।
अन्योन्यं विप्रा नमंति। अन्योन्यौ। अन्योन्यान्। अन्योन्येन कृतं। अन्योन्यस्मै द ॥२८॥
त्तमित्यादि। स्त्रीनपुंसकयोरुत्तरपदस्थाया विभक्तेराम्भावो वा वाच्यः। अन्योन्यां अन्यो
दि॰

६
न्यां परस्परां परस्परं इतरेतरां इतरेतरं वा इमे ब्राह्मण्यौ। कुले वा भोजयतः। दलद्वये दा बभौ वृद्धी
बवौ ह्रस्वौ ह्रस्व एव मो। समासे सोरलुक्केति सिद्धं बाहुलकादयं। अन्योन्यमित्यादौ दलद्वये
टाप्। अद्वितेरस्य दृढत्वप्राप्तः। अन्योन्यसंसक्तमहस्त्रियामं। अन्योन्याश्रयः सेपरस्परक्षिसा
हृश्यं। अदृष्टपरस्परैरित्यादौ सोर्लुक् च प्राप्तः। सर्वं बाहुलकात्समाधेयं॥ ॥इति द्विरु
क्तिप्रक्रिया॥ ॥स्त्रियां। अधिकारोऽयं समर्थानामिति यावत्॥ अजाद्यतष्टाप्। अ
आदीनामकारांतस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप्स्यात्। अजा। अजादिभिः स्त्रीत्वस्य
विशेषणान्नेह। पंचाजी। अत्रादि समासार्थसमाहारनिष्ठं स्त्रीत्वं। अतः। खट्वा। अजा। ए
डका। अश्वा। चटका। मूषिका। बाला। वत्सा। होडा। मंदा। विलाता। संभस्त्राजिनशणपिं
डेभ्यः फलात्। संफला इत्यादि। सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्। सत्पुष्पा। प्राक्पुष्पा।
सर्वा २

वन्निति ङ्निरस्कृ निप्वनिपां सामान्यग्रहणं ४

मौ॰कौ॰ श्री प्रत्यक्पुष्पा। शूद्रा चामहत्पूर्वा जातिः। पुंयोगे तु शूद्री। अमहत्पूर्वा किं। महाशूद्री। क्रुंचा।
॥२७॥ उष्णिहा। देवविशा। ज्येष्ठा कनिष्ठा मध्यमेति पुंयोगेपि। कोकिला जातावपि। मूलान्न
ञः। अमूला। ऋन्नेभ्यो ङीप्। कर्त्री। दंडिनी। उगितश्च। ङीप्। भवती। पचंतीति। वनो र च। वन्न
तात्तदंतात् ङीप् स्यात् रश्चांतादेशः। सुत्वानमतिक्रांता अतिसुत्वरी। अतिधीवरी। शर्वरी।
वनो न हशः। एवं वावाब्राह्मणी। राजयुध्वा। बहुव्रीहौ वा। बहुधीवा। बहुधीवरी। पादो
ऽन्यतरस्यां। द्विपदी द्विपात्। टाबृचि। द्विपदा ऋक्। एकपदा। मनः। मन्नंतान्न ङीप्। सी
मा। सीमानौ। अनो बहुव्रीहेः। अन्नंताद्बहुव्रीहेर्न ङीप्। बहुव्रीहौ बहुयज्वा। बहु
६ यज्वानौ। डाबुभाभ्यामन्यतरस्यां। सूत्रद्वयोपात्ताभ्यां डाप् वा। सीमा। सीमे। सीमानौ। ॥२७॥
दामा। दामानौ। अन उपधालोपिनोऽन्यतरस्यां। अन्नंताद्बहुव्रीहेरुपधालोपिनो वा

ङीप्। हयंताद्धातोर्यीवन्तस्मान्नङीप् [illegible] अपनयनेय
बहुपञ्चा। बहुपञ्चे॥ [illegible] स्यर्थः

प॰॥ प्रत्ययस्थात्ककारात्पूर्वस्याकारस्येदाप्यसुपः [illegible]

ङीप्। पक्षे डाप्निषेधौ। बहुराज्ञी। बहुराज्ञ्यौ। बहुराजे। बहुराजानौ। प्रत्ययस्थात्कात्पूर्व
स्यात इदाप्यसुपः। आप्यसुपः परो न चेत्। सर्विका। कारिका। अतः किं। नौका। प्रत्ययस्थात्किं स्त्री॰
शक्नोतीति शका। असुपः किं। बहुपरिव्राजका नगरी। मामकनरकयोरुपसंख्यानं। मामि
का। नरिका। त्यक्त्यपोश्च। दाक्षिणात्यिका। इहत्यिका। नयासयोः। यत्तदोरस्येन्न।
यका। सका। त्यकन श्च निषेधः। उपत्यका। अधित्यका। आशिषि वुनश्च न। जीविका।
भवका। उत्तरपदलोपे न। देवदत्तिका। देवका। क्षिपकादीनां च। क्षिपका। ध्रुवका। चट
कोऽकन्यका। तारका ज्योतिषि। वर्णका तांतवे। वर्तका शकुनौ प्राचां। अष्टकापितृदे
वत्ये [illegible] सूतकापुत्रिकावृंदारकाणां वेति वक्तव्यं। एषामात्वा अकारो भवतीत्यर्थः।
सूतिका। सूतिकेत्यादि। उदीचामातः स्थाने [illegible]

म.कौ॰ स्त्री ॥२८॥

स्थाने योऽस्य कात्पूर्वस्येद्वापि परे। केण इति ह्र
यकपूर्वायाः। यकपूर्वस्य स्त्रीप्रत्ययस्यातः
स्वः। आर्यका। आर्यिका। चटकका। चटकिका। अतः किं। सांकाश्यभवा सांकाश्यिका। यकेति किं।
अश्विका। स्त्रीप्रत्ययः किं। शुभंयिका। अभाषितपुंस्काच्च। एतस्माद्विहितस्यातः स्थाने इद्वा। गं द्वा
गका। गंगिका। आदाचार्याणां। पूर्वविषये। गंगाका। अनुपसर्जनात्। अधिकारो यून
स्तिरित्यभिव्याप्य। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः। अनुपस
र्जनं यट्टिदादि तदंतं यददंतं ततो ङीप्। कुरुचरी। उपसर्जनत्वान्नेह। बहुकुरुचरा। न
दट्। नदी। देवट्। देवी। सौपर्णेयी। ऐंद्री। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री।
पंचतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी। नञ्स्नञीकक्ख्युंस्तरुणतलुनाना श्री २ ॥२८॥
मुपसंख्यानं। स्त्रैणी। पौंस्नी। शाक्तीकी। आढ्यंकरणी। तरुणी। तलुनी। यञश्च। यञं

× इत्यनतराजिसत्तिश्याः झरपर

ताङ्ङीप्। अकारलोपे कृते। हलस्तद्धितस्य। हल उत्तरस्योपधाभूततद्धितयस्य लोप ईति।
गार्गी। प्राचां ष्फ तद्धितः। यञंतात् ष्फो वा। गार्ग्यायणी। वयसि प्रथमे। प्रथमवयोवाचिनोऽदंता
न्ङीप्। कुमारी। वयस्यचरम इति वाच्यं। वधूटी। चिरंटी। द्विगोः। अदंतात् ङीप्। त्रिलोकी
अजादित्वात् त्रिफला। त्र्यनीका। अपरिमाणबिस्ताचितकंबल्येभ्यो न तद्धितलुकि। अपरिमा
णांताद्बिस्ताद्यंताच्च द्विगोर्न ङीप् तद्धितलुकि। पंचभिरश्वैः क्रीता पंचाश्वा। आर्हीयष्ठक्।
अध्यर्धेति लुक्। द्वौ बिस्तौ पचति द्विबिस्ता। द्विकंबल्या। परिमाणात्तु द्व्याढकी। तद्धित
लुकि किं। समाहारे पंचाश्वी। कांडांतात्क्षेत्रे। क्षेत्रेयः कांडांतो द्विगुस्ततो न ङीप् तद्धितलु
कि। द्वे कांडे प्रमाणमस्याः द्विकांडा क्षेत्रभक्तिः। मात्रचः प्रमाणे लो द्विगोर्नित्यमिति लुक्।
क्षेत्रे किं। द्विकांडी रज्जुः। पुरुषात्प्रमाणेऽन्यतरस्यां। प्रमाणे यः पुरुषः तदंताद्विगोर्ङीब्वा

म॰ सि॰ स्त्री तद्धितलुकि। द्वौपुरुषौ प्रमाणमस्याः द्विपुरुषी। द्विपुरुषा वा परिखा। ऊधसोनङ्। ऊधोंतस्य
॥२९॥ बहुव्रीहेरनङ् स्त्रियां। बहुव्रीहेरूधसो ङीष्। ऊधोंतात् बहुव्रीहेः। कुंडोध्नी। स्त्रियांकिं। कुं
डोधो धेनुकं। दामहायनांताच्च। संख्यादेर्बहुव्रीहेर्दामांतात् हायनांताच्च ङीप् स्यात्। द्विदाम्नी। द्वि
हायनी बाला। त्रिचतुर्भ्यां हायनस्य णत्वं वाच्यं। वयोवाचकस्यैव हायनस्य ङीप्णत्वं चेष्यते।
त्रिहायणी। चतुर्हायणी। वयसोन्यत्र त्रिहायना चतुर्हायना शाला। अंतर्वत्पतिवतोर्नु स्प
क्। नांतत्वात् ङीप्। अंतर्वत्नी। पतिवत्नी। गर्भभर्तृसंयोग एवेष्यते। अन्यत्र तु। अंतर
स्वस्यां शालायां घटः। पतिमती पृथ्वी। पत्युर्नो यज्ञसंयोगे। वसिष्ठपत्नी। विभाषा सपूर्व स्प॰
स्य। पतिशब्दांतस्य नो वा। गृहपत्नी। गृहपतिः। दृढपत्नी। दृढपतिः। नित्यं सपत्न्यादिषु। ॥२९॥
सपत्नी। एकपत्नी। वीरपत्नी। पूतक्रतोरै च। पूतक्रतोः स्त्री पूतक्रतायी। वृषाकप्यग्निकुसि

तकुसिदानामुदात्तः। एषामुदात्त ऐ आदेशो ङीप्। वृषाकपेः स्त्री वृषाकपायी। अग्नायी। कुसि ॥२९॥
तायी। कुसिदायी। मनोरौ वा। उदात्तैकारश्चौकारश्च वा तत्सन्नियोगशिष्टो ङीप्। मनायी। मना
वी। मनुः। वर्णादनुदात्तात्तोपधात्तोनः। वर्णवाचीयस्तोपधस्तदंतात् ङीप् तस्य नः। एता। ए
नी। रोहिता। रोहिणी। षिद्गौरादिभ्यश्च। ङीष्। नर्त्तकी। गौरी। अनडुही। अनड्वाही। पिप्पल्या
दयश्च। आकृतिगणोयं। मत्स्यस्य ङ्यां। यलोपः। मत्सी। जानपदकुंडगोणस्थलभाजना
गकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायो
विकारमैथुनेच्छाकेशवेशेषु। एकादशभ्यः क्रमादेतेष्वर्थेषु ङीष्। जानपदी। वृत्ति
श्चेत्। अन्या जानपदा। अंतत्वात् ङीपि त्वाद्युदात्तः। भाजी श्राणा चेत्। भाजान्या। स्थ
अं॰२ वागरूष्यिका श्राणा विलेपी तरला यवागूः। शोणात्प्राचां। शोणी। शोणा। वोतोगुणवचनात्।

मकौ॰स्त्री

॥३०॥

उदंतात् गुणवाचिनो वा ङीष्। पट्वी। पटुः। उतः किं। शितिः। गुणेति किं। आखुः। खरुसंयोगोपधा
न्न। खरुः। पांडुः। बह्वादिभ्यश्च। वा ङीष्। बह्वी। बहुः। कृदिकारादक्तिनः। रात्रिः। रात्री। सर्वतोऽक्ति
न्नर्थादित्येके। शकटिः। शकटी। पुंयोगादाख्यायां। या पुमाख्या पुंयोगात् स्त्रियां वर्त्तते ततो
ङीष्। गोपस्य स्त्री गोपी। पालकांतान्न। गोपालिका। अश्वपालिका। सूर्याद्देवतायां
चाप्। सूर्यस्य स्त्री देवता सूर्या। इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुला
चार्याणामानुक्। ङीष्। इंद्राणी। हिमारण्ययोर्महत्त्वे। महद्धिमं हिमानी। यवाद्दोषे।
दुष्टो यवो यवानी। यवनाल्लिप्यां। यवनानां लिपिर्यवनानी। मातुलोपाध्याययोरा
नुग्वा। मातुलानी। मातुली। उपाध्यायानी। उपाध्यायी। आचार्यादणत्वं च। आचा ॥३०॥
र्याणी। अर्यक्षत्रियाभ्यां वा स्वार्थे। अर्याणी। अर्या। क्षत्रियाणी। क्षत्रिया। पुंयोगे तु।

अर्यी। क्षत्रियी। क्रीतात् करणपूर्वात्। क्रीतांतादंतात् करणादेर्ङीष्। वस्त्रक्रीती। क्वचिन्न। धनक्री
ता। बहुव्रीहेश्चांतोदात्तात्। क्तांतात् ङीष्। ऊरुभिन्नी। अस्वांगपूर्वपदाद्वा। पूर्वेणानित्ये प्राप्ते वि
कल्पोऽयं। सुरापीती। सुरापीता। स्वांगाच्चोपसर्जनादसंयोगोपधात्। असंयोगोपधमुपसर्जनं
यत्स्वांगं तदंतादू ङीष्। अतिकेशी। अतिकेशा। चंद्रमुखी। चंद्रमुखा। संयोगोपधात्तु सुगुल्फा।
अद्रवं मूर्त्तिमत्स्वांगं प्राणिस्थमविकारजं। अतत्स्थं तत्र दृष्टं च तेन चेत्तत्तथायुतं। सुस्वेदा। द्रवत्वा
त्। सुज्ञाना। अमूर्त्तत्वात्। सुमुखा शाला। अप्राणिस्थत्वात्। सुस्तनी। सुस्तना वा प्रतिमा।
प्राणिवत्। प्राणिसदृशे स्थितत्वात्। नासिकोदरोष्ठजंघादंतकर्णशृंगाच्च। वा ङीष्। तुंग
नासिकी। तुंगनासिका। पुच्छाच्च। सुपुच्छी। सुपुच्छा। कबरमणिविषशरेभ्यो नित्यं। कब
रपुच्छी। उपमानात् पक्षाच्च पुच्छाच्च। उलूकपक्षी शाला। उलूकपुच्छी सेना। नक्रोडादि

मकौ० स्त्री

॥३९॥

बह्वचः। क्रोडादेर्बह्वचश्च स्वांगान्न ङीष्। कल्याणक्रोडा। आकृतिगणोयं। सुजघना। सह
नञ्विद्यमानपूर्वाच्च। न ङीष्। सकेशा। अकेशा। विद्यमाननासिका। नखमुखात्संज्ञायां॥
ङीष् न। शूर्पणखा। गौरमुखा। संज्ञायां किं। ताम्रनखी कन्या। वाहः। वाहंतात् ङीष्। दित्यौ
ही। सख्यशिश्वीति भाषायां। सखी। अशिश्वी। जातेरस्त्रीविषयादयोपधात्। जातिवाचि
यत् न च स्त्रियां नियतमयोपधं ततो ङीष्। आकृतिग्रहणा जातिर्लिंगानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह। घटी। वृषली। औपगवी। कठी। जातेः किं।
मुंडा। अस्त्रीविषयात्किं। बलाका। अयोपधात्किं। क्षत्रिया। योपधप्रतिषेधे गवयहय
मुकयमनुष्यमत्स्यानामप्रतिषेधः। गवयी। हयी। मुकयी। मनुषी। मत्सी। पाककर्णप ॥३९॥
र्णपुष्पफलमूलवालोत्तरपदाच्च। पाकाद्युत्तरपदाज्जातिवाचिनः स्त्रीविषयादपि ङीष्। ओद

नपाकी। शंकुकर्णी। शालपर्णी। शंखपुष्पी। दासीफली। दर्भमूली। गोवाली। ओषधिविशेषे रूढाः।
इतो मनुष्यजातेः। ङीष्। दाक्षी। ऊङुतः। उकारांतादयोपधान्मनुष्यजातिवाचिन ऊङ्। कुरूः।
२ पंगोश्च। पंगूः। श्वशुरस्योकाराकारलोपश्च। वा। ऊङ्। पुंयोगलक्षणङीषोपवादः। श्वश्रूः। ऊरू
त्तरपदादौपम्ये। उपमानवाचि पूर्वपदमूरूत्तरपदं यत्तस्मादूङ्। करभोरूः। संहितशफ
लक्षणवामादेश्च। संहितोरूः। सहितसहाभ्यां च। सहितोरूः। सहोरूः। शार्ङ्गरवाद्यञो
ङीन्। शार्ङ्गरवादेरञोऽकारस्तदंताच्च जातिवाचिनो ङीन्। शार्ङ्गरवी। बैदी। नृनर
योर्वृद्धिश्च। नारी। यङश्चाप्। यङंताच्चाप्। आंबष्ठ्या। कारीषगंध्या। षाच्च यञः चाप्
वाच्यः। पौतिमाष्या। आवट्याच्च। अस्मात् चाप्यञश्चेति ङीपोपवादः। अवटशब्दो ग
र्गादिः। आवट्या। यूनस्तिः। युवन्शब्दात्तिः। युवतिः। अनुपसर्जनादित्येव। बहवो युवानो

मध्य०वै यस्यां बहुः युवा । युवतीति तु यौतेः शत्रन्तात् ङीपि बोध्यं ॥ ॥ इति स्त्रीप्रत्ययाः ॥ ॥छ॥
॥३२॥ ॥ ॥ षष्ठीयुक्तश्छंदसि वा । पतिशब्दो घिसंज्ञः । क्षेत्रस्य पतिना वयं । इहवेति योगं विभज्य
छंदसीत्यनुवर्त्तते । तेन सर्वे विधयश्छंदसि वैकल्पिकाः । बहुलं छंदसीत्यादिरस्यैव प्रपंचः ।
अयस्मयादीनि छंदसि । साधूनि । भपदसंज्ञाधिकाराद्यथायोगं संज्ञाद्वयं बोध्यं ।
तथा च वार्त्तिकं । उभयसंज्ञान्यपीति वक्तव्यमिति । स सुष्टुभा स ऋक्वता गणेन । पद
त्वात्कुत्वं भत्वाज्जश्त्वाभावः । नैनं हिन्वंत्यपि वाजिनेषु । अत्र पदत्वाज्जश्त्वं भत्वात्कु
त्वाभावः । ते प्राग्धातोः । छंदसि परेऽपि । व्यवहिताश्च । हरिभ्यां याह्योक आ । आ मंद्रै
रिंद्र हरिभिर्याहि । तृतीया च होश्छंदसि । जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च । ॥३२॥
यवाग्वाग्निहोत्रं जुहोति । मंत्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् । श्वेतवहादीनां डस्

पदत्वमिति वक्तव्यं । यत्र पदत्वं भावि तत्र ण्विनोऽपवादो डस् वक्तव्य इत्यर्थः । श्वेतवाः । श्वेतवाहौ । श्वेतवाहः
उक्थानि शंसति उक्थशाः यजमानः । उक्थशासौ । पुरो दाश्यते दीयते पुरोडाः । अवे यजः ।
अवयाजौ । अवयाजः । अवयाः श्वेतवाः पुरोडाश्च । एते संबुद्धौ निपात्यंते । वादुक्थशाः । लि
ङर्थे लेट् । सिब्बहुलं लेटि । इतश्च लोपः परस्मैपदेषु ॥ लेटोऽडाटौ । लेटोऽडाटौ । स्तो वा तौ
पितौ । सिब्बहुलं णिद्वक्तव्यः । वृद्धिः । प्रण आयूंषि तारिषत् । सुपेशसस्करति जोषि
षद्धि । आसाविषदर्शसानाय्या ॥ सिप इलोपस्य चाभावे । पताति दिद्युत् । प्रियः सूर्ये
प्रियो अग्ना भवाति । स उत्तमस्य । लेट उत्तमस्य सो वा लोपः । करवाव । करवावः ।
चरेत्वं । आत ऐ । लेट आकारस्य । सुतेभिः सुप्रयसा मादयैते । आत ऐ इत्याकारस्य
ऐ । वैतोऽन्यत्र । लेट एकारस्य ऐ स्याद् आत ऐ इत्यस्य विषयं विना । प्रभूना मीशै । गृ
हा गृहान्ते । अन्यत्र किं । सुप्रयसा मादयैते । उपसंवादाशंकयोश्च । पणबंधे आशी

म॰कौ॰वै कार्यामलिट्। अहमेवपश्वनामीशे। ओषधी हन्तार्यंतोनरकंपताम। व्यत्ययोबहुलं। विकरणानांछंदसि। आ
॥३३॥ आशुष्कस्येमेदति। भिनोत्रीतिप्राप्ते। जरसामरतेपतिः। म्रियतइतिप्राप्ते। इंद्रोवस्तेननेपतु॥
नयतेर्लोट्। सिपोलुग्विकरणो। इंद्रेणयुजातरुषेमदवृत्रं। तरेमेत्यर्थः। तरतेर्विध्यादौलिङ्।
उःसिपश्शप्चेतित्रयोविकरणाः। सुप्तिङुपग्रहलिंगनराणांकालहलच्स्वरकर्तृयङांच॥
व्यत्ययमिच्छतिशास्त्रकृदेषांसोपिचसिध्यति। बाहुलकेन। धुरिदक्षिणायाः। दक्षिणस्या
मितिप्राप्ते। चषालंयेअश्वयूपायतक्षति। तक्ष्णुतीतिप्राप्ते। उपग्रहःपरस्मैपदात्मने
पदे। ब्रह्मचारिणमिच्छते। इच्छतीतिप्राप्ते। प्रतीपमन्यऊर्मिर्युध्यति। युध्यतइ
तिप्राप्ते। मधोस्तृप्ताइवासते। मधुनइतिप्राप्ते। नरःपुरुषः। अधासवीरैर्दशभिर्वि
यूयाः। वियूयादितिप्राप्ते। कालः कालवाचकाःप्रत्ययाः। श्वोग्नीनाधास्यमानेन। लु ॥३३॥
लर्थविषयेलृट्। तमसोगा अदुक्षत। अधुक्षादितिप्राप्ते। मित्रवयं वस्तर्याः। मित्रा

॥१॥

वयमिप्राप्ते। स्वरव्यत्ययस्तुवक्ष्यते। कर्तृशब्दःकारकमात्रपरः। तथातद्वाचिनांकृत्तद्धितानां
व्यत्ययः। अन्नादय। अणिविषयेअच्। यडोयिशश्वादारभ्यलिङ्याशिष्यङितिङकारेणप्रत्या
हारः। तेषांव्यत्ययोभवतीत्यादिरूह्यएव। छंदस्युभयथा। धात्वधिकारोक्तप्रत्ययःसार्वधा
तुकार्धधातुकोभयसंज्ञःस्यात्। वर्द्धतुत्वासुष्टुतयः। वर्द्धयंत्वित्यर्थः। आर्द्धधातुकत्वा
छि णिलोपः। विश्रृण्विरे। सार्वधातुकत्वात्श्नुश्रभावश्च। कृण्वंतीरितिमण्। तुमर्थेसे
सेनसेअसेन्क्सेकसेनध्येअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः। से। वक्षे त
रायः। सेन्। तावामेषे। असे। शरदोजीवसेधाः। असेन्। आयुत्तसे। कसेन्। गवामि
वश्रियसे। अध्यै अध्यैन्। जठरंपृणध्यै। पक्षे आद्युदात्तं। कध्यै कध्यैन्। आहुवध्यै।
शध्यै। राधसःसहमादयध्यै। शध्यैन्। वायवेपिबध्यै। तवै। दातवा उ। तवेङ्। सूतवे।

तवेन् । कर्तवै । प्रयै रोहिष्यै अव्यथिष्यै । एतानि पात्यंते । प्रयातुं रोद्धुं अव्यथितुमित्यर्थः । दृशे वि
ख्यै च । निपात्यौ । द्रष्टुं विख्यातुमित्यर्थः । कृत्यार्थे तवैकेन्केन्यत्वनः ॥ धातोरेते स्युः । न
वैष्ठा अन्वेतवै । केन् । अवगाहे । केन्या । दिदृक्षेण्यः । त्वन् । कर्त्वं । सृपितृदोः कसुन् । तुमर्थे ।
पुरा क्रूरस्य विसृपो विरप्शिन् । पुरा जर्तृभ्य आतृदः । प्रकृत्यांतःपादमव्यपरे । ऋक्पादम
ध्यस्थस्य एङ् प्रकृत्या स्यात् । न तु वकारयकारपरे अति । उप प्रयंतो अध्वरं । सु
जाते अश्वसूनृते । अंतःपादं किं । एतास एतेर्चंति । अव्यपरे किं । ते वदन् । अव्यादवद्या
वक्रमुरव्रतायमवंत्ववस्युषु च । एषु व्यपरेष्वपि एङ् प्रकृत्या । वसुभिर्नो अव्यात् ॥
मित्रमहो अवद्यात् । मा शिवासो अवक्रमुः । ते नो अव्रतः । शतधारो अयं मणिः । ते नो अ
वंतु । कुशिकासो अवस्यवः । सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः । ऋजवः सं ॥३५॥

तु पंथाः । पंथान इति प्राप्ते । परमे व्योमन् । व्योमनि इति प्राप्ते । धीती । मती । सुष्टुती । धीत्या ।
मत्या । सुष्टुत्येति प्राप्ते पूर्वसवर्णः । या सुरथा रथीतमा । यौ सुरथौ इति प्राप्ते । आ । नताद्ब्रा
ह्मणं । नतमिति प्राप्ते आत् । न युष्मे वाजबंधवः । अस्मे इंद्रा बृहस्पती । युष्मासु । अस्म
भ्यं इति प्राप्ते शे । उरुया धृष्णुया । उरुणा धृष्णुना इति प्राप्ते या । नाभा पृथिव्याः । नाभावि
ति प्राप्ते डा । ता अनुष्ठ्योच्यावयतात् । आ डड्या । साधुया । साध्विति प्राप्ते याच् ॥
वसंता यजेत । वसंते इति प्राप्ते आल् । इयाडियाजीकाराणामुपसंख्यानं । उर्विया । उरु
णेति प्राप्ते । दार्विया । सुक्षेत्रिया । सुक्षेत्रिणेति प्राप्ते डियाच् । दृतिं न शुष्कं सरसी शयानं ।
सरस्यामिति प्राप्ते ई । आज्जसेरसुक् । ब्राह्मणासः । तन्वादीनां वेयङुवङौ । तन्वं पुषेम ॥
तनुवं पुषेम । विष्वं पश्य । विषुवं पश्य । स्वर्गो लोकः । सुवर्गो लोकः । त्र्यंबकं । त्रियंबकं । व

मकौ०स्व रण्यं। रैरणियं। अतोभिसरोस्त। बहुलंछंदसि। अग्निर्देवेभिः। मंत्रेष्वाड्यादेरात्मनः। आ
॥३५॥ त्मन्शब्दस्यादेर्लोपआङि। त्मनादेवेषु। अपोभिमासचंद्रसीतिवक्तव्यं। माद्भिःशरद्भिः
॥ प्रसमुपोदः पादपूरणे। एषांदूस्तः। प्रप्रायमग्निः। संसमिद्युवसे। उपोपमेपरामृश॥
किंन्नोददुहर्षसे। षष्ठ्याःपतिपुत्रपृष्ठपारपदपयःपोषेषु॥ विसर्गस्यसस्स्यात्। वा
चस्पतिं। विश्वकर्माणं। दिवस्पुत्रायसूर्याय। दिवःस्पृष्ठंभंदमानः। तमसस्पारम
स्य। परिवीतइळस्पदे। दिवस्पयोदिधिषाणाः। रायस्पोषंयजमानेषुधत्तं॥ ॥
॥ ॥ इतिवैदिकप्रक्रिया॥ ॥धातोः॥ अंतउदात्तःस्यात्। अनुदात्तंपदमेकव
र्जं। परिभाषेयंस्वरविधिविषयास्मिन्पदेयस्योदात्तःस्वरितोवाविधीयतेतमेक ॥३५॥
मर्ववर्जयित्वाशेषंतत्पदमनुदात्तंस्यात्। गोपायतंनः। अत्रसनाद्यंताधातव

इतिधातुत्वेधातुस्वरेणयकारात्पराकार उदात्तः। शिष्टमनुदात्तं। उदात्तादनुदात्तस्यस्वरितः॥
इतितकारादाकारःस्वरितः। स्वरितात्संहितायामनुदात्तानां। एकश्रुतिःस्यात्। इतिनकारा
कारप्रचयः। अनुदात्तस्यचयत्रोदात्तलोपः। यस्मिन्ननुदात्तेउदात्तोलुप्यतेतस्योदात्तः
। देवीवाचं। अत्रङीबुदात्तः। आद्युदात्तश्च। प्रत्ययआद्युदात्तःस्यात्। कर्तव्यं। अनुदात्तौ
सुप्पितौ। पूर्वस्यापवादः। यज्ञस्य। नयोयुच्छति। शप्तिपोरनुदात्तत्वेस्वरितप्र
चयौ। चितः। अंतउदात्तःस्यात्। चितःसप्रकृतेर्बह्वकजर्थं। चितिप्रत्ययेसतिप्रकृ
तिप्रत्ययसमुदायस्यांतोदात्ततावाच्येत्यर्थः। नमंतामन्यकेसमे। यकेसरस्वतीं
। तकत्सुते। तद्धितस्य। चितस्तद्धितस्यांतउदात्तः। पूर्वेणसिद्धेपित्स्वरबाधनार्थं

को आयनाः। कितः। कितस्तद्धितस्यांत उदात्तः। यदाग्नेयः। तित्स्वरितं। क्व नूनं। उपोत्तमं
रिति। रिदन्तप्रत्ययांतस्योपोत्तमं उदात्तं स्यात्। यदाहवनीये। क्त्रिस्यादिर्नित्यं। जिदं
तस्यानिटं तस्य स्वादिरुदात्तः। यस्मिन्विश्वानि पौंस्या। पुंसः कर्माणि। ब्राह्मणादित्वात्
ष्यञ्। सुतेदधिष्वनश्च नः। वायतेरसुन्। वायुरन्ते ह्रस्वश्चेति वकारादसुनोनुदा
गमः। लिति। प्रत्ययात्पूर्वमुदात्तं स्यात्। चिकीर्षकः। अत्र ईकारस्योदात्तता। इत्या
दिप्रयोगमनुसृत्यान्वाख्यातव्यं॥ ॥इति स्वरप्रक्रिया॥ ॥एषा वरदराजेन
बालानामुपकारिका॥ कृता श्रीपाणिनीयानां मध्यसिद्धांतकौमुदी॥ इति व
रदराजस्य मध्यसिद्धांतकौमुदी॥ तस्याः संख्या तु विज्ञेया खबाणकरवह्निभिः ॥३६॥
॥२॥ ॥छ॥ इति श्रीववटिकेट्टिवरदराजभट्टकृता मध्यसिद्धांतकौमुदी समाप्ता

॥छ॥ ॥श्री शके १६१४ श्रीमुखवाब्दे कार्त्तिक शुद्ध तृतीयायां सौरे लिखितं त्विदं॥ छ॥
भग्नपृष्ठकटिग्रीवा स्तब्धदृष्टिरधोमुखः॥ कष्टेन लिखितं ग्रंथं यत्नेन परिपालयेत्॥ छ
शुभमस्तु सर्वजगतः परहितनिरता भवंतु भूतगणाः॥ दोषाः प्रयांतु नाशं सर्वत्र जनः सु
खी भवतु॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥ ॥छ॥ ॥श्री॥

३८

८

॥ अथसारस्वतप्रारंभः ॥

अहं परमात्मानं प्रणम्य बालधीवृद्धिसिद्ध्यै पंचवर्णात्मकं सत्त्वं सारस्वतीप्रक्रियां ऋजुं कुर्वे करोमि

श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। प्रणम्य परमात्मानं बालधीवृद्धिसिद्धये। सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तराम्॥१॥ इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः। प्रक्रियां तस्य कृत्स्नस्य क्षमो वक्तुं नरः कथम्॥२॥ तत्रादौ संज्ञासंव्यवहाराय संगृह्यते। अइउऋऌसमानाः। अनेन प्रत्याहारग्रहणाय वर्णाः परिगण्यन्ते। तेषां समानसंज्ञा च विधीयते। नैतेषु सूत्रेषु संधिरनुसंधेयो विवक्षितत्वात्। विवक्षितस्तु संधिर्भवतीति नियमात्। लौकिकप्रयोगनिष्पत्तये समयमात्रत्वात्। ह्रस्वदीर्घप्लुतभेदाः परस्परं सवर्णा भण्यन्ते। ह्रस्वदीर्घप्लुतभेदाः सवर्णाः। एतेषां ह्रस्वदीर्घप्लुतभेदाः। ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्याः। एकमात्रो ह्रस्वः। द्विमात्रो दीर्घः। त्रिमात्रः प्लुतः। व्यंजनं चार्धमात्रकं। चाषस्त्वेकमात्रं द्विमात्रं त्वेव वायसः। शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकं। एषामन्येऽप्युदात्तादिभेदाः। उच्चैरुपलभ्यमान उदात्तः। नीचैरनुदात्तः। समा

ग्रंथादौ ग्रंथमध्ये ग्रंथांते मंगलमाचरणीयमिति शिष्टाचारः। तत्तु मंगलं त्रिविधं। आशीर्नमस्क्रियावस्तुनिर्देशात्मकं। बालानां धीः बालधीः। बालधियः वृद्धिः बालधीवृद्धिः बालधीवृद्ध्यैः सिद्धिः बालधीवृद्धिसिद्धिः तस्यै बालधीवृद्धिसिद्ध्यै सारस्वतीप्रक्रियां। सरस्वत्याः प्रणीता

श्रीपरमेश्वरस्य इन्द्रेण प्रमाणं। तद्विभ्रती नाम परिच्छेदप्रमाणं। तत्र कुतर्ककामार्यस्त्वप्रयोजकान् नश्यत्र

हारः स्वरितः। उदात्तानुदात्तवर्णधर्मौ समाह्रियेते यस्मिन् स्वरिते स स्वरः स्वरितसंज्ञः स्यात्। अकुहविसर्जनीयानां कंठः। इचुयशानां तालु। उपूपध्मानीयानामोष्ठौ। पकारात्पूर्वविसर्गः उपध्मानीयः। उवर्णपवर्गौ च। अमङणनानां नासिका च। ऋटुरषाणां मूर्धा। ऌतुलसानां दंताः। एऐतोः कंठतालु। ओऔतोः कंठोष्ठौ। वकारस्य दंतोष्ठौ। जिह्वामूलीयस्य जिह्वामूलं। ककारात्पूर्वविसर्गः जिह्वामूलीयः। अनुस्वारस्य नासिकास्थानमिति। अक्षरशिरसि बिंदुरनुस्वारः। अक्षरपरतः बिंदुद्वयं विसर्गः। अष्टौ स्थानानि वर्णानामुरः कंठः शिरस्तथा। जिह्वामूलं च दंताश्च नासिकोष्ठौ च तालु च। हकारं पंचमैर्युक्तमंतस्थाभिश्च संयुतं। औरस्यं तं विजानीयात् कंठ्यमाहुरसंयुतं। उभयेस्तु ङञणनमैर्युक्तं। एऐओऔ संध्यक्षराणि। एषां ह्रस्वसंज्ञा न संति। अवर्जा नामिनः स्वराः। अकारादयः पंच चत्वार एकारादयः उभये स्वराः उच्यंते। अवर्जा नामिनः

पंचमैः ङञणनमैर्युक्तं हकारं। यवरलैश्च युक्तं औरस्यं तं हकारं विजानीयात् एतैरसंयुतं हकारं कंठ्यमाहुः वदंति।

[illegible] इउऋऌएऐओऔ सस्वराण्युक्तान्यपि १

अवर्णवर्जा अष्टौ स्वरा नामिनः।

2 अवर्णवर्जाः स्वरा नामिन उच्यंते। अनुक्रांतास्तावत्स्वराः। प्रत्याहारजिघ्रा
हयिषया व्यंजनान्यनुक्रामति। स्वरवर्जितान्यक्षराणि [illegible] ज्ञेयानीत्यर्थः।
हयवरल। ञणनङम। झढधघभ। जडदगब। खफछठथ। चटतकप। शषस।
आद्यंताभ्यां। प्रत्याहारं जिघृक्षता आद्यंताभ्यामेव वर्णा ग्राह्याः। अकारो वकारेण
गृह्यमाणो अवप्रत्याहारः। अकारतः वकारपर्यंतं अवप्रत्याहारः। स च। अइउऋऌ
एऐओऔ। हयवरल। ञणनङम। झढधघभ। जडदगब। इत्येतावत्संख्या
कः संपद्यते। ञणनङम इति ञमप्रत्याहारः। झढधघभ इति झभप्रत्याहा
रः। जडदगब इति जबप्रत्याहारः। चटतकप इति चपप्रत्याहारः। एवं यत्र य
त्र येन येन प्रत्याहारेण कृत्यं स स तत्र तत्र ग्राह्यः। संख्यानियमो नास्ति
हसा व्यंजनानि। हकारादिसकारांता वर्णा हसा व्यंजनानि भवंति। स्वर 2
हीनं व्यंजनं। तत्र वकारः सुखमुखोच्चारार्थं चादित्संज्ञकः। कार्यायेत्।
प्रत्ययाद्यतिरिक्तः कस्मैचित्कार्याय उच्चार्यमाणो वर्ण इत्संज्ञो भवति।

यस्येत्संज्ञा तस्य लोपः। वर्णादर्शनं लोपः। वर्णविरोधो लोपश्च। एकं वर्णं नाश
यत्यन्यस्योत्पत्तिं प्रतिबध्नातीति वर्णविरोधः। मित्रवदागमः। मित्रवदागमस्य कार्यं
कुर्वाणो यस्य यद्विहितं तं दर्शतिस आगमः। शत्रुवदादेशः। यो ह्यागतस्य स्था
निनमुच्छिनत्ति स आदेशः। स्वरानंतरिता हसाः संयोगः। स्वररहिता इत्यर्थः
स्वरानुसंधिनावपि द्वौ हसौ संयोगश्च। कुचुटुतुपु वर्गाः। एषु उकारः पंचवर्णपरिग्रहणार्थः। अ
5 रेदो नामिनो गुणाः। नामिस्थानका अर् इउऋऌ अनु ए ओ इति गुणसंज्ञका
आकारो भवंति। आरैऔ वृद्धिः। आकारस्य आ वृद्धिः। इकारस्यैकारो वृद्धिः। उका
वृद्धिः ऋ रस्यौकारो वृद्धिः। अंत्यस्वरादिष्टिः। अंत्यो यः स्वरस्तदादिवर्णाष्टि
कारस्य 5 संज्ञो भवति। अंत्यात्पूर्व उपधा। अंत्याद्वर्णमात्रात्पूर्वो यः स उपधासं
भू ज्ञो भवति। अ संयोगादिपरो ह्रस्वो लघुः। संयोगविसर्गानुस्वाराः यस्य न प
त्वापि नलं राः स अ संयोगादिपरो ह्रस्वो लघुश्च। विसर्गानुस्वारसंयोगपरो दीर्घश्च
स्वरस्यापि दिसंज्ञा वाच्या। क्वचिद्वर्णमात्रमपि उपधासंज्ञं भवति ३

अक्षरशिरसिस्थितार्धरेफः २

सार॰ २ गुरुः। मुखनासिकाभ्यामुच्चार्यमाणोऽनुनासिकः। मुखेनैवोच्चार्यमाणो निर
नुनासिकः। अक्षरपरतौ द्वौ बिंदू विसर्गः॥ अक्षरशिरसि बिंदुरनुस्वारः॥ इति
संज्ञाप्रक्रिया। ॥ अधुना संधिरभिधीयते। स्वरहीनस्य स्वरेण सह संधा
नं संधिः। इ यं स्वरे। इवर्णो यत्वमापद्यते स्वरे परे। दधि आनयेति स्थिते।
इ यं स्वरे कृते दध्य् आनयेति भवति। हसे हसः। स्वरात्परो रेफहकारव
र्जितो हसो हसे परे द्विर्भवति। इति धकारस्य द्वित्वं। झबे जबाः। झसानां झ
भे परे जबा भवंति। इति धकारस्य दकारः। वर्णग्रहणे सवर्णग्रहणं कारग्रह
णे केवलग्रहणं। सवर्णत्वाद्ग्यो वर्ग्येण सवर्ण इति वचनात्। यथासं २
ख्यं वा वक्तव्यं। स्वरहीनं परेण स्वरेण संयोज्यं। दद्ध्यानय। गौरी अत्र इति
स्थिते। अहितिविशेषणान्न रेफस्य द्वित्वं। किंतु। राद्यपो द्विः। स्वरपूर्वाद्रेफा
त्परो यपो द्विर्भवति। जलतुंबिकान्यायेन रेफस्योर्ध्वगमनं। गौर्य्यत्र। स्वरह

स्वरे स्वरे इति पदं अनुवर्तते यत्र यत्र सूत्रेषु पाठे नमस्ति न तत्र तत्रेषु अनु[illegible]
स्वरे इति पदं [illegible] पठितमस्ति तत्र तेयं। एवं सर्वत्र [illegible]
स्वरे इति पदं यत्र नैव [illegible] पठितं [illegible] विसर स्वत्या पठितमं [illegible] सर्वसूत्राणि तेषां [illegible]
त्यनुवर्तते। एवमन्यत्रापि यत्र न सूत्राक्षरैः कार्यसिद्धिस्तत्र सर्वत्र सूचीतरात्प
दांतनानुवृत्तिर्ज्ञातव्या। ग्रंथभूयस्त्वभयान्नास्माभिर्लिख्यते। उवं। उवर्णो व
त्वमापद्यते स्वरे परे। मधु अत्र मद्ध्वत्र। ऋ रं। ऋवर्णो रत्वमापद्यते स्वरे परे। पि
तृ अर्थः पित्रर्थः। ऌ लं। ऌवर्णो लत्वमापद्यते स्वरे परे। ऌ अनुबंधः। लनुबंधः
ओ अव्। ओकारस्य अव् भवति स्वरे परे। भो अतिभवति। ए अय्। एकारस्य अय् भ
वति स्वरे परे। ने अनं नयनं। गवादेरवर्णागमो क्षादौ परे वक्तव्यः। गो अ
क्ष इति स्थिते। अवर्णागमः। सवर्णे दीर्घः सह। सवर्णः सवर्णे परे सह दी
र्घो भवति। ओ अव्। ओकारस्य अव् भवति स्वरे परे। गवाक्षः। गो अजिनं ग
वाजिनं। गो इंद्रः गवेंद्रः। अग्राजिनयोर्विकल्पेन। गो अग्रं गोऽग्रं। गवाग्रं।
गो अजिनं गोजिनं। गवाजिनं। अकारस्याहितस्वरे परे विकल्पेनानुस्व[illegible]
मत्तगवीशः। गवेशः। स्व ईरं स्वैरं। अक्ष ऊहिनी अक्षौहिणी। प्र ऊढः प्रौढः।

गव्यूतिः स्त्री क्रोशयुगं

कश्चित्स्वरवद्यकारः। यथाद्यपरिमाणे। यथाशक्त्यर्थे। अद्यपरिमाणेइव।
४ गोपूतिः। गव्यूतिः। ए आय्। एकार आय् भवति स्वरे परे। नै अकः। नायकः।
ओ आव्। ओकार आव् भवति स्वरे परे। नौ इह। नाविह। य्वोर्लोपश्च वा पदां
ते। पदांते स्थितानाम् यादीनां यकारवकारयोर्लोपश्च वा भवति। ते आगताः
त आगताः। तयागताः। तस्मै इदं। तस्मा इदं। तस्मायिदं। पटो इह। पट इह। पटवि
ह। तौ इमौ। ता इमौ। ताविमौ। लोपे शि पुनर्न संधिः। छंदसि तु भवति। पूर्वापरवर्ण
योर्मिथो घटनं संधिः। कार्यांतरानुसंधानं वा संधिः। पुनः शब्दाद्धामोदरदोषि
त्यादौ स्वलोपे सत्यपि संधिर्भवति। छंदसि प्रयोगं दर्शयति। हे सखे इति
स्थिते। ए अय्। य्वोर्लोपश्च वा पदांते। अ इ ए। अवर्ण इवर्णे परे सह ए भवति। हे स
खेति। एदोतोतः। पदांते स्थितादेकारादोकाराच्च परस्य अकारस्य लोपो भ ४
वति। ते अत्र तेत्र। पटो अत्र पटोत्र। सवर्णे दीर्घः सह। सवर्णः सवर्णे परे सह दीर्घो
भवति। अत्र अत्र अत्रात्र। दधि इह दधीह। विधु उदयः विधूदयः। होतृ ऋकारः

धा विष्टके बलस्वर
५ स्थापिटि सं वाच्या

होतॄकारः। दधीहेत्यादौ इयं स्वर इत्यस्य प्राप्तिः कथं नेत्याशंक्याह। सामान्यशास्त्रतो
नूनं विशेषो बलवान्भवेत्। परेण पूर्वबाधो वा प्रायशो दृश्यतामिह। बहुव्यापकं सामा
न्यं। अल्पव्यापको विशेषः। अ इ ए। अवर्ण इवर्णे परे सह ए भवति। तव इदं तवेदं। मम इ
दं ममेदं। अदीर्घो दीर्घतां याति नास्ति दीर्घस्य दीर्घता। पूर्वं दीर्घस्वरं दृष्ट्वा पर
परे लोपो विधीयते। हलादेरीषादौ टिलोपो वक्तव्यः। हल ईषा हलीषा। लांगल ईषा
मनस्त्र लांगलीषा। मनस् ईषा मनीषा। ओमाङावपि। अवर्णात्परो ओमाङो टिलो
त्र अत्स्येटि पोनिमित्तोस्तः। अद्य ओं अद्यों। शिव आ एहि शिवेहि। कुल अटा। कुलान्यटतीति अत्र अकारटिलोपः
लका ध्यार्थं सती कुलटा। कुलान्यटति जारार्थं कुलटा वेश्या। भिक्षुकी सती वेश्या च कुल
ईश्वरः टा। सीमंतः। सीमंतः स्त्रीशिरः केशमध्यवीथिः। एषोदरं। पतंजलिः। सारंगः इत्यादि
बुहलादेरिति टिलोपः। उ ओ। अवर्ण उवर्णे परे सह ओ भवति। गंगा उदकं गंगो
दकं। ऋ अर्। अवर्ण ऋवर्णे परे सह अर् भवति। तव ऋद्धिः तवर्धिः। कविर

सा॰ रः। अवर्ण ऋवर्णयोः परे सह ऋकविदा आर् भवति। ऋण ऋणं। ऋणार्णं। शीत ऋतः शी
५ तार्तः। शीत ऋतुः शीतर्तुः। अप ऋतुः अपर्तुः। ~~सप्त ऋषयः~~ सप्तर्षयः। क्वचिद्यथा
प्रकृति छंदसि। सप्त ऋषयः। ऌ अऌ। अवर्णो ऌवर्णे परे सह ऌ ल् भवति। त
व ऌकारः। तवल्कारः। रलयोः क्वचित् सावर्ण्यं वक्तव्यं। पनिश्रंकः पर्यंकः
पल्यंकः। रलयोर्डलयोश्चैव रखबयो बवयोस्तथा। वदंत्येषां हि सावर्ण्य
मलंकार विदो जनाः। एऐ ऐ। अवर्णः एकारे ऐकारे च परे सह ऐकारो भवति
तव एषा तवैषा। तव ऐश्वर्यं तवैश्वर्यं। तव ओदनं तवौदनं। तव औन्नत्यं
ओ ओत्वो। तवौन्नत्यं। ओष्ठोत्वोर्वा। अवर्णस्य ओष्ठोत्वोः परयोर्वा सह ओ भवति। बिंब समासे स ५ नि ४
वा ओष्ठः बिंबोष्ठः। बिंबौष्ठः। स्थूल ओतुः स्थूलोतुः। स्थूलौतुः। असमासे तु।
तव ओतुः तवौतुः। तवौष्ठः। इति सारस्वते स्वरसंधिः। अथ प्रकृतिभा
व उच्यते। प्रकृतेर्यथावस्थितभवनं स्थितिः प्रकृतिभावः। प्रकृत्या स्वरूपेण भ
वे

ईषदर्थे आङा सह संधिः

वनं अवस्थानं प्रकृतिभावः। नामी। अदसो मी शब्दः संधिं न प्राप्नोति। अमी आदित्याः।
ये द्वित्वे। द्विवचने। इकारांत उकारांत एकारांतश्च शब्दो द्वित्वे वर्तमानः संधिं न प्रा
प्नोति। मणी वादिवर्जं। मणी व। दंपती व। रोदसी व। जायापती व। अग्नी अत्र। व
टू अत्र। माले आनय। ओ निपातः। आकार ओकार निपात एकस्वरश्च संधिं न प्रा
प्नोति। आ एवं मन्यसे। नो अत्र स्थातव्यं। उ उत्तिष्ठ। इ इंद्रं पश्य। ओ निपात इति सूत्रे
आकारश्चात्र ओकार पर्यंतम् अंगीकृतमस्तीति सूत्रकृदाशया मध्यगतानामि
कारोकारादीनां एकस्वराणां ग्रहणाय एकस्वरश्चेत्युक्तयान्हत्ति कृत। आ नाङ् अ
नाङाकारः संधिं न प्राप्नोति। तर्हि हि ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्। आ ईषदुष्णं ओष्णं। आ एहि उदकं
ऐहि। इति क्रियायोगे। आ अग्रात् आग्रात्। ~~मर्यादायां~~। आ उदकं ओदकं। यशो रा व्याप्य
मस्य। आ उदकांतं ओदकांतं। इत्यभिविधौ अभिव्याप्तावाकारः। प्लुतः। प्लुतश्च संधिं [illegible]

उदकं व्याप्य वर्तते तदोदकांतं
अग्रपर्यंतं इत्येयं। इति मर्यादायां।
आ एवं मन्यसे इति वाक्ये। [illegible] आ अस्मिन्नर्थे स्मरामीति वं स्मरणे

वर्गचतुर्थो हकारस्य सवर्णः

यत्नप्रतिर्यत्नशक्तिः

नयाह्नोति। देवदत्ता३ एहि। यत्नभूते आगच्छ। प्लुतत्वनियममुदाहरति। दूराद्दाह्वा
६ नेटेः प्लुतः॥ दूराद्दाह्वाने गायने रोदने विचारे च टेः प्लुतो भवति। ॥इति सारस्वते
प्रकृतिभावः॥ ॥अथ व्यंजनकार्यमुच्यते॥ ॥ चपा अबे जबाः। पदांते वर्तमा
नाश्चपा जबा भवंत्यबे परे। षट् अत्र षडत्र। वाक् यथा। वाग्यथा। ञमे ञमा वा।
पदांते वर्तमानाश्चपा [illegible] ञमे परे ञमा वा भवंति। वाक् मात्रं वाङ्मा
त्रं। वाग्मात्रं। षट् मम। षण्मम। षड्मम। चपात् छः शः। चपादुत्तरस्य शकारस्य
छो वा भवति। वाक् शूरः वाक्छूरः॥ वाक्शूरः॥ होङ्भाः। चपादुत्तरस्य हकारस्य
ङ्भा भवंति। झढधघभानां प्राप्तौ नियमार्थमाह। ~~[illegible]~~ ६
भवति तत् हविः तद्धविः॥ वाक् हरिः वाग्घरिः॥ स्तोः श्चुभिः श्चुः॥ स्तोः सकारस्य त
वर्गस्य शकारेण चवर्गेण च योगे शकारचवर्गौ यथासंख्येन भवतः। कस् चरति
कश्चरति। विसर्जनीयस्य सः॥ विसर्जनीयस्य सकारो भवति खसे परे। कः शूरः क

वर्गचतुर्थो हस्य सव र्णः धा। चिरं लीयोपि ४

विसर्गभवः विसर्जनीयः
गकारस्य जकारादेशः
कनेये काइति ईयप्रत्ययः

सकारात् किं वा न वर्गास्य षकारे कृते नकि वार
वर्गे कृते न योग अस तां सकारो षकारहो तो न व

विसर्जनीयस्य सः। विसर्जनीयस्य सकारो। तत्र शास्त्रे १
स्तोः श्चुभिः श्चुः। भवति खसे परे।
श्शूरः। तत् चित्रं तच्चित्रं। तत् शास्त्रं [illegible]। चपात् छः शः। चपादुत्तरस्य शकार रोटवर्गहितो
स्य छो वा भवति। तत् शास्त्रं। तच्छास्त्रं। न शात्। शकारादुत्तरस्य तवर्गस्य चुत्वं न
भवति। विश्नः। प्रश्नः। ष्टुभिः ष्टुः॥ स्तोः षकारटवर्गयोगे ष्टुर्भवति। कस् षष्ठः कष्ष
ष्ठः। तत् टीकते तट्टीकते। तोर्लि लः॥ तवर्गस्य लकारे परे लकारो भवति। तत् लु सानुनासिकत्वं भवति ४
नाति तल्लुनाति। भवान् लिखति। भवाँल्लिखति। अंतस्था द्विप्रभेदाः। रेफवर्जिता
यवलाः सानुनासिका निरनुनासिकाश्च तत्र सानुनासिकत्वं लकारेण नकार सकारस्य
स्य भवति। न षात्। षकारे परे तवर्गस्य टुत्वं न भवति। भवान् षष्ठः। टोरंत्यात्। पदांते वर्त तवर्गस्य ष्टुर्न भवति
मानात् टवर्गात् परस्य स्तोः ष्टुर्न भवति। ञमे ञमा वा। षट् नरः षण्णरः। पक्षे चपा अबे जे सकारे च
बाः षड् नरः। षट् सीदंति षट्सीदंति। नोऽसि वर्के छते। नांतस्य पदस्य छते परे सगागमो भव कारस्तवर्गे टवर्गो न भवति
ति। टिकितौ आद्यंतयोर्विकृत्यौ। राजन् सच्चित्रमिति स्थिते राजंश्चित्रं। भवान् तनोति। भ
वान्स्तनोति। शे चग्का। नांतस्य पदस्य शे परे च आगमो भवति। स्तोः श्चुभिः श्चुः। भवान्

स्तोः श्चुभिः श्चुः। राजंश्चित्रं
अत्रानुस्वारस्य प्रयोजनं तु
सम्प्रदायरंगार्थं लिख्यते

नांतस्य पदस्य छते परे छ ... रे परे
सगागमो भवति

मो राजि सम: क्वौ। किंवंते राजतेौ परे सम्मो मस्य म एव स्यात्। सम्राट्। हे म परे वा।
किं ह्मलयति । यवलपरे हकारे वस्य वला वानुस्वारस्य। किं ह्मयः। किंह्मः। किंह्मलयति। किं ह्मलयति।

(side notes, right margin: किं ह्मलयति। किं ह्मलयति। किं ह्वलयति। किं ह्यः। ति)

शूरः। भवाञ्छूरः। पक्षे चवा छ: शः। इति छकारः। भवाञ्च्छूरः। वर्गेभाव पक्षे तुल्यं

नभवति भवान् शूरः। ङ्णो ह्रस्वाद् द्विः स्वरे। पदान्ते वर्तमाना ङकारणकारनकारा ह्रस्वा

दुत्तरा द्विर्भवंति स्वरे परे। प्रत्यङ् ङ् इदं प्रत्यङ्ङिदं। सुगण् ण् इह सुगण्णिह। राजन् न् इह

राजन्निह। छः। ह्रस्वादुत्तर [illegible] छकारो द्विर्भवति। तव च्छत्रं तव च्छत्रं। [illegible]

[illegible]। [illegible]। क्वचिद् दीर्घादपि च्छकारो द्विर्भवति। [illegible]

ह्री च्छः। [illegible] म च्छः। आच्छादयति। मा च्छिदत्। मा हे च्छत्। इत्यादि प्रयोगवशात्। मो

यं मोऽनुस्वारः। मकारस्यानुस्वारो भवति हसे परे पदान्ते च। त्वं हससि त्वं हससि। ति। (margin: मः। नो। तो। तं। अत्र। पदान्ते तं)

पटुं मन्ये। यथा पटुं हृथा। नश्चापदान्ते झसे। नकारस्य मकारस्य चापदान्ते वर्तमा (नश्चापदान्ते झसे)

नस्यानुस्वारो भवति झसे परे। यशांसि यशांसि। पुंभ्यां पुंभ्यां। यमा यपस्य (margin: ७)

अनुस्वारस्य यमा भवंति यपे परे। (यपे परे वा) अस्य यपस्य सवर्णाः। तं करोति। तङ्करो

ति। तं तनोति तन्तनोति। यवलपरे तु सानुनासिका एव यवला भवंति। सम्यन्त:। सं (margin: अनुस्वारस्य)

स्यन्त:। सम्वत्सरः संवत्सरः। सम्लापः संल्लाप:। इति सारस्वते व्यंजनसंधि:।

यशः। यशसी। यशांसि। यशसा। यशोभ्यां। शकारांतो यशस्शब्द:

यशोभि:। यशसे। यशोभ्यां। यशोभ्य:

बृहि हिं इहि ङ्कौ बृहत्यां पतिरिति विग्रह:

अरात्रि विवितिविशेषणाद्रात्रि रूपरथं त

बृहस्पत्यादि षु तकारलोप:५

रेफर्थवा ना। ५

सुगणम:

अथ विसर्गसंधिर्निगद्यते। विसर्जनीयस्य सः। विसर्जनीयस्य सकारो भवति खसे

से परे। कः तनोति कस्तनोति। कुप्वो ≍क ≍पौ वा। विसर्जनीयस्य कवर्गपवर्गसे ≍क

निर खसे परे ≍क ≍पौ वा भवत:। कया वुच्चारणार्थौ। कः करोति क≍करोति। कः पठति क≍प

(left margin: विसर्जनीयस्य सः) ठति। वा वस्य त्सादयः। सं शा शो निपातात्साधवः। वोर्वं स्पतिः। बृहस्पतिः। वावस्य (margin: क ≍ करोति ≍ हा)

प्राद्विषु प्रविहित लक्ष्यका: सवतो ह्रस्वयो। हरिश्चंद्र:। नमस्कार:। तस्कर:। श्रेयस्क

रः। अयस्पात्रमित्यादय:। वा शब्दो वकुलार्थ:। तेन कस्कादावप्रवृत्ति: [illegible] कस्कः। य

स्क:। भास्करः भास्करः। हरिस्फुरतीत्यादौ विसर्गलोपः। हरिः स्फुरति। हरि स्फुरति।

अह्नो रो रात्रिषु। अह्नो विसर्जनीयस्य पदांते रो भवति रात्र्यादिशब्दवर्जितेषु परत:। (margin: रो नाम रेफो भवति ५)

अहः पतिः अहर्पतिः। अहः गणः अहर्गणः। अरात्रिविषितिविशेषणाद्रात्रौ अहोरू

पं। अहो रथंतरं। अहोभ्यां। अतोऽत्युः। अकारात्परस्य विसर्जनीयस्य उकारो भवत्यति

परतः। कः अर्थः कोऽर्थः। हुबे। अकारात्परस्य विसर्जनीयस्य उकारो भव [illegible] ति

हवे परे। कः गतः को गतः। देवः याति देवो याति। मनः रथः मनोरथः। आदबेलोपश्च। अव

ओतवा विसर्जनीयस्य यत्वं वक्तव्यं भो अच्युत। भो यच्युत।

कुप्वोः क प्यौ वा। विसर्जनीयस्य कवर्गपवर्गसंबंधिनि खसे परे क प्वौ वा भवतः।

सार० ८

कौ त्यरस्य विसर्जनीयस्य लोपश्च भवत्यवे परे। वालाः वातालाः। बाला बालाः। स्वरे यत्वं वा

अवर्णात्परस्य विसर्जनीयस्य यत्वं वा भवति स्वरे परे। देवाः अत्र देवायत्र। पक्षे देवा अत्र।

भोसः। भोस् भगोस् अघोस् इत्येते शब्दाः सकारवर्जा निपाताः तेषां विषये। भो देवाः। भो

एहि भगो नमस्ते। अघो याहि। नामिनो रः। नामिनः परस्य विसर्जनीयस्य रेफो भवत्य

बे परे। अग्निः अत्र। अग्निरत्र। बहुः यजते बहुर्यजते। रेफप्रकृतिकस्य रत्वं पेवा।

रेफप्रकृतिकस्य विसर्जनीयस्य रेफो वा भवति खपे परे। गीः पतिः गीर्पतिः। कुप्वोः क

प्यौ वेति बकारः। गीष्पतिः। रः। रेफसंबंधिनो विसर्जनीयस्य रेफो भवत्यवे परे। प्रातः

अत्र प्रातरत्र। अंतः गतः अंतर्गतः। रिलोपो दीर्घश्च। रेफस्य रेफे परे लोपो भवति विसर्गस्य वा ८

पूर्वस्य च दीर्घः। पुनर् रमते पुना रमते। शुक्तिः रूप्यात्मना भाति शुक्ती रूप्यात्मना भाति।

सैषाद्हसे। सशब्दात् एषशब्दात् परस्य विसर्जनीयस्य लोपश्च भवति हसे परे। सः चरति

स चरति। एषः हसति एष हसति। सैषादिति संहिता। सच एव च सैषं समाहार द्वंद्वे क

वचनं तस्मात् सैषात्। सेष इत्यत्र अदबे लोपश्च। सेष दाशरथी रामः सेष राजा युधि

छंदो वत्सूत्राणि भवंतीति नियमात्

सूत्राणां छांदसत्वात् सैषादिति संहिता नाता

सेष दाशरथी राम इति श्लोकोपि छांदसो लौकिकश्च।

अवर्णागमः। गवेंद्रादौ वर्णागमः। सिंहे वर्णविपर्ययः। अंत्यवर्णः पूर्वं पूर्वं अंत्यो भवति।

षोडशादौ पदे वर्णस्य अन्यादेशो भवति अयं वर्णविकारः। दूषादि वेड दरं यस्य सह बाद रः। अत्रव नाशः

ष्ठिरः। सेष कर्णो महात्यागी सेष भीमो महाबलः। सैषादिति या संहिता विहिता सा से

व दाशरथी राम इत्यादौ लोपशिसत्यपि पादपूरणसंध्यर्था ज्ञेया सेवा कारतया

सूत्रे प्रयोगो दर्शितः। यदुक्तं लौकिका ये हतद्देवं क्रकं भवेत्। से मां भूम्यादद सोषा सवाम नः इत्यां भ

मित्यादीनाम् इष्टता। नामिनो बे लोपश्च। नामिनः परस्य विसर्जनीयस्य लो मिंत्र्याद

पश्च भवत्यबे परे। क्वचिद्वृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव इत्वीह

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति। वर्णागमो वर्णविपर्य तयान

यश्च द्वौ चापरौ वर्णविकार नाशौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पं सः अनि

चविधं निरुक्तं। क्रमेणोदाहरति। वर्णागमो गवेंद्रादौ सिंहे वर्णविपर्ययः। षो रुत्थः उ

डशादौ विकारः स्याद्वर्णनाशः पृषोदरे। वर्णविकारनाशाभ्यां धातोरतिश भ्यां वाणा

येन यः। योगः स उच्यते प्राज्ञैर्मयूरभ्रमरादिषु। पात्रे यांजलिना यान्नं विबेद सरकन्यो आददेजं

पिपिबेद् पि। इति सारस्वते विसर्गसंधिः। अथ विभक्तिर्विभाव्यते। र गीव कां

महत्प्रजायां इशब्दे मध्योरीतीति मयूरः महीसंबंधि वृक्षेषु वा। भ्रमु चलने

अस्य योगाइतिसंतो क्वचित्सत्राणां प्रवृत्तिः क्वचिद इतस्ततो भ्रम

प्रवृत्तिः क्वचिद्विभाषा विकल्पः क तीति भ्रमरः

विद्धी पदिश सत्यां विसंधिः।

विभक्त्यारहितं प्रकृतिरूपं धा
तुवर्जं अर्थवत् देव इत्युक्ते नाम
शब्दः
नाम्नः परत इत्यर्थः ४

सारस्व सा द्विधा। विभज्यंते कर्तृकर्माद्यर्थाः प्रकृतिप्रत्ययार्थो नया सा विभक्तिः
९ विभाव्यते प्रकाश्यते कथ्यत इत्यर्थः। सा द्विधा। स्यादिस्त्यादिश्च। विभक्त्यं
तं पदं। विभक्त्यंतं शब्दरूपं पदसंज्ञं भवति। सिलोपे विहराजन्नित्यादीनां
पदत्वसिद्धिः। तत्र स्यादिर्विभक्तिर्नाम्नोभिधीयते। त्यादिस्तु धातोः परतो योज्या।
अविभक्ति नाम। विभक्तिरहितं धातुवर्जं चार्थवच्छब्दरूपं नामोच्यते। प्रकृतिरू
पं धातावपि व्याप्तिः। तदर्थं धातुवर्जमित्युक्तं। देव इत्युक्ते लौकिकव्यवहारेण देव
शब्दस्यैव प्रकृतिरूपं धातुशंका न प्रतीयते तस्मात् धातुवर्जमित्युक्तं। अर्थो
र्थ विद्यते यस्मिन्नित्यर्थवत् शब्दरूपमित्युक्तं। कृत्तद्धितसमासाश्च नामसंज्ञकाः
स्युः। प्रातिपदिकसंज्ञका इति केचित्पौ वदंति। नामपर्यायः प्रातिपदिकं। त २
तस्मादि स्मात्। सि। औ। जस्। अम्। औट्। शस्। टा। भ्यां। भिस्। ङे। भ्यां। भ्यस्। ङसि। भ्यां।
तिसूत्रं भ्यस्। ङस्। ओस्। आम्। ङि। ओस्। सुप्। तस्मादिति पंचम्येकवचनांतं सू
त्रं। तस्मात् नाम्न इत्यर्थः। तस्मात् नाम्नः परा स्यादयः सप्त विभक्तयो भवंति। तत्रा

पदांते वर्तमानजे सकाररेफ त्यां सविसर्जनीयादेशो होतो नाम परतः सकारास
विसर्जनीय आदेशो होतो र् स प्रत्याहार पृष्ठं अससतां

येकार्थविवक्षायां प्रथमैकवचनं सि। देव सि इति स्थिते। इकार उच्चारणार्थः। सो विस
पदांते र्गः। सकाररेफयोर्विसर्जनीयादेशो भवति नाम्नि सिपरे । अपातो रिति नाम परं व्या
वर्तमा ख्येयं। द्वित्वविवक्षायां देव औ इति। अ औ औ। अवर्ण ओकारे औकारे च परे सह औ
नयोः २ कारो भवति। देवौ। बहुत्वविवक्षायां देव जस् इति। जकारस्य संज्ञायां तस्य लोपः।
जकारप्रयोजनं जसीति विशेषणार्थं। सवर्णे दीर्घः सह। सो विसर्गः। देवाः। छंद
सि अकाराज्जसि सुक् कश्चिद्वक्तव्यः। देवासः। द्वितीयैकवचने देव अम् इति। अम्
शसोरस्य। सिमां नाउसेरयोरम्शसोरकारस्य लोपो भवति । मोनुस्वारः।
मकारस्यानुस्वारो भवति न से परे पदांते च। देवं। द्वितीयाद्विवचने देव औ इति स्थि
ते। अ औ औ। देवौ। बहुवचने देव शस् इति। शकारः शसीति विशेषणार्थः।
सो नः पुंसः। पुल्लिंगात् समानादुत्तरस्य शसः सकारस्य नकारादेशो भवति। श
सि। शसि परे पूर्वस्य दीर्घो भवति। यत्तदेशस्तद्वद्भवति। देवान्। तृतीयैकवच

सार० नेदेवटा इति० टेन। अकारात्परष्टाइनभवति। अइए। देवेन। देवाभ्याम्भिसि० अद्भि
१० अकारआभवति भकारेपरे। देवाभ्यां। देव भिस् इति० भ्यः। अकारात्परस्य भिसो
भकारस्याकारादेशो भवति। इस् परतः। देव अ इस् इति० प्रत्ययप्राधान्यात्प्रथ
मं आदेशप्रत्यययोः अ इस् अनयोः संधिः पश्चात्तामादेशयोः। अइए। एदैऐ। स्रो
विसर्गः। देवैः। अकारस्य भिसि छंदस्येकारो वा वक्तव्यः। देवेभिः। कर्णेभिः। वतु पुंसि न
थ्यैकवचने देव ङे इति० ङे अक्। अकारात्परस्य ङे इत्यस्याग्गमो भवति। किन्त्वा नपुंसके
दं ते। देव ए अ इति० एअय्। एकारस्य अय् भवति स्वरे परे। सवर्णे दीर्घः सह। देवाय। दे ४८
वाभ्यां। अद्भि। एस्मि बहुत्वे। अकारस्य एत्वं भवति सकारे भकारे च परे बहुत्वे सति
देवेभिः। पंचम्येकवचने देव ङसि इति० ङसिरत्। अकारात्परो ङसिरत् भवति। स
वर्णे दीर्घः सह। देवात्। अद्भि। देवाभ्यां। एस्मि बहुत्वे। देवेभ्यः। षष्ठ्येकवचने देव १०
ङस् इति० ङस् स्य। अकारात्परो ङस् स्य भवति। देवस्य। व ओसि। अकारस्य ओ
सि परे एत्वं भवति। देवे ओस् इति० एअय्। स्वरहीनं परेण संयोज्यं। स्रो विसर्गः॥

पदांते वर्तमानयोः सकाररेफयोर्विसर्जनी देवशब्दे: ८
यादेशो नाम सकाररेफ रे।
देवयोः। देव आम् इति० नुडामः। समानात्परस्यामो नुडागमो भवति। टित्वादादौ
नामि। नामि परे पूर्वस्य दीर्घो भवति। देवानां। सप्तम्येकवचने देव ङि इति ङिते
अइए। देवे। देवयोः। बहुवचने देव सुप् इ० एस्मि बहुत्वे। किलात्सः षः कृतस्य
कवर्गादिकाच्च प्रत्याहारादुत्तरस्य केनचित्सूत्रेण कृतस्य सकारस्य षकारा
देशो भवति। देवेषु। कुचिल्कि डाभावेपि सस्य षत्वं। स्तंभुरोधने। अथ संबोधने
आमंत्रणे सिर्धिः। आमंत्रणमाभिमुखीकरणं तत्र विहितः सिर्धिसंज्ञो भवति
[illegible] समानाद्धेर्लोपो धातोः। समानादुत्तरस्य धेर्लोपो भवति स्यादौ प
धातोः। आभिमुख्याभिव्यक्तये हे शब्दस्य प्राक्प्रयोगः कार्यः। हे देव। हे देवौ रे।
हे देवाः। हे ल्हः। हे कृ हूः। हे वात प्रमीः। इत्यादौ दीर्घत्वान्न धिलोपः। पुनर्धिः सिः
प्रयुज्यते। एवं घट पट स्तंभ कुंभादयोप्यकारांताः पुल्लिंगाः। एतैरेव सूत्रैः
सिध्यंति। अकारांतानामपि सर्वादीनां तु विशेषः। सर्व। विश्व। उभ। उभय।
विश्वः। विश्वौ। विश्वे। उभशब्दो द्विवचनांतः उभयशब्दस्य द्विवचनं
विश्वा। विश्वौ। विश्वाः। उभौ। उभौ। उभाभ्यां। आदिके वचने बहु बहुवचनेस्तः
विश्वे। विश्वौ। विश्वानि। उभयः उभये। उभयं उभयानू

आ ई ऊ ऋ ए ऐ ओ औ विसर्गानुस्वारसंयो। ए ऐ ओ औ दीर्घ आक्ष

न परसवर्णो दीर्घो गुरुरुच्च भवति   गुरुर्दीर्घमक्षरं बहुक्षरश्चेति स्वल्पदीर्घाः

गुरुलक्षणं   अथ गुरुलक्षणं विसर्गानुस्वारसंयोगपरो दीर्घश्च गुरुः आ ई ऊ ऋ ए ऐ ओ औ गुरुः इत्येते

सार॰ अन्य। अन्यतर। इतर। डतर। डतम। कतर। कतम। सम। सीम। नेम। एक। पूर्व। पर। पिगुरवः शकारः

११ अपर। अवर। अधर। दक्षिण। उत्तर। स्व। अंतर। त्यद्। तद्। यद्। एतद्। इदम्। इत्यर्थः आगमादे

अदस्। द्वि। किं। युष्मद्। अस्मद्। एते सर्वादयस्त्रिलिंगाः। तत्र पुल्लिंगत्वे यथा शप्रत्या

रूपं नेयं तत्कथयति। सर्वः। इकार उच्चारणार्थः स्त्रो विसर्गः। सर्वौ। जसी। सर्वा धातेश्चाग

देरकारांतात्परो जस ई भवति। गुरुः शिष्य सर्वस्य वक्तव्यः। अ इ ए। सर्वे। सर्वं। मादेशप्र

सर्वौ। सो नः पुंसः। शसि। सर्वान्। सर्वेण। सर्वाभ्यां। सर्वैः। षुर्णो नोऽन्ते। ऋवर्ण त्ययाः।

रुष्षुः। षकाररेफऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति। [illegible]

सर्वानिति [illegible] दंते स्थितस्य न भवति। अवकु पु अंतरेपि। अव प्रत्याहारेण कवर्गेण प

निदर्शनं ४ वर्गेण वमध्ये व्यवधानेपि भवति नान्येन। अविसर्गानुस्वारविसर्गव्यवधानेपि

अत्रनुम णत्वं वाच्यं। विंबकंमः। उरः केणा। उरुष्वोणोति सिध्यति। चतुर्थ्येकवचने सर्वडे

२ इति स्थिते। सर्वादेः स्मट्। सर्वादेरकारांतात्परस्य चतुर्थ्येकवचनस्य स्मडाग

अन्यः। अन्यौ। अन्ये।   अत्र विसर्गः २ उरुमहत्वे   सीमा। सीमानौ। सीमानः

अन्यतरः। इतरः

अकारस्यैत्वं भवति सकारे भकारे च परे बहुवच   ङसिरत्। अकारात्परो ङसिरद् भवति ९

नचने ४   अकारस्यैत्वं भवति बहुवचने सकारे भकारे च परे। ४

मो भवति। टित्वादादेः। सर्वस्मै। सर्वाभ्यां। सर्वेभ्यः। अतः। सर्वादेः परस्यातः

स्मडागमो भवति। सर्वस्मात्। सर्वाभ्यां। सर्वेभ्यः। ङस् स्य। अकारात्परो ङ ११

स स्य भवति। सर्वस्य। सर्वयोः। सुडामः। सर्वादेः परस्यामः सुडागमो भवति ६ सुडित्य

एस्मि बहुत्वे। द्विकात्सः षः। सर्वेषां। ङिः स्मिन्। सर्वादेरकारांता स्मि लुप्त

त्परो ङिः स्मिन् भवति। सर्वस्मिन्। सर्वयोः। एस्मि बहुत्वे। सर्वेषु। हे सर्व। हे रकारार्थः

सर्वौ। हे सर्वे। विश्वादीनामेकशाब्दपर्यंतानां सर्वशब्दवद्रूपं नेयं। विश्वादि

शब्दमध्यस्थितो डतरडमौ विहाय तो प्रत्ययौ। नन स्त दंताः शब्दा यथा स्युः। पू

र्वादीनां तु नवानां जस ईकारो वा वक्तव्यः। पूर्वे। पूर्वाः। परे। पराः। अवरे। अवराः   पूर्वः पू

अपरः अ परौ। अपरे। अपराः। दक्षिणे। दक्षिणाः। उत्तरे। उत्तराः। अधरे। अधराः। स्वे।   र्वौ। पूर्वे

दक्षिणः स्वाः। अंतरे। अंतराः। नेमशब्दस्य जस ईकारो विकल्पेन। नेमे। नेमाः। पूर्वा   परः। परौ।

दक्षिणौ। दीनां तु नवानां ङसिङ्योः स्मात्स्मिनौ वा वक्तव्यौ। पूर्वस्मात्। पूर्वात्। पूर्वस्मिन्   अवरः अवरौ। अवराः

अंतरः। अंतरौ   उत्तरः। उत्तरौ। अधरः। अधरौ। स्वः। स्वौ।   अवरे

नेमः। नेमौ।

पूर्वे। परस्मात्। परात्। परस्मिन्। परे। अपरस्मात्। अपरात्। अपरस्मिन्। अप
रे। अवरस्मात्। अवरात्। अवरस्मिन्। अवरे। दक्षिणस्मात्। दक्षिणात्। दक्षि
१२ णस्मिन्। दक्षिणे। उत्तरस्मात्। उत्तरात्। उत्तरस्मिन्। उत्तरे। अधरस्मात्। अध
रात्। अधरस्मिन्। अधरे। स्वस्मात्। स्वात्। स्वस्मिन्। स्वे। अंतरस्मात्। अं
तरात्। अंतरस्मिन्। अंतरे। तीयप्रत्ययांतस्य सर्वशब्दवद्रूपं ङित्सु देववद्वा। सर्वत्र
सर्वादिः स्मट् सर्वादित्वात् परस्य वतुर्थ्येकः — वक्तव्यं। द्वितीयस्मै। द्वितीयाय। द्वितीयस्मात्। द्वितीयात्। द्वितीयस्मिन्। द्वितीये। इति सिद्धं अतो एकवचनं नां उभये बहुवचनं
एवं तृतीयः। उभयशब्दस्य द्विवचनाभावादेकवचनबहुवचने स्तः। उभयः। उभये।
उभयं। उभयान्। उभयेन। उभयैः। उभयस्मै। उभयेभ्यः। उभयस्मात्। उभयेभ्यः।
उभयस्य। उभयेषां। उभयस्मिन्। उभयेषु। हे उभयः। हे उभये। उभशब्दो नित्यं द्वि
वचनांतः। उभौ। उभौ। उभाभ्यां। उभयोः। उभयोः। संज्ञायां गौणत्वे द्वंद्वे बहुव्री १२
हौ च तीयासमासे तदर्थवाक्ये च सर्वेषां न सर्वादित्वं। अत्रोदाहरणानि। स
र्वाय देहि। सर्व इति नामकायेत्यर्थः। इति संज्ञायां। अतिसर्वाय। गौणत्वे। प्रिय

अज्ञातिधनवाचकस्य स्वशब्दस्य ... सर्वादि — बहुव्रीहौ च तीयास मासे च यथासंख्यं चैवोदाहरणं। एकस्माद्ग्रामादन्यो ग्रामांतरमिति ग्रामांतरं [redacted]
स्वे। स्वाः सर्वाय द्वंद्वे। मासपूर्वाय। बहुव्रीहौ। मासेन पूर्वाय। इति तदर्थवाक्ये। पूर्वादीनां
व्यवस्थायामेव सर्वादित्वं। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। समशब्दस्य
तुल्यार्थे न सर्वादित्वं। समाय समदृशायेत्यर्थः। ग्रामांतरेलापसः। ग्रामाद्बहि
रित्यर्थः। अंतरायां पुरि। स्वशब्दस्य ज्ञातिधनवाचकत्वे स्वाय धनाय ज्ञातये वा
ज्ञातिशब्दः पुल्लिंगः। अधरशब्दस्य ओष्ठवाचकत्वेन सर्वादित्वं। अधरे सक्ति
मा। ।०। उक्तं हि। सर्वादिः सर्वनामाख्या न चेज्ज्ञातिधनाभिधः। पूर्वादिश्च व्य
वस्थायां समो तुल्ये तरे पुरि। परिधाने बहिर्योगे स्वोर्थज्ञात्यन्यवाच्यपि
मासस्याल्लोपो वा। मासशब्दस्याकारस्य लोपो भवति सप्तविभक्तिषु
परतः। तत्र अकारांतस्य देववद्रूपं। मासः। मासौ। मासाः। मासं। मा
सौ। मासान्। मासेन। मासाभ्यां। मासैः। मासाय। मासाभ्यां। मासेभ्यः।
मासात्। मासाभ्यां। मासेभ्यः। मासस्य। मासयोः। मासानां। मासे। मा

स्रोर्विसर्गः
आदबे लोपश्च २

सयोः। मासेषु। हे मास। हे मासौ। हे मासाः। अकारलोपपक्षे। माः। मासौ।
मासः। मासं। मासौ। मासः। मासा। माभ्यां। माभिः। मासे। माभ्यां। माभ्यः।
१३ मासः। माभ्यां। माभ्यः। मासः। मासोः। मासानां। मासि। मासोः। मास्सु।
पुल्लिंगः हे माः। हे मासौ। हे मासः। आकारांतः सोमपाशब्दः। सोमपाः। सोमपौ।
सोमपाः। सोमपां। सोमपौ। आतो धातोर्लोपः। धातुसंबंधिन आकार
स्य लोपो भवति शसादौ स्वरे परे। सोमपः। सोमपा। सोमपाभ्यां। सोम
पाभिः। सोमपे। सोमपाभ्यां। सोमपाभ्यः। सोमपः। सोमपाभ्यां। सो
मपाभ्यः। सोमपः। सोमपोः। सोमपां। सोमपि। सोमपोः। सोमपासु।
हे सोमपाः। हे सोमपौ। हे सोमपाः। एवं कीलालपाप्रभृतयः। इकारांतः
पुल्लिंगो हरिशब्दः। तस्य प्रथमैकवचने हरिः। औ यु। इकारांतादुकारां १३
ताद्वपर औ सु आपद्यते इश्च भवतः। हरी। ए ओ जसि। इकारांतस्योका

अइउऋऌसमानाः २

रांतस्य च जसि परे एकार ओकारश्च भवति। हरयः। घौ। इकारांतस्योका
रांतस्य च घिविषये एकार ओकारश्च भवति। समानाद्धेर्लोपो धातोः। हे हरे।
हे हरी। हे हरयः। हरिं। हरी। हरीन्। टा ना स्त्रियां। इकारांतादुकारांतच्च परष्टा ना
भवत्यस्त्रियां। हरिणा। हरिभ्यां। हरिभिः। ङिति। इकारांतस्योकारांतस्य च ङि
ति परे एकार ओकारश्च भवति। हरये। हरिभ्यां। हरिभ्यः। ङस्याः। एदोद्भ्यां मु
त्तरस्य ङसिङसोरकारस्य लोपो भवति। हरेः। हरिभ्यां। हरिभ्यः। हरेः। ह
र्योः। हरीणां। नुडामः। ष्टुर्वर्णान्नो णं। ङेरौ ङित्। इदुद्भ्यामुत्तरस्य ङेरौ भवति स
च ङित्। ङिति टेः। ङिति परे टेर्लोपो भवति। हरौ। हर्योः। हरिषु। एवमग्निगिरिर
विकविप्रभृतयः। एवमुकारांताश्च विष्णुवायुभानुप्रभृतयः। एतैरेव सूत्रैः
सिध्यंति। भानुः। भानू। भानवः। भानुं। भानू। भानून्। भानुना। भानुभ्यां।
भानुभिः। भानवे। भानुभ्यां। भानुभ्यः। भानोः। भानुभ्यां। भानुभ्यः। भानोः।
भान्वोः। भानूनां। भानौ। भान्वोः। भानुषु। हे भानो। हे भानू। हे भानवः। सखि

४ शब्दस्य भेदः। सखि सि इति॰ सखिशब्दस्य सेरधेर्डा भवति। डित्वाट्टिलो
पः। सखा। ऐ सख्युः। सखिशब्दस्यैकारादेशो भवति पंचस्वपि सुपरेषु।
वक्षीनिर्दिष्टादेशाः सर्वं तस्य ज्ञेयः। ऐ आयू। सखायौ। सखायः। द्विवचनस्यौ
वा छंदसि। सखाया। सखायः। अधेरिति विशेषणादकाराधिविषये। समा
नाध्धेर्लोपो धातोः। हे सखे। हे सखायौ। हे सखायः। सखायं। सखायौ। स
खीन्। सखिपत्योरीकाः सखिपतिशब्दयोरीमागमो भवति टाङे ङि बुप
रेषु। दीर्घत्वान्नानभवति। सख्या। आगमानित्यं। सखिभ्यां। सखिभिः जं
सख्ये। सखिभ्यां। सखिभ्यः। ङसिङसः। सखिपतिशब्दयोर्ङस्यागमो भव
ति ङसि ङसोर्ङकारे परे। सख्यु अस्य इति॰ ङसोरुः ङ उः। ङकारांतपर २४
स्य ङसिङसोर्ङकारस्य उकारो भवति सवर्णे दीर्घः। सख्युः। सखिभ्यां। स
खिभ्यः। सख्युः। सख्योः। सखीनां नुडागमः। नामि। सप्तम्येकवचने ङौ
डित्यौकारे कृते सखिपतिशब्दयोरीगितीगागमः। सख्यौ। सख्योः।

सखिपति शब्दयोरी गागमे कृते सवर्णदीर्घः सहेतिसूत्रं कृतं तेन दीर्घत्वेजाते सति

पतिः। पती। पतयः। पतिं। पती। पतीन्। पतिना। पतिभ्यां। पतिभिः। पतये॰ पतेः॰ पतेः। पत्योः। पतीनां। पत्यौ। पत्योः। पतिषु।
प्रजापतिः। प्रजापती। प्रजापतयः। प्रजापतिं। प्रजापती। प्रजापतीन् प्रजापतिना। प्रजापतये। प्रजापतेः॰ प्रजापतेः। प्रजापत्योः। प्रजापतीनां।

ङंदसि[…]प तिशब्दो हरिवत्

सखिषु। अनि सखा। सखायमतिक्रांतः अतिसखा। पंचसु सखिवत् अ
न्यत्र हरिवत्। पतिशब्दस्य प्रथमाद्वितीययोर्हरिशब्दवत्प्रक्रिया। टानी
यादिषु सखिवत्। पतिरसमासे एवं सखिवद्वक्तव्यः। ततः समासे तस्य ना
द्योभवंति। प्रजापतिना। प्रजापतये इत्यादि। द्विशब्दो नित्यं द्विवचनांतः। त्या
देहेरस्यात्। त्यदादेहेरकारो भवति स्यादौ परे। द्वौ। द्वौ। द्वाभ्यां। द्वाभ्यां।
द्वयोः। द्वयोः। त्यदादीनां दशानां संबोधनाभावः। त्रिशब्दो नित्यं बहुवचनांतः
त्रिजस्य इति स्थिते। एओ जसि। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः। त्रिभ्यः। त्रेस्त्रयः
त्रिशब्दस्याय आदेशो भवति नामि परे। [illegible] त्र
याणां। त्रिषु। गोणसमासे बहुव्रीहौ वा द्वित्रिशब्दयोर्नित्यमयङ्। अति
क्रांतास्त्रयो येन स अतित्रयः। अतिक्रांतौ द्वौ येन स अतिद्वयः। प्रियास्त्रयो य
स्य स प्रियत्रयः। कतिशब्दो नित्यं बहुवचनांतः स्त्रिषु सरूपः। कतिशब्दा
ज्जः शसोर्लुग्वक्तव्यः। लुकि न तन्निमित्तं। लुकि आते सति तन्निमित्तं

त्रिशब्दस्य इकारस्य यः। नुडागमः। प्रणोनोनेते। अवकृपं नरेपि।

५

सार॰ कार्यं न भवति। कति। कति। कतिभिः। कतिभ्यः २ कतीनां। कतिषु। ईका
रांतः पुंलिंगः सुश्रीशब्दः। सुश्रीः। य्वोर्धातोरियुवौ स्वरे। धातोरीकारो नाम्नश्च
१५ कारयो रियुवौ भवतः स्वरे परे। सुश्रियौ। सुश्रियः। सुश्रियं। सुश्रियौ। सुश्रि
यः। सुश्रिया। सुश्रीभ्यां। सुश्रीभिः। सुश्रिये। सुश्रीभ्यां। सुश्रीभ्यः। सुश्रियः।
सुश्रीभ्यां। सुश्रीभ्यः। सुश्रियः। सुश्रियोः। सुश्रियां। सुश्र्यादीनां यामो नुट्
वक्तव्यः। सुश्रीणां। सुश्रियि। सुश्रियोः। सुश्रीषु। हे सुश्रीः। हे सुश्रियौ। हे
ग्रहणार्थः। अ एदो नामिनो गुणः। नामिस्थाने अकार अर् एओ अल् एते गुणसंज्ञकाः। आ
रैऔ वृद्धिः। आ आर् ऐ औ आल् एते वृद्धिसंज्ञकाः। अंत्यस्वरादिष्टिः। अंत्यो यः स्वरस्त
दादि वर्णः टिसंज्ञको भवति। अंत्यात्पूर्व उपधा। अंत्याद्वर्णात्पूर्वो यः स उप
धासंज्ञको भवति। असंयोगादिपरो ह्रस्वो लघुः। विसर्गानुस्वारसंयोगपरो २॥
दीर्घश्च गुरुः। मुखनासिकाभ्यामुच्चार्यमाणो अनुनासिकः। मुखेनैवोच्चार्यमाणो

धमात्रकं। एषामन्त्ये प्लुता नादिभेदाः। उच्चैरुपलभ्यमान उदात्तः। नीचैरनुदात्तः। सम
हृत्या स्वरितः। एऐओऔ संध्यक्षराणि। एषां ह्रस्वा न सन्ति। उभये स्वराः। अकारा
दयः पंच पंच वा। ऋऌकारादयः। उभये स्वरा उच्यंते। अवर्ण्यो नामिनः। अवर्णवर्जाः स्वरा
नामिन उच्यंते। अनुक्रान्ता स्तव त्वराः। प्रत्याहारं विना हे पया व्यंजनान्युच्या
मति। हयवरल। ञमणनङम। झढधघभ। जडदगबब। खफछठथ। चटतकप।
शषसह॥ आपंताम्यां प्रत्याहारं विधत्ता घंतौ मिलेवर्णाभ्या घाः। आदिवर्णान्त्य
नपर्यंतमणुः स्तनाम प्रत्याहारः। तथाहि। अकारो बकारेण गृह्यमाणो व प्रत्याहार
स उच्यते। अइउऋऌएऐओऔहयवरलञमणनङमझढधघभजडदगब। इत्येवा
वर्णसमाख्यातः संपद्यते। चटतकप। इति चप प्रत्याहारः। झढधघभ। इति झभ प्रत्या
हारः। जडदगब। इति जब प्रत्याहारः। एवं यत्र यत्र येन येन प्रत्याहारेण कृत्यं स स

निरनुनासिकः। अं इत्यनुस्वारः। अः इति विसर्जनीयः। इति संज्ञाप्रक्रिया॥ ॥अ
धुना संधिरभिधीयते। इ यं स्वरे॥ इवर्णो यत्वमापद्यते स्वरे परे॥ दधि आनय इति
स्थिते॥ दध्य् आनय इति तावद्भवति। हसेहसः। स्वरात्परो रेफहकारवर्जितो हसे परे
द्विर्भवति। इति धकारस्य द्वित्वं। द्विवविधानाद्वैवशिष्यंते। अन्येत्वधंतो झभे जवा
हसानां झसानां झभ परे जबा भवंति। इति पूर्वधकारस्य धकारः। सवर्णे
णत्वा: न गणास वर्णाद् इति वचनात्॥ यथा संख्यं वक्तव्यं॥ स्वरहीनं परेण संयोज्यं। दध्या
नय। गौधी अत्र स्थितः। अहीति विशेषणा। रेफस्य द्वित्वं। किंतु। राद्यपो द्विः। स्वरपूर्वा
द्रेफात्परो यपा द्विर्भवति। जलतुंबिकान्यायेन रेफस्योर्ध्वगमनं। गौर्य्यत्र। स्वर इत्यनु
वर्तते॥ एवमन्यत्रापि यत्र न सूत्राक्षरैः कार्यसिद्धिस्तत्र सर्वत्र सूत्रांतरात्पदांतरानु
वृत्तिर्ज्ञातव्या॥ यंपभ्रूयस्त्वमयानास्माभिर्लिख्यते। उ वं। उवर्णो वत्वमापद्यते स्वरे परे।

सा॰ स॰

स॰ सं॰

मफ अत्रमध्वत्र। सरं। सवर्णोरत्वमापद्यते स्वरेपरे। पितृ अर्थः पित्रर्थः। ऌ लं॥
ऌवर्णो लत्वमापद्यते स्वरे परे॥ ऌअनुबंधः लनुबंधः। ए अय्। एकार अय् भवति
स्वरे परे। ने अनं नयनं॥ ओ अव्॥ ओकार अव् भवति स्वरे परे। गो अति।
भवति। गवादेरवर्णागमोक्षादौ वक्तव्यः। उगो अक्षः। गवाक्षः। गो इंद्रः गवेंद्रः।
गो अजिनं। गवाजिनं। प्र ऊढः प्रौढः॥ क्वचित्स्वरवधकारः॥ यथा अध्व
परिमाणे॥ गोयूतिः गव्यूतिः॥ ऐ आय्। ऐकार आय् भवति स्वरे परे। नै अ
कः नायकः। औ आव्। औकार आव् भवति स्वरे परे॥ तौ इह ताविह। यो लो
पश्च वा पदांते। पदांते स्थितानामपदीनां यकारवकारयोर्लोपश्च वा भवति।
ते आगताः तआगताः। तयागताः। वटो इह वट इह वटविह। लोपशि
पुनर्न संधिः। हृदासिद्धं भवति। हे सखे इह इति। हे सखेति। एदोतोतः। पदां

बा

तेवर्तमाना श्चपाअमेपरेअमाः भवंति। वाक् मात्रं। वाङ्मात्रं। वाग्मात्रं। ष
ट्ममः षण्मम। षड्मम। मयादि नित्यं वाच्यं॥ चित् मयं। चिन्मयं। छेया च
यः। चपाद्धत्तरस्य छकारस्य छो वा भवंति। वाक् श्ररः। वाक्छूरः। वाक्
श्ररः। होझभाः। चपादुत्तरस्य हकारस्य झभ भवंति। यद्योगश्चपस्त द्योगा भा
श्च लुपोस्तवति। तत् हविः। तद्धविः। वाक् हरिः। वाग्घरिः। स्तो श्चभिश्चुः।
स्तोः सकारस्य तवर्गस्य शकारेण चवर्गेण च योगे शकार चवर्गौ यथा सं
ख्येन भवतः। कस् चरति। कश्चरति। कस् शूरः। कश्शूरः। तत् चित्रं। त
च्चित्रं। तत् शास्त्रं। तच्छास्त्रं। नयात् ज्ञानारादुत्तरस्य तवर्गस्य चुत्वं न भ
वति। विश्नः विश्नः। प्रश्नः प्रश्नः। ष्टुभिष्टुः। स्तोः षकार ष्टवर्ग योगे
भवति। कस् षष्ठः। कष्षष्ठः। कस् टीकते। कष्टीकते। तत् टीकते। तट्टीकते। तद्दी

भा

यं॰सं

सा॰त कते। नोल्लिलः। तवर्गस्य लकारे परे लकारो भवति। तल्लुनाति। तल्लुनाति
भवाँल्लिख्यति। भवाँल्लिख्यति। अंतस्थादिः प्रभेघ रेफवर्जितापर्यंता।
६ सानुनासिका निरनुनासिकाश्च तत्र सानुनासिक एव लकारो नकारस्य
भवति। नाषि। षकारे परे तवर्गस्य ष्टुत्वं न भवति। भवान्षष्ठः। भवान्षष्ठः। दी
र्घ्यात्। पदांते वर्तमानात् टवर्गात् परस्य स्तोष्टु न भवति। षट्नरः। षण्णरः। पट्
रः। षट्सीदंति। षट्सीदंति। नः सक् छते। नांतस्य पदस्य छते परे सगाग
मो भवति। द्विरुक्तो वा घंतयोर्वक्तव्यौ। राजन्श्चित्रं। राजंश्चित्रं। भवांस्त
नोति। भवांस्तनोति। शेचक्का। नांतस्य पदस्य शे परे चकारागमो भवति। भवान्
शूरः। भवाञ्छूरः। भवाञ्शूरः। भवान्शूरः। ५। ङ्णो ह्रस्वाद्द्विः स्वरे। ङकारणकार ६
नकारा ह्रस्वादुत्तरा द्वि भवंति स्वरे परे। प्रत्यङ्ङिदं। प्रत्यङ्ङिदं। सुगण्ण्

सू २ शे २

सा॥ अवर्ण ऋवर्णे परे सह कचित् आर् भवति। तवल्कारः। तवल्कारः। रल
योः सावर्ण्यं वक्तव्यं। परि अंकः। पर्यंकः। पल्यंकः। रलयोर्डलयोश्चैव शषयो
र्बवयोस्तथा। वदंत्येषां हि सावर्ण्यमलंकारविदो जनाः। एऐ ऐ। अ
सह वर्णे एकारे ऐकारे परे ऐकारो भवति। तवैषः। तवैषः। तवैश्वर्यं। तवै
श्वर्यं। ओऔ औ॥ अवर्ण ओकारे औकारे च परे सह औकारो भव
ति। तव ओदनं। तवौदनं। तव औत्सुक्यं। तवौत्सुक्यं। ओष्ठोत्वौ वा। अ
वर्णस्य ओष्ठोत्वोः परयोः सह वा ओ भवति। समा सेत्साति। बिंब ओ
ष्ठः। बिंबोष्ठः। बिंबौष्ठः। स्थूल ओतुः। स्थूलोतुः। स्थूलौतुः॥ इति स्वरसंधिः
॥ अथ प्रकृतिभाव उच्यते॥ नामी॥ अदसो मी संधिं न प्राप्नोति॥

स्व॰ सं

सा॰त॰ अमी आदित्याः। द्विवचनं ई ऊ ए च स्वरे। ईकारांत ऊकारांत एकारांत
८ द्विवचनं द्विवे वर्त्तमानः संधिं न प्राप्नोति। मणीवादिवर्जं। मणीवस्त्रा। रो
दसीव। दंपतीव। जायापतीव। अग्नी अत्र। वायू अत्र। माले आनय। ओ
निपातः। आकार ओकार निपात एकस्वरश्च स्वरे संधिं न प्राप्नोति। आ अेवं
न्यसे। नो अत्र स्थातव्यं। उ उत्तिष्ठ। इ इंद्रं पश्य। प्लुतः। प्लुतश्च स्वरे संधिं न प्राप्नो
ति। देवदत्ता ३ एहि। यज्ञभूते ३ आगच्छ। दूराद्धाने टेः प्लुतः। दूराद्धा
विचारे ह्वाने गायने रोदने च टेः प्लुतो भवति॥ इति प्रकृतिभाव उच्यते॥ अथ
व्यंजनकार्यमुच्यते। ॥ चपा अबे जबाः। पदांते वर्त्तमाना चपा अबे जबा भवं ५
ति अबे परे। षट् अत्र। षड् अत्र। वाक् अथा। वागथा। अमे आमा वा। पदां

हे। सम्मणिर्हा। राजन् इह। राजन्निह। छः। ह्रस्वात्परछकारो द्विर्भवति। स
से चपा झसानां। झसानां खसे परे चपा भवंति। तवछत्रं। त[illegible]चो। दीर्घाद्वि
चवक्तव्यं। ह्रीच्छः। म्लेच्छः। मोनुस्वारः। मकारस्यानुस्वारो भवति हसे परे प
दांते। तं मू हसति। तं हसति। एडु मूढ्या। वंडुढ्या। मः स्वरे। अनुस्वारस्य मका
रो भवति स्वरे परे। अनं आयाति। तमायाति। नश्चापदांते झसे। नकारस्य मका
रस्य चापदांते वर्त्तमानस्यानुस्वारो भवति झसे परे। यशान् सि। यशांसि। पय
न् सि। पयांसि। पुम् भ्यां। पुंभ्यां। यमा यपे स्य। अनुस्वारस्य यमो भवति
यपे परे। अस्य यपस्य सवर्णः। तं करोति। तङ्करोति। तं तनोति। तन्तनोति। सं
यंता। सय्यंता। सं लोकं। सल्लोकं। संवत्सरः। सव्वत्सरः। ङ[illegible]हसि। अनुस्वा
रस्य ङकारो भवति शषसहरेफेषु परेषु। [illegible]दसि। हंसः। हङ्सः॥ इति व्य

सा

जनसंधिः।अथविसर्गसंधिर्निगद्यते।विसर्जनीयस्यसः॥विसर्जनी खं॰सं
यस्यसकारोभवतिखसेपरे।कः तनोति।कस्तनोति।शषसेवा।विसर्जनी खस्ते
यस्यशषसेपरे।कः शेते।कश्शेते।कुपोः कः पाव।विसर्जनीयस्यक कपि
वर्गसंबंधिनिखसेपरेकः पावाप्तभवतः।कपाउच्चारणार्थौ।कः करो
ति।कस्करोति।कः पठति।कः पठति।वाचस्पत्यादयः शब्दाःसंज्ञानि
ह पातात्साधवः।तद्वृत्तौ।करपत्योश्चेसस्यवतयोःसुट्लोपश्च।ततेकर।
तस्करः।बृहस्पतिः।बृहस्पतिः।पोचस्पतिः।उतेस्थादेःसलोपः।
उतस्थादेः सकारस्यलोपोभवति।उत्तस्थानं।उत्थानं।अहोरा
त्रिषु।अह्नोविसर्जनीयस्यपदांतेरोभवतिरात्र्यादिश
ब्दवर्जितेषुपरतः।अहःपतिः।अहःपतिः।अहःगणः।

अहर्गणः।अरात्रिविधितिविशेषणादहोरात्रं।अतोत्युः।अकारात्परस्यविस
र्जनीयस्योकारोभवत्यतिपरतः।कःअर्थः।कोर्थः।रवे।अकारात्परस्यवि
सर्जनीयस्योकारोभवतिहवेपरे।कःगतः।कोगतः।देवःयाति।देवोया
ति।मनःरथः।मनोरथः।आद्वेलोपश्च।अवर्णात्परस्यविसर्जनीयस्य
लोपश्चभवत्यवेपरे।देवाअत्र।देवाअत्र।वाताः वांति।वातावांति।स्व
रेयत्वंवा।अवर्णात्परस्यविसर्जनीयस्ययत्वंवाभवतिस्वरेपरे।देवाः
अत्र।देवायत्र।भोसः।भोभगोअघोइत्येतस्मात्परस्यविसर्जनीयस्यलो
पश्चभवत्यवेपरे।भोः एहि।भोएहि।भगोनमस्ते।भगोनमस्ते।अघोःया
हि।अघोयाहि।नामिनोरः।नामिनःपरस्यविसर्जनीयस्यरेफोभवतिघो
षवेपरे।अग्निःअत्र।अग्निरत्र।वटुःयजते।वटुर्यजते।रेफप्रकृतिकस्यख
पेवा।रेफप्रकृतिकस्यविसर्जनीयस्यरेफोवाभवतिखपेपरे।गीःपतिः।

स॰ स्व॰
८

वि॰ सं॰

गीर्षपतिः। गीष्पतिः। धूः पतिः। धूर्पतिः। धूष्पतिः। रः। रेफसंबंधिनो
विसर्जनीयस्य रेफो भवत्स्वरघोषवत्परे। प्रातः अत्र। प्रातरत्र। अंतः गतः। अंत
र्गतः। रि लोपो दीर्घश्च। रेफस्य रेफे परे लोपो भवति पूर्वस्य च दीर्घः।
पुनः रमते। पुनारमते। शुक्लैः रूप्या मना भाति। शुक्लै रूप्या मना भा
ति। सैषाद्धसे। सशब्दादेषशब्दाच्च परस्य विसर्जनीयस्य लोपो भव
ति हसे परे। सः चरति। स चरति। एषः हसति। एष हसति। कचिन्ना
मिनो वा लोपश्च। कचिन्नामिनः परस्य विसर्जनीयस्य लोपश्च भ
वत्यवपरे। सैषादिति संहिता। सैषा दशरथी रामः सैष राजा युधि
ष्ठिरः। सैष कर्णो महात्यागी सैष भीमो महाबलः॥ इत्यादौ पादपू
र्णे संधयः। पद्मके। लौकिकायहतद्विर बहुलं भवेत्। सामर्थ्या
द्दर्शनात्॥ मित्यादिनामदुष्टता॥ २॥ कचित्प्रवृत्तिः कचिदप्रवृत्तिः

कचिद्विभाषा कचिदन्यदेव। विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं
बाहुलकं वदंति॥ ३॥ वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारना
शौ। धातोस्तदर्थातिशयेन योगस्तदुच्यते पंचविधं निरुक्तं॥ ४॥ वर्णा
गमा गवेंद्रादौ सिंहे वर्णविपर्ययः। षोडशादौ विकारस्य द्वर्णनाशः
पृषोदरे॥ ५॥ वर्णविकारनाशाभ्यां धातोरातिशयेन यः। योगः स उ
च्यते प्राज्ञैर्मयूरभ्रमरादिषु॥ ६॥ ॥इति विसर्गसंधिः॥ ॥अथ वि
भक्तिर्विभाव्यते॥ ॥सा द्विधा॥ ॥स्यादिस्त्यादिश्च॥ विभज्यंते
परा। तत्र स्यादिविभक्तिर्नाम्नो योज्यते। अविभक्तिनाम। विभक्ति
रहितं धातुवर्जितं चार्थवच्छब्दरूपं नामोच्यते। कृत्तद्धितसमासाश्च। प्रा
तिपदिक संज्ञा इति केचित्। तस्मात्। सि। औ। जस्। इति प्रथमा॥
अम्। औ। शस्। २ टा भ्यां। भिस्। ३ ङे। भ्यां। भ्यस्॥ ४॥ ङसि भ्यां॥

सा॰ स्व॰ भ्यस्॥ ५ ङसि। ओस्। आम्॥ ६ ङि। ओस्। सुप्॥ ७ तस्मान्नाम्नः पराः
२ स्यादयः सप्त विभक्तयो भवंति। तत्राप्यथमा चैकत्वविवक्षायां प्र
थमैकवचनं सि। अकारांतः पुल्लिंगो देवशब्दः। देवसि इति स्थि
ते इकार उच्चारणार्थः। सो विसर्गः। सकाररेफयोर्विसर्जनीयो दृश्य
भवत्यधातोरसपदांते च। देवः॥ द्वित्वविवक्षायां। औ। औ औ।
देवौ। बहुत्वविवक्षायां जस्। जकारस्य संज्ञायां तस्य लोपः। प्रयोज
नं जसीति विशेषणं। दीर्घं विसर्गौ। देवाः। अकाराज्जसा सह
चिदुक्तव्यः। हे वासा नियया शिरा। ब्राह्मणास॰। द्वितीयैकवचने
देव अम् इति स्थिते। अम् शसोरस्य। समानादुत्तरयोरम्शसोरका
रस्य लोपो भवत्यधातोः। देवं। देवौ। द्वितीयाबहुवचने देवशस्
इति स्थिते। शकारः शसीति विशेषणार्थः। सो नः पुंसः। पुल्लिंग २

त्समानादुत्तरस्य शसः सकारस्य नकारस्यादेशो भवति। शसि। शसि परे पूर्वस्य
दीर्घो भवति। नदादेः रास्तद्भवति। देवान्। तृतीयैकवचने देवटा इति स्थि
ति। टकारानुबंधष्टेनेति विशेषणार्थ। यः। टेना। अकारात्परस्य टा इन भवति। अ
रूपं देवेन। अद्भि। अकार आ भवति भकारे परे। देवाभ्यां। भ्यः। अकारां
तस्य भिसो भकारस्याकारादेशो भवति। अभिसः। देवैः सह इति स्थिते। ए
ऐ ऐ से। सो विसर्गः॥ रेफयोर्विसर्जनीयो। देवैः॥ अकारस्य भिसि छंद
सि ऐकारो वक्तव्यः। देवेभिः। कर्णेभिः। चतुर्थ्येकवचने देव ङे इति स्थिते। ङ
कारो ङित्कार्यार्थः सर्वत्र। ङे अकः। अकारांतस्य ङे इत्येतस्य आग

स्व·पुं

सा·त गमो भवति। एअय्। सवर्णे दीर्घः सह। देवाय। देवाभ्यां। ङसिभ्यसि बहुत्वे। अ
१० कारस्य एत्वं भवति सकारे भकारे च परे बहुत्वे सति। देवेभ्यः। पञ्चम्येकव
चने देव ङसि इति स्थिते। इकारो विभक्तिभेदज्ञापनार्थः। ङसिरत्
अकारात्परो ङसिरत् भवति। देवात्। देवाभ्यां। देवेभ्यः। षष्ठ्येकवचने देव
ङस् इति स्थिते। ङस्स्य। अकारात्परो ङसः स्यस्य भवति। देवस्य। ओसि।
अकारस्य ओसि परे एत्वं भवति। एअय्। देवयोः। नुडागमः। समानात्
परस्यामो नुडागमो भवति। उकार उच्चारणार्थः। नामि। नामि परे पूर्वस्य १०
दीर्घो भवति। देवानां। सप्तम्येकवचने देव ङि इति स्थिते। ङकारो ङि

त्कार्यार्थः। अइए। देवे। देवयोः। सुपि बहुत्वे च। किलात्सःषः। किलात्सस्य। कवर्गादि किल्
प्रत्याहारादुत्तरस्य केनचित्स्थानेन कृतस्य सकारस्य षकारादेशो भवति। देवेषु। आ
मंत्रणे सिर्धिः। आमंत्रणमभिमुखीकरणं तस्मिन्विहितः। सिर्धिसंज्ञको भवति। दे
धुसमानाल्लोपोऽधातोः। समानादुत्तरस्य धेर्लोपो भवत्यधातोः। आभिमुख्याभि
व्यक्तये हेशब्दस्य प्राक्प्रयोगः। हे देव। हे देवौ। हे देवाः। एवं घटपटस्तंभकुंभाद
योऽप्यकारान्ताः सिध्यन्ति। अकारान्तानामपि सर्वादीनां तु विशेषः। सर्व· विश्व· उभ· उभय·
अन्य· अन्यतर· इतर· डतर· डतम· कतर· कतम· सम· सीम· नेम· एक· पूर्व· पर· अव
र· अधर· अपर· दक्षिण· उत्तर· स्व· अंतर· त्यद्· तद्· यद्। एतत्· इदम्· अदस्· द्वि·
किं· युष्मत्· अस्मत्। एते सर्वादयस्त्रिलिंगाः। तत्र पुंलिंगत्वे रूपं नेयं। सर्वः। सर्वौ।

स्व॰ ५०

सा॰प॰रू॰ जसि। सर्वादेरकारांतात्परस्य जसि ई भवति अइए। सर्वे। सर्वे सर्वौ। सर्वान्। रषृनोणानः। रषकार
११ ऋवर्णेभ्यः परस्य नकारस्य णकारादेशो भवति। अंते सिद्धस्य न भवति। सर्वा
नित्यादौ। अवकुप्वंतरेपि। अवप्रत्याहारेण कवर्गेण पवर्गेण च मध्ये व्यवधानेपि णत्वं निनान्ये णे।
सर्वेण। सर्वाभ्यां। सर्वैः। चतुर्थ्येकवचने ङे इति स्थिते। सर्वादेः स्मट्। सर्वादेरकारात्परस्य चतु
र्थ्येकवचनस्य स्मट् आगमो भवति। टित्वादाद्यौ। ङे ए। सर्वस्मै। सर्वाभ्यां। सर्वेभ्यः। पंचम्येकवचने सर्व
ङसि इति स्थिते। ङसि। सर्वादेरकारांतात्परस्य ङसेः स्मट् आगमो भवति। टित्वादाद्यौ। दीर्घः। सर्व
स्मात्। सर्वाभ्यां। सर्वेभ्यः। सर्वस्य। सर्वयोः। साडागमः। सर्वादेः परस्याम: सड् आगमो भवति।
षत्वे षत्वे। सर्वेषां। सर्वादेरकारांतात्परो ङिः स्मिन् भवति। सर्वस्मिन्। सर्वयोः। सर्वेषु। ११
हे सर्व। हे स × ङिस्मिन् सर्वौ। हे सर्वे। एवं विश्वादीनां रूपं। नेयं। इतर इतमो प्रत्ययौ।
तौ विहाय। प्रत्ययग्रहणे तदंत इति पठितौ। × एकशब्दपर्यंतानां सर्व। द्वि
यस्य सर्ववद्रूपं ङेङसिङ्योर्वा वक्तव्यं। द्वितीयस्मै। द्वितीयाय। द्वितीयस्मात्

१६ द्वितीयात्। द्वितीयस्मिन्। द्वितीये। एवं तृतीयः। उभशब्दो नित्यं द्विवचनांतः।
उभौ २ उभाभ्यां ३ उभयोः २ पूर्वादीनां तु नवानां ङसिङ्कारौ वा वक्तव्यः। पूर्वे। पूर्वा
ः। ङसिङ्योः स्मात्स्मिनौ वा वक्तव्यौ। पूर्वस्मात्। पूर्वात्। पूर्वस्मिन्। पूर्वे। एवं परादी
नामपि। प्रथमचरमतयायडल्पार्धकतिपयनेमानां जसि वा। प्रथमे। प्रथ
माः। चरमे। चरमाः। शेषं देववत्। नेमे। नेमाः। शेषं सर्ववत्। तयायडौ प्रत्ययौ। उभयश
ब्दो द्विवचनाभावे एकवचनबहुवचने भवतः। उभयः। उभये। उभयं। उभयान्। उभयेन। उभयैः।
उभयस्मै। उभयेभ्यः। उभयस्मात्। उभयेभ्यः। उभयस्य। उभयेषां। उभयस्मिन्। उभ
येषु। मासस्यालोपो वा। मासशब्दस्याकारस्य लोपो वा भवति। सर्वादिविभक्तिषु पर
तः। हसेपः सेर्लोपः। हसंतात् दीर्घतात्परस्य सेर्लोपो भवति। माः। मासः। मासौ। मासौ।
मासः। मासाः। मासं २ मासौ २ मासः। मासान्। स्रोर्विसर्गः। आद्वेलोपः। मासा। मा
सेन। माभ्यां। मासाभ्यां। माभिः। मासैः। मासे। मासाय। माभ्यां। मासाभ्यां। माभ्य
मासेभ्यः। मासः। मात् भ्यां। मासाभ्यां। माभ्यः। मासेभ्यः। मासः। मासस्य। मासयोः।
॥मासात्॥

सा॰त मासयोः। मासां। मासानां। मासि। मासोः। मासोः। मासखोः। माःसु। मासेषु। आका
रांतः पुल्लिंगः सोमपाशब्दः। सोमपाः। सोमपौ। सोमपाः। धातुरिति विशेषणाद्गुलो
१२ पोनास्ति। हे सोमपाः। सोमपां। सोमपौ। आतो धातोर्लोपः। धातुसंबंधिन आकारस्य लो
पो भवति शसादौ स्वरे परे। सोमपः। सोमपा। सोमपाभ्यां। सोमपाभिः। सोमपे। सोमपाभ्यां।
भ्यः सोमपाः। सोमपाभ्यः। सोमपः। सोमपाभ्यां। सोमपाभ्यः। सोमपः। सोमपोः। सो
मपां। सोमपि। सोमपोः। सोमपासु। एवं कीलालपामधुपाधूम्रपाप्रभृतयः। अधातो
रिति विशेषणात् हाहानित्यादि। आदंतच्छसोनत्वाभावश्चेत्येके। हाहाः। आकारांतेषु आ
बंतानामेव नुडागमो नान्येषामिति नियमात्। हाहां। इत्यादि। इकारांतो हरिश
ब्दः। तस्य प्रथमैकवचने हरिः। औयू। इकारांतादुकारांताच्च परऔयूआपद्यते
भवतः। हरी। एओजसि। इकारांतस्योकारांतस्य च जसि परे एकार ओकारश्च
भवतः। षष्ठीनिर्दिष्टस्यादेशस्तदंत्यस्य ज्ञेयः। हरयः। धौ। इकारांतस्योकारां
तस्य धिविषये एकार ओकारश्च भवतः। हेहरे। हरिं। हरी। हरीन्। टानास्त्रि १२

यां। इकारांतादुकारांताच्च परष्टानाभवत्यस्त्रियां। हरिणा। हरिभ्यां। हरिभिः
ः। ङिति। इकारांतस्योकारांतस्य च ङिति एकार ओकारश्च भवतः। हरये। हरि
भ्यां। हरिभ्यः। ङसिङसोरस्य। एदोद्भ्यां परस्य ङसिङसोरकारस्य लोपो भवति।
हरेः। हरिभ्यां। हरिभ्यः। हरेः। हर्योः। हरीणां। ङेरौ ङिद्वत्। इदुद्भ्यामुत्तरस्य ङे रौ भवति
स च ङित्। टेः। ङिति परे टेर्लोपो भवति। हरौ। हर्योः। हरिषु। एवमग्निगिरिकविप्र
भृतयः। उकारांताश्च विष्णुवायुभानुप्रभृतयः। भानुः। भानू। भानवः। हे भानो। भा
भानुं। भानू। भानून्। भानुना। भानुभ्यां। भानुभिः। भानवे। भानुभ्यां। भानुभ्यः। भानोः भा
नुभ्यां भानुभ्यः भानोः। भान्वोः। भानूनां। भानौ। भान्वोः। भानुषु। सखिशब्दस्य भेदः। सेर्धिः।
सखिशब्दस्य सेर्धिर्भवति। ङित्वाट्टिलोपः। सखा। ऐसख्युः। सखिशब्द
स्य कारादेशो भवति पंचसु परेषु। आयादेशः। सखायौ। द्विवचनस्य वा छंदसि।
सखायौ। सखायः। अधोरिति विशेषणादैकारो धिविषये। हे सखे। सखा।

सा· यं। सखायौ। सखीन्। सखिपत्योरिङ्। सखिपतिशब्दयोरिगागमो भवति
टाङेङसिङस्सु परतः। दीर्घत्वाभावान्न भवति। सख्या। आगमजमनित्यं। सखिना।
१३. सखिभ्यां। सखिभिः। सख्ये। सखिभ्यां। सखिभ्यः। ङसिङसोः। सखिपतिशब्दयोरिगाग
मो भवति। ङसिङसोरिकारे परे। सख्य अस इति स्थिते। ख्यत्योरुः। ऋकारात्पर
स्य ङसिङसोरकारस्य उकारो भवति। सखङसि। सख्युः। सखिभ्यां। सखिभ्यः। स
ख्युः। सख्योः। सखीनां। सप्तम्येकवचने ङेरौ। द्वितीयौकारे ङौ स सखिपत्योरिगिति।
गागमः। सख्यौ। सख्योः। सखीषु। पतिशब्दस्य प्रथमा द्वितीययोर्हि सखिवत्प्रक्रिया।
त्रि तृतीयादौ सखिशब्दवत्। पतिरसमास एव। सखिशब्दवद्वक्तव्यः। ततः समासान्तस्य
नाद्यो भवति। प्रजापतिना। प्रजापतये इत्यादि। द्विशब्दो नित्यं द्विवचनान्त
ः। त्यादेष्टेरः स्यादौ। त्यदादेष्टेरकारो भवति स्यादौ परे। द्वौ २ द्वाभ्यां ३ द्वयोः २ त्रि १३
शब्दो नित्यं बहुवचनान्तः। त्रयः। त्रीन्। त्रिभिः। त्रिभ्यः २ त्रेस्त्रयउ। त्रिशब्दस्याय

देशो भवति नामि परे। त्रिनं त्रयस्त्रयण्वक्तव्यः। त्रयाणां। त्रीषु। कतिशब्दो नित्यं बहुवच
नान्तः त्रिषु समरूपः। कतिशब्दाज्जश्शसो लुग्वक्तव्यः। कति २ कतिभिः। कतिभ्यः २ कती
नां कतिषु। ईकारान्तः पुल्लिङ्गः सुश्रीशब्दः। सुश्रीः। य्वोर्धातोरियुवौ स्वरे। धातोरीकारो
कारयोरियुवौ भवतः स्वरे परे। सुश्रियौ। सुश्रियः। सुश्रियं। सुश्रियौ। सुश्रियः। सुश्रि
या। सुश्रीभ्यां। इत्यादि। तथैव सुधीशब्दः। ऊकारान्तश्च स्वयंभूशब्दः। स्वयंभूः।
स्वयंभुवौ। स्वयंभुवः। इत्यादि। सेनानीशब्दस्याविशेषो हसादौ तु विशेषः। सेनानीः।
य्वावा। धातोरवयवसंयोगः पूर्वो यस्मादीकारादूकारात् ×स्वरे× नास्ति तदन्तस्या
नेकस्वरस्य ईकारस्योकारस्य च यकारवकारौ भवतः स्वरे परे। वर्षाभ्वपुनर्भ्वति अतिरि
क्तैकेशब्दस्य सुधीशब्दादौ वर्जयित्वा ग्रहणादियं विवक्षा। सेनान्यौ। सेनान्यः। सेनान्या
नां वामो ङुडन्नस्त्यः। सेनान्यां। सेनानीनां। आमः ङेः। आबन्तादीबन्तान्नीशब्दा
धातोरस्य उ समादेशो भवति। सेनान्यां। सेनान्योः। सेनानीषु। एवं ग्रामणिप्रभृ[illegible]

सा॰ त॰ सः। उकारांतोप्ययं वलूप्रभृतयः। ऋकारांतः पुल्लिंगः पितृशब्दः। सेरा। ऋकारांतात्परस्य स॰ पुं
१४ सेराभवति स च डित्। डित्वाट्टिलोपः। पिता। पंचसु। ऋकारस्यार्भवति पंचसु परेषु। पितरौ।
पितरः। ऋतेरु। ऋकारांतात्परस्य घेरुर्भवति स च डित्। हे पितः। पितरं। पितरौ। पितॄन्। पि
त्रा। पितृभ्यां। पितृभिः। पित्रे। पितृभ्यां। पितृभ्यः। पितुः। पित्रोः। पितृभ्यः। पितुः। पि
त्रोः। पितॄणां। ङौ। ऋकारोर्भवति ङौ परे। पितरि। पित्रोः। पितृषु। एवं जामात्राद्यः।
नुर्नामि दीर्घः। नृशब्दस्य नामि परे वा दीर्घो भवति। नॄणां। नृणां। कर्त्तृशब
ब्दस्तु विशेषः। स्तुरार्। सकारस्तृप्रत्ययसंबंधिन ऋकारस्यार्भवति पंचसु परेषु।
कर्त्तअर इति स्थिते। यदादेशस्तद्वद्भवति। सेरा। कर्त्ता। कर्त्तारौ। क
र्त्तारः। हे कर्त्तः। कर्त्तारं। कर्त्तारौ। कर्त्तॄन्। शेषं पितृवत्। एवं होतृपोतृ
प्रभृतयः। उकारांतस्य क्रोष्टुशब्दस्य पंचस्वघिट्सु तृप्रत्ययांतस्येव १७
रूपं कर्त्तव्यं। क्रोष्टा। क्रोष्टारौ। क्रोष्टारः। हे क्रोष्टो। क्रोष्टारं। क्रोष्टारौ

शसि तृप्रत्ययवद्भावो भवति। क्रोष्टून्। तृतीयादौ स्वरादौ तृप्रत्ययांतता
वा वक्तव्या। क्रोष्ट्रा। क्रोष्टुना। क्रोष्टुभ्यां। क्रोष्टुभिः। क्रोष्ट्रे। क्रोष्टवे। क्रोष्टु
भ्यां। क्रोष्टुभ्यः। क्रोष्टुः। क्रोष्टोः। क्रोष्टुभ्यां। क्रोष्टुभ्यः। क्रोष्टुः क्रोष्ट्रोः। क्रोष्ट्रोः।
क्रोष्ट्वोः। कृताकृतप्रसंगी यो विधिः स नित्यः। नित्यानित्ययोर्नित्यं बलवत्।
तेन नुडागमे कृते हसादित्वात् वद्भावो नास्ति। क्रोष्टूनां। क्रोष्टरि। क्रोष्ट्रोः। क्रोष्ट्रोः।
क्रोष्ट्वोः। क्रोष्टुषु। ॠकारांता लृकारांता एकारांता अप्रसिद्धाः। ऐकारांतः सु
रैशब्दः। रैस्भि। रैशब्दस्याकारादेशो भवति सकारे भकारादौ विभक्तौ परतः।
सुराः। स्वरादावयादेशः। सुरायौ। सुरायः। हे सुराः। सुरायं। सुरायौ। सुरा
यः। सुराया। सुराभ्यां। औकारांतो गोशब्दः। ओरौ। ओकारस्यौकारादे
शो भवति पंचसु परेषु। गौः। गावौ। गावः। आ अम्शसि। ओकारस्यात्वं

वत्यमिशसि चपरे। गां। गावौ। गाः। गवा। गोभ्यां। गोभिः। गवे। गोभ्यां। गोभ्यः। उ-
स्यपकारलोपः। गोः। गोभ्यां। गोभ्यः। गोः। गवोः। गवां। अंते गोरामः॥
गोशब्दस्य चरागांते ङसिङसवर्जमाना ओशब्दस्य सरस्यामो ङङस्यो
भवति। सह स्यादशगोनां। गवि। गवोः। गोषु। एवं स्त्रीयोशब्दः। ओकारांतो ग्लौ
शब्दः। तस्य ह्रस्वादाव विशेषः। स्वरादावादेशः ७ ग्लौः। ग्लावौ। ग्लावः। इ-
त्यादि। इति स्वरांताः पुल्लिंगाः॥ ॥ अथ स्वरांताः स्त्रीलिंगाः। तत्रादावाबंतो गंगा
शब्दः। आपः। आबंतात्परस्य सेर्लोपो भवति। गंगा। औ। आबंतात्परऔ ईकार
माप द्यते। गंगे। गंगाः। धिः। आबंतात्परो धिरिर्भवति। हे गंगे। हे गंगे। हे गंगाः।
गंगां। गंगे। गंगाः। यै सौ रे। आबंतस्य टौसोः परयोरेत्वं भवति। अ यादेशः। गंग
या। गंगाभ्यां। गंगाभिः। ङितां याट्। आबंतात्परेषां ङेङसिङस् ङि इत्येषां यु
ड् आगमो भवति। गंगायै। गंगाभ्यां। गंगाभ्यः। गंगायाः। गंगा। भ्यां। गंगाभ्यः। गं

स्व-स्त्री

सार- गाभ्याः। गंगयोः। गंगानां। अम्ङेः। गंगायां। गंगायोः। गंगासु। एवं श्रद्धामेधा
२६ शालामालाहेलादोलाप्रभृतयः। अंबादीनां धोऽस्वः। हे अंब। हे अक्क। हे अल्ल।
नद्यादीनां तु ङिः स्व विशेषः पयोक्तः। आबंतात्सर्वादेः परस्य यटः स्डागमो भ
वति। पूर्वस्य चापोकारः। सर्वस्यै। सर्वस्याः। २ सर्वस्यां। जरायाः। स्वरादौ ज
रस्वा वक्तव्यः। जरा। जरसौ। जरे। जरसः। जराः। जरसं। जरां। जरसौ। जरे। जर
सः। जराः। जरसा। जरया। जराभ्यां। जराभिः। जरसे। जरयै। जराभ्यां। जराभ्यः। ज
रसः। जरायाः। जराभ्यां। जराभ्यः। जरसः। जरायाः। जरसोः। जरयोः। जरसां।
जराणां। जरसि। जरायां। जरसोः। जरयोः। जरासु। इकारांतो बुद्धिशब्दः
तस्य प्रथमद्वितीययोर्हरिशब्दवत्प्रक्रिया। बुद्धिः। बुद्धी। बुद्धयः। बुद्धिं। बुद्धी। २६
स्त्रीत्वान्नत्वाभावो विशेषः। बुद्धीः। बुद्ध्या। बुद्धिभ्यां। बुद्धिभिः। ङेङसिङसङीनां। स्त्रियां

वर्तमानाभ्यामिकारोकाराभ्यां परेषां ङितां वचनानां वाडागमो भवति। बुद्ध्यै।
बुद्धये। बुद्धिभ्यां। २। बुद्धिभ्यः। बुद्ध्याः। बुद्धेः। २ बुद्ध्योः। बुद्धीनां। स्त्रियां योः। इ
श्च श्च पुः। तस्मादिवर्णात् उवर्णात् स्त्रियां वर्तमानात्परस्य ङे रामादेशो भवति।
आडागमाभावे आम्। बुद्ध्यां। बुद्धौ। बुद्ध्योः। बुद्धिषु। एवं मतिविकृतिप्र
भृतयः। तथा च धेनुरज्जुप्रभृतयः। धेनुः। धेनू। धेनवः। धेनुं। हे धेनो। हे
धेनू। हे धेनवः। धेनू। धेनून्। धेन्वा। धेनुभिः। धेन्वै। धेनवे। धेनुभ्यः। धेन्वाः।
धेनोः। धेन्वाः। धेन्वाः। धेन्वोः। धेनूनां। धेनौ। धेन्वोः। धेनुषु। ईबंतो नदीश
ब्दः। हसेपसे काप्यः। नद्यौ न धो। न धः। धोऽस्वः। ईवर्णोवर्णयो र्यवौ। स्त्रि
यां धौ परे ङसो लोपो भवति। हे नदि। नदीं। नद्यौ नदीः। नद्या। नदीभ्यां। नदीभिः २
ङितामट्। स्त्रियामीकारोकारांताद्भूपरेषां ङितां वचनानामडागमो भवति।
नद्यै। नदीभ्यां। नदीभ्यः। नद्याः। नदीभ्यां नदीभ्यः। नद्याः। नद्योः। नदीनां। नद्यां २

सार नद्यौः। नदीषु। एवं सरस्वती ब्राह्मी कुमारी किशोरी प्रभृतयः। लक्ष्मी स॰स्त्री
१८ शब्दस्यैवं तत्वाऽभावात् सिलोपो नास्ति। लक्ष्मीः लक्ष्म्यौ। लक्ष्म्यः।
हे लक्ष्मि इत्यादि। स्त्रीशब्दस्यैवं तत्र सिलोपो नास्ति। स्त्रीभ्रुवोः।
स्त्रीशब्दस्य भ्रूशब्दस्य च इयुवौ भवतः स्वरे परे। स्त्री। स्त्रियौ। स्त्रि
यः वामश्यसि। आमि शसि च परे स्त्रीशब्दस्य भ्रूशब्दस्य च वा इयु
वौ भवतः। स्त्रियं। स्त्रीं। स्त्रियौ। स्त्रियः। स्त्रीः। स्त्रिया। स्त्रीभ्यां। १८
स्त्रीभिः। इत्यादि। श्रीशब्दस्य ङिति विशेषः। वेयुवः। इयुवां ता

स्त्रियां वर्तमानाद्वा ङितां वचनानामडागमो भवति। श्रियै। श्रिये। श्री स॰स्त्री
भ्यां। श्रीभ्यः। श्रियाः। श्रियः २। श्रियादीनां वामो नुडाम्यः। श्रीणां। श्रि
यां। श्रियां। श्रियि। श्रियोः। श्रीषु। एवं धीह्रीप्रभृतयो धेनी वंताः। एवं भ्रू
शब्दोऽपि भ्रूशब्दस्य। वधूजंबादीनां नदी[illegible]शब्दवद्रूपं नेयं। मातृशब्द
स्य पितृशब्दवत्प्रक्रिया। शसि मातॄः। स्वसृशब्दः कर्तृशब्दवत्। रैश
ब्दः सुरैशब्दवत्। गोशब्दः पुंवत्। नौशब्दो ग्लौशब्दवत्। इति स्व
रांताः स्त्रीलिंगाः। ॥ अथ स्वरांता नपुंसकलिंगाः प्रदर्श्यंते। तत्रा
कारांतः कुलशब्दः। तस्य प्रथमाद्वितीयैकवचने। अतोम्। अका
रांतान्नपुंसकलिंगात्परयोः स्यमोरम् भवत्यचो अमेताम् ग्रहणं
लु ग्व्याः इत्यपि। कुलं। कुले। नपुंसकलिंगात्परः औ ईकारमापद्यते। कुले।

पत्रशब्दस्य पुनोंर्णो नेते पत्राणि

स्व॰न॰

सा॰स्व॰ जश्शसोः शिः। नपुंसकलिंगात्परयोर्जश्शसोः शिर्भवति। गुरुः शिः सर्व

स्यवक्तव्यः। नुमयमः। नपुंसकस्य नुमागमो भवति शौ परे। यम प्रत्याहा

१८ स्तो रांतस्य न भवति। मिदंत्यात्स्वरात्परो वक्तव्यः। नोपधायाः। नांतस्योपधायाः पादी

पंच॰ र्घो भवति शौ धिवर्जिते धुटि नामि च। कुलानि। पुंरपि। कुलं। कुले। कुलानि। शेषं

देववत्। एवं मूलकफलपत्रपुष्पकुंडकुटुंबादयः। इतरान्यादेः। अन्यादेः परस्या

स्यमोर्लुग्भवति। शकारः सर्वादेशार्थः। अन्यत्। अन्ये। अन्यानि २

इतरत्। इतरे। इतराणि। २ शेषं पुंवत्। इकारांतो अस्थिशब्दः। नपुंसका श्रीराम

त्स्यमोर्लुक्। नपुंसकलिंगात्परयोः स्यमोर्लुक् भवति। अस्थि। नामिनः १८

स्वरे। नाम्यंतनपुंसकस्य नुमागमो भवति स्वरे। अस्थिनी। अस्थीनि। नपुं नि

सके धौ वा गुणो वक्तव्यः। हे अस्थे। हे अस्थि। उभे हि। संबोधनेनलू शनसः त्रिरूपं स [illegible]

तं तथा मांतम थाप्पदंतं। माध्यं। दिनि विष्टिगुणं लिंगंतेन पुंसके व्यापेत्रेदं वरिष्ठः

२ अस्थ्यादीनां शसादौ। अस्थ्यादीनां नुमागमो भवति। इकारस्य चाकारो भवति श

सादौ स्वरे परे। अल्लोपः स्वरेम्वपुंसकास्थ सादौ। मांतस्योपधाया अकारस्य लोपो भ

वति शसादौ स्वरे परे तद्धिते ईपि ईकारे परे। मकारवकारसंयोगादुत्तरस्य न भवति।

अस्थ्ना। अस्थिभ्यां। इत्यादि। वेड्योः। ईड्योः परयोर्वा अकारस्य लोपो भवति। अस्थ्नि

अस्थनि। एवं दधिसक्थ्यक्षिशब्दः। नपुंसकस्य। नपुंसकस्य ह्रस्वो भवति। ग्रा

मणि कुलं। स्वरादौ नामिनः। स्वर इति नुमागमः। ग्रामणि। ग्रामणिनी। २ टादाबुक्तपुंस्कं पुं ग्रामणीनि

वद्वा। टक्तपुंस्कपूर्वं नाम्यंतं नपुंसकलिंगं टादौ स्वरे परे पुंवद्वा भवति। यन्निमित्तमुपादाय पुं

सि शब्दः प्रवर्त्तते। क्लीववृत्तौ तदेव स्यादुक्तपुंस्कं तदुच्यते। २। ग्रामण्या। ग्रामणिना। इत्या

दि। सोमपं वा। सोमपे। सोमपानि। २ सोमपेन। सोमपाभ्यां। इत्यादि। मधुवेकारोतौ शब्दः

न स्य स्वरे नुमागमः। मधु। मधुनी। मधूनि। हे मधो। हे मधु। मधुना। ऋकारांतकर्तृशब्दः

कर्तृ। कर्तृणी। कर्तॄणि २। हे कर्तः। हे कर्तृ। कर्त्रा। कर्तृणा। इत्यादि। इति स्वरांता नपुंस

काः।

सा०त कालिंगाः॥ ॥अथ हसांताः पुल्लिंगाः। तत्र हकारांतो अनुडुहशब्दः। पंचस्वनडुह आमागमो ह०पुं०
१९ वक्तव्यः। अनडुहशब्दस्य सौ परे सुमागमो भवति। संयोगांतस्य लोपः। संयोगांतस्य लोपो
भवति। अनड्वान्। भवति रसे पदांते च। हसेपः सेर्लोपः। अनड्वान्। अनड्वाहौ। अनड्वाहः। धावम्।
अनडुहशब्दस्य धौ परे अमागमो भवति। हे अनड्वन्। हे अनड्वाहौ। हे अनड्वाहः। अनड्वाहं।
अनड्वाहौ। अनडुहः। अनडुहा। वसां सेरे। वसुस्रंसुध्वंसु अनडुह इत्येतेषां रसे पदांते च दत्वं
रव भवति। अनडुद्भ्यां। अनडुद्भिः। इत्यादि। खसे चपा झसानां। अनडुत्सु। दुह त्रपूरणे।
गोदुहशब्दस्य भेदः। दादेर्घः। दादेर्धातोर्हकारस्य घत्वं भवति। धातोः स्वसे परे नाम्नश्च रसे रस्य
पदांते च। गोदुघ्स् इति स्थिते। आदिजबानां झभांतस्य झभाः स्ध्वोः। धातोर्झभांत
स्यादौ वर्त्तमानानां जबानां झभा भवंति सकारे ध्वशब्दे च परे नाम्नश्च। वावसाने। अ
वसाने वर्त्तमानानां झसानां जबाश्चपाश्च भवंति चपा वा। गोधुक्। गोधुग्। गोदुहौ। गोदुहः। १९
हे गोधुक्। हे गोधुग्। गोदुहं। गोदुहौ। गोदुहः। गोदुहा। गोधुग्भ्यां। इत्यादि। सप्त

मीबहुवचने धुगोधुक्षु इति सिद्धं। खसे चपा झसानां। किकात्सः षः। कत्तस्य। क
षयोगे क्षः। ककार षकार योगे क्षत्वं भवति। गोधुक्षु। मधुलिहशब्दस्य हो ढः।
ढ हो ढः। धातोर्हकारस्य ढत्वं भवति। धातोर्झसे परे। वावसाने। मधुलिट्। मधुलि
हे४ ड्। मधुलिहौ। मधुलिहः। मधुलिट्। मधुलिड्भ्यां। इत्यादि। द्रुहादीनां घत्व ढत्वे वा। द्रु
हादीनां धातूनां घत्व ढत्वे वा भवतः। धोतोः। मित्रधुक्। मित्रधुग्। मित्रध्रुट्।
मित्रद्रुहौ। मित्रद्रुहः। तथा वल्लल समन्नुह शब्दः। रेफांतश्चतुर्शब्दो नित्यं बहुवच
नांतः। चतुरामशौ च। चतुर्शब्दस्यामागमो भवति पंचस्वपि शसि च। चत्वारः।
चतुरः। चतुर्भिः। चतुर्भ्यः। २। रः संख्यायाः। रेफांतसंख्यायाः परस्यामो नुडागमो
भवति। णत्वं द्वित्वं च। चतुर्णां। चतुर्षु। नकारांतो राजन्शब्दः। नोपधायाः
नो इति दीर्घः। नाम्नो लोपः। नाम्नो नकारस्य लोपो भवति रसे पदांते च। राजा। राजानौ। राजानः। अर्थविशेषणात् राजन्
गौरिति

सा॰त॰ राजानं। राजानौ। अल्लोपः स्वरेम्वयुक्ता द्वमादेः। नांतस्योपधाया अकारस्य लो
पो भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च परे। स्तौः श्चुभिः श्चुरिति जकारः ञ
२०औ कारः। ञः। जकारञकारयोर्योगे ज्ञः स्यात्। राज्ञः। राज्ञा। लोपस्थितेन नन संधिरिति निय
मात्। दंडित्वात् न भवति। राजभ्यामित्यादि। वेडयोः। राज्ञि। राजनि। राज्ञोः।
राजसु। एवं यज्वन्। आत्मन्सृ पर्मन्प्रभृतयः। अम्वयुक्तादिति विशेषणाद
लोपो नास्ति। यज्वनः। यज्वना। यज्वभ्यामित्यादि। श्वन्युवन्मघवन्शब्दा
नां पंचसु राजन्शब्दवत् प्रक्रिया। श्वादेः। श्वादेर्वकारस्य उत्वं प्राप्नोति शसादौ
स्वरे परे तद्धिते ईपि। शुनः। शुना। श्वभ्यामित्यादि। यूनः। यूना। युवभ्यामित्या
दि। मघोनः। मघोना। मघवभ्यामित्यादि। पथिन्शब्दस्य भेदः। इतोत्पंचसु।
पंचसु स्यादिषु पथ्यादीनामिकारस्याकारो भवति। थोन्थ। पथ्यादीनां थ २०
कारस्य न्थ आगमो भवति पंचसु परेषु। पन्थन् इति स्थिते। आसौ। पथ्यादीनां

सि २

दे रात्वं भवति सौ परे। पंथाः। पंथानौ। पंथानः। पंथानं। पंथानौ। पथां टेः। पथ्यादी
नां टेर्लोपो भवति शसादौ स्वरे परे। पथः। पथा। पथिभ्यामित्यादि। एवं मथिन् ऋ
भुक्षिन्शब्दौ। दंडिन्शब्दस्य भेदः। इन्हन्पूषार्यम्णां शौ सौ। इन्हन्पूषन् अर्यमन्। इत्येते
षां शौ सौ च परे उपधाया दीर्घो भवति। दंडी। दंडिनौ। दंडिनः। हे दंडिन्। दंडिनं।
दंडिनौ। दंडिनः। दंडिना। दंडिभ्यामित्यादि। ब्रह्महा। ब्रह्महणौ। ब्रह्मणः। हे ब्रह्मह
न्। ब्रह्महणौ। ब्रह्मघ्नः। हेनघ्नि। हतेर्घः। हकारस्य घत्वं भवति। नकारे ञिति णि
ति च परे। घसंयोगे णत्वनिषेधात्। ब्रह्मघ्नः। ब्रह्मघ्ना। ब्रह्महभ्यामित्यादि। पूषा।
पूष्णा। पूषभ्यामित्यादि। अर्यम्णः। अर्यम्णा। अर्यमभ्यामित्या॰ संख्याशब्दाः पं
चन्प्रभृतयो नित्यं बहुवचनांताः त्रिषु सरूपाः। पंचन् जस् इति स्थिते। जश्शसो
र्लुक्। षकारनकारांतसंख्यायाः परयोः जश्शसोर्लुक् भवति। पंच। पंच। पंचभिः। पं
चभ्यः। [illegible]। षकारनकारांतसंख्यायाः परस्याम आम् नुडागमो भवति। नोपधाया इति
दीर्घः। नाम्नो नलोपः। पंचानां। पंचसु। एवं सप्तन्। नवन्प्रभृतयः। अष्
टन्शब्दस्य भेदः। अष्टन आ जे। अष्टन आत्वं परयोः जश्शसोर्वा डौ भवति। डित्वादि

सा० र०
२१

लोपः। अष्टौ। अष्ट २ वा स। वा आ आस। अष्टन्। आ सः परासु विभक्तिषु वा आत्वं भव
ति। अष्टाभिः। अष्टभिः। अष्टाभ्यः। अष्टभ्यः २। अष्टानां। अष्टासु। अष्टसु। मका
रांत इदम् शब्दः। इदमोऽयं पुंसि। इदम शब्दस्य पुंसि विषये अयं भवति सिसहित
स्य। अयं। त्यदादेष्टेरः स्यादौ। दद स्य मः। त्यदादीनां दकारस्य मत्वं भवति स्यौ
परे। इमौ। सर्वादित्वात् जसि। इमे। त्यदादेः संबोधनं नास्तीत्युत्सर्गः। हे सभ्याद्यु
दाहृतत्वात्। इमं। इमौ। इमान्। अनयैसोः। इदमोऽना देशो भवति टौसोः परयोः।
अनेन। स्म्यः। इदमः सकारे भकारे च परे अकारो भवति हलन्तस्य। अङ्गित्यात्वं।
आभ्यां। भिस भिसः। इदमदसोर्भिसो भिसेव भवति। न भकारस्याकारः। एभिन
कृते। एभिः। अस्मै। आभ्यां। एभ्यः। अस्मात्। आभ्यां। एभ्यः। अस्य। अनयोः। ए
षां। अस्मिन्। एषु। किम् शब्दस्य टेरत्वे कृते सर्वशब्दवद्रूपं ज्ञेयं। कः। कौ। के। इ
त्यादि। धकारांतस्तत्त्वबुधशब्दः। आदिजबानामिति दीर्घे भकारः। तत्त्वभु
द्भ्यां। वावसाने। तत्त्वभुत्। तत्त्वबुधौ। तत्त्वबुधः। तत्त्वभुद्भ्यामित्यादि जकारां

ह० पुं०

शिवो०
२१

ह० पुं०

तः सम्राज् शब्दः। छशषराजादेः षः। छकारांतस्य शकारांतस्य षकारांतस्य
सृज यज सृज मृज भ्राज देश्च षत्वं भवति। धोर्लोऽझसे परे नाम्नश्च असे पदांते न
षस्य षत्वं अख्यातादौ डत्वं निषेधार्थी तेन ड्वीत्यादौ डत्वं भवति। षोडः। षका
रस्य डत्वं भवति धातोः। सम्राट्। सम्राड्। सम्राजौ। सम्राजः। सम्राजं। सम्रा
जौ। सम्राजः। सम्राजा। सम्राड्भ्यां। इत्यादि। एवं विराजादयः। दकारांत
स्य द्वत्व। एतत् शब्दः। तेषां त्यदादेष्टेरः स्यादाविति सर्वत्राकारः। ततः। त्यदादेस्त
कारस्य सत्वं भवति स्तौ परे। स्यः। त्यौ। त्ये। त्यं। त्यौ। त्यान्। सः। तौ। ते। यः। यौ।
ये। एषः। एतौ। एते। एतं। एतौ। एतान्। एतेन। एताभ्यां। एतैः। एनं। एनौ। एना
न्। एनेन। एनाभ्यां। एनैः। एतदोऽन्वादेशे द्वितीयाटौस्स्वेनो वा वक्तव्यः। उक्तस्य पु
नः कथितेऽन्वादेशः। एनयोः। एतयोः। छकारांतस्तत्त्वप्राछ् शब्दः। छशषराजादेः ष
डः। वावसाने। तत्त्वप्राट्। तत्त्वप्राड्। तत्त्वप्राछौ। तत्त्वप्राछः। तत्त्वप्राछं। तत्त्वप्राछौ।
तत्त्वप्राछः। तत्त्वप्राछा। तत्त्वप्राड्भ्यामित्यादि। थकारांतोऽग्निमथशब्दः। अग्निम
त्। अग्निमद्। अग्निमथौ। अग्निमथः। चकारांतः प्रत्यच् शब्दः। अंचेः पच स्त्नुमागमो

सान्त वर्त्मव्यः। प्रत्यन्‌ न्‌ स इति स्थिते। स्तोः श्चुभिः श्चुः। संयोगांतस्य लोपः। चोः कुः। चव
२२ र्गस्य कवर्गादेशो भवति धातोः। प्रत्यङ्‌। प्रत्यञ्चौ। प्रत्यञ्चः। प्रत्यञ्चं। प्रत्यञ्चौ। अंचु
दीर्घश्च। अंचतेरकारस्य लोपो भवति पूर्वस्य च दीर्घः। शसादौ स्वरे परे लुप्ते। चू
शब्दः। तिर्यङ्‌। तिर्यञ्चौ। तिर्यञ्चः। तिर्यञ्चं। तिर्यञ्चौ। तिरश्चादयः। तिरश्चादयो
निपात्यन्ते शसादौ स्वरे परे। तिरश्चः। तिरश्चा। तिर्यग्भ्याम्‌। उदीचः। उदीचा।
उदीग्भ्यां। तकारांतो मरुत्‌ शब्दः। मरुत्‌। मरुतौ। मरुतः। मरुद्भ्यां। स्वयमान्नित्य
प्रत्ययः। तकारांत उकारानुबंध महत्‌ शब्दः। ऋदितो नुम्‌। उकारानुबंधस्य ऋकारानु
बंधस्य नुमागमो भवति पंचसु परेषु। महतो धोर्दीर्घः सौ च। न्संतस्य पूर्वस्य महत
स्य चोपधाया दीर्घो भवति पंचसु परेषु सौ च परे। महान्‌। महांतौ। महांतः। महांतं। महांतौ।
महतः। महता। महद्भ्यामित्यादि। हे महन्‌। तकारांत ऋकारानुबंधो भवत्‌ शब्दः। अत्वसोः सौ।
अत्वंतस्यासंतस्य चोपधाया दीर्घो भवति धिवर्जिते सौ परे। भवान्‌। भवंतौ। भवंतः।
भवतं। भवंतौ। भवतः। सकारानुबंधो भवत्‌ प्रत्ययः। नुमागमस्तु न दीर्घः। भवा
न्‌। भवंतौ। भवंतः। हे भवन्‌। भवंतं। भवंतौ। भवतः। भवता। भवद्भ्यामित्यादि। एवं
वत्‌ वक्ष्यमाणमयः। शकारांतो विश्‌ शब्दः। छशषराजादेः षः। छकारांतस्य शकारांतस्य षकारो २२

६३

तस्यादान्‌। यजसृजमृजभ्राजादेश्च षत्वं भवति। षोडः। वावसाने। विट्‌। विड्‌। विशौ। विशः।
षपूर्वादेर्नित्यं वकुवच नान्तो। द्विषु सरूपः। अभ्यासो लुक्‌। षोडः। षड्‌। षड्‌। षाड्‌। षड्‌भिः। षड्‌
भ्यः। षडिति लुक्‌। षट्‌ नामिति स्थिते। षः। षां तसंख्यासंबंधिनो डकारस्य णत्वं भवति
नामि परे। षण्णां। कोंचित्‌ पदांतता श्रयणीयात्‌ षड्‌षु। षट्‌सु। षकारांतो दोष्‌ शब्दः।
दोषां। दोष्‌ सजुष्‌ आशिष्‌ हविष्‌ प्रभृतीनां। षकारस्य रेफो भवति रसे पदांते च। दोः। दोषः। दोषौ।
दोषः। दोषं। दोषौ। शसादौ स्वरे परे नांतता वा वक्तव्या। दोष्णः। दोषा। दोष्णा। दोर्भ्यामि
त्यादि। सजुष्‌ आशिष्‌ रसे पदांते च दीर्घता वक्तव्या। सजूः। सजुषौ। सजुषः। सजुषं। सजुषौ।
सजुषः। सजुषा। सजूर्भ्यामित्यादि। सकारांत पुंस्‌ शब्दः। पुंसोसुङ्‌। पुंस्‌ शब्दस्यासुङादेशो
भवति पंचसु परेषु। मः स्वरे। अनुस्वारस्य मकारो भवति स्वरे परे। पुमस्‌ स्‌ इति स्थिते। ऋदि
तो नुम्‌। संमहतोधो दीर्घः सौ च। संयोगांतस्य लोपः। पुमान्‌। पुमांसौ। पुमांसः। पुमांसं। पुमां
सौ। पुंसः। पुंसा। पुंभ्यामित्यादि। हे पुमन्‌। असंभवे पुंसः। ककुसौ। असंभवे इति। वेदांते
कविधस्यासनो वकुवा संसवेवाप्येसति। पुंस शब्दस्य ककागमो भवति सेपरे। स्कोराद्योश्च
संयोगाद्योः सकारयोर्लोपो भवति। कषयोः क्षः। पुंक्षु। एवं विद्वान्‌ शब्दः। विद्वान्‌। विद्वां

सा॰न

सो। विद्वांसः। विद्वांसं। विद्वांसौ। वसोर्वेऽम्। वसोः संबंधीवकारस्यउत्वं प्राप्नोति शसादौ स्वरपरे
तद्धिते ई प ईकारे च परे। विदुषः। विदुषा। विद्वद्भ्यामित्यादि। सुवचस्शब्दस्यअसंसोः सावि
२३ निदीर्घः। सुवचाः। सुवचसौ। सुवचसः। हे सुवचः। सुवचसं। सुवचसौ। सुवचसः। सुवचसा। स्रोति
सगिः। हवे। सुवचोभ्यां। एवं चन्द्रमसवेधसप्रभृतयः। उशनस्शब्दभेदः। उशनसां। उशनसपु
रुदंशस अनेहसांसंबुद्धौ तेषां सेडौ भवति उकारश्चलोपार्थः। उशना। उशनसौ। उशनसः। उश
नसौ। धोनां नतादंतता चवावा। हे उशनः। हे उशन। हे उशन। अदस्शब्दस्य भेदः। त्यादि
ष्टरस्यादौ। अदसि इति स्थिते। सौ सः। अदसो दकारस्य सत्वं भवति सौ परे। सेरौ। अदसः सेरौका
रादेशो भवति। असौ। दस्य मः। माद् उत्वऊत्वे। अदसो मकारात्परस्य ह्रस्वस्य उत्वं
रो भवति दीर्घस्य दीर्घो भवति। अमू। सर्वादित्वाज्जसि। अइ ए। अमे इति स्थिते। एरीबहुत्वे।
बहुत्वे तत्वदसएकारस्य ईकारो भवति। अमी। अमुं। अमू। अमून्। मत्वोत्वे कृते टानाञ्स्त्रियां। अमुना।
आ ङिस्त्रियां तं पश्चात् माद् इत्यूकारः। अमूभ्यां। अमीभिः। अमुष्मै। अमूभ्यां। अमीभ्यः। त्यादेः। द
स्य मः। ङसिरत्। अतः। माद्। विकार्थत्वेसः। अमुष्मात्। अमूभ्यां। अमीभ्यः। अमुष्य। आमि। एके २३
कृते। अथादेशः। पश्चादुकारः। अमुयोः। अमीषां। अमुष्मिन्। अमुयोः। अमीषु। सामान्ये

अदसः कस्यादिवत्। अमुकः। अमुकौ। अमुके। इति हसांताः पुल्लिंगाः। अथ हसांताः स्त्रीलिंगाः।
तत्र हकारांत उपानह् शब्दः। नहोधः। नहो हकारस्य धकारादेशो भवति रसे पदांते च। उपानत्। उपानद्।
उपानहौ। उपानहः। हे उपानत्। हे उपानद्। उपानहं। उपानहौ। उपानहः। उपानहा। उपानद्भ्यामित्यादि। वकारां
तो दिव्शब्दः। दिव औ। दिवश्चस्यौकारादेशो भवति सौ परे। द्यौः। दिवौ। दिवः। वामि। दिवो वकारस्य वा
मि परे वा आत्वं भवति। द्यां। दिवं। दिवौ। दिवः। दिवा। उरसे। दिवो वकारस्योकारो भवति रसे पदांते च। द्यु
भ्यां। इति आदि। रेफांतश्चतुर्शब्दो नित्यं बहुवचनांतः। त्रिचतुरोः स्त्रियां तिसृचतसृ। स्त्रियां वर्तमान
योस्त्रिचतुरशब्दयोः तिसृचतसृ इत्येतावादेशौ भवतः। रकारश्च ऋकारवत्। ते नस्तार। रिस्यान्यनी
वति। तिस्रः। तिस्रः। तिसृभिः। तिसृभ्यः। न तिसृचतसृ। एतयोर्नामि दीर्घो न भवति। तिसृणां। तिसृ
षु। तिसृचतसृ। इत्येतयोश्छंदसि नामि परे वा दीर्घो भवति। चतस्रः। चतसृभिः। चतसृभ्यः। चतसृ
णां। चतसृषु। रेफांतो गिर्शब्दः। वोर्विहसे। धातोरिकारोकारयोर्दीर्घो भवति रेफवकारयोर्हसपरयोः।
गीः। गिरौ। गिरः। गिरं। गिरौ। गिरः। गिरा। गीर्भ्यां। एवं पुर् धुर् आदयः। धकारांतः समिध् शब्दः। स
मित्। समिद्। समिधौ। समिधः। भकारांतः ककुभ्शब्दः। ककुप्। ककुब्। ककुभौ। ककु
भः। ककुब्भ्यां। इत्यादि। दकारांता त्यादयः। त्यादेष्टरस्यादौ। आबंतात्स्त्रियां। अकारांतानाम् स्त्रि
यां च ते मानादापूप्रत्ययो भवति वियपकारसलोपार्थः। स्त्रीलिंगे सवैशब्दवद्रूपं नेयं। स्यात्। सा। सा।

सा॰ त॰ ता। ताः। याभि। याः। एषा। एते। एताः। इयं स्त्रियां। इदम्शब्दस्य स्त्रियामियं भवति। भिसाहि
२५ नाभ्या। इयं। इमे। इमाः। चकारांतस्त्वचूशब्दः। चोकुरिति कुत्वं। त्वक्। त्वच। त्वचौ। त्व
चः। एवं रुचुवाचूशब्दः। अपूशब्दोऽनित्यं बहुवचनांतः। अप्मह तोर्धादीर्घः। शो चो
आपः। अपः। भिदपः। अबा। दीनां भकारेपरे दत्वं भवति। अद्भिः। अद्भ्यः। अपां। अ
प्सु। शकारांतो दिश्शब्दः। दिशा। दिशौ। दृश्स्पृश्मृश्दृस्य तेषां रसेपदांते च
कुत्वं भवति। दिक्। दिग्। दिशौ। दिशः। दृक्। दृग्। दृशौ। दृशः। स्पृक्। स्पृग्। स्पृ
शौ। स्पृशः। मृक्। मृग्। मृशौ। मृशः। षकारांतस्त्विषूशब्दः। षोडः। षोवसाने। त्विट्।
त्विड्। त्विषौ। त्विषः। आशिषूशब्दस्य सजूषूशब्दवत्प्रक्रिया। आशीः। आशिषौ।
आशिषः। अदस्शब्दस्य सौ न विशेषः। त्यादेष्टरस्यादौ। सौ सः। सैरो
असौ। द्विवचनादौ मादेष्टरत्वस्यादिति सर्वत्राकारस्थाने आत्वत स्त्रि
यामित्याप्। विभक्तिकार्यं प्राक्पश्चान्मादुत्कारः। अमू। अमूः। अमूं। अमू। अमूः

अमुया। अमुभ्यां। अमूभिः। अमुष्यै। अमुभ्यां २ अमुभ्यः। अमुष्याः। अमुभ्यां। अमुभ्यः।
अमुष्याः। अमूषां। अमुष्यां। अमुयोः। अमूषु। इति हलंताः स्त्रीलिंगाः। अथ हलंता नपुंस
कलिंगाः। तत्र रेफांतो वार्शब्दः। नपुंसकात्स्यमोर्लुक्। वाः। वारी। वारि। अयम विशे
षणानुमून भवति। वारा। वार्भ्यां। चतुर्शब्दः बहु चतुर। शौ चे त्याम्। चत्वारि २। चतुर्भिः।
चतुर्भ्यः। चतुर्भ्यः। चतुर्णां। चतुर्षु। नकारांतो अहन्शब्दः। अहः। अह्नो नकारस्य सत्वं
भवति रसेपदांते च। अहः। अह्नी। वेशोः। अहनी। अहानि। २ अह्ना। अहोभ्यां। इत्यादि। ब्रह्म
न्शब्दस्य रसे पदांते च। न लोपो व्भ्यः। हे ब्रह्मन्। हे ब्रह्म। ब्रह्मणा। ब्रह्मभ्यां। भिस्यादि। एवं चर्म
न्वर्मन्प्रभृतयः। नांतादंता छंदसि डिःश्योर्वा लोपः। छंदस्यागमानागमजपोलोपाको
पो व्यो। दीर्घत्वं न निवर्तते। परमे व्योमन्। परमे व्योम्नि। सर्वाणि भूतानि। सर्वाणि भूता
नि। त्यदादीनां स्यमोर्लुकि कृते टेरत्वं भवति। स्यादाविति विशेषणात्। त्यत्। त्ये।
त्यानि। तत्। ते। तानि। यत्। ये। यानि। एतत्। एते। एतानि। किं। के। कानि। शेषं पुंवत्। इदं। इ
मे। इमानि। चकारांतः प्रत्यच्शब्दः। प्रत्यक्। प्रतीची। प्रत्यंचि। तकारांतो जगत्शब्दः।
जगत्। जगती। जगंति। महत्। महती। महंति। सकारांताः पयस्तेजस्वर्चस्प्रभृतयः।

सा. त. पयः। पयसी। पयांसि। पुंसोऽर्थे। पयोभ्यां। अदसश्चान्यस्य मोऽनुकि कृते। स्तोर्विसर्गः।
असः। ढेरत्वे कृते मत्वोत्वे। अमू। अमूनि। शेषं पुंवत्। इति हसान्ता नपुंसकलिंगाः। अथ युष्म
२५ दस्मदोः स्वरूपं निरूप्यते। तयोश्च वाच्यलिंगत्वात् त्रिष्वपि लिंगेषु समानं रूपं। त्वमहं सिना।
सिसहितयोर्युष्मदस्मदोस्त्वमहमित्येतावादेशौ भवतः। यथासंख्येन। त्वं। अहं। युवावौ द्वि
वचने। युष्मदस्मदोर्द्विवचने परे युवआवइत्येतावादेशौ भवतः। अमौ। युष्मदस्मदोः परऔ अ
त्वं भवति। युवां। आवां। यूयं वयं जसा। जसा सहितयोर्युष्मदस्मदोर्यूयं वयमित्येतावादेशौ
भवतः। यूयं। वयं। त्वन्मदेकत्वे। युष्मदस्मदोस्त्वन्मदित्येतावादेशौ भवतः। एकत्वे गम्य
माने। आम्शसोः। युष्मदस्मदोष्टेरात्वं भवति अमि शसि कारे भिसि च परे। त्वां। मां। ढेरत्वे कृते अ
तिदीर्घत्वं। युवां। आवां। शसो नो वक्तव्यः। युष्मान्। अस्मान्। त्वन्मयादेशयोः कृतस्य योः।
टाङ्योः। युष्मदस्मदोष्टेरेत्वं भवति टाङि इत्येताभ्यां परयोः। त्वया। मया। युवाभ्यां। आ
वाभ्यां। युष्माभिः। अस्माभिः। तुभ्यं मह्यं ङया। ङेसहितयोर्युष्मदस्मदोस्तुभ्यं मह्यमि २५
त्येतावादेशौ भवतः। तुभ्यं। मह्यं। युवाभ्यां। आवाभ्यां। भ्यस भ्यं। युष्मदस्मदोः परो
भ्यसः भ्यं भवति। शकारो सर्वादेशार्थ इत्यर्थः। तेनात्वैत्वे न भवतः। युष्मभ्यं। अस्म

भ्यं। ङसिभ्यसोरत्। पंचम्या ङसिभ्यसोरद् भवति। शकारः सर्वादेशार्थः। त्वत्। मत्। युवाभ्यां।
आवाभ्यां। युष्मत्। अस्मत्। तवममङसा। ङसासहितयोर्युष्मदस्मदोस्तवममइत्येतावादेशौ भवतः।
तव। मम। युवयोः। आवयोः। सर्वादित्वात् सुट्। साम आकं। युष्मदस्मदोः परः साम् अकं भवति। युष्मा
कं। अस्माकं। त्वयि। मयि। युवयोः। आवयोः। युष्मासु। अस्मासु। अथानयोरादेशविशेषविधि
र्निरूप्यते। युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयासु तेमेवांनौवस्नसौ। युष्मदस्मदोर्यथासं
ख्येन ते मे आदेशा भवंति। कीदृशयोः। षष्ठीचतुर्थीद्वितीयासहितयोः। तत्रैकवचने नसहि
ते मे भवतो। द्वितीयेन वांनौ बहुवचनेन वस्नसौ। स्वामी ते समायातः। स्वामी मे संपतं गवः ने।
मस्ते भगवान् भूयादेहि मे मोक्ष मक्षयं॥१॥ स्वामी वां सहाजेसो ... नो दाननयान
नां। राजा वां दत्त स्य तेदानं शान्तो मधुसूदनः॥२॥ देवी वा भवता निर्हेतुर्नरकाद् भोजनार्दनः।
स्वामी वो वक्ष्यत राजा स्वामी नो सो जनार्दनः॥३॥ नमो वो ब्रह्मविन्नः। तानि नो दीय
तां धनं। सानंदाः वः प्रपश्यामः पश्यामो नः सुदुःखिनः॥४॥ त्वा मा मा। अमा सहितयो
र्युष्मदस्मदोस्त्वा मा इत्येतावादेशौ भवतः। पश्यामि त्वा मदाली ढ पश्यसि मां प्रेरेदकं। नादौ।
पादादौ वर्तमानयोर्युष्मदस्मदोरेते आदेशा भवंति। देवास्मान्पाहि हेरे विहितोऽस्मा

रक्ष सर्वदा। संबोधनपदादग्रेन न श्चवंतित्वसादयः। १॥ युष्माकं पोषको विष्णुरस्माकं कुलदे-
वता। तवयेशत्रवो राजन् ममतेप्यतिशत्रवः। २॥ युष्मान् रक्षतु गोविंदोस्मान् रक्षतु सर्व-
दा वस्तु मम पुत्रौ लः माता तव माता बुधः। सुता ॥ चादिभिश्च। चादिभिरभियोगेनैते आदे-
शा भवंति। चादिर्निपातः। चादिर्गणोव्ययो निपातसंज्ञो भवति। च। वा। ह। अह। आह। एव। एवं।
नूनं। पृथक्। विना। नाना। अद्धा। स्वस्ति। षा दोषा। नक्तं। मृषा। मिथ्या। मिथस्। अथ। अथो।
हास। श्वस। उच्चैस्। नीचैस्। स्वर। अंतर। प्रादुर्। पुनर्। भूयस्। अहो। स्वित। उत। आं ह। नमस्।
सह। सते। अंतरेण। अंतरा। नमस्। अलं। अत्यर्थं। कुलं। अ। मा। नो। ना। प्रतिषेधे। ईषत्।
किल। खलु। वै। आरात्। दूरात्। शश्वत्। तत्र। अ। इ। उ। ऋ। लृ। ए। ऐ। ओ। औ। इत्येवमादि-
र्णो निपातसंज्ञोव्ययसंज्ञो भवति। तत्रादिर्गणा विभक्त्यर्थे निरूप्यते। तस्मिन्निति तत्र।
यस्मिन्निति यत्र। कस्मिन्निति कुत्र। तस्मिन्निति काले तदा। कस्मिन्काले कदा। तेन प्रकारे-
ण तथा। येन प्रकारेण यथा। केन प्रकारेण कथं। अनेन प्रकारेण इत्थं। तस्मादिति ततः। यस्मा- २६
दिति यतः। कस्मादिति कुतः। अस्मादिति अतः। इतः। सार्वविभक्तिकस्तस् इत्येके। पूर्वस्मिन्नि-

ति पुरस्तात्। परस्मिन्निति परस्तात्। आहि च दूरे। दक्षिणाहि वसति। चांडालः। किमः सामा-
न्ये चिदादिः। कश्चित्। कश्चन। कचित्। कुचन। तदधीन कार्त्स्न्ययोर्वा साति। सर्वं भस्मे-
ति भस्मसात्। राजाधीनं राजसात्। उर्यादिरंगीकरणे। उरीकृत्य। उररीकृत्य। स्वधादिः कावे नि-
पात्यंते। सुस्थ। अद्य। सपदि। अधुना। इदानीं। सांप्रतं। सादिति। तूर्णं। पूर्वेद्युः। यर्हि। तर्हि
रीप्रं। प्रादुरुपसर्गाः। प्र। परा। अप। सं। अनु। अव। निर्। निस्। दुर्। दुस्। वि। आङ्। नि। अधि। अ-
पि। अपि। अभि। प्रति। परि। उप। सु। उत्। श्रत्। अंतर। आविर्। प्रादुर्। अयं गण उपसर्गसंज्ञकः।
प्राग्धातोः उपसर्गाः प्राग्धातोः प्रयोक्तव्याः। उपकरोति। निराकरोति। तदव्ययं। तदिदं चादिस्व-
रूपमव्ययसंज्ञं भवति। क्त्वा। घं। तच। त्वा। क्यप्। णम्। णमु। क्विप्। डाप्। यावत्। कृत्वा। कृत्वा। आम्।
इत्वा। कादयः। अव्ययात् विभक्तेर्लुक्। अव्ययात्परस्या विभक्तेर्लुक् भवति। न तु शब्दनिर्देशो अ-
व्ययानां च न लिंगादि नियमः। उक्तं हि। सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु य-
न्न व्येति तदव्ययम्। १ इत्यव्ययानि॥ ६॥ ॥ ७॥ ॥ ७॥ ॥ ७॥
अथ स्त्रीप्रत्ययाः। आबंतः। स्त्रियां। अकारांतान्नाम्नः स्त्रियां वर्तमानादाप्प्रत्ययो भ-
वति। जाया। माया। श्रद्धा। मेधा। भाया। इत्यादि। अजादेश्चाप् वक्तव्यः। अजा। एडका।

कोकिला। बाला। शूद्रा। गणिका। काय तः। कापि इअतः। स्त्रियां कापि परे पूर्वस्याका
रस्येकारो भवति। कारिका। पाचिका। पाठिका। वर्ष्टिभागुरिरल्लोपमवाप्योरुप
सर्गयोः। आपं चैव हसंतानां यथा वाचा निशा दिशा। १। अवगाहः। वगाहः। अपिधानं।
पिधानं। ह्रस्वो वा। स्त्रियां कापि परे तरादौ च पूर्वस्य ह्रस्वो वा भवति। वेणिका। वेणीका।
नंदिका। नंदीका। श्रेयसितरा। श्रेयसीतरा। नौकादौ न भवति वाग्रहणदेवा। निश्चये
नपर्तत्यनेके षर्चेषिति निपाताः। निपातानामनेकार्थत्वात्। न्नण ईप्। नकारांताहकारां
ताद्दण्णंताच्च स्त्रियामीप्प्रत्ययो भवति। दंडिनी। दंतिनी। इपि राज्ञो लोपो वक्तव्यः। राज्ञी।
शुनी। मघोनी। कर्त्री। हर्त्री। औपगवी। यस्य लोपः। ईश्च अस्यायः। तस्य लोपो भवति
ष्ठ रेयकारे च परे। ष्टीतः। षकारटकारउकारानुबंधात् स्त्रियामीप्प्रत्ययो भवति। षवर
की। ठकुरुचरी। उ गोमती। भवंती। अत्ययोरानित्यं। अप्प्रत्ययसंबंधिनोक २७
रात्परस्य शतुर्नित्यं नुमागमो भवति ईकारे ईपि च परे। पचंती। नद्यादेः। नद्यादेर्गणा
त्स्त्रियामीप्प्रत्ययो भवति। नदी। गौरी। गौतमी। इंद्रादेरानीप्। इंद्रादेः स्त्रियामानी

प्प्रत्ययो भवति। इंद्राणी। भवानी। मृडानी। शर्वाणी। द्विगुः समाहारे गुणश्च। समाहारे
र्थे ईप्प्रत्ययो भवति। गुणश्च। त्रयी। पुंयोगे च। शूद्री। गणिका। जातेरयोपधात्। जाति
वाचिनो यकारोपधाया दकारांता स्त्रियामीप्प्रत्ययो भवति। मेषी। हंसी। सूकरी। अ
यकारोपधग्रहणात्। क्षत्रिया। वैश्या। प्रथमवयोवाचिनोत ईप् वक्तव्यः। कुमारी। कि
शोरी। कलभी। प्रथमग्रहणात्। वृद्धा। स्थविरा। अग्रहणाद्भिक्षुः। स्वांगाद्वा। स्वांगवा
चिनो वा स्त्रियामीप्प्रत्ययो भवति। सुमुखी। मृगाक्षी। तन्वंगी। वाग्रहणात्। पद्मवदना।
कमललोचना। कृदिकारादक्तेरीब्वा वक्तव्यः। अंगुलिः। अंगुली। धूलिः। धूली। अक्तेरिति वि
शेषणात्। कृतिः। भूतिः। ऐ च मन्वादेः। मन्वादेर्गणात् स्त्रियामीप्प्रत्ययो भवति ऐकारा
देशश्च। मनायी। वृषाकपायी। चकारात् मनोरौकारादेशश्च। पत्न्यादयः। पत्न्यादयो नि
पात्यंते। पत्नी। अंतर्वत्नी। सखी। असखी। अर्धजरती युवती। दारशब्दो नित्यं बहुव
चनांतः। पुल्लिंगाः। दाराः। दारान्। वोतो गुणात्। उकारांताद्गुणवाचिनो वा ईप्प्रत्य
यो भवति। पट्वी। पटुः। मृद्वी। मृदुः। तन्वी। तनुः। उतर्डुः। उकारांताद्दप्रत्ययो भवति।

पंगूः। वामोरूः। पूनास्तिः। युवन् शब्दात् स्त्रियां तिः प्रत्ययो भवति। युवतिः। नण ई पू। इती
पोपवादः। नाम्नो नो लोपश्च। एम्यो नाम सत्वात्स्यादयः। अथ विसर्गत्यय पौ नि रूप्यते आबं

तादापू इति सि लोपः। इवंताद् सेपः से लोपः। इति स्त्री प्रत्ययाः। अथ विभक्त्यर्थ पौ नि रू
प्यते। लिंगार्थे प्रथमा। धातु प्रत्यया तिरिक्त मर्थवच्छब्द रूपाणां। तस्यैवार्थे सत्वा नेः प्रथमा
विभक्तिर्भवति। उच्चैः। नीचैः। लिंगादयो विप्रथमाप्यादि इति केचित्। तत्र इलेति। रवि रिव
राजते राजा। रोषात्कुमारी रोरूयते। नोपुज्यते भुवपद्यः। प्रागास्तां राम लक्ष्मणौ। २
मनसि वचसि काये पुण्य पीयूष पूर्णास्त्रिभुवनमुपकारश्रेणिभिः प्रीणयंतः। परगुण परमा
णून्पर्वतीकृत्य नित्यं निजहृदि विकसंतः संति संतः कियंतः। ३ कुमारी रोरते स्वैरं रो
रूयंते च नारिकाः। जेगीयंते जगीत इ ... मेम्रियंते चैं रुजार्दिताः। आमंत्रणे च। अभि
मुखीकरणे प्रथमा विभक्तिर्भवति। मास मुकुंद गोविंद प्रसीद परमेश्वर। कुमारीस्व
रमासाप्यां क्षम ध्वं भो तपस्विनः। ४ ... सः। भोषगो अघो इत्येते शब्दानि शत्स्यातेधि
विषये। क्षमस्व भो दुराध्य भगो तुभ्यं नमो स्तुते। अघी घभो महा प्रइ घात याघे
रा

स्वधस्मरा। कर्ता कर्म च करणं संप्रदानं तथैव च। अपादानाधिकरण मित्याहुः कारका नि
षट्। शेषाः कार्य कर्तृ साधनयो र्दानपात्रे प्रविश्लेषावधौ संबंध आधार भावयोः। शेषात्स्ववि
वक्षयोः द्वितीयाद्याः षष्ठ्यंतं भवंति। कार्यं कर्म। कारके। उत्पाद्ये। आप्ये। संस्कार्ये। विकारे
च द्वितीया विभक्तयो भवति। यत्सिद्धमेव आप्यते तत् आप्यं। यदसत्तामापितद् उत्पाद्यं। पूत्रगु
णाधानं मलापकर्षो वा क्रियते यत्र तत्संस्कार्यं। यत्र पूर्वावस्थापरित्यागेनावस्थांतरापत्तिः क्रि
यते तद्विकार्यं। कटं करोति कारुः कौ रूपं पश्यति चाक्षुषः। राज्यं प्राप्नोति धर्मिष्ठः सोमं सु
नोति सोमपः। १ अभि सर्वतस् ओकार्यौ धिगुपर्यादिषु त्रिषु। द्वितीयाम्रेडितांतेषु ततोन्य
त्रापि दृश्यते। २ अभितो ग्रामं नदी वहति। सर्वतो ग्रामं तरवो दृश्यंते। धिग् देवदत्तं जीवितं।
उर्ध्वपरि ग्रामं ग्रामं। अनुग्रामं। प्रतिग्रामं। कालाध्वनो नैरंतर्ये। कालयाचकाद्ध्ववाच
नैरंतर्ये द्वितीया विभक्तिर्भवति। मासं स्वाध्यायमधीते। मासमधीते। क्रोशं क्रोशं पर्वतः।
कर्तरि प्रधाने क्रियाश्रये साधने च। क्रियासिध्युपकारके करणे तृतीया विभक्तिर्भ
वति। भिन्नः शरेण रामेण रावणो लोकरावणः। करा ग्रेण विदीर्णोपि वारेन युध्यते पुनः।

सा·
२९

दानपात्रे संप्रदानकारके चतुर्थी। सम्यक् श्रेयोबुद्ध्या यस्मै प्रदीयते तत्संप्रदानं। वेदवि
देगां ददाति। छात्राय कन्यां ददाति। विश्लेषो विभागस्तत्र यो अवधिश्च तत्तया चला
तया वा विवक्षितस्तत्रापादाने पंचमी। धावतोश्वादपतत्। भूस्तलोवतरति गंगा। सं
बंधे षष्ठी। संबंधिनोर्मध्ये यः प्रधानस्तत्र षष्ठी विवक्षिता। राज्ञः पुरुषो यद्वा पित्रोरेतद्
पूजनं गुरूणां वचनं पथ्यं कवीरा रसावद्वचः। आधारे सप्तमी। आधारोधिकरणं। ष
ड्विधमधिकरणं। औपश्लेषिकं। सामीपकं। अभिव्यापकं। वैषयिकं। औपचारिकं। नै
मित्तिकं चेति। चतुर्विधमिति केचित्। व्यापकं। औपश्लेषिकं। वैषयिकं। सामीपकं चेति।
व्यापकं यथा। तिलेषु तैलं व्याप्तं। औपश्लेषिकं यथा। कटे आस्ते ब्राह्मणः। वैषयिकं य
था। वने शार्दूला वसंति। सामीपकं यथा वने वसंति घोषाः। उक्तं च। कटे शेते कुमारोसौ २९
वटे गावः सुशेरते। तिलेषु विद्यते तैलं हृदि ब्रह्म म तं परं १ भावः क्रियालक्षणं। तत्र

सप्तमी। प्रसिद्धक्रियया अप्रसिद्धक्रियया लक्ष्यलक्षणं बोधनं भावः। वर्षति देवे चोर आय
ति। वपत्येषु मालिनी पतितो रातिः। गवसंलेको किलाशब्दं करोति। विना सह नमः क्ते। निर्धा
रणे स्वाम्यादिभिश्च। एतैरपि योगे द्वितीयाद्या विभक्तयो भवंति। विना पापं सर्वं फलति। अंत
रेणाक्षिणी। किं जीवितेन। अंतरा त्वां मां माधवः इत्यादि पद्याकुलं। सह साकं सार्धं समं योगे
तृतीया। सह शिष्येणागतो गुरुः। सहशश्चैत्रो मैत्रेण। साकं नयनाभ्यां लक्ष्मणा दंताः। सार्धं धनि
भिर्धूर्तः साधुः। नमः स्वस्ति स्वाहा स्वधालं वषट् योगे चतुर्थी। नमो नारायणाय। स्वस्ति राज्ञे। सो
माय स्वाहा। पितृभ्यः स्वधा। अलं मल्लो मल्लाय। वषडिंद्राय। सत्येतानानमुक्तिः। अप्रयोगः हाहिर
रः। निर्धारणं क्रियागुणजातिभिः समुदायात् एकदेशस्य पृथक्करणं तत्र षष्ठी। क्रियापराणां भगवदाराध
श्रेष्ठः। गवां कृष्णा गौः संपन्नक्षीरा। एतेषां क्षत्रियः शूरतमः। स्वाम्यादिभिश्च। गोषु स्वामी गवां
स्वामी। गोष्वधिपतिः। गवामधिपतिः। कर्तृकार्ये योरक्का दोक्तलिषष्ठी। कर्तृकार्ये च षष्ठी भव
ति। कादिवर्जिते कृदंते शब्दे प्रयुज्यमाने। व्यासस्य कृतिः। भारतस्य श्रवणं। स्मृतौ चका
र्थे। मातुः स्मरति। मातरं स्मरति। हेतौ तृतीया पंचमी वक्तव्या। अनित्यः शब्दः कृतकत्वेन कृ
तकत्वात्। भयहेतौ च। चोराद्बिभेति। व्याघ्रात्त्रस्यति। विद्युत्पाताच्चकितः। षष्ठी हेतुप्रयो

सा॰स्या गे। कस्येहेतोरियं कन्या। इत्थंभावे तृतीया। अन्यस्यान्यत्रोपचारेण वर्त्तमानत्वमित्थंभा
३० वः। शिष्यं पुत्रेण पश्यति। आचार्यः ससारं मर्सारेण पश्यति। येनांगविकारः। येनांगेनांगि
नोंगविकारो लक्ष्यते तस्मात् तृतीया विभक्तिर्भवति। अक्ष्णा काणः। पादेन खंजः। इत्या
दौ न्यूनांगविकारः। मुखेन त्रिलोचनः। वपुषा चतुर्भुजः। इत्यादौ अधिकांगे विकारः। जनिक
र्त्तुः प्रकृतिः। जायमानं कार्यस्योपादानप्रदानसंज्ञं भवति। तत्रापादाने पंचमी। यस्मात्प्र
जाः प्रजायंते तद्ब्रह्मेति। आङ्मर्यादायोगे च। आपाटलिपुत्राद्वृष्टो देवः। तादर्थ्ये चतुर्थी वक्तव्या।
संयमाय श्रुतं धत्ते नरो धर्माय संयमं। धर्मं मोक्षाय मेधावी धनं दानाय यच्छति। क्रुधादि
योगे च। क्रूराय क्रुध्यति। मित्राय द्रुह्यति। गुणवते असूयति। ल्यब्लोपे पंचमी वक्तव्या।
हर्म्यात्प्रेक्षते। हर्म्यमारुह्य प्रेक्षत इत्यर्थः। निमित्तात्कर्मयोगे सप्तमी वक्तव्या। चर्मणि द्वी
पिनं हंति दंतयोर्हंति कुंजरं। वालेषु चमरीं हंति सीम्नि पुष्कलको हतः। विषये च। तर्के चतु
रः। षष्ठीसप्तम्यौ चानादरे। बहूनां क्रोशतां लांगलः। सस्यचोरः। बहुषु साधुषु ब्रुवत्स्वपि स्व ३०
मार्गो याति साधुमार्गेण मातापित्रोरुदतोः प्रव्रजति पुत्रः। अन्योक्तेः प्रथमा। यदि दका

र्त्त्वादन्येनाख्यातेन कृता चोक्तं भवति। तदा प्रथमा प्रयोक्तव्या। घटः क्रियते। घटः का
र्यः। छंदसि स्यादिः सर्वत्र। दध्नाजुहोति। पुपुन्नत्तु ब्रह्मणस्पतिः। व्रजती विरिजुः। इति कार
कप्रक्रिया। अथार्थवद्विभक्तिविशिष्टानां समासो निरूप्यते। समासश्चान्वये नाम्नां
मन्वययोग्यत्वे सति ऐक्ये समासो भवति। पंचशब्दाश्च द्विलोपितक्तोभा राजपुरुषस्येत्या
दौ न समासः। परस्परसंबंधात्। स च षड्विधः। अव्ययीभावस्तत्पुरुषो द्वंद्वो बहुव्रीहि कर्म
धारयो द्विगुश्चेति। पूर्वपदप्रधानो व्ययीभावः। द्विगुतत्पुरुषौ परपदप्रधानः। द्वंद्व
कर्मधारयौ चोभयपदप्रधानौ। बहुव्रीहिरन्यपदप्रधानौ। तस्य क्रियाभिसंबंधात्।
उभयपदप्रधानो बलवान्। एकपद्यमैकस्वर्यमेकविभक्तिकत्वं च समासप्रयोजनं।
अधिस्त्री इति स्थिते। स्त्रीशब्दात्। द्वितीयैकवचनममू। स्त्रियमधिकृत्य भवतीति
विग्रहे अन्वययोग्यार्थसमर्पकः पदसमुदायो विग्रहो वाक्यमर्थमिति यावत्। कृते
समासे अव्ययानां पूर्वनिपातो वक्तव्यः। पूर्वव्ययेव्ययीभावः। अव्यये पूर्वपदे सतियो

सा.व्या. अव्ययःपोव्ययीभावःसंज्ञकःसमासोभवति। समासश्चाव्ययपोः। समासेवर्त्तमानाद्याविभ
क्तेःप्रत्ययेचपरेलुक्भवति। इत्यमोर्लुक्। नामसंज्ञायांस्यादिविभक्तिः। सकनपुंसकं। सोव्ययी
३२ भावोनपुंसकलिंगोनपुंसकंभवति। नपुंसकत्वाद्ध्रस्वत्वं। अव्ययीभावात्। अव्ययीभावात्परस्यावि
भक्तेर्लुक्भवति। अधिस्त्रिग्रहकार्यं। रायमतिक्रांतमतिरि। कुले। नावमतिक्रांतमतिनु। लंज।
कृस्यादेशेसंध्यक्षराणां मिकारोकारौवक्तव्यौ। यथासादृश्ये। यथाशब्दःसादृश्येसमस्यतेसोव्य
यीभावः। शक्तिमनतिक्रम्यकरोतीतियथाशक्ति। अतोमनतः। अकारांतादव्ययीभावात्परस्या
विभक्तेरमूस्यात् तंवर्जयित्वा। कुंभस्यसमीपेइत्युपकुंभं। उपकुंभंपश्य। वाटाङ्योः। टाङि त्येतयोर्वाम
भवति। उपकुंभेनकृतं। उपकुंभंकृतं। उपकुंभेनिधेहि। उपकुंभंनिधेहि। अनतइतिविशेषणात्सिद्ध
स्यात्अमन्नभवति। उपकुंभाद्दानाय। अवधारणार्थेयावत्। अवधारणार्थेयावच्छब्दस्सुस्नसमा
सेसोव्ययीभावसंज्ञकःसमासोभवति। यावंत्यमत्राणितावतोब्राह्मणानामंत्रयस्वेति यावदमत्र
मामंत्रयस्व। मक्षिकाणाममावोनिर्मक्षिकंवर्त्तते। इत्यव्ययीभावः। अमादौतत्पुरुषः। द्वितीयाद्यं
तेपूर्वपदेसतितत्पुरुषसंज्ञकःसमासोभवति।। ग्रामंप्राप्तोग्रामप्राप्तः। दात्रेणछिन्नंदात्रछिन्नं। ३२
यूपायदारु। यूपदारु। वृकेभ्योभयंवृकभयं। राज्ञःपुरुषोराजपुरुषः। अक्षेषुशौंडः। अक्षशौंडः।

कचिदमाद्यंतस्यपरत्वं। अग्नौआहितइत्याहिताग्निः। भूतपूर्वः। समासःक्वचिद्देकपद्यंणत्वहेतुः। श
रणांवनंशरवणं। आम्राणांवनंआम्रवनं। त्रिनयनः। त्रिणयनः। पानस्यवा। पानस्यवाणत्वंभवति।
क्षीरपानं। क्षीरपाणं। नञ्। नञिपूर्वपदेसतितत्पुरुषसंज्ञकःसमासोभवति। न। समासेसति
नञोअकारादेशोभवति। नब्राह्मणः। अब्राह्मणः। अन्स्वरे। समासेसतिनञोऽनादेशोभवतिस्वरेपरे।
नाकादिवर्जं। अश्वादन्योनश्वः। धर्मविरुद्धोधर्मः। ग्रहणाभावोग्रहणमिति। तदन्यतद्विरुद्धतदभा
वेषुनञ्प्रवर्त्तते। इतितत्पुरुषः।। चार्थेद्वंद्वः। समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः। तत्रेश्वरं
गुरुंचभजस्वेतिप्रत्येकमेकक्रियाभिसंबंधेसमुच्चयेसमासोनास्ति। बटोभिक्षामटगांचानयेति। क्र
नां दादीनां जक्षादीनां च शतुर्नित्यं नुम् न वक्तव्यः॥ [illegible] दादेः। ददातीति ददत्। [illegible]
ददतौ। ददतः॥ दधातीति दधत्। स्त्रियां ददती। दधती। नपुंसके ददत्। ददती। ददंति
जक्षतीति जक्षत्। जागर्तीति जाग्रत्। दरिद्रातीति दरिद्रत्। चकासदीसो। चकास्तीति
चकासत्। अनुशास्तीत्यनुशासत्। विदेर्वा वसुः॥ विदेर्धातोः शतुर्विषये वा वसुः प्रत्य
अतवसोः सौ यो भवति। वेत्तीति विद्वान्। वेत्तीति विदन्। अत्रभवत्तत्रभवच्छब्दौ पूजार्थे निपात्येते।
३ उकारानुबंधौ ज्ञातव्यौ। तेन अत्रभवान्। तत्रभवान्। अत्रभवंतो भट्टमिश्राः पूज्या इ
त्यर्थः। अत्रभवद्भिर्भगवत्पादैर्भणितं। पूज्यैरित्यर्थः॥ शीलेतृन्। धातोस्तृन्प्रत्य ८

यस्य तौ वित्यत्र [illegible] अंत्यवर्णस्यपूर्व
निपातः इकारादेशः अपवादित्वात् प्रत्ययः। शितः। [illegible] विमोचने। रोदि
तीति रुदः। शिति कंठः। नील कंठः। शिति [illegible] स्यात्
अलंकृञ्यायो॥ २

यो भवति शीले स्वभावे अर्थे। नकारः प्रत्ययभेदज्ञापनार्थः। करणशीलः कर्ता। हरणशी
लः हर्ता। इष्णुस्नुक्नु॥ धातोः शीलेर्थे इष्णु स्नु क्नु इत्येते प्रत्यया भवंति। अलंकरो
तीत्येवंशीलः अलंकरिष्णुः। निराकरोतीत्येवंशीलः निराकरिष्णुः। ग्रस अद
ने। ग्रसतीत्येवंशीलः ग्रसिष्णुः। सहतीत्येवंशीलः सहिष्णुः। जिभुवोः स्नुः॥ कि[illegible]न्।
अत्रस्नुः जयतीत्येवंशीलः जिष्णुः। भवतीत्येवंशीलः भूष्णुः। तिष्ठतीत्येवंशीलः स्थास्नुः। वि
ष्णुर्व्याप्तौ। वेवेष्टि एवंशीलः विष्णुः। गृधु अभिकांक्षायां। गृध्नुः। षाकोकण॥ धा गृध्नाती
तोः शीलेर्थे षाक ऊक कण इत्येते प्रत्यया भवंति। वर निंदायां। वराकः। भिक्षु या त्येवंशीलः
च्यायां। भिक्षुकः। भिक्षुकः। भिक्षाकः। सनाशंसयोश्च॥ वक्तुमिच्छुः विवक्षुः [illegible]
शंसु कथने। आशंसत इत्याशंसुः। भिक्ष याचने। जिघृक्षतीति जिघृक्षुः। पातु [illegible]
मिच्छति पिपासति। पिपासतीति पिपासुः। कामयतीत्येवंशीलः कामुकः। उकप्रत्ययः

षाकप्रत्ययस्य षकारानुबंध
त्वात् वराकी। भिक्षाकी

गत्वरश्च गमेरनुनासिकलोपो नित्यात्वे ... त्यपि तिकृतितुक।
इणनशजिसर्तिभ्यः क्वरप्। इत्वरः। इत्वरी। नश्वरः। जित्वरः। सत्वरः। गत्वरः॥
इणगतौ। णशनशने। जीजये। इत्वरः

हिंसिहिंसायां ... पर्यायः ... सिद्धः

वंशीकः ... त्येवं ... भंगुरः। मङ्गुरः।

छदंन। भावयतीत्येवं भावुकः। नमादरः न मत्तशीलः नम्रः। हिंसनशीलः हिंस्रः। हिंसि हिंसायां। घ
१ सादेः कास्त्वे घस्मरः। भंजो आमर्दने। भंजनशीलः भंगुरः। चजोः कुगधि त्येवं वंशी
ति। चजोश्चकारजकारयोः ककारगकारौ भवतः इति जस्य गकारः। छिदिभिदिवि
दि। कुरच्। छिदुरः। भिदुरः। विदुरः। यङ ऊकः। यङन्ताद्धातोरूकप्रत्ययो भवति शीलेऽर्थे वाच्ये सति
। यङ्लुक्। ऊक संनियोगे यङो लुग्भवति। अतिशयेन यजतीत्येवं शीलः यायजूकः॥
अतिशयेन वदतीत्येवं शीलः वावदूकः। जपजल्पव्यक्तायां वाचि। यमज पोनुकः। नोलो
पः। अतिशयेन जपतीत्येवं शीलः जंजपूकः। दंशः दंशने। अतिशयेन दंशतीति दंदश
कः। ... जागर्तेरूकः। जागरूकः। आदृतः किः किश्च भूते। आकारान्ता
दृकारान्ताच्च धातोर्भूतकाले किः प्रत्ययो भवति शीलेऽर्थे वाच्ये सति धातोश्च द्विर्वचनं।
पा पाने। पपौ इत्येवं शीलः पपिः। रामः सोमं पपिर्यः ... गजानन
विराजकिः पौंडरीके महाद्विजान् १॥ आदृत इति किः किश्चेति चकारात् उपधालोपिनां १
४ जागतीर्हित्वाभावो गुणश्च। अतिशयेन जागर्ति ...

अतीस... सुरुक्... क्षिपृ... मायावृष्ट... क्षिणी ... अर्मश्च ... रोगः स्तोमः संघातः
स्तोमः क्षेमः। सर्मः गमनं धर्मः क्षेमं क्षामं भामः ... यामः वामः। वामः शोभनः उष्यो ... पद्म
यक्ष्माः रोगः नेमः

ग्रहणं। जगामेति जग्मिः हन हिंसागत्योः। जघानेति जघ्निः। चखानेति चख्निः। जहेति
स्तोभ्यश्च भिन्नः। जघ्नि। जघासेति जक्षिः। खसेचपा। घसादेः। सदेणादयः। धातोः सर्वस्मिन्काले
श्चः। २ उणादयः प्रत्यया भवंति। करोतीति कारुः। वागतिगंधनयोः। वातीति वायुः। आतोयु
क। कुशआह्वाने रोदने च। तप्रत्ययः क्रोशतीति क्रोष्टा। अवरक्षणगतिकांतिप्रीति
तृप्तिगमनप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छारीप्यवाप्त्यालिंगनाहिंसादानभा
ववृद्धिषु। मुकप्रत्ययः। किल्वात्संप्रसारणं उकारः। अवतीति ओमा। अतसावत्यगमने
। मनिण्प्रत्ययः। अततीति आत्मा। बृहि वृद्धौ। बृंहति विब्रह्मा। ब्रह्मा। ब्रह्मेनस्त्र नपुंसकं
। मन्नुपधाया ऋरः। मनिप्रत्यये परे उपधाया ऋकारस्य रकारो भवति। धृञ् धारणे॥
ध्रियते स धर्मः। ध्यादेः क्विश्च। ध्यादेर्धातोः क्विक प्रत्ययो भवति। भावे कर्मणि च। स्त्रि
यां वायुना धूयते सा धूकिः। अगिलघिरघिगत्यर्थाः। अंगतीत्यंगुकिः। उकिकर्त
र्वो वा। अंगुली। धूली। ध्यादेः क्विश्चेति चकारात् लुघिरघोरु प्रत्ययः। रपते गत्व
कृदिकारादक्तेरी पूर्वावक्तव्यः १

कृदंत· तिशास्त्रांतं शश्वंतं वेतिरघुः। लंघयतीतिलघुः। भविष्यार्थे मणिन्। गम्लृगतौ। आगमि
१० ष्यतीत्यागामी। भविष्यतीतिभावी। अतिशयेन गच्छतीति जंगमः। कः प्रत्ययः। यङ्लुक्
।ईश ऐश्वर्ये। वरप्रत्ययः। ईष्टेसौ ईश्वरः। इट् प्रतिषेधो वाच्यः। तिष्ठतीति स्थावरः। रा
जादेरन्। राजादेरन् प्रत्ययो भवति। राजतेसौ राजा। भ्राजृ दीप्तौ। भ्राजते सौ भ्राजा।
तु धातोः यौतीति युवा। शोतनूकरणे। श्यति शब्देन तनूकरोतीति श्वा। मघवा। युवहावहागि
अवनिः भ्यो निः। योनिः। हीयते सा हानिः। वहते सौ वह्निः। अंगतौ। अग्निः। इदि च दरो दशकृभ्यो
रः। इदि परमैश्वर्ये। इंदतीतीन्द्रः। चदि आह्लादे। दीप्तौ च। चंदतीति चंद्रः। रुदिर् अश्रुविमो
चने। रोदितीति रुद्रः। शक्लृ शक्तौ। शक्नोतीति शक्रः। वचो देरस्। उच्यते तद्वचः। मह
पूजायां। महतीति महः। अय वय पय रय गतौ। अयतीत्ययः। वयतीति वयः। पयती
ति पयः। रयतीति रयः। रहः। सोकर्य के किमः। सोकर्य के किमप्रत्ययो भवति। नेतुंसु १०
करं भिदेद्किमं। कास्थं। पक्तुं सुकराः पचेकिमाः। आढ्यंकरः। शं प्रविश्या ~~[illegible]~~ शंभुः।
भुवो डु रसंज्ञा
यां

प्रभुः। विभुः। उणादयोप्यपरिमिताः प्रयोगमनुसृत्य प्रयोक्तव्याः॥ तुमुन्तदर्थायां भविष्य
ति। धातोर्भविष्यति काले तुमुन् प्रत्ययो भवति। तदर्थायां क्रियायां प्रयुज्यमाना
यां। भोक्तुं व्रजति। पठितुमिच्छति। लब्धुमीहते। घञ् भावे। धातोर्भावेर्थे घञ्प्रत्य
यो भवति। चजोः कुघिण्ण्यतोः। पच्यत इति पाकः। त्यज्यत इति त्यागः। भज सेवायां। विपू
र्वः। विभज्यत इति विभागः। रंज रागे। रज्यत इति रागः। रंजेर्नलोपो वा। भूयत इति भावः।
इण् गतौ। ईयत इत्यायः। डुदाञ् दाने। आतो युक्। दीयत इति दायः। संज्ञायामकर्तरि
च। कर्तृवर्जिते भावेर्थे घञ् प्रत्ययो भवति संज्ञायां विषये। प्रतिकार्यमाह्रियत इति प्र
प्रक्रि त्याहारः। विक्रियत इति विकारः। स्वरादल्। स्वरांताद्धातोरल्प्रत्ययो भवति भावादौ। विच
चयनं। चीयत इति चयः। संचयः। ष्टुञ् स्तुतौ। स्तूयत इति स्तवः। णीञ् प्रापणे। नीयतेसौ ते ३
नयः। उन्नीयतेसौ उन्नयः। स्वरादइत्यत्र इ उ ऋ दंतेभ्यो प्य प्रत्ययो भवति भावादौ कारणे
प्रयुज्यमाने सति। न विक्षिपा। क्षियते विक्षिप्यते कामादिभिर्भ्रमतीति नरः॥

कुदंत। स्तृ वरणे। व्रियते वधूभिरिति वरः। स्तृ विस्तारे। विस्तीर्यते इति विस्तारः। मद मदः।
३१ मदादीनाम् अल् प्रत्ययो भवति भावादौ। मदी हर्षे। मद्यते अनेनेति मदः। मदादेः सोप
सर्गस्य घञ् वा। उन्मादः। उन्मदः। प्रमादः। प्रमदः। दीव्यते विश्वम् अनेनेति देवः। पि
ञ् बंधने। विशेषेण सीयते बध्यते अनेनेति विषयः। मूर्तौ घनः। मूर्ति काठिण्ये पो[...] कठिण स्वभावे
दे [...] भिधेये हंतेर् अल् प्रत्ययो भवति घनादेशश्च भावादौ। दधि काठिण्यं दधिघनः। संघ
वे काठिण्ये संघवघ[...]नः। हिसि हिंसायां। अच् प्रत्ययो वर्णविपर्ययश्च। हिनस्ती
ति सिंहः। ट्वितोथुः। ट्वितो धातोर् अथु प्रत्ययो भवति भावादौ। टुवेपृ कंपने। वेप्यते अनेनेति
कंपः ३ वेपथुः। टुक्षु क्षेपणे। क्षेप्यते अनेनेति क्षेपथुः। टुवमु उद्गीरणे। वाम्यते अनेनेति वम
भेवक्षरो थुः। ड्वितस् त्रिमक् तत्कृते। ड्वितो धातोस् त्रिमक् प्रत्ययो भवति तेन धात्वर्थेन कृतेर्थे निष्प
गोवा २ वाच्ये सति। क्रियया निर्वृत्तो निष्पन्नः कृत्रिमः। घटः। संभ्रियते सो संभारः। संभारणा न्ने २

डुकृञ् करणे।

निष्पन्नं

निर्वृत्तं संपन्नं संस्कृत्रिमं। युध्वं। डुभृञ् धारणपोषणयोः। पचन क्रियया निर्वृत्तः पक्त्रि
मः। ओदनः। नङ्। धातोर् नङ् इत्येतौ प्रत्ययो भवतो भावादौ। यती [...] प्रयत्ने। प्रतन
यत्नः। भिक्षु प्रश्नये। स्वपनं स्वप्नः। प्रच्छः श्नेः। प्रच्छ धातोश् छकारस्य शकारो भव
ते ४ ति नकारे परे। पृच्छ्यते सो प्रश्नः। इज्यते सो यज्ञः। स्तो श्रु भिक्षुः। विधानं विधिः। संधा बिधीयु नेसविधिः
संधीयतेस नं संधिः। अंभोनि धीयते यत्र स अंभोनिधिः। भावे युट्। धातोर् भावे युट् प्रत्ययो भ
वति। युवोरनाकौ। क्रियते तत्करणं। म्रियते तन्मरणं। ह्रियते तद्धरणं। भ्रियते त
द्भरणं। ऊह्यते तदूहनं। दीयते तद्दानं। हूयते तद्धवनं। ज्ञायते तज्ज्ञानं। पीयते तत्पानं। नं ४
पाशोने। स्नीयते तत्स्नानं। वम्यते तद्वमनं। हषेश्च गंतस्य कृति च कचित्। हृष्यते
[...] तद्धर्षणं। उद स्थादेः सलोपश्च। उपसर्गात्परस्य स्थादेः सकारस्य लोपो भवति
त भावादौ। उत्थीयते तदुत्थानं। उत् स्थादेर् इत्यादि शब्दात् स्तंभेर्ग्रहणं। उत्तम्भ

वसनिवासे ४ साधनेऽर्थे आधारेऽर्थे इति वाच्यं २ दुगतो

कृदंत तेलट्तं भनं। युट् साधनाधारयोः। साधने आधारे चार्थे युट् प्रत्ययो भवति। पच्यते नेनेति पच

१२ नः। अग्निः। दह्यते नेनेति दहनः। पच्यते स्यामिति पचनी। स्थाली। द्रूयते नेनेति द्रोणः। घनादिना

द्रोणी। [illegible] करणः। ईषद्दुःसुषु खल्व्यू। ईषदादिषु प्रयुज्यमानेषु स्मिर

खल्व्यू इत्येतौ प्रत्ययौ भवतो भावादौ। ईषद्भूयते नेनेतीषद्भवः। दुःखेन भूयते नेनेति दुर्भवः। सु

खेन भूयते नेनेति सुभवः। ईषत्क्रियते नेनेतीषत्करः। दुष्करः। सुखेन क्रियते सो सुकरः। सु

करं। युध संप्रहारे। दुःखेन युध्यते नेनेति दुर्योधनः। सुयोधनः। सुखेन ज्ञायते सो सुज्ञानः॥

तव्यानीयौ॥ धातोस्तव्यानीयौ प्रत्ययौ भवतो भावादौ॥ वसतेः कर्तर्यपि तव्यः स्यात्। उपध्याया

[illegible] दीर्घः। वसतीति वास्तव्यः। [illegible] भूयते भवितव्यं क्रियते तत्कर्तव्यं। करणी

णिच यं। आस्यते तत् आसितव्यं। आसनीयं। इटो ग्रहाङ्क्विति च। ग्रहादीनामिट ई भवति। गृह्य

ते तद् ग्रहीतव्यं। ग्रहणीयं। व्रियते तत् वरीतव्यं। वरणीयं। स्वरा घः। स्वरांतात् धातोर्यप्र

त्ययो भवति। चीयते चेयं। नीयते नेयं। ऋय्यजय्यौ शक्यार्थे निपात्येते। डुक्रीञ् द्रव्यविनिम १२

विनिमयने णीञ् प्रापणे कर्तरि। क्षय्योपि तथैव ३

क्रेतुं योग्यं जेतुं योग्यं क्षेतुं योग्यं

[illegible] ये। क्रेतुं शक्यं क्रय्यं। जेतुं शक्यं जय्यं। अन्यत्र क्रेयं। जेयं। क्षेतुं शक्यं क्षय्यं। क्षेयं। पुशकात् पवर्गी

तात् धातोः शकादेश्च यप्रत्ययो भवति भावादौ। जप्यते तत् जप्यं। लभ्यते तत् लभ्यं। शक्यते तत् श

क्यं। सह्यते तत् सह्यं। ए चातः। आकारांतात् धातोर्यप्रत्ययो भवति आकारस्य एकारो भवति

भावादौ। दीयते तत् देयं। पीयते तत् पेयं। मीयते तत् मेयं। माङ् माने॥ गीयते तत् गेयं। धीयते तत् धे

यं। ऋहलांतात् घ्यण्। ऋवर्णांतात् व्यंजनांतात् घ्यण् प्रत्ययो भवति भावादौ। घकारः प्रत्ययभेद

ज्ञापनार्थः। णकारो वृद्ध्यर्थः। क्रियते तत् कार्यं। बंध बंधने। बाध्यते तत् बाध्यं। व्रियते तत् वार्यं।

ह्रियते तत् हार्यं। हस हसने। हास्यं। चित्वात् ककारोपि। उच्यते तत् वाक्यं। पच्यते तत् पाक्यं। अ

न्यत्र क्रियाकारकसमुदायादन्यत्र वाच्यं। ये एते भावकार्ययोर्विहितास्तव्यादयस्ते ह

कर्तरि ३ विध्येव ते व्याः। दारो दृसर् दर्शने। द्रष्टुं योग्यो द्रष्टव्यः। दर्शनीयः। अध्येतुं योग्यो अध्येतव्यः। अध्य

रअरः यनीयः। श्रोतुं योग्यः श्रोतव्यः। श्रवणीयः। मंतुं योग्यो मंतव्यः। मननीयः। मन ज्ञाने। ध्यै चिंता

रारः यां। ध्यातुं योग्यो ध्यातव्यः। ध्यानीयः। स प्रत्ययांतादपि एते प्रत्यया भवंति। नितरां ध्यातुमि

अरः अर

कारस्य ३ इच्छादीनामनीयादौ गुणो हि [illegible]

अवश्यभावितुं योग्यम् अवश्यभाव्यं
अवश्यभाव्यमित्यत्र अव्यय
पूर्वत्वादव्ययीभावः।२

[illegible] ओदौतो भवतः॥२
[illegible] आपूर्व [illegible] पदस्य [illegible]

२ अवश्यमाव्यम् भव्यमित्यत्र ओदोतोः परयोः [illegible] भावितुं योग्यं भव्यं अत्र क्यप् २

कृदंत ३२ ष्टो निर्दिष्टव्या सितव्याः [illegible] विशेषणाज्ञातुमिष्टो विजिज्ञासितव्यः॥ ओरवश्यके॥ उवर्णान्ता
त् अवश्यकेऽर्थे ण्यत् प्रत्ययो भवति। ओदौतोः प्रत्ययः स्वरवत्। अवश्यं भवितुं योग्यं तदवश्यभा
व्यं। अवश्यं लवितुं योग्यं अवश्यलाव्यं। समासे सति अवश्यमादीनां मलोपमिच्छंति। लुंपेदव
श्यमः कृत्ये तुं काममनसोरपि। समो वा हिततत्तयो मांसस्य पचियुड्घञोः॥ लव्यादीनां कृत्यसंज्ञा
पाणिनीयानां। अवश्यं लाव्यो वश्यलाव्यः॥ भोक्तुं मनोयस्यस भोक्तुमनाः॥ गंतुं [illegible] कामो यस्य
स गंतुकामः॥ सम्यक्प्रकारेण हितं संहितं। सहितं। संततं। संततं। मांसस्य पचनं मांसपचनं।
मांस्पचनं। मांसस्य पाकः॥ मांसपाकः॥ मांस्पाकः॥ ऋदुपधात् क्यप्॥ ऋदुपधाद्धातोः क्यप्प्र
भावकार्ययोः ४ त्ययो भवति। [illegible] ॥ [illegible] कर्त्तनं कृत्यं। यजादिभ्यः स्त्रि
यां भावे क्यप्॥ यजादेर्धातोः स्त्रियां भावे क्यप् प्रत्ययो भवति। कित्वात्संप्रसारणं॥ यजनमि
ज्या। अज गतिक्षेपणयोः॥ समजनं समज्या। शयनं शय्या [illegible] शय्या॥ ध्या [illegible] ध्याय्या॥ हंतेः क्य
५ प्॥ हंतेर्धातोः क्यप् प्रत्ययो भवति। नकारस्य च तकारः॥ ब्रह्मणो हननं ब्रह्महत्या॥ [illegible] ॥
४ वर्तनं वृत्यं। कर्तनं कृत्यं। कृत्याश्च क्यप्॥ कृत्याद्धातोः क्यप् प्रत्ययो भवति। आ तो युक्। [illegible]
कृत्ये प्रत्यये परे अवश्यमः अनुस्वारो लुंपेत् काममनसोः परयोः तुम् प्रत्ययमकारौ लुंपेत्
हिततततयोः परतः सतोः समः अनुस्वारो लुंपेत्

नाममात्रेण वस्तुसंकीर्तनमुद्देशो निर्देशश्च

[illegible] यने

क्तिः॥ धातोः स्त्रियां भावे क्तिः प्रत्ययो भवति। अनुभूयते तदनुभवनं। अनुभवनं अनुभूतिः॥ संवय
नं संवितिः॥ पचनं पक्तिः॥ वह प्रापणे। [illegible] ॥ वहनं ऊढिः॥ [illegible] ॥ शम
नं शांतिः॥ दमनं दांतिः॥ अनुशासनमनुशास्तिः॥ भ्रमणं भ्रांतिः॥ वमनं वांतिः॥ ज्याग्लाहाभ्यो निः
ज्यानिः॥ ग्लानिः॥ हानिः॥ शीङो न गुणश्च। क्तिप्रत्यये परे शीङो गुणाभावो [illegible] भवति। संशयनं सं
शीतिः॥ कर्तरि क्तिश्च। कर्तरि क्तिः प्रत्ययो भवति स्त्रियां। प्रकुरुत इति प्रकृतिः॥ विपन्नते सा विपत्तिः
इक्श्तिपौ धातुनिर्देशे। धातुनिर्देशे वाच्ये सति इक्श्तिपौ प्रत्ययौ भवतः। पचनं पचिः॥ पचतिः।
षिद्भिदादिभ्योऽङ्। षितो धातोर्भिदादेश्च स्त्रियामङ् प्रत्ययो भवति। पचनं पचा। मार्जनं मृजा। मृजुपरि
त्यौ। भेदनं भिदा। छेदनं छिदा। जरेत्यत्र ऋकारवर्जितपरहित अ प्रत्ययो भवति। जीर्यते नया सा जरा। क्षीर्य
ते नया सा क्षरा। गुरोर्हसात्। गुरुधातोर्हसांतात् अ प्रत्ययो भवति स्त्रियां। ईह चेष्टायां। ईहते सा ईहा
ऊह वितर्के। ऊहा। ऊह्यते सा ऊहा। ईक्ष्यते सा ईक्षा। एध्यते सा एधा। प्रत्ययांतात्॥ प्रत्ययांतात् अ प्रत्ययो भवति भावे
कर्तरि स्त्रियां। चिकीर्षणं सा चिकीर्षा। पुत्रीया। भावना। [illegible] पूर्वकाले क्त्वा। धातोः पूर्वकाले क्त्वा
प्रत्ययो भवति। समानकर्तृके धातौ प्रयुज्यमाने। स्नात्वा भुंक्ते। भुक्त्वा व्रजति। भुक्त्वा सेदू [illegible] ॥

इच्छायामा कर्तुमिच्छा चिकीर्षा आत्मनः पुत्रेच्छा पुत्रीया
मानः सः २ समानः एकः कर्ता २
ययोः पदयोः स समानकर्तृकः १

कृत्वा।

कृदंत. इट्सहितः क्त्वाप्रत्ययो वा किद्भवति। वृतु वर्तने। वर्तित्वा। ग्रह ग्रहणात् लेदोपि रुदादेः परः क्त्वा
१४ वा किद्भवति। तेन रुदित्वा। रोदित्वा। विद ज्ञाने। विदित्वा। वेदित्वा। भिन्नकर्तृकेपि क्यप् दृश्यते।
मत्वसूतिमभारत्येति। अलंखल्वोः प्रतिषेधे। प्रतिषेधवाचकयोरलंखल्वोर्योगे पूर्वका
लं विनापि धातोः क्त्वाप्रत्ययो भवति। अलं भुक्त्वा। परिभाषणे। खलु कृत्वा। उदितो वा क्त्वा
वेट्। उदितः परस्य क्त्वाप्रत्ययस्य वा इडागमो भवति। इषु इच्छायां। इषित्वा। इष्ट्वा। समा
से क्यप्। समासे सति पूर्वकाले क्यप्प्रत्ययो भवति तत्कर्तृके धातौ प्रयुज्यमाने। संभ
त्य करोति। प्रणम्य गच्छति। प्रकर्षेण नत्वेति प्रणम्य। नञ्पूर्वे इत्येके॥ नञ्पूर्वके स
मासे सति क्त्वाप्रत्ययो भवति। अकृत्वा जल्पति। क्विपि अंतस्योपधा णमि प्रकीर्तिते।
धातोः प्ररयो परिणामयित्वा इति परिणमय्य सुं[illegible]डे। तत्काके पिक्यप् दृश्यते। मीळ
निमीळे। अक्षिणी संमीळिता इत्यक्षिणी संमील्य हसति। मुखं व्यादाय स्वपिति। पौ
नःपुण्ये णमुप् द्वित्वं च। समानकर्तृके धातौ प्रयुज्यमाने पौनःपुण्यार्थे वाच्ये सति णं

(interlinear: नवकारस्य कृत्वा; निकर्षे नाम्यय काभाव)

समानः एकः कर्ता यस्मिन् स समानकर्तृकः। प्रसार्य २

Left margin: णमुप्रकी भावे ५ / ह्रस्वस्य पित्कृति तुक् / उकारउच्चा रणार्थः / क्त्वावीस्या वीरंते / पत्रंध्या पुनःपुनः क्रियमाणं / तोव्यवनं पौनःपुण्यं / तत्रतुकन भवति ५

Right margin: ह्रस्वस्यपि तिकृतितुक् / [illegible] / क्यप्गुणश्च / गजानीत. १४ / क्यप्प्रत्ययो स्मरतो १

उपधाया लघोः। ब्रह्मभावं प्राप्तः केन प्रकारेण स्पर्थः अनेन प्रकारेण क भुवो भावे वा क्ये सति भू धातोः

(interlinear: केन प्रकारेण करोति रोमी इत्थं एवं प्रकारेण करोती; तत्कथं कारं)

क्यप्प्रत्ययो भवति २
म् प्रत्ययो भवति। तस्य [illegible] णमंत पदस्य द्विर्वचनं। स्मारं स्मारं। पीत्वा इति पायं पायं गच्छति पीत्वा
भुक्त्वा। भुक्त्वा इति भोजं भोजं व्रजति। कथमादिषु स्वार्थे णमुप्। कथमादिषूपपदेषु सत्सु कृ यस्मिन्धातो
ञ् धातोर्णम्प्रत्ययो भवति। कथंकारं। एवंकारं। इत्थंकारं। इत्थं करणं। भुवो भावे क्यप्। ब्र वृद्धिस्तिष्ठ
भावे क्ती ह्मणो भावः ब्रह्मभूयं। ब्रह्मभूयं गतः। ब्रह्मभूयाय कल्पते। लक्षेरीमुट् च। लक्षेर्धातोरीप्रत्य लोपभावः
वर्त ४ यो भवति तस्य मुडागमश्च। लक्ष दर्शनांकनयोः। लक्ष्यते पुमान् अनया सा लक्ष्मीः। स्त्याय
तेर्ड्रीलेड्रूट्। संघ्यक्षराणाम्। ड्रट् प्रत्ययः। ड्रित्वाड्रिटेर्लोपः। संयोगांतस्य लोपः। ष्ट्रितइ
तीप्। स्त्यायते शब्दसमूहं करोति सा स्त्री। वर्णात्कारः। वर्णात्कारप्रत्ययो भवति। क इति
ख वर्णः ककारः। ख इति वर्णः खकारः। रादीफो वा। राद् इफप्रत्ययो भवति। रेफः। रकारः॥ ६
रकारादीनि नामानि शृण्वतो मम पार्वति। रत्नानि च रमण्यश्च संत्रासं
जनयंति मे।

क्रदंत
१५

राम
१५

·प्रारंभश्चेयंसारस्वतस्यटीका·
पुंजराजेनविरचिताभा[illegible] १

पुं.टी. श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ आनंदैकनिधिं देवमंतरायतमोरविं । दयानिलय
॥१॥ नं वंदे वरदं द्विरदाननं ॥१॥ वाग्देवतायाश्चरणारविंदमानंदसांद्रं हृदि संनिधाय । श्री
पुंजराजः कुरुते मनोज्ञां सारस्वतव्याकरणस्य टीकां ॥२॥ इह ग्रंथस्य कर्त्ता निरंतरायमी
प्सितार्थसिद्धौ शिष्टाचारप्रतिपालनाय चेष्टदेवतानमस्काररूपमंगलाचरणपूर्वकं श्रो
तृप्रतिपत्तिद्वारेण ग्रंथकरणस्य प्रयोजनं चिकीर्षितं प्रतिजानीते ॥ प्रणम्य परमात्मानं बा
लधीवृद्धिसिद्धये । सारस्वतीमृजुं कुर्वे प्रक्रियां नातिविस्तरां ॥१॥ तं परमात्मानं प्रण
म्य बालधीवृद्धिसिद्धये नातिविस्तरां सारस्वतीं प्रक्रियां ऋजुं कुर्वे इत्यन्वयः । प्रक्रि
यंते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्यंते शब्दा यया अनया इति प्रक्रिया । सरस्वत्या
प्रणीता सारस्वती तां सारस्वतीं प्रक्रियां ऋजुं प्रयोगानुकूलं सूत्रक्रमां कुर्वे । प्रक्रि
या हि सूत्रपाठक्रमेण नार्जवमुपयाति । अतस्तं क्रममुल्लंघ्य यत्र तत्र स्थितानां सू ॥२॥
त्राणामेकेन ऋजुं सरलां कुर्वे इत्यन्वयः । किं लक्षणां सारस्वतीं प्रक्रियां । नातिवि

स्तरां । न विद्यते अतिविस्तरः । शब्दबाहुल्यं यस्यां सा नातिविस्तरा तां नातिविस्तरां ।
एतेन शब्दबाहुल्यमेव निरस्तं । नार्थबाहुल्यं । स तु शब्दस्य विस्तर इति उक्तत्वात् ॥
अल्पपदबह्वर्था प्रक्रियेत्युक्तं भवति । किं कृत्वा ऋजुं कुर्वे इत्याह । परमात्मानं प्र
णम्येति । अततीत्यात्मा । परमश्चासौ आत्मा च परमात्मा । स जगद्व्यापको विष्णुरेव
मूलात्मा परमात्मा च सह स्वनामभिः पठितत्वात् । तं प्रणम्य प्रकर्षेण कायवाङ्मनो
भिर्नत्वा । अत्र प्रकर्षवाचिनः प्रशब्दस्य प्रथमप्रयोगो मंगलार्थत्वोपलक्ष्यते । मंग
लाचरणं शिष्टाचारमूलं । यथा नित्ये शब्दार्थसंबंधिन इति । वक्तव्ये सिद्धे शब्दार्थसं
बंध इत्याह स्म कात्यायनः । यथा च वृद्धिरादैजित्यत्र वृद्धिशब्दमादौ प्रयुक्तवान् पा
णिनिः । एवं महत्यपि ग्रंथे प्रशब्दप्रयोगः । प्रयोजनमाह । बालधीवृद्धिसिद्धये । इति र
बक्कं ति चक्कं ति दुर्बोधादिति बालकाः । अव्युत्पन्नाः । तेषां धीवृद्धिर्व्युत्पत्तिः । तस्याः ॥

पुं.टी. सिद्धिः निष्पत्तिः। तस्यै ॥ सारस्वतीप्रक्रियां ऋजुं कुर्वे सुलिवाक्यार्थः। बालव्युत्पादकस्यास्य
२ ग्रंथस्य परार्थत्वेपि तन्निर्माणसमुत्पन्नधर्मस्य फलस्यात्मगत्वात् कुर्व इत्यात्मनेपदं प्रयोगे
युक्त एव। नातिविस्तरामिति नाक्कादित्वात्रञ आदेशः। अथवा नइति अन्त्रञ निषेधार्थो नि
पातः। तेन सह समासः अरण्यस्थानं फलनिमित्तं नैकदमवनमित्यादि प्रयोगदर्शनात्।
कृचित्तु नइति पृथक्पदमेवमन्यते। अत्रैके सरस्वत्या प्रणीतानि सूत्राणि सारस्वतानि तत्सं
बंधिनी सारस्वतीति व्युत्पत्तिमाश्रयंते। तन्मतं च भट्टयस्य दुर्निवारत्वादुपेक्षणीयः। तथा
सति सारस्वती पितृभावितव्यं। बालानां धीस्तस्या वृद्धिरिति विग्रहेलादृश्या एवमूर्द्धि
योवृद्धिरुक्ता। भवेत्। तस्माद्बालानां धीवृद्धिर्व्युत्पत्तिरित्यैव युक्तं। सारस्वतीप्रक्रिया श्रीशिव.
महं कुर्वे इत्युक्ते परकृतायाः स्वयंकरणमनुपपन्नं। तस्मात्प्रक्रियामन्यघट्टकुर्वे विधेयं। २
अथ नवीनामेव सारस्वतीसमाख्यां प्रक्रियां कुर्वे इति। कश्चिदाह। तन्मतैसन्तसघश

तीं यस्मै ददौ साक्षात्सरस्वती॥ अनुभूतिस्वरूपाय तस्मै श्रीगुरवे नमः।१। इति नरेंद्रसूरि
श्रवणेरुक्तत्वात् इति इह विरोधः स्यात्। तस्याव्यथाभिद्धितमेवसाधनीयः। तेनउक्तं। अत्र
प्रक्रियाज्ञेय विषयः। तेन बालधीवृद्धिः प्रयोजनं। हेतुहेतुमद्भावः संबंधितः॥ जिज्ञासुरधिकारीइ
तिविषयाद्यनुबंधचतुष्टयं वेदितव्यं। ननु विस्तरः कथं निरस्तो यस्मिन्साकल्येन शब्दसंज्ञान
स्यात्॥ इति शंका मपाकर्तुमाह॥ इंद्रादयोपि यस्यांतं न ययुः शब्दवारिधेः॥
प्रक्रियां तस्य कात्स्न्यस्य क्षमो वक्तुं नरः कथं॥ २॥ इति॥ इंद्रश्चंद्रः काशिकृत्स्नापि
शलिः शाकटायनः॥ पाणिन्यमरजैनेंद्रा जयंत्यष्टौ च शाब्दिकाः॥
वैयाकरणाः अपि यस्य वारिधेः शब्दसमुद्रस्य पारं नाधीयंते यस्मिन्निति वारिधिः शब्दसमु
द्रः। तस्य पारं अंतं इयत्तया परिच्छेदं न प्रापुः। न प्रापुः। तस्य कृत्स्नस्य समस्तस्य प्रक्रियां वक्तुं
नरो वाचिनो मनुष्यः कथं क्षमो भवामि। इत्यध्याहार्यं अयमभिप्रायः। इंद्रादयो महानुभावा
अपि लौकिकानां च शब्दानां साकल्येन प्रतिपादने शक्ता न बभूवुः। मम पुनः का कथा। एवं स

पुं.टी. तिकिं। बालव्याकुलीकरणेन दृष्ट्वा विस्तरेयेति प्रक्रियाविस्तरेति क्रियादिनाकतिपयप्रत्याहारसाधन
मार्गदर्शनेन बालव्युत्पत्तिं संक्षेपेणेति विस्तरतयेन प्रक्रियायाः ऋ जुकरणं युक्तमिति। एत
३ न प्रतिपदपाठोपि न लघुः उक्तं हि। बृहस्पतिरिंद्राय दिव्यवर्षसहस्रं प्रतिपदपठितानां शब्दानां
पारायणं प्रोवाच। बृहस्पतिर्वक्ता इंद्रश्चाऽध्येता दिव्यं वर्षसहस्रमध्ययनकालं
न चांतं जगामेति। तस्माद्यथोक्तप्रकारेणैव प्रक्रियां ऋजुं कुर्वन् इति श्लोकद्वयतात्पर्यार्थः ३
संज्ञाविधानमंतरेण प्रक्रियाक्रमो बालैर्दुर्बोध इति अभिधास्यमानं संज्ञासंग्रहं प्रतिजा
नीते। प्रक्रियोपकारकत्वाय समग्रव्यवहाराय संज्ञा। अभिधासंगृह्यते। अल्पाक्षरैर्बद्धे
र्थाः तत्र तावत्संज्ञासंव्यवहाराय संगृह्यते। तत्र तस्यां प्रक्रियायां तावत् आदौ संव्यवहारा
य ✗ बहुलं न पृथक् स्यात् तथा गृह्यत इत्यर्थः। संव्यवहारो हि संज्ञानिबंधन इति संव्यवहा
रार्थसंग्रहार्थ उक्त एव। तावच्छब्दः प्रसक्तेभ्यः संधिकार्यादिभ्यो व्यवच्छेदार्थो ज्ञेयः। तत्रा ३
नादिष्टपरिगणितव्यंजनक्रममवलंब्य समानसंज्ञासूत्रं प्रमाणमिति। अइउऋऌ

समानाः। इति षट्पदं सूत्रं। यदि द्विपदं स्यात् न हि प्रथमं पदं पंचवर्णात्मकं। तत्र द्वंद्वसमासः। त
था समासेति ------ एव संधिः स्यात्। उक्तं हि। संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते इति। तद्दोषपरिहारार्थं पंचवर्णाः पंचैव सांकेति
कानि पदानि। षट् समाना इति। एवं षट्पदं सूत्रं शिष्टा मन्यंते। सूत्रं हि वाक्यरूपं। वाक्यं प
दसमुदायात्मकं। पदं च विभक्त्यंतमिति पदत्वसिद्ध्यै विभक्तिः कल्पनीया। तस्मादिह
प्रति वर्णं प्रथमैकवचनं सिरवसेयः। ... वक्तुं चाणि भवंतीति सूत्राणां छंदस्त्वात् ... दृसः
सिलोपो ज्ञातव्यः। अथवा। अकारादिवर्णानां सांकेतिकत्वेनाव्ययत्वेन विभक्तिलो
पः। निर्दिष्टं हलो किक ... प्रत्याहारसमाचार्येण। सूत्रार्थं विवृणोति। अनेन
प्रत्याहारग्रहणार्थं वर्णाः परिगण्यंते। तेषां समानसंज्ञा च विधीयते। अनेन अइउऋऌ स
माना इति सूत्रेण प्रत्याहारग्रहणार्थं वर्णा एव परिगण्यंते। परिपाट्या प्रकाश्यंते। परिगणि
तानामेव तेषां समानसंज्ञा च विधीयते। अविविधानसामर्थ्यात् संज्ञासु रम्या। वर्णपरिगणनं तु

संज्ञाविधानांगमागममेवेति नवाक्यभेददोषः। प्रधानभेदेहि भेदः संपद्यते। अथवा। सक्
दुच्चारिता एव अइउऋऌ वर्णाः। वर्णपरिगणने च समान संज्ञा च विधाने च ल त्रणवोपयुज्यंतइ
ति न वाक्यभेददोषः। तथा चोक्तं भर्तृहरिणा। आवृत्ति शास्त्रिभिन्ना चैकस्य सकृदपि श्रु
लिंगमतंत्र धर्मा च विभागाख्य वर्तिषु तत्कुलि। प्रत्याहारा णामपि संज्ञात्तपत्वात्। तदुप्रयो
गि कृत्वा सूत्र वर्णपरिगणनस्य वर्णपरिगणन संज्ञा संयहेम ध्येना कामितात्ववमितिलब्ध
समाना इति बहुवचननिर्देशात् अइउऋऌ इत्युच। संधेरकारण विवक्षाकारणमाह। नै
। अइउऋऌ एषु प्रत्येकं समान संज्ञा च विधीयते। एषु कारस्य त्वयाभाव।। सकेलात्वाङ
लकाद्या सिद्धः। ।नैतेषु स्वरेषु संधिरनुसंधेयो विवक्षितत्वात्। विवक्षितस्तु संधिर्भव
नी ति नियमात्। इति। एतेषु उक्तं वक्ष्यमाण स्वरेषु संधिर्नानुसंधेयः। तस्मात् अविवक्षि
तत्वात्। वक्तुरिष्टं विवक्षित तस्याभावो विवक्षितत्वं नविवक्षितत्वमविवक्षितत्वं तस्मात्।
भद्रये। एअथ उवृ। इत्यादि सन्धेः संधौविहिते अथवाक्ष ग्रामस्मानसंज्ञा माभूदित्यवि
वक्षितत्वं पुनः विवक्षितश्चेद संधिर्भवतीति सर्वेषामा चार्याणां नियमस्तस्मादपि संधिर्नक्रि ५

यः। हेत्वंतरमाह। न केवलमेषामेव स्वाचार्याणामिरीतिः किंतु सर्वेषामेव व्याकरणानामित्य
तआह। लौकिकप्रयोगनिष्पत्तये समयमात्रं चावोति। लौकिकप्रयोगाणामिनाद्धिहि
प्रयोगाणां निष्पत्तये व्युत्पादनाय य इस मयमात्रत्वं तस्माच्च संधिर्नकार्यः। केवलं समयः
समयमात्रं तस्य भावस्तत्त्वं तस्मात्। अथवा। लोके भावाः लौकिकाः बालाः तेषां प्रयोग
निष्पत्तिः। तस्य। इह बालव्युत्पत्त्यर्थं संकेतमात्रत्वमस्तीति। एतेषु स्वरेषु संधिर्न कार्यः इ
त्यर्थः। बालव्युत्पत्त्यो परिगणनं तेषु अकारादिषु सांकेतिक विभक्त्योपपदत्वमिति।
समयमात्रत्वं स्पष्टमेव। यथा आदिजिति कुत्वाकरणं। पाणिनेरिस्वा संकेतः। स
आपीति मंत्रव्यं। समानप्रदेशाः समानाः ऊ‍ँ पो धातोरित्येव माद्यायः। ननु यथापरि
गणितानामेव अइउऋऌ वर्णानां समानसंज्ञा विधानात्। नद्यादिषु दीर्घ ई का
रस्य समानसंज्ञाभावात्। भमृशसोरस्येत्यकारलोपो न स्यात्। तेन रू
पसिद्धिर्न भवेदित्येतिदर्थं सूत्रांतरमवतारयति। ह्रस्वदीर्घप्लुतभेदाः स

पुंटीका·

५

वर्णा इति । सूत्रार्थं विवृणोति । एतेषां अइउऋऌवर्णानां ह्रस्वदीर्घप्लुतभेदाः
परस्परमन्योन्यं सवर्णा भण्यन्ते उच्यन्ते । विजातीयेषु ह्रस्वदीर्घ । प्लुतभे
देषु सावर्ण्यं निषेद्धुं परस्परमित्युक्तं । समानानां ह्रस्वदीर्घप्लुतभेदाः स
वर्णा इति ज्ञापयितुं एतेषामित्युक्तं । अन्यथा हरयेदित्यत्र सर्वे ऽपि दीर्घः स
हेत्यस्य प्राप्तिः स्यात् । इति केचित्तु अवर्णावर्ज्याः स्वरा इत्यत्र वर्णायत्नमु=
वर्णावत्वामित्यादिष्वकारपदेषु वर्णव्यवहारमनुसंधाय वर्णग्रहणे स=
वर्णग्रहणमिति परिभाषा समर्थिता । एतेषां ह्रस्वादिभिः परस्परं समा
नसंज्ञायामन्वर्थता मवसीयते । इत्याशयः । ननु ह्रस्वादीनां सावर्ण्य
मुक्तं ते त्वनुपदिष्टाः कथं बालैर्ज्ञातव्याः । इत्यत आह । लोकाच्छेषस्य सि
द्धिरिति वक्ष्यतीति । ततो लोकत एव ह्रस्वादिसंज्ञा ज्ञातव्या । लोकाच्छेष ५
स्य सिद्धिर्यथा मातरादेरिति सूत्रेण भगवती सरस्वती शेषस्यानुक्तस्य=

सिद्धिर्लोकादिति वक्ष्यति । शास्त्रान्तरात् । तस्माल्लोकत एव ह्रस्वादिसंज्ञा । आदिशब्दाद् उदात्ता
नुदात्तादिसंज्ञा ज्ञातव्या । लोकतः प्रसिद्धत्वात् एव ह्रस्वादिसंज्ञा वा अन्वर्था इत्यर्थमनुवदति । एकमात्रो ह्र
स्वः । द्विमात्रो दीर्घः । त्रिमात्रः प्लुतः । उक्तं च । उक्तं च शिक्षायां । एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उ
च्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रकमिति । चाषस्तु वदते मात्रां द्विमात्रं वायसो ब्रवीत् । त्रिमात्रं तु
शिखी ब्रूते नकुलस्त्वर्धमात्रकमिति । ह्रस्वादीनामवान्तरभेदानाह । एषामन्येऽप्युदात्तादिभेदाः ।
एषां ह्रस्वादीनामन्येऽप्युदात्तादिभेदाः सन्ति । तद्विशेषाः । तत्स्वरूपमाह । उच्चैरुपलभ्यमानउदात्तः ।
नीचैरनुदात्तः । समाहारः स्वरितः । उच्चैः स्थाने उच्चार्यमाणतया उपलभ्यमानो वर्ण उदात्तः ।
नीचैः स्थाने उच्चार्यमाणतया उपलभ्यमानो ऽनुदात्तः । उदात्तानुदात्तयोः समवृत्तिः समा
हारः स्वरित इत्युच्यते । केचित् समवृत्त्या स्वरित इति पठन्ति । तथा च ह्रस्वसरसमवृत्ति यस्मि
। [illegible] तानी च तेनु रुद्रस्य नापेक्ष्यान्ता तव्या । अन्यथातिप्रसंगदोषापत्तिरिति । ह्र
स्वः । सवर्णदीर्घः सह इत्यादावनेन टिप्लुत इत्यादयो ह्रस्वादिसंज्ञाप्रदेशाः । देवे औ औ सं
आक्षराणि । पंचप देस्सत्रे । पवित्रं । अनेनप्रत्याहारग्रहणाय वर्णाः परिगण्यन्ते । तेषां सं

पु॰टी॰ ध्यक्षरसंज्ञा च विधीयते। अत्र सूत्रस्य वाक्यविवक्षितत्वेन न संधिः। छांदसित्वेन विलोपः।
अकारस्य इकारेण उकारेण ओकारेण संबंधो क्रमेण ए ऐ ओ औ भवंति। इति संध्यक्षरस्य सू
६ त्रार्थो ज्ञेयः। एषां ङ्कखानसंति। ए ऐ ओ औ एषां संध्यक्षरत्वात्। ङ्कखानसलिदीर्घादयः सू
त्येवेत्यभिप्रायः समानानां संध्यक्षराणां च संज्ञांतरमाह। उभये स्वराः इति। द्विपदं सूत्रं
अकारादयः पंच चत्वार एकारादयः। अ इ उ ऋ ऌ ए ऐ ओ औ एवं उभयप्रकाराः स्वराः।
स्वरसंज्ञा उच्यंते। स्वराणामवर्जितानां संज्ञांतरमाह। अवर्ज्यो नामिन इति। अवर्णं वर्ज
यंतीत्यवर्णवर्ज्याः अवर्णरहिताः स्वरा इकारादयः नामिसंज्ञा उच्यंते। उक्तानुवादपूर्व
कं यथाक्रमं ग्रंथं संबध्नाति। अनुक्रांतास्तावत्स्वरा इति। तावदादौ स्वरा अनुक्रांताः परि
पाट्या प्रकाशिता इत्यर्थः। परिपाटी अनुक्रमः। प्रथमतः अकारादयः पश्चादेकारादयः
इत्यनुक्रमेणोक्ताः। इदानीं प्रत्याहारजिग्राहयिषया ग्राहयितुमिच्छा जिग्राहयिषा प्रत्याहा
राणां जिग्राहयिषा प्रत्याहारजिग्राहयिषा तया हेतुभूतया व्यंजनानि हकारादीनि अनु
क्रामति। वक्ष्यमाणपरिपाट्या निर्दिशति। ह। य। व र। ल। ञ ण न ङ म। झ ढ। ध। घ। भ। ज ड। ६

द। ग ब। ख। फ। छ। ठ। थ। च ट त। क प। श। ष स। इतीदं वर्णोद्देशस्तथा कार्यविधायकं आद्यंताभ्या
मित्यनेन लब्धसंबंधसूत्रं। तत्र हकारादारभ्य सकारपर्यंतं यावंतो वर्णाः तावंति सांकेतिकानि
ह्रस्वकप्रथमैकवचनांतानि पदानि इति ज्ञेयं। आद्यंताभ्यां। इति द्विवचनांतं एकपदं नियमवि
धायकं सूत्रं। अतिकार्यमाक्रीयत अतिप्रत्याहारः। तं जिघृक्षितायाह यथा तुमिच्छता पुरुषेण आद्यंता
भ्यामाद्यंतवर्णाभ्यां सह हयवरल इत्यादिक्रमेण परिपरिगणिता वर्णाः ग्राह्याः। आद्यं
ताभ्यामिति द्विवचनं आत्यभिप्रायेण तेन प्रतिप्रत्याहारमाद्यंताभ्यामिति संबध्यते। प्रत्याहा
राणां नामानि ज्ञापयितुमाह। आदिवर्णोंत्येन गृह्यमाणस्तन्नामा प्रत्याहार इति। कार्यापेक्षया
सेपायः कश्चिदादिवर्णः येन केनचिदंत्येन वर्णेन गृह्यमाणः तथा आद्यंतवर्णात्मकं यन्नाम
भवति तन्नामा प्रत्याहारो भवति। अथवा। आदिवर्णः अंत्येन गृह्यमाणः प्रत्याहारो भ
वति। किंलक्षणः प्रत्याहारः तन्नामा अंत्येन सहोच्चार्यमाणः आदिवर्णो नाम यस्य
स तन्नामा इति। तौ आदिवर्णांत्यवर्णौ नाम यस्य स तन्नामा इति च व्याख्येयं। तमे
व प्रत्याहारं विशेषतो दर्शयति। तथा हि। अकारो वकारेण गृह्यमाणो अप्रत्याहारः।

पुं-टी [illegible]

[illegible]

[illegible]

स चा॥ एतावत्संख्याकः संपद्यते। अष्टत्यारस्यपर्यंतं एतावः संख्याकः एतावद्गुण संख्या
कः संपद्यते संपूर्णो भवति। झभघढधष इति झषः। जबगडद इति जबः। चटतकप इति चपः।
एतावत्संख्याकः संपद्यते इति सर्वत्रानुसंधेयं। नन्वेत एव प्रत्याहाराः इत्याशंक्याह नेत्याह। ए
वं यत्र यत्रेत्यादि। एवमुक्तप्रकारेण प्रत्याहारेण यत्र यत्रोदाहरणे कृत्यं कार्यं भवति सर्वं
तत्र तत्र याह्यः। तुपुनः संख्यानियमोनास्ति। यथा ग्रंथांतरे। ते च प्रत्याहाराः एकचत्वारिंशदि
ति। तथा संख्यानियमो न कृतः। यथा कार्यमनुसंधेयमित्यभिप्रायः। अथ हकारादय इत्या
दि हकारादयः सकारांताः अत्र एव हलावर्णाः व्यंजनानि व्यंजनसंज्ञा निभवंतीत्यर्थः। व्यं

जन लक्षणमाह। स्वरहीनं व्यंजनमिति। स्वरेण हीनं स्वररहितं। इत्युक्ते स्वरेष्वसेनास्तीति त
स्यापि व्यंजनत्वापत्तेः। स्वरेभ्यो हीनमन्यदिति व्याख्येयं। अथवा। एकयोर्द्विवचने कमचनेऽन्
त्यादिवर्ज्ञावप्रधानो निर्देशो मंतव्यः। तेन स्वरहीनं व्यंजनमित्यर्थः। ननु हयवरलादिषु अकारस्य वि
द्यमानत्वात्। कथं व्यंजनमित्याह। तेध्वकारमिति। तेषु हकारादिषु वर्णेषु वर्त्तमानो अकारः सुख
सुखेन उच्चारणं तदर्थं प्रयोजनं यस्य स तथा। तस्य भावस्तत्वं। तस्मात् सुखोच्चारणार्थत्वादित्सं
ज्ञो भवति एवं ज्ञातिनि। गलत्यर्थं इत्यर्थः। केवल हलानां व्यंजनानामुच्चारतयाऽकारसंयुक्तानां सु
खोच्चारणार्थत्वमुपपन्नं। अकारादिसंयुक्तेषु हकारादिषु हियविरलि ङुञुणुनुमु इत्येवं रूपेणो
च्चारितास्यात्। एतदर्थं अकार एव सुखोच्चारणार्थ इति भावः। ननु इकारादयः। इत्संज्ञाविधा
यक सूत्रमाह। कार्यार्थ इत्। प्रत्ययाद्यतिरिक्तः प्रत्ययादिभ्यो अतिरिक्तो आधिकः केवलं चिकी
र्षित सुखोच्चारणाय स्थानविध्याद्यर्थं वा उच्चार्यमाण इत्संज्ञो भवति। आदिशब्दात् धात्वादेश
आगमनाम धातु प्रत्याहारेभ्योऽधिक इति ज्ञेयं। इत्संज्ञाप्रयोजनमाह। यस्येत्संज्ञा तस्य
लोपः। इत्संज्ञासंकेतितस्य लोप इत्यर्थः। अन्यथा नत्वविदित्यादौ इदित्यस्य लोपः। प्र

पुं.धी.
८

सज्येत। तदर्थयस्येत्संज्ञाविस्यल्लोहिता तस्य इत्संज्ञा। विशिष्टस्य लोपः स्यात्। यथा। लोपस्वरू
पमाह। वर्णादर्शनं लोपः। वर्णानामदर्शनमभावो लोपः कोलोपसंज्ञः। वर्णाभ्यां विरोधोप
स्यसः वर्णेभ्यो विरुध्यताइति वर्णविरोधः। एकं वर्णं नाशयित्वा अन्यस्योत्पत्तिं प्रतिबध्नाति। य
र्थः। मित्रवदागमः। मित्रवदागत्य कार्यं कुर्वाणो यस्य विहितस्तं दर्शयति स आगमः। शत्रुवदादेशः
। पोत्यागतः स्थानिनं शत्रुं छिनत्ति स आदेशः। संयोगस्वरूपमाह। स्वरानंतरिता हसाः संयो
गः। स्वरेण अनंतरिताः अव्यवहिताः हसाः संयोगसंज्ञा भवंति। अत्र हसा इति बहुवच
नमेकत्वनिषेधपरं तेन द्वयोरपि हसयोः स्वरानंतरितत्वे संयोगत्वं सिध्यत्येव। कुचुटुतु
पुवर्गाः। एते वर्गसंज्ञाः। तेन कु इत्युक्ते ककारादयः पंच चु इत्युक्ते चकारादयः। पंच। एवं प्रति
वर्गं पंच पंच वर्णा गृह्यंते। स्तोश्चुभिश्चुः। ष्टुभिष्टुः। कुपुभ्यां कृष्यो वेत्यादौ वर्गव्यवहारः। अ
ईदोनामिनो गुणः। अर। एत्। ओ। नामिनः। गुणः। नामिन इति स्थाने भवतीत्यर्थः। गुण इति
संज्ञकानां त्रयाणां ग्रहणं एवं नामिनो गृह्यंते। ऋकारस्तु सावर्ण्यात्। अर। अरः। अन्त ८

था सध्यक्षरणामपि नामित्वात्प्राप्तौ त्यादौ गुणः प्रसज्यते। अत्र तत्प्रकरणमसंदेहार्थमा
रऔवृद्धिः। आ। आर। ऐ। औ। एते वृद्धिसंज्ञा इत्यर्थः। अकारस्याकारो वृद्धिः। इकारस्य ऐकारः
स्य ऐकारो वृद्धिः। उकारस्य ओकारस्य औकारो वृद्धिरिति। अंत्यस्वरादिष्टिः। अंत्यो यः स्वरस्त
दादिवर्णः टिसंज्ञो भवति। अंत्ये भवोंत्यः। यः स्वरः स टीसंज्ञो भवति। न केवलमंत्यस्वरस्तदा
दिवर्णश्च। सोंत्यस्वरः। आदिः आदौ वा यस्य सोपि हसोटीसंज्ञः। तेन हलइण। इत्यत्र अं त्यस
रएवटिसंज्ञः। मन सइषाइत्यत्र अस इत्युक्तस्य टिसंज्ञा। अंत्यात्पूर्वउपधा। यो वर्णो अंत्या
त् अक्षरमात्रात् पूर्वः स उपधासंज्ञको भवति। असंयोगादिपरो ह्रस्वो लघुसंज्ञो भवति।
आदिशब्दात्। विसर्गानुस्वारौ गृह्येते। तेन अश्व इति संयोगपरत्वात् ह्रस्वोप्यकारो ल
घुः। शिव इत्यत्र। विसर्गपरः शिर्वबंध इत्यत्र तु स्वारस्वरश्च ह्रस्वोन लघुरित्यर्थः। विस
र्गानुस्वारसंयोगपरो दीर्घश्च गुरुः ४ विसर्गानुस्वारसंयोगा परभूता यस्य एता दृशो

पुं·टी·

९

वर्णो दीर्घश्च गुरुसंज्ञो भवति। मुखनासिकाभ्यामुच्चार्यमाणोऽनुनासिकः इति। मुखना-
सिकाभ्यां संभूयोच्चार्यमाणोऽनुनासिक उच्यते। यथा। अम्भान् आम् इति। ऽः इति विसर्ज-
नीयेति॥ ॥श्रीपुञ्जराजनिर्मितायामस्यां सारस्वतटीकायां संज्ञाप्रकरणमेतच्चतु-
रचमत्कारि निवृत्तं॥ ॥मोहिनी॥ ॥अधुना स्वरसंधिरभिधीयते। अधुनेति संज्ञा-
कथनानन्तरं संधिर्वर्णसन्निकर्षविशेषोऽभिधीयते॥ ॥ इयं स्वरे। इ स्वरे परस्थे सति
इवर्णो यत्वं प्राप्नोति। अत्र इवर्ण इति वर्णग्रहणं दीर्घमपि संगृह्णाति। यतो वर्णग्रहणे स-
वर्णग्रहणं कारग्रहणे तत्परकरणे तावन्मात्रग्रहणमिति शिष्टसंकेतः। तस्माद् गौरी अ-
त्रेत्यादौ यत्वं प्राप्नोति। दधि आनयेत्युदाहरणं। यत्वे कृते दध्य् आनय इति स्थिते वक्ष्य-
ति। हसे हसः। हसः स्वराद्य इति सूत्रात् स्वरादित्यनुवर्तते। धुट्कस्वा द्विः स्वरे इ-
त्येतो द्विरित्यनुवर्तते। भावप्रधाननिर्देशात्। रेफलवहत्ववर्जितो हसः सहसः हसे ९

परस्थे सति द्विर्भवति इत्यर्थः। इति धकारस्य द्वित्वं। झबे जबाः। खसे चपा झसानां
मित्यतो झसानामित्यनुवर्तते। तत्र प्रथमधकारस्य झसस्य स्थाने द्वितीयधकारस्य
झबे परस्थे सति जबो दकारो भवति। कस्मात् सवर्णत्वात्। एकवर्गस्थत्वात्। सवर्ण-
त्वमपि तु माह। वर्ग्यो वर्ग्येण सवर्ण इति वचनादिति। कथं तत्सवर्णत्वं वर्गभवो वर्ग्यः। स्व-
कीयेन वर्गेण स सवर्णः। तस्मात् धकारस्थाने दकार एव जातः। यथासंख्यं वा वक्तव्य-
मिति। प्रकारान्तरेणापि धकारस्थाने दकार एव भवति। झद ध इति स्थिते यस्य झभस्य
स्थाने जदुद इति लक्षितो जबः। ततो दद्ध्य् आनय इति निष्पन्नं। अत्र द्वित्वविधानसा-
मर्थ्यात् न पुनर्द्वित्वं द्विः इति भावे वृत्तत्वात्। इति विधानसामर्थ्याद्विष्टस्यापि द्वित्वासं-
भवात्। वा वा मारे इत्यत्र दत्तोपासंयोगान्तस्येति सूत्रं स्वाभाविकयोग। विषयं।

पुं.टी.

१०

तेन स्वरसंधिसंयोगांतस्य यकारस्य न लोपः। अथवा। इयंउवंइत्यादिसूत्रैर्यकारादिवि
धानसमर्थ्यान संयोगांतस्य लोपः। नामिनः स्वरे इति विभक्ति स्वरविषयं विस। किं स्व
राभावात् तुम भावः। विष्टोच्चारणे दृष्ट्वा नेति सिद्धं। गौरी अत्र इत्युदाहरणे यत्ले
अर्ह इति विशेषणान्न रेफस्य द्वित्वं। हसेर्हसः इति सूत्रे हसो रेफहकारवर्जित इति विशे
षणात्। रेफहकारवर्जितव्यतिरिक्तस्य द्वित्वमित्युक्तं। तस्मान्न रेफस्य द्वित्वमित्यर्थः
किंतु। तर्हि किंभवतीत्यत आह। राद्यपो द्विरिति। स्वराद्वित्यनुवर्त्तते। स्वरात्परो रेफः
स्वरवचनं सामर्थ्यात् स्वरपूर्व इत्युक्तः। तस्मात् स्वरपूर्वाद्रेफात् परो यपो द्विर्भवतीति
यकारस्य द्वित्वे गौर्य्यत्रेति सिध्यति। उवमित्यादिसूत्रेषु स्वरानुवृत्तिमनुसंदधा १०
ति। स्वर इत्यनुवर्त्तत इति। उवर्णो वत्वमापद्यते स्वरे परे इत्यादौ इयं स्वर इत्यतः स्व

55

र इत्यनुवर्त्तत इत्यर्थः। किमयमनुवृत्तिरस्मिन्नेव सूत्र इत्यत आह। एवमन्यत्रापि यत्र न
सूत्राक्षरैः कार्यसिद्धिस्तत्र सर्वत्र सूत्रांतरात् पदांतरानुवृत्तिर्ज्ञातव्येति। प्रतिसूत्रं सूत्रांतरं तस्मात्
पदांतरानुवृत्तिः स्वर इत्यनुवर्त्तते एवं विधा। कथं न लिख्यत इत्यत आह आह। ग्रंथभूयस्त्वभया
न्नास्माभिर्लिख्यत इति। भूयसो भावः भूयस्त्वं। तद्वि भयं तस्मान्न लिख्यत इत्यर्थः। उवं। स्वरु
र्णो वत्वमापद्यते स्वरे परे। मध्वत्र इति स्थिते। उकारस्य वकारः। हसेर्हसः इति धकारस्य द्वित्वे
झबे जबाः इति पूर्वधकारस्य दकारः। स्वरहीनं परेण संयोज्यं। मध्वत्रा इति सिध्यति। ऋ रं।
ऋवर्णो रत्वमापद्यते स्वरे परे। रेफे कृते इति हसेर्हसः इति तकारस्य द्वित्वं। पित्रर्थः। ऌ लं।
ऌवर्णो लत्वमापद्यते स्वरे परे। ऌ अनुबंध इत्यत्र लत्वे कृते स्वरहीनं परेण संयोज्यं। लनुबंधः।
ओ अव्। ओकारो अव् भवति स्वरे परे। ओ अति इति भवस्थायां तोः तिवादौ अपि गुणे कृते भो अती
त्युदाहरणे। ओकारस्य अव् भवति इति सिध्यति। गवादेरवण् गमोक्षादौ वक्तव्यः। गवादे

पुं.टी.

११ गणस्य अक्षादौ परभूते सति अवर्णागमो वक्तव्यः। गो अ अक्षः। ओ अव्। सवर्णे दीर्घः
सह। गवाक्षः। गो अ इन्द्रः। ओ अव्। अ इ ए। गवेन्द्रः। गो अ अजिनं। ओ अव्। सवर्णे दीर्घः स
ह। गवाजिनं। गवाक्ष गवेन्द्रयो नित्यमवर्णागमः। गवाग्रं गवाजिनमित्यादौ विकल्पेनावर्णाग
मः। तद्यथा। गोअग्रं। गोग्रं। गोअजिनं। गोजिनं। इत्यादौ विकल्पेन प्रकृतिभावः। तथा। गो
ईशः। गवीशः इत्यादौ गोशब्दस्य यकारव्यतिरिक्ते स्वरे परे विकल्पेनावर्णागमः। न प्रकृति
भावः। एतावती व्यवस्था यावद्ग्रहणाद्वसेया। प्रऊढः इति स्थिते। गवीदेरवर्णागमोक्षादाववक्त
व्यः। आगमवैयर्थ्यप्रसंगात् प्रथमं न सवर्णे दीर्घः सह। किंतु उ ओ इत्यकारे कृते ओ औ ओ।
प्रौढः। अविहितलक्षणः इत्यादौ अवर्णागम इति मनस्वैरं स्वैरिणी अक्षौहिणी प्रौढिः। प्रैषः
इत्यादाववर्णागमः। क्वचित् स्वरे वयकारः। अथा अध्वपरिमाणे। गव्यूतिः। गोयूतिः इति स्थि १२
ते। यकारे स्वरे स्वत ते नो वृ इत्यस्य प्राप्तौ जातायां गव्यूतिरिति सिध्यति। गव्यूतिरिति

कोशयुगं। ऐ आय्। ऐकार आय् भवति स्वरे परे। नै अक इति स्थिते। ऐ आय्। नायकः
।औ आव्। औकार आव् भवति स्वरे परे। नौ र इति स्थिते। औकारस्याव् भवति स्वरे प
रे। नाविह। यो लोपश्च वा पदान्ते। य्। अय्। आय्। अव्। आव्। एते अयादयः। पदान्ते स्थिता नाम
पादीनां यकारवकारयोर्लोपः स्वरे विकल्पेन भवति। अय् आय् इत्यत्र यकारलोपश्च। अव्
आव् इत्यत्र वकारलोपश्च। ते आगता इति स्थिते। एभ्य यूणकारस्य लोपे कृते त आगताः।
पक्षे। तयागताः। तस्मै इदमित्यत्र ऐ आय्। यकारलोपश्च। तस्मा इदं। पक्षे। तस्मायिदं। प
टो इह इत्यत्र ओ अव्। वकारस्य लोपश्च। पटविह। नौ इमौ इत्यत्र औ आव्। वकारलोपे कृते
ना इमौ। पक्षे। नाविमौ। ननु यकारवकारयोर्लोपे कृते संधिः कथं न स्यादित्यत आह। लो
पशिपुनर्न संधिरिति। पूर्वापरवर्णयोर्मिथो घटनं वा संधिः। कार्यान्तरानुसंधानं वा सं
धिः स लोपे जाते न भवति। इत्यत आह। त आगता इत्यादौ सवर्णे दीर्घः सहेति मिथोघटन

पुं.टी. मिथो घटन रूपो संधिर्न भवति। तथा राम भ्यामित्यादौ नलोपः शिक्षते। अक्षौत्यात्यं का यांत
रानुवृत्तिसंधानरूपः संधिर्न भवति। उभनर्ने संधिरिति व्याकृता त्युनः। शब्दादेवदामोदरेत्यादौ
९२ मिथो घटन रूपः संधिः। तथा दंडधित्यादौ पत्वकार्यानुसंधानरूपश्च संधिर्भवतीति तेयं। छंद
सि विशेषमाह। छंदसि तु भवतीति। हे सखे इत्यत्र एअ यू। यकारस्य लोपः शिक्षते छांदसत्वात्। अइ
ए इति पुनः संधौ हे सखे इत्युदाहरणं। एदोतोतः। तपरकरणमेदोतो तइत्यत्र असंदिग्धोच्चार
णार्थं। अत इत्यत्र तावन्मात्रपरिग्रहणार्थं। पदांते स्थितादित्यनुवृत्तेर्लभ्यते। अत्र वक्ष्यमाणः
सामान्यविशेषन्यायोऽनुसर्त्तव्यः। अन्यथा। अयावादेशनिवारणं कथं स्यात्। ते अत्र। वटो अ
त्र। इह पदांते स्थितादेकारौकाराभ्यां परस्य लोपे जाते। तेऽत्र। वटोऽत्र। सवर्णे दीर्घः सह। इ सव
र्णस्य सवर्णे परे सह दीर्घो भवति। यथा अत्र इत्यत्र अः स्वदीर्घप्लुतभेदाः सवर्णा इति। अका ९२
रस्य अकारेण सावर्ण्यात्तद्दीर्घाकारादेशे जाते अत्रेति सिध्यति। त्वं दधीह। विधत्यः

तेहिकारः। ननु दधीहेत्यादिषु इयं स्वरे इत्यादीनां कथं न प्राप्तिरित्याशंक्याह। सा
मान्यशास्त्रतो नूनं विशेषो बलवान्। परेण पूर्वबाधो वा प्रायशो दृश्यतामिह रति। यथा
दधीहेत्यत्र इयं इयं स्वरे सवर्णे दीर्घः सहेति उभयोरपि प्राप्तौ यद्यप्युभयं प्राप्तं। सवर्णे दी
र्घः सहेति केवलं सवर्णमात्रपरिग्रहणात्। अल्पव्यापकविशेषसूत्रं। ततः सामान्यशा
स्त्रात्विशेषो बलीयान्। शासनात् शास्त्रं। सूत्रमित्यर्थः। एतस्माच्छास्त्रनियमा
त् हेत्वंतरमाह। परेणेत्यादि। प्रायशो बाहुल्येन सूत्रपाठापेक्षया परसूत्रेण पूर्वसूत्र
बाधः। इहास्मिन्व्याकरणे दृश्यतां वा शब्दः। वाशब्दः प्रकारांतरद्योतनार्थकः। अथवा।
परशब्दो उत्कर्षवाची। तेनयदुत्कृष्टं इष्टं तेन पूर्वबाधो दृश्यतां। अइए। ३। इति सप्त
म्यंतं सांकेतिकं पदं। तदेव विवृणोति। अवर्णे इवर्णे परभूते सति सह इत्युभयोगेन एकस्य

पुं·टी· ति। तवइदं तवेदं। अत्र अकारः इकारेण सह एकारत्वं प्राप्तः। हल। दंशी। दौटेर्लोपो वक्तव्यः। हल
१२ दंणि स्थ ईषा दौगणपरे टेर्लोपो वक्तव्यः। हलईषा। लांगल ईषा। इत्यत्र अ इति टेर्लोपो वक्तव्यः।
मनस ईषा इत्यत्र अस इति टेर्लोपः। अध ओम् इत्यत्र अ इति टेर्लोपः। शकंधुः शकानां देशानां
अंधुः। कूपः। कर्कंधुः। कुलटा। सीमंता। इषोदरं। पतंजलिः। सारंगः। इत्यादिषु आवृहिलक्ष
णः। टिलोप आदौ द्रष्टव्यः। उ ओ। अवर्ण उवर्णे परे सह पूर्वापर योगेन ओ स्याति। गंगोदकं। अ
त्र आकार उकारेण सह ओकारत्वमापन्नः। ऋ अर्। २ ऋ अर्। इति सांकेतिकं सप्तम्येकवचनां
तं पदं। अवर्णे ऋवर्णे परे सह अर् भवति। तव ऋद्धिरित्यत्र अर्। रा षणो ह्रिः। रसभेजवाः। तव
र्द्धिः। क्वचिदार्। २। अवर्ण ऋवर्णपरे सह आर् भवति। ऋण ऋणं। ऋणार्णं। क्वचिदित्यनेन प्र
वत्सवत्सतरकंबलवसनदशानामेतेषां ऋण शब्दे परे तथा सुखार्त इति तृतीया समासे तथा उपा १२
र्षपार्ष्णीत्यादौ आर् भवति। तथा उपर्षभीयति। इत्यात्यादौ सकारादीनाम धातौ वेव

कार्त्यिक भ्वार् भवति। इति प्रयोगवशात् ज्ञातव्यं। लृ अल्। अवर्णे लृवर्णे परे सह अल् भवति।
रलयोः सावर्ण्यं वक्तव्यमिति वचनाल्लकारस्य रेफवद्भावात्। रा षणो ह्रिरित्यस्य प्राप्तौ ऋका
रस्य ह्रित्वे तवल्कार इति सिध्यति। ननु यदि रलयोः सावर्ण्यमुच्यते तर्हि विकेनकाकेनेत्यादौ
रेफनिमित्तं णत्वं कस्मान्न स्यात्। अत्रोच्यते। सूत्रकृता यथाविहिते ऋ अ वर्णस्थानिनो लो लयो
रेवात्र सावर्ण्यं विवक्षितं। ननु हर इत्यादौ प्रकृतिस्थयोः रेफ लकारयोः। अन्यथा वक्तव्य रेफ
लकारयोः सावर्ण्यं वक्तव्यमित्येवावक्ष्यत्। पुरं च। अत्र रलयोः सावर्ण्यं वक्तव्यमिति व चे
व्यात्। रलस्थानिनोः ऋ लृ वर्णयोरपि सावर्ण्यं न जायते। तेन लृकारादीनाम धातावपि प्रका
रीयन्तीत्यादौ वा अल्। लृवर्णसावर्ण्यात्। प्रयोगवशात् ज्ञेयं। ए ऐ ऐ २ अवर्ण इत्यनुवर्त्तते तत्र ए
ण। तवैषा। तव ऐश्वर्यं। तवैश्वर्यं। इह अवर्णक मात्। एकारे ऐकारे च परे सह ऐकारो ज्ञातः
ओ औ औ। अवर्ण ओकारे औकारे च परे सह औकारो भवति। तव ओदनमित्यत्र अवर्णस्य ओ

पुं.टी.

औकारेण सह औकारो जातः। अवर्णग्रहणाद् गंगौघः। ओ ओष्ठे लो वौ। ओष्ठे लोः। ब। ओ ३। अवर्णस्य

ओ शब्दे स्वरूपे च ओतुशब्दे च परे वा ओकारो भवति। बिंबओष्ठ इति स्थिते बिंबोष्ठः। स्थूलओतु इ

१४ ति स्थिते स्थूलोतुः। पुष्पे। ओ औ औ। इत्यौकारः बिंबौष्ठः। स्थूलौतुः। निश्चयेन पतंत्यनेके षु परि

ति निपातानामनेकार्थत्वात्। वाशब्दः समुच्चयार्थः एव विकल्पस्य समासविषयतां निदर्शयति। तस्मा

दिह समासे एव ओकारः। स च विकल्पेनेति बोद्धव्यं। असमासे तु। तव ओतुः। तव ओष्ठः। इत्येव॥ इति

श्रीपुंजराजेन विद्वदंबुजभानुना। सारस्वतस्य टीकायां स्वरसंधिर्निरूपितः १। मोहिनी॥ अथ प्रकृति

भाव उच्यते। अथेति स्वरसंधिनिरूपणानंतरं संधिसनिमित्ते सत्यपि प्रकृत्याश्रवणं प्रकृतिभावः।

नामी। अमी रोगाः। सात्यासी त्वमी। अथवा। अत्रामी इत्यर्थं तो न भूयस्याप्रकृतिभावो न स्यादिति।

एतदर्थं अदससंबंधी अमीशब्दः इति चिह्नणाति संधिं न प्राप्नोतीत्यनेनैव स्वरे परे प्रकृत्येति इ १४

यो द्वगतमेव। ननु अदस अमी संधिं न प्राप्नोतीति लुके अमीशब्दः प्रति संधिनिमित्ते प्रकृत्या

तिति भवतीत्यवसितं। एवं सति यथा अमी आदित्या इत्यत्र प्रकृतिभावः। तथा अमी त्वचापि प्रकृतिभा

व प्रसंगात्। सवर्णे दीर्घः सह इति अस्य न प्राप्तिः इत्याशंक्य सूत्रकृतैव नमी इति संधिदर्शनात्। तस्माद् मी

शब्दस्य पूर्वपदेन सह संधिः स्यादिति। ... द्विवे। चेति वर्णविग्रहे षंदर्शयन्नाचष्टे। ई च उ च ए च ते। ई

कारांत ऊकारांत एकारांतश्च शब्दो द्विवचने वर्तमानः संधिं न प्राप्नोति। गौर्यत्र। उक्रूदिव्यः। सवीह इत्यादौ

प्रकृतिभावव्याप्त्यर्थं द्विवचने वर्तमान इति विशेषणं उदाहरति। अग्नी अत्र। वटू अत्र। माले आन

य। क्रमेण इउए वर्णा दर्शिताः। क्वचिदपवादमाह। मणीवादिवर्जमिति। ईकारांतशब्दो द्विवचने वर्तमानो

मणीवादिवर्जितो न संधिं न प्राप्नोति। मणीव। रोदसीव। दंपतीव। जायापतीव। द्यावापृथिवी। द्या

वाभूमी। अत्र न प्रकृतिभावः। अमी त्याह इत्यादौ अनुकरणेपि संधिर्दृश्यते। ओ निपातः। ४ आ अश्व

च ओ च ओ। निपातः। आकार ओकार निपात एकस्वरश्च स संधिं न प्राप्नोति। एक एवासौ स्वरश्च ए

कस्वरः। अविधो योगिपातनित्यर्थः। निपातसाहचर्यात् ओकारनिपात एव गृह्यते। तेन। वहे

पुं.टी. इह इतिवाक्येन प्रकृतिभावप्राप्तिः। अकार इतिकारग्रहणात्। आ इयमाङ् वर्ज्यो गृह्यते। तेन। आ
१५ एवं मन्यसे। इति वाक्ये आ एवं ईश्वरवचनमिति। स्मरणे चेत्। अनाङ् अकारः संधिं न प्राप्नोति।
उक्तं हि। ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्य स्मरणयोरङि-
त् इति। आ उष्णम्। ओष्णम्। ईषदर्थे आङा सह संधिः। आ ईक्षसे। एक्षसे। इत्यादौ। क्रियायो
गे आङा संधिः। आ भवात् मर्यादायाम् एंद्रतः। अभिव्याप्तौ संधिः। नो अत्र स्थातव्यं। अ
हो ईशाः। इत्यत्र ओकारे निपातो संधिं न प्राप्नोति। एकस्वरनिपातेषु प्रकृतिभावं दर्शयति।
अ अत्र। अनिर्दिष्टसने। इ इंद्र। इ संबोधने। उ उपेंद्र। उ संबोधने। एवं यथा प्रयोगं। एओ
औ एतयोकस्वरा उदाहर्तव्याः। ओ निपात इति सूत्रे ओ इत्येतस्या आवृत्तिः। तस्या अकारप्र १५
श्लेष औकारपर्यंतं प्रत्याहारत्वमंगीकृतमस्ति। इति सूत्रकृदाशयालक्ष्यगता नामी

कायदीनामेकस्वराणां ग्रहणाय निपातएकस्वरश्चेत्युक्त्वा वहति कृतिति। सकार लका
रयोस्तु न ग्रहणं। प्लुतः। प्लुतश्च संधिं न प्राप्नोति। उदाहरति। देवदत्ता ३ एहि। अत्र प्लुतत्वं कथय
तीत्याह। दूरादाह्वाने इः प्लुतः। दूरादाह्वाने गायने रोदने विचारे च ठेः प्लुतो भवति। इति प्रकृति
भावोयं सूत्रव्याख्यानुसारः। विठ्ठलपुंजराजेन संक्षिप्ये व निरूपितः। अथ व्यंजनकार्यमुच्य
ते ॥ अथेत्यानंतर्ये। अपान्त्या बेजवाः। ३ पदांते इत्यनुसारेण व्याचष्टे। अबपरे पदांते वर्तमाना
अपाः अजवा भवंति। षट् अत्र इत्यत्र सावर्ण्यात् षष्ठा संख्या डकारो जवः। षडत्र। वाक् यः
पा इत्यत्र पस्य अबो अकारः। ककुप् यथा। ककुब्यथा। इत्यादि अपा अबे जवाः इत्यत्र अबग्रहणं
किमर्थं खसे जव प्राप्ति माभूदित्येतदर्थं। न चैतत्। खसे चपा खसानामित्यनेनैव तान्निष्टत्तिः तत

पुं·ज·१९ तोज्ञायते। यथा च्छत्र इत्यत्र अनुद्द्ध्यर्थं। अवग्रहणं भविष्यति। तेन तच्छ्लोकेनेत्यत्र शकारस्य लकारे
१६ अप्रोपपरत्वे छत्वं स्यात्। इति चेदत्र नाङ्गीक्रियते। तर्हि वाक् — — — योतती त्यत्र अनुव्यतिरिक्तस्य के
नस्यादिति। अमे अमा वा। यरां ते वर्णमाश्च यरा अमे परे अमा वा भवंति। वाक्मात्र मित्यत्र ककारस्था
ने सावर्ण्याद्ङकारो ऽमः। पक्षे। यथा अब्जे जवा। इत्यत्र ने ङकारः। तेन वाङ्मात्रं। वाग्मात्रं चासिध्य
ति। षण्मम। इत्यत्र णकारो यमः। पक्षे डकारः। षडम्मम। तन्मयः। तद्मयः। इत्यादि यद्वित्तु नित्यप
वयमाभावः। तेन चिन्मयं। वाङ्मयमिति सिध्यति। यथा छशः। ३ यथा उत्तरस्य शकारस्य छो वा
भवति। वाक्शूर इत्यत्र। ककारस्य परस्मात् तस्य शकारस्य विकल्पेन छकारे जाते। वा १६
क्छूरः। वाक्शूर इति रूपद्वयं भवति। होझवाः। ३ झय उत्तरस्य हकारस्य सभा भवंति। झठध

घभानां शषौ नियमार्थमाह। यह्निगम्भ्य परस्य ह्गंगम्भ्यश्चतुर्थो भवति। तत्हविरिति स्थिते। त
त इत्यत्र तवर्गग्गभ्यः। तस्मात्तवर्गगचतुर्थो धकारो हकारस्थाने जातः। तद्धविरिति जातं। यथा
अब्जे जपा इति दकारे कृते तद्धविरिति जातं। वाक्हरिरित्यत्र कवर्गे चचतुर्थे घकारे कृते यथा अब्जे
जवा इति गकारे कृते वाग्घरिरिति सिध्यति। पक्षे। वाग्हरिः। स्तोश्चुभिश्चुः। सश्चु। तुश्चु। रस्तु। तस्य
स्तोः। विग्रहं कृत्वा व्याचक्षते। सकारस्य तवर्गस्य शकारेण चवर्गेण च योगे शकारचवर्गौ यथा
संख्येन भवतः। इत्यत्र आदेशस्य स्थाने सकारतवर्गयोर्यथा संख्यं नु स्तोश्चुभिश्चुरित्यत्र य
थासंख्यं। यत श्चुभिरिति बहुवचनं यथासंख्येन प्रयोगदर्शनार्थं। तेन सकारस्य शकारेण
चवर्गेण च योगे शकारः। तवर्गस्य शकार चवर्गाभ्यां योगे चवर्ग इति। तेन विश्नः। प्रश्नः। इत्यत्र
न शादिरित्यनेन प्रसक्तस्य चुत्वस्य प्रतिषेधो ऽनुक्त एव। कस्सचरति इति। स्थिते। सकारस्य श

पुं.टी.

१७ कारस्य। कश्चरति। कस् चरति इत्यत्र सकारस्य शकारेण च योगे शकारः। कः श्चरति। स्तोः श्चुभिः श्चु
रिति योगस्य यथासंख्यमुदासार्थं कश्चरति इति। अथ मंउदाहरणं मे कश्चरतीत्युदाहृतं। तच्चि
त्रं। अत्र सकारस्य चवर्गेण योगे चकारः। तच्छास्त्रं। अत्र च पक्षे श्शः इति वा छकारः तच्छास्त्रं॥
नशात्॥ शकारादुत्तरस्य तवर्गस्य चुत्वं न भवति। विश्नः। प्रश्नः। ष्टुभिष्टुः। २ स्तोः सकारतवर्गयोः
षकारटवर्गयोगे ष्टुर्भवति। षकारटवर्गौ यथासंख्येन भवत इत्यर्थः। अत्रापि योगस्तु न यथासंख्येन
ति ष्टुभिष्टुरिति बहुवचनाभिप्रायः। कस्षष्ठः। कष्षष्ठः। कस्टीकते इति स्थिते। षकारटवर्गयोर्योगे सका
रस्योभयत्र षकारः। तट्टीकते इत्यत्र तवर्गस्य टवर्गेण योगे टवर्गः। तट्टीकते। तोर्लि लः। ३ तवर्गस्य
लकारपरे लकारो भवति। भवान् लिखति। अत्र तवर्गस्य लकारे परे लकारो जातः। लकारस्य सानुना १७
सिकात्वं निरूपयति। अंतस्था द्विःप्रभेदा रेफवर्जिता यवलाः। व्याचष्टे यवलाः सानुनासिका निर

नुनासिकाश्च तत्र तेषां मध्ये सानुनासिकस्य नकारस्य सानुनासिक एव लकारो भवति। तल्लुनाति। भवाँ
ल्लिखति। न षि। षकारे परे तवर्गस्य ष्टुत्वं न भवति। भवान्षष्ठः। टोरंत्यात्। २। पदांते वर्तमानात् टवर्गात् परस्य
स्तोः ष्टुर्न भवति। सकारतवर्गयोः षकारटवर्गौ न भवत इत्यर्थः। षट् नरः। इत्यत्र तवर्गस्य नकारस्य ष्टुत्वेन
णकारो न भवति। अमे अमात्र॥ षण्नरः। पृक्षो। च पा अवे अवाः। षट्नरः। षट्सीदंति। नात्र षकारः। नः सक्
छते। (३) नांतस्य पदस्य छते परे सक् आगमो भवति। स्वोनुविध्यर्थमाह। द्वितकिता बाधं वयावैके वया।
एते तेषु पेयोश्चे व्यंभयोगो तु सारिणेव। तस्मात् इ - नेस्योर्नादिष्टो तेस्यके मां दा घतयोर्वैके वा। द्वितिगुण
दूहूत्व यस्य सटि च। कृ इत्व यस्य किल। तौ यस्य ४ द्वितिगुणप्रतिषेधार्थ किति च नेय परिभाषेति मंतव्यं॥
राजन् चित्रमिति स्थिते। किल्वा दंतेस गागमः। राजन् स्चित्रं चुत्वे नवाकारः। पतस्य शकारो यं तत्वात् र
नकारस्य पदांतत्वेन नश्चापदांत इति सूत्रेण अनुस्वारः। राजंश्चित्रं। भवांश्चलनोति। भवांस्तनोति। र
एवं यथासंभवं छते परेष्वुदाहरणानि द्रष्टव्यानि। शेच का ३ नांतस्य पदस्य शकारे परे च गागमो

पुं·टी· भवति। भवान्शूर इत्यस्तोः श्चुभिः श्चुरित्यनेन चुत्वे प्राप्ते शे चक्केति च व्यवधानेन प्रतिबंधे कृतेऽपि
१८ पुनरपि कृताकृतप्रसंगेन बलीयस्त्वात् नकारस्य चुत्वमेव नानुस्वारः। तेन भवाञ्च्छूरः। पक्षे। चपा
छशाइति छकारः भवाञ्छूरः। चवर्गाद्युपरि सीमवाश्वमरः। ङ्णोह्रस्वाद्द्विः स्वरे।४। ह्रस्वात्परात्पदान्तवर्ति
नाः ङकारणकारनकाराः स्वरपरे द्वित्वं भवंति। प्रत्यङ्ङिदं। सुगण्णिह। राजन्निह। क्रमेण द्वित्वं। प्रत्यङ्ङि
दं सुगण्णिह। राजन्निह। दंडिना इत्यादौ अपदांतत्वान्न द्वित्वं। पत्ले ङकारस्य ङकारागमः णकारस्य
णकारागमः नकारस्य नकारागमो भवतीति सूत्रकृतानोक्तं परंतु ङणना एव द्विर्भवतीत्युक्तं। त
त्रायमाशयः। पदांते स्थितस्य ङणनवर्णस्य द्विरुच्चारणं छायापुरुषवत्। एकारस्यैव [illegible]
पदर्शनान्न पदांतत्वप्रसंगः। तस्मात्कुर्वन्नास्ते इत्यादौ एकस्यैव द्विरुच्चारितस्य प्रथमनकारस्यापि प
दांतत्वात्। ऋवर्णाणोर्नं तेइति णत्वं न भवति। छः। ह्रस्वात्परस्य छकारो द्विर्भवति स्वरे परे तत्र वर्गचतुर्थो
२ छकारस्य चकारः। तव च्छत्रं। दीर्घादपि च वक्तव्यम्। दीर्घात्परस्य छकारस्य द्वित्वं भवतीति वा।।। १८
४ मितिजातेः। खसे चपा झसानां।३ झसानां खसे परे चपा भवंति। इति। सवर्णत्वेन ४ [illegible]।

अपि शब्दाद्दीर्घात्पदांताच्छस्य वा। स्त्रीच्छाया। स्त्रीछाया। कश्चित्त्वाङ्माङ्भ्यां अपदांताच्चाद्यति।
माच्छिदत्। म्लेच्छति। यत्तु त्वमित्याशौ नित्यमिति। प्रयोगवशात् ज्ञेयं। मोनुस्वारः।२ मकारस्यानुस्वा
रो भवति हसे परे पदांते च। त्वं हससि। त्वं हससि। पुंडुम्बृत्था। पुंडुम्बृत्था। अपदांते तु मन्यते। नश्चापदां
ते झसे।४ अपदांते वर्तमानस्य नकारस्य मकारस्यानुस्वारो भवति झसे परे। यशांसि। यशांसि।
पयांसीत्यत्रापदांतयोर्नकारमकारयोर्झसे परेऽनुस्वारः। संयंता। यमायपेस्या। अनुस्वारस्य
यपे परे यमा भवति पदांते च। अस्य यपस्य सवर्णो भवति। तत्र शंकरोषि इति स्थिते। मोनुस्वारे कृते क
कारस्य यपस्य सवर्णो ङकारः। तङ्करोषि। तन्तनोषि। इत्यत्र तकारस्य यपस्य सवर्णो नका
रः। तन्तनोषि। सय्यँता। इत्यत्रानुस्वारे कृते यकारस्यानुनासिको यकारः। संय्यँता। संवत्सर इत्य
त्रानुनासिको वकारः। संव्वँत्सरं। [illegible] सिद्धिरिति विवस्याति। मनयवल परे हकारे अनुस्वार
स्य मनयवला भवंति। इति ज्ञेयं। तेनकिम्मम [illegible] यति। किन्न कुते कि मस्वः। कि वृक्षयति

पुं.टी. १९

कृ

तत्किलच्छत्रायति। यथा शषसपरतो कंकारणकारयोः कुः कु उकारावागमौ भवतः। तेन प्राङ्कूषष्ठः। सु
गणर्टूषष्ठः। इत्यादिप्रयोगवशात्तद्ज्ञेयं। इति श्रीसारस्वतस्य न्यासे व्याकरणटीकायां। सुधिया
सुधिया व्यंजनसंधिर्निरूपितः पुंजयजेन। अथ विसर्गसंधिर्निगद्यते॥ अथ व्यंजनसंध्यनंत
रं विसर्गसंधिर्निगद्यते॥ विसर्जनीयस्य सः। ३। विसर्जनीयस्य सकारो भवति खसे परे। कस्तनोती
त्यत्र विसर्जनीयस्य खसे तकारे परे सकारः। कस्तनोति। कुप्वोः ᳲक ᳲपौ वा। विसर्जनीयस्य
कवर्गे पवर्गे च खसे परे ᳲक ᳲपौ वा भवतः। ᳲक ᳲपयोः कपावुच्चारणार्थौ। कᳲकरोति। कस्क
रोति। कᳲपठति। कः पठति। कथं पुनर्वाचस्पत्यादौ नेत्यत आह। वाचस्पत्यादयः संज्ञाशब्दा निपात्य
साधवः इति सिद्धः। एवैते निपात्यंते अविहितलक्षणः सकारो वाचस्पत्यादिषु द्रष्टव्यः। तेहरिश्चंद्रः।
नमस्कारः। श्रेयस्कारः। तस्करः। श्रेयस्कारः। अयस्कारः। अयस्त्यात्कमि त्यादयः शब्दाः प्रयोगात्सारेणोदाहर्त १९
व्याः। कुप्वोः ᳲक ᳲपौ वा। इत्यत्र वा शब्दो वाऽऽकुलकार्थः। तेन कस्कादावप्रवृत्तिः। भास्करः। भाःकर इत्यादौ

विभाषा सकारः। हरिः स्फुरतीत्यादौ वा। तेन हरिः स्फुरति। हरिस्स्फुरति वि सर्गलोपः। रो र्यादिभिर्व
जिताः। कः शेते इत्यादौ वा सत्वं। कस्सरित इत्यादौ अन्यद्देवीति प्रयोगवशात्तद्ज्ञेयं। अहोरात्रादिषु। ४। अह्नः
रः। रात्र्यादिशब्दवर्जितेषु परतः अह्नो विसर्जरो भवति पदांतो अहन्पतिरिति स्थिते। अह्न इति
सकारस्य विसर्गः तस्य स्थाने रेफः। द्वित्वं अहर्पतिः अरात्रि इति विशेषणात् अहोरात्रं। अत्र न रेफः। रात्र्यादि
ष्वित्यादि विशेषणात् अहोरूपं अहोरात्रं रूपरथंतरविभक्तिषु न रेफः। तेन अहोरात्रं। अहोरथंतरं। अहो रूपाणि ति
सिध्यति। अतो त्युः। अतः। अति। ५। अकारात्परस्य विसर्जनीयस्य उकारादेशो भवति। अति उकारे परे। तपर
करणं उभयत्रापि सवर्णे निषेधार्थं। कः अर्थः इति स्थिते। विसर्गस्योकारः। उ ओ। एदोतोतः। कोर्थः। ह
वे। अकारात्परस्य विसर्जनीयस्य उकारो भवति हवे परे। कः गतः इति स्थिते। उत्वं उ ओ। कोगतः। तथादे
वः याति। मनः रथ इत्यत्र हवे। इति उकारः। उ ओ। देवो याति। मनोरथः। आदवे लोपः परे। ६। अवर्णात्परस्य
विसर्जनीयस्य लोपः परे भवत्यवे परे। अतोत्युरित्यस्य विषयं परित्यज्योदाहरंति। देवाः अत्र। इति विस

पुं·टी· जनीयलोपः। देवाअत्र। हवे इति ऋ स्वस्य विषयपरिहृत्योदाहरति। वाताः वाताः। विसर्गलोपश्च। वाता

२० वाताः। स्वरेय त्वं वा। अवर्णादुत्तरस्य स्वरेपरे यत्वं भवति वा। देवा अत्र इति स्थिते। विसर्जनीयस्य यत्वं।

देवायत्र। पक्षे। देवाअत्र। भोसः। च। भो इत्ययं आदिवर्णः। अघोस इत्यंतं सकारेण प्रत्याहारेण गृह्यते। तेन भो भगो अघोस इति त्रयोपि उदितास्युः। विहृणोति। भोभगोअघो इत्येतस्मात्परस्य विसर्जनीयस्य

स्वेपरे लोपश्च भवति। स्वरे यत्वं वेति पत्वस्य व्याख्या कर्तव्यं स्वरेय कारश्च वा भवति। लोपश्च विषये

आदवे लोपश्च। इत्यस्मादवे परे इत्यनुवर्तते। भोः एहि इति स्थिते। भो एहि। पक्षे। विसर्गलोपः। भगो

रैशब्दस्याकारादेशो भवति सकारादौ विभक्तौ परतः। सुराः। स्वरादावायादे
शः। सुरायौ। सुरायः। हे सुराः। सुरायं। सुरायौ। सुरायः। सुराया। सुराभ्यां॰॥
ओकारांतो गोशब्दः। औरो। ओकारस्यौकारादेशो भवति पंचसु परेषु। गौः।
गावौ। गावः। आम्शसि। ओकारस्यात्वं भवत्यम्शसि परे। गां। गावौ। १४
गाः। गवा। गोभ्यां। गोभिः। गवे। गोभ्यां। गोभ्यः। ङस्यत्य कारलोपः। गोः।
गोभ्यां। गोभ्यः। गोः। गवोः। गवां। गोशब्दस्य सर्गत इदसि वर्त्तमानाद्रोशे

अंतेमराम:१

ब्दात्परस्यामो नुडागमो भवति। सहस्रादशगोनां। गवि। गवोः। गोषु। एवं सु
द्योशब्दः। औकारांतो ग्लौशब्दः। तस्य इदसादावविशेषः। स्वरादावादेशः। ग्लौः। ×वा२
ग्लावौ। ग्लावः। इत्यादि॥ ॥इति स्वरांताः पुल्लिंगाः॥ ॥अथ स्वरांतास्त्रीलिं
गाः॥ ॥तत्रावंतो गंगाशब्दः। आपः। आवंतात्परस्य सेर्लोपो भवति। गंगा।
आ। आवंतात्पर औ ईकारमापद्यते। अइए। गंगे। गंगाः। धिरि। आवंतात्परो धिरि
संबुद्धिर्भवति। हे गंगे। हे गंगे। हे गंगाः। गंगां। गंगे। गंगाः। टौसोरे। आवंतस्य टौसोः परयो
रेत्वं भवति। अयादेशः। गंगया। गंगाभ्यां। गंगाभिः। ङितां यट्। आवंतात्परेषां ङे
ङसिङसङीनां यडागमो भवति। गंगायै। गंगाभ्यां। गंगाभ्यः। गंगायाः।
गंगाभ्यां। गंगाभ्यः। गंगायाः। गंगयोः। गंगानां। अम्ङेः। गंगायां। गंगयोः।
गंगासु। एवं श्रद्धा मेधा शाला माला होला दोला प्रभृतयः। अंबादीनां धौ ह्रस्वः।

सा॰ हे अंब। हे अक्क। हे अल्ल। सर्वादीनांतु ङि स्फ विशेषः। यटोच्च। आबंतात् सर्वादेः परस्यय
१५ टः सुडागमोभवति। पूर्वस्य ह्रस्वः। सर्वस्यै। सर्वस्याः२। सर्वस्यां। जरायाः स्वरा
दौ जरस्वा वक्तव्यः। जरा। जरसौ। जरे। जरसः। जरा। जरसं। जरां। जरसौ। जरे। जरसः।
जराः। जरसा। जरया। जराभ्यां। जराभिः। जरसे। जरायै। जराभ्यां। जराभ्यः। जरसः। ज
रायाः। जराभ्यां। जराभ्यः। जरसः। जरायाः। जरसोः। जरयोः। जरसां। जराणां। जरसि।
जरायां। जरसोः। जरयोः। जरासु। इकारांतो बुद्धिशब्दः। तस्य प्रथमाद्वितीययोर्हरि
शब्दवत्प्रक्रिया। बुद्धिः। बुद्धी। बुद्धयः। बुद्धिं। बुद्धी। स्त्रीत्वान्नत्वाभावो विशेषः। बुद्धीः।
बुद्ध्या। बुद्धिभ्यां। बुद्धिभिः। स्त्रियां। स्त्रियां वर्त्तमानाभ्यामिकारोकाराभ्यां परेषां
ङितां वचनानां वा ङागमो भवति। बुद्ध्यै। बुद्धये। बुद्धिभ्यां। बुद्धिभ्यः। बुद्ध्याः। १५
बुद्धेः। बुद्धिभ्यां। बुद्धिभ्यः। बुद्ध्याः। बुद्धेः। बुद्ध्योः। बुद्धीनां। स्त्रियांयापोः। इत्र उत्र पुः।

तस्मादिवर्णान्तादुवर्णान्तात्स्त्रियां वर्त्तमानात्परस्य ङेरामादेशो भवति। अङागमाभा
वे आमोप्यभावः। बुद्ध्यां। बुद्धौ। बुद्ध्योः। बुद्धिषु। एवं मतिविकृतिभूतिप्रभृतयः। तथा
न धेनुरज्जुप्रभृतयः। धेनुः। धेनू। धेनवः। हे धेनो। धेनुं। धेनू। धेनूः। धेन्वा। धेनु
भ्यां। धेनुभिः। धेन्वै। धेनवे। धेनुभ्यां। धेनुभ्यः। धेन्वाः। धेनोः। धेनुभ्यां। धेनुभ्यः।
धेन्वाः। धेन्वोः। धेनूनां। धेन्वां। धेनौ। धेन्वोः। धेनुषु। ईवंतो नदीशब्दः। दसेपःसे
लोपः। नदी। नद्यौ। नद्यः। धोर्ह्रस्वः। इवर्णोवर्णयोरधातोः स्त्रियां धोपरे ह्रस्वो भव
ति। हे नदि। नदीं। नद्यौ। नदीः। नद्या। नदीभ्यां। नदीभिः। ङितामट्। स्त्रियामी
कारांतादूकारांताच्च परेषां ङितां वचनानामङागमो भवति। नद्यै। नदीभ्यां। न
दीभ्यः। नद्याः। नदीभ्यां। नदीभ्यः। नद्याः। नद्योः। नदीनां। नद्यां। नद्योः। नदी
षु। एवं गौरी सरस्वती ब्राह्मी कुमारी किशोरी प्रभृतयः। लक्ष्मीशब्दस्य बंतलाड

सार. भावात्स्त्रिलोपो नास्ति। लक्ष्मीः। लक्ष्म्यौ। लक्ष्म्यः। हे लक्ष्मि। इत्यादि। स्त्रीशब्द
१६ स्यैवं तत्वात्स्त्रि लोपोस्ति। स्त्री शब्दस्य भ्रूशब्दस्य च इयुवौ भवतः स्वरे परे।
स्त्रियौ। स्त्रियः। वामशसि। अमि शसि च परे स्त्रीशब्दस्य भ्रूशब्दस्य च वा इयुवौ
भवतः। स्त्रियं। स्त्रीं। स्त्रियौ। स्त्रियः। स्त्रीः। स्त्रिया। स्त्रीभ्यां। इत्यादि। श्रीशब्दस्य
ङिति विशेषः। वेयुवः। इयुवंतात्स्त्रियां वर्त्तमानाद्धातोः ङितां वचनानां मनो ऽगमो भव
ति। श्रियै। श्रिये। श्रीभ्यां। श्रीभ्यः। श्रियाः। श्रियः। श्र्यादीनां वामो नुट् कथ्यः
श्रीणां। श्रियां। श्रियां। श्रियि। श्रियोः। श्रीषु। एवं धी ह्री प्रभृतयोप्यनीवंताः।
एवं भ्रूशब्दो भ्रूशब्दश्च। वधू जंब्वादीनां नदीशब्दवद्रूपं ज्ञेयं। मातृशब्दस्यापि १६
तृशब्दवत्प्रक्रिया। शसि मातृः। स्वसृशब्दः कर्तृवत्। रैशब्दः सुरैशब्दवत्। गोश

ब्दस्तूक्तपूर्ववत्। नौशब्दो ग्लौशब्दवत्॥ ॥इति स्वरांताः स्त्रीलिंगाः॥ ॥अथ स्वरांता
नपुंसकलिंगाः प्रदृश्यंते। तत्राकारांतः कुलशब्दः। तस्य प्रथमा द्वितीयैकवचने अतो
म्। अकारांतान्नपुंसकलिंगात्परयोः स्यमो रमभवत्यर्थो। अमो मूयहणं तु व्याप्र
त्यर्थं। कुलं। ईमौ। नपुंसकलिंगात्पर औ ईकारमापद्यते। कुले। जश्शसोः शिः। नपुं
सकलिंगात्परयो जश्शसोः शिर्भवति। गुरुः शि इ सर्वस्यव क्ते व्यः। नुमयमः। नपुंस
कस्य नुमागमो भवति। शौ परे। यमप्रत्याहारांतस्य न भवति। मृदंत्यात्स्वरात्परो व
क्तव्यः। नोपधायाः। नांतस्योपधाया दीर्घो भवति शौ घि राजंतेषु पंचसु नामिव
कुलानि। पुनरपि कुलं कुले कुलानि। शेषं देववत्। एवं मल फल पत्र पुष्प कुंड कुंडं
वादयः। शतन्नींद। अन्यादेः परयोः स्यमोः स्तुर्भवति। शकारः सर्वादेशार्थः। अ
न्यत्। अन्ये। अन्यानि। इतरत्। इतरे। इतराणि। शेषं पुंवत्। इकारांतो ऽस्थिशब्दः।

सारस्व नपुंसकात्स्यमोर्लुक्। नपुंसकलिंगात्परयोः स्यमोर्लुग्भवति। अस्थि। नामिनः स्वरे। ना
१७ म्यंतनुमागमस्य नुमागमो भवति स्वरे परे। अस्थिनी अस्थीनि। २ यणांनपुंसके धो
वा। नपुंसके णौ वक्तव्यः। हे अस्थे हे अस्थि। उक्तं च। संबोधने तु शानस्त्रिरूपं
सांतं तथा नांतमथाप्यदंतं॥ माध्यंदिनिर्वष्टि गुणं त्विगंते नपुंसके व्याघ्रपदां वरिष्ठः
॥१॥ अस्थ्यादेश्च शसादौ। अस्थ्यादीनां नुमागमो भवति इकारस्य चाकारो भवति शसादौ
स्वरे परे। अल्लोपः स्वरेऽम्वयुक्तात् शसादौ। नांतस्योपधाया अकारस्य लोपो भवति शसा
दौ स्वरे परे। तद्धितईपि ईकारे परे। मकारवकारसंयोगादुत्तरस्य न भवति। अस्थ्ना।
अस्थिभ्यामित्यादि। वा ङ्योः। ईङ्योः परयोर्वा अकारस्य लोपो भवति। अस्थ्नि।
अस्थनि। एवं दधिसक्थ्यक्षिशब्दाः। नपुंसकस्य। नपुंसकस्य ह्रस्वो भवति। २८
ग्रामणि कुलं। स्वरादौ नामिनः स्वरे इति नुमागमः। ग्रामणि। ग्रामणिनी। ग्रा

मणीनि। टादावुक्तपुंस्कं पुंवद्वा। उक्तपुंस्कं नाम्यंतं नपुंसकलिंगं टादौ स्वरे परे पुंवद्वा भ
वति। यन्निमित्तमुपादाय पुंसि शब्दः प्रवर्त्तते। क्लीबवृत्तितदेवस्यादुक्तपुंस्कं तदुच्यते।
ग्रामण्या। ग्रामणिना इत्यादि। सोमपं कुलं। सोमपं। सोमपे। सोमपानि। २ सोमपेन।
सोमपाभ्यां। इत्यादि। उकारांतो मधुशब्दः। तस्य स्वरे नुमागमः। मधु। मधुनी।
मधूनि। हे मधो। हे मधु। मधुना। ऋकारांतः कर्तृशब्दः। कर्तृ। कर्तृणी। कर्तॄणि। २ कर्तृ।
कर्त्रा। कर्त्रा। कर्तृणा। इत्यादि॥ ॥इति स्वरांता नपुंसकलिंगाः॥ ॥अथ हसांता
नपुंसकलिंगाः। तत्र हकारांतोऽनडुह्शब्दः। पंसि स्वनडुह आगमो वक्तव्यः। सावनडुहः। भा
अनडुह्शब्दस्य सौ परे नुमागमो भवति। संयोगांतस्य लोपः। संयोगांतस्य लोपो
भवति रसपदांते च। हसेपः सेर्लोपः। अनड्वान्। अनडुहौ। अनडुहः। धावं॥
अनडुह्शब्दस्य धौ परे अमागमो भवति। हे अनड्वन्। हे अनडुहौ। अनडुहः

अनडुहौ। अनडुहः। अनडुहा। वसांसे। वसस्रंसध्वंसु अनडुहू इत्येतेषां सेपदां
तेवदत्वंभवति। अनडुद्भ्यां। अनडुद्भिः। इत्यादि। खसेचपाझसानां। अनडुत्सु॥
दुहप्रकरण। गोदुहू शब्दस्यभेदः। हादेर्घः। हादेर्धातोर्हकारस्यघत्वंभवति। धातोर्झ
सेपरेनाम्निश्चरसेपदांतेच। गोदुघ्स् इतिस्थिते। आदिजबानांझभांतस्यझसाः
स्ध्वोः। धातोर्झभांतस्यादौवर्त्तमानानांजबानांझभाभवंतिसकारेध्वशब्देचपरेना
म्निच। वावसाने। अवसानेवर्त्तमानानांझसानांजबाभवंतिचपावा। गोधुक्। गोधु
ग्। गोदुहौ। हेगोधक्। हेगोधग्। गोदुहं। गोदुहौ। गोदुहः। गोदुहा। गोधुग्भ्यां।
इत्यादि। सप्तमीबहुवचने गोधुघ्सु इतिस्थिते। खसेचपाझसानां। झसानांख
सेपरेचपाभवंति। किलात्षः। कतस्यकषयोगेक्षः। ककारषकारयोगेक्ष इत्यक्ष १८
रंभवति। गोधुक्षु। मधुलिह्शब्दस्यभेदः। होढः। धातोर्हकारस्यढत्वंभवति।

धातोर्झसेपरे। वावसाने। मधुलिट्। मधुलिड्। मधुलिहौ। मधुलिहः। हेमधुलिट्।
मधुलिड्भ्यामित्यादि। कुहादीनांघत्वंढत्वंवा। कुहादीनांधातूनांघत्वंढत्वंवाभवतः।
धातोः। मित्रध्रुक्। मित्रध्रुग्। मित्रध्रुट्। मित्रद्रुहौ। मित्रद्रुहः। तथारत्नवसमुहश
ब्दः। रेफांतश्चतुरशब्दोनित्यंबहुवचनांतः। चतुरामौजस्। चतुरशब्दस्यागमोभवतिपं
चस्वपरेषुशेषेषु। चत्वारः। चतुरः। चतुर्भिः। चतुर्भ्यः२। रःसंख्यायाः। रेफां मा× तसंख्या
याःपरस्यामोनुडागमोभवति। णत्वंद्वित्वंच। चतुर्णां। चतुर्षु। नकारांतोराज
नशब्दः। नोपधायाइनिदीर्घः। नाम्नोनोलोपश्चधौ। नाम्नोनकारस्यानाग
मजस्यलोपश्चभवतिरसेपदांतेच। धौ। राजा। राजानौ। राजानः। अंधाविति
विशेषणाद्धेराजन्। राजानं। राजानौ। अल्लोपःस्वरेम्वयुक्ताच्छसादौ। नांत
स्योपधायाआकारस्यलोपोभवतिशसादौस्वरेपरेन्तु। हेतुईपिईकारेचपरे।

सार०
१९

सोऽभुमिभुरितिअकारः। अञोईः। अकारअकारयोगेईस्यात्। राज्ञः। राज्ञा। लोपशिपुनन्
संधिरितिनियमादङ्गित्यात्वंनभवति। राजभ्यामित्यादि। ङेङ्योः। राज्ञि। राजनि। राज्ञोः
राजसु। एवंयज्वन्। आत्मन्। सुधर्मन्। प्रभृतयः। अम्वयुक्तादितिविशेषणाद्लो
पोनास्ति। यज्वनः। यज्वना। यज्वभ्यामित्यादि। श्वन्युवन्मघवन्शब्दानांपंचस्
राजन्शब्दवत्प्रक्रिया। श्वादेः। श्वादेर्वकारउत्वंप्राप्नोतिशसादौस्वरेपरेतद्धितेईपि।
शुनः। शुना। श्वभ्यामित्यादि। यूनः। यूना। युवभ्यामि०। मघोनः। मघोना। मघव
भ्यामि०। पथिन्शब्दस्यभेदः। इतोत्पंचसु। पंचस्वेषुस्यादिषुपथ्यादीनामिकारस्या
कारोभवति। थोन्तः। पथ्यादीनांथकारस्यन्तुडागमोभवतिपंचस्परेषु। पन्थन्
सिइतिस्थिते। आसौ। पथ्यादीनांटेरात्वंभवतिसौपरे। पंथाः। पंथानौ। पंथानः। १९
पंथानं। पंथानौ। पथांटेः। पथ्यादीनांटेर्लोपोभवतिशसादौस्वरेपरे। पथः। पथा।

पथिभ्यामित्या०। एवंमथिन्। ऋभुक्षिन्शब्दौ। दंडिन्शब्दस्यभेदः। इन्हन्पूषार्यम्णांशौसौ। इन्हन्पूष
न्अर्यमन्इत्येतेषांशौसौ। शसौपरेउपधायादीर्घोभवति। दंडी। दंडिनौ। दंडिनः।
हेदंडिन्। दंडिनं। दंडिनौ। दंडिनः। दंडिना। दंडिभ्यामित्या०। ब्रह्महा। ब्रह्महणौ। ब्रह्महणः।
हेब्रह्महन्। हेब्रह्महणौ। ब्रह्महणं। ब्रह्महणौ। हनोघ्न। हन्तेर्धातोर्हकारस्यघत्वंभवति
नकारेऽभिलेणितिवपरे। घसंयोगेणत्वनिषेधार्थः। ब्रह्मघ्नः। ब्रह्मघ्ना। ब्रह्महभ्यामि
त्यादि। पूष्णः। पूष्णा। पूषभ्यामित्यादि। अर्यम्णः। अर्यम्णा। अर्यमभ्यामित्यादि।
संख्याशब्दाःपंचन्प्रभृतयोनित्यंबहुवचनान्तास्त्रिपुंसरूपाः। पंचन्जस्इतिस्थि
२० ते। जश्शसोर्लुक्। षकारनकारान्तसंख्यायाःपरयोर्जश्शसोर्लुग्भवति। पंच। पं
च। पंचभिः। पंचभ्यः। २। नुट्। षकारनकारान्तसंख्यायाःपरस्यामोनुडागमोभवति।
नोपधायाइतिदीर्घः। नाम्नोनोलोपश्चधौ। पंचानां। पंचसु। एवंसप्तन्। नवन्

सार
२०

भ्रतयः। अष्टन्शब्दस्य भेदः। अष्टनोडे। अष्टन्शब्दात्परयोर्जश्शसोर्वा डौ भवति। डित्वादिलोपः। अष्टौ। अष्ट। २ वाष्ट। वा आ आस्। अष्टन् आस् परास् विभक्तिषु वा आत्वं भवति। अष्टाभिः। अष्टभिः। अष्टाभ्यः। अष्टभ्यः २ ष्टः। अष्टानां। अष्टासु। अष्टसु। मकारांत इदम्शब्दः। इदमोयं पुंसि। इदमशब्दस्य पुंसि विषये अयं भवति सि सहितस्य। अयं त्यादेष्टस्य दोऽस्य मः। त्यदादीनां दकारस्य मत्वं भवति स्यादौ परे। इमौ। सर्वादेस्ताज्जसि। इमे। त्यदादेः संबोधनं नास्तीत्युत्सर्गः। हेसभाव्ये उदाहृतत्वात्। इमं। इमौ। इमान्। अनत्यौसोः। इदमो नादेशो भवति टौसोः परयोः। अनेन। स्यः। इदमः। सकारे भकारे च परे अकारो भवति हलि लस्पि। अश्री त्यात्वं। आभ्यां। भिस्त्वभिस्। इदमदसोर्भिस्भिस्सैव भवति न भकार २०

स्याकारः। एतस्मिं वक्तुंते। एभिः। अस्मै। आभ्यां। एभ्यः। अस्मात्। आभ्यां। एभ्यः। अस्य। अनयोः। एषां। अस्मिन्। अनयोः। एषु। किम्शब्दस्येटरत्वे कृते सर्वशब्दवद्रूपं नेयं। कः। कौ। के। इत्यादि। धकारांतस्तत्वबुधशब्दः। आदिजबानामिति भकारः। वान्तसाने। तत्वभुत्। तत्वबुधौ। तत्वबुधः। तत्वभुद्भ्यामित्यादि। जकारांतः सम्राज्शब्दः। छशषराजादेः षः। छकारांतस्य शकारांतस्य षकारांतस्य राज् यज् सृज् मृज् भ्राजादेश्च षत्वं भवति। धातौ झसे परे नाम्न्यस्वरे सपदांते च। षस्य षत्वं अख्यातादोडत्निषेधार्थं। तेन हे हरी स्यादौ डत्वं न भवति। षोडः। षकारस्य डत्वं भवति धातौ॰ सम्राट्। सम्राड्। सम्राजौ। सम्राजः। सम्राजं। सम्राजौ। सम्राजः। सम्राजा। सम्राड्भ्यां। एवं विराजादयः। दकारांतास्त्यद् तद् यद् एतद् शब्दाः। तेषां स्यादेषेर स्यादावित्ति सर्वत्र अकारः। सः। त्यदादेस्तकारस्य सत्वं भवति सौ परे। स्यः। त्यौ॥

स्ये। स्यं। स्यौ। स्यान्। स्येन। स्याभ्यां॥ सः॰ तौ॰ ते॰ यः॰ यौ॰ ये॰ एषः। एतौ॰ एते॰ एतदो
न्वादेशे द्वितीयाटौस्स्वेनो वा वक्तव्यः। उक्तस्य पुनरुक्तिरन्वादेशः। एतं। एनं। एतौ।
एनौ॰ एतान्। एनान्। एतेन। एनेन। एताभ्यां॰ एतैः। एतयोः। एनयोः। छकारांत
स्तत्त्वप्राछ्शब्दः। छशषराजादेः षः। षोडः। वावसाने। तत्त्वप्राड्। तत्त्वप्राड्। तत्त्व
प्राछौ। तत्त्वप्राछः। तत्त्वप्राछं। तत्त्वप्राछौ। तत्त्वप्राछः। तत्त्वप्राछा। तत्त्वप्राड्भ्यामि
त्या॰ थकारांतोग्निमथ्शब्दः। अग्निमत्। अग्निमद्। अग्निमथौ। अग्निमथः।
चकारांतः प्रत्यच्शब्दः। अंचेः पूजायां नुमागमो वक्तव्यः। प्रत्यन् वस इति स्थिते॰ स्तो
श्चुभिश्चुः। संयोगांतस्य लोपः। चोः कुः। चवर्गस्य कवर्गादेशो भवति धातोः। प्रत्य
ङ्। प्रत्यञ्चौ प्रत्यञ्चः। प्रत्यञ्चं। प्रत्यञ्चौ। अचोऽदीर्घश्च। अंचतेरकारस्य लोपो भ
वति पूर्वस्य च दीर्घः शसादौ स्वरे परे तद्धिते। अंचेरनुस्वारोऽनुस्वारो न पठनीयः

२ उदई त्व। उद च्युदीचादेशो भवति शसादौ स्वरे परे। २

प्रतीचः। प्रतीचा। प्रत्यग्भ्यां॥ एवं तिर्यच्शब्दः। तिर्यङ्। तिर्यञ्चौ। तिर्यञ्चः। तिर्यञ्चं। तिर्य
ञ्चौ॰ तिरश्च आदेशः। तिरश्च आदेशो निपात्यते शसादौ स्वरे परे॰ तिरश्चः। तिरश्चा। तिर्यग्भ्यां॰
उदीचः। उदीचा। उदग्भ्यां॰ तकारांतो मरुत्शब्दः। मरुत्। मरुद्। मरुतौ। मरुतः।
मरुद्भ्यां॰ एवमग्निचित्प्रभृतयः। नकारांत उकारानुबंधो महत्शब्दः। उगितां नुम्
उकारानुबंधस्य नुमागमो भवति पुंसि पंचस्कपरेषु। महतोऽथो दीर्घः शौ नः॰ न्सांत
स्यापि शब्दस्य महच्छब्दस्य चोपधाया दीर्घो भवति पंचस्कधिवर्जितेषु शौ च परे॥
महान्। महांतौ। महांतः। हे महन्। महांतं। महांतौ। महतः। महता। महद्भ्यां। मित्या॰
तकारांत उकारानुबंधो भवच्छब्दः। अत्वसोः सौ। अत्वंतस्यासंतस्य चोपधाया
दीर्घो भवति धिवर्जिते सौ परे। भवान्। भवंतौ। भवंतः। हे भवन्। भवंतं। भवंतौ॰
भवतः। भकारानुबंधो भवत्शब्दः। नुमागम एव न दीर्घः। भवन्। भवंतौ। भवंतः॰

ऋकारानुबंधस्यानव—

सारस्व॰ हे भवन्। भवंतं। भवंतौ। भवतः। भवता। भवद्भ्यामित्यादि। एवं पचत् पठत् प्रभृतयः। शका
२२ रांतो विशशब्दः। छशषराजादेः षः। छकारांतस्य शकारांतस्य षकारांतस्य राज् यज् सृज्
मृज् भ्राज् आदेश्च षत्वं भवति। षोडः। वावसाने। विट्। विड्। विशौ। विशः। षषूशाद्दोनि
त्यं बहुवचनांतस्त्रिषु सरूपः। जश्शसोर्लुक्। षोडः। षट्। षड्। षड्भिः। षड्भ्यः। २ स्त
ह्रस्वतिनुट्। षड्नामिति स्थिते। ड्ः। षांतसंख्यासंबंधिनो ड्कारस्य णत्वं भवति नामि
परे। षण्णां। ह्रस्वे तिन्पदांतता आश्रयणीया षड्नां। षट्सु। षकारांतो दोषशब्दः। दोषां।
दोषू सजुष् आशिषु दिविषुप्रभृतीनां षकारस्य रेफो भवति रसे पदांते च। दोः। दोषौ।
दोषः। दोषं। दोषौ। शसादौ स्वरे परे नांतता वा वक्तव्या। दोष्णः। दोषा। दोष्णा। x दोषः x २२
दोर्भ्यामित्यादि। सजुषाशिषो रसे पदांते च दीर्घता वक्तव्या। सजूः। सजुषौ। सजुषः।
सजुषं। सजुषौ। सजुषः। सजुषा। सजूर्भ्यामित्यादि। सकारांतः पुंसशब्दः। पुंसोसु

ङ्। पुंसशब्दस्य असुङ् आदेशो भवति पंचसु परेषु। मस्स्वरे। अनुस्वारस्य मकारो भवति स्वरे
परे। पुम् असु स् इति स्थिते। उगितां नुम्। न्सं महतो धौ दीर्घः। शोच। संयोगांतस्य लोपः।
पुमान्। पुमांसौ। पुमांसः। हे पुमन्। पुमांसं। पुमांसौ। पुंसः। पुंसा। पुंभ्यामित्यादि।
असंभवे पुंसः ककसौ। असंभवे इति। वेदांते कवेद्यस्यात्मनो बहुत्वासंभवे वा
असति पुंसशब्दस्य ककारागमो भवति सौ परे। स्कोरादौ च। संयोगाद्यो सकार
ककारयोर्लोपो भवति। कषयोगे क्षः। पुंक्षः। एवं विद्वन्शब्दः। विद्वान्। विद्वांसौ।
विद्वांसः। विद्वांसं। विद्वांसौ। वसोर्वउं। वसोः संबंधी वकार उत्वं प्राप्नोति श
सादौ स्वरे परे ततो द्विमई पिई कारे परे। विदुषः। विदुषा। विद्वद्भ्यामित्यादि।
सुवचस्शब्दे तु अत्वं सोः [illegible] दीर्घः। सुवचाः। सुवचसौ। सुवचसः। हे सु

सार
२२

वचः। स्रुवचसं। स्रुवचसौ। स्रुवचसः। स्रुवचसा। स्त्रोर्विसर्गः। हसे। सुवचोभ्यां। एवं चंद्रमस् वेधस् प्रभृतयः। उशनस् शब्दस्य भेदः। उशनसः। उशनस् पुरुदंशस् अनेहस् इत्येतेषां सेरधेर्ङा भवति। डकारष्टिलोपार्थः। उशना। उशनसौ। उशनसः। उशनसा धौ नांतता दंतता चवावक्तव्या। हे उशनः। हे उशनन्। हे उशान्। अदस् शब्दस्य भेदः। त्यादेष्टेरस्यादेः। अदस् इति स्थिते। सोसः। अदसो दकारस्यौत्वं स भवति सोपरे। सेरौ। अदसः सेरौकारादेशो भवति। असौ। दस्यमः। मादु। उश्च ऊश्च ऊ। अदसो मकारात्परस्य ह्रस्वस्य ह्रस्व उकारो भवति दीर्घस्य दीर्घो भवति। अमू। सर्वादित्वाज्जसि। अइए। अम इ इति स्थिते। एरीबहुत्वे। बहुत्वे सत्यदसि एकार ईकारो भवति। अमी। अमुं। अमू। अमून्। मत्वोत्वे कृते टा २३

ना स्त्रियां। अमुना। अतो ईत्वात्पश्चान्मादु इत्युकारः। अमूभ्यां। अमीभिः। अमुष्मै। अमूभ्यां। अमीभ्यः। त्यादे। दस्यमः। ङसिरत्। अतः। मादु। किलात्सः। अमुष्मात्। अमूभ्यां। अमीभ्यः। अमुष्य। ओसि। एत्वे कृते अयादेशः। पश्चादुकारः। अमुयोः। अमीषां। अमुष्मिन्। अमुयोः। अमीषु। सामान्ये अदसः कस्यात्। स्त्रियां। अमुकः। अमुकौ। अमुके। ॥ इति हसांताः पुंलिंगाः॥ ॥ अथ हसांताः स्त्रीलिंगाः। तत्र हकारांत उपानह शब्दः। नहोधः। नहो हकारस्य धकारादेशो भवति सेरपदांते च। उपानत्। उपानद्। उपानहौ। उपानहः। हे उपानत्। हे उपानद्। उपानहं। उपानहौ। उपानहः। उपानहा। उपानद्भ्यां। वकारांतो दिव् शब्दः। दिव औ। दिवशब्दस्यौकारादेशो भवति सोपरे। सः द्यौः। दिवौ। दिवः। वामि। दिवो वकारस्यौकारस्य सभ्यवर्णमि भपरे वा आत्वं भवति। द्यां। दिवं। दिवौ। दिवः। दिवा। उसिर्। दिवो वकारस्योकारो भवति रसे

सार० २४
परे। छुभ्यां। रेफांतश्चतुर्शब्दो नित्यं बहुवचनांतः। त्रिचतुरोः स्त्रियां तिसृचतसृ। स्त्रियां
वर्त्तमानयोस्त्रिचतुरशब्दयोः तिसृचतसृ इत्येतावादेशौ भवतः। सकारस्य रेफारव
त। तेन सुरास्त्यान्न भवति। तिस्रः। तिस्रः। तिसृभिः। तिसृभ्यः। २ न तिसृचतसृ
एतयोर्नामि दीर्घो न भवति। तिसृणां। तिसृषु। तिसृचतसृ इत्येतयोः छंदसि वा
मिपरे वा दीर्घो वक्तव्यः। चतस्रः। २ चतसृभिः। चतसृभ्यः। चतसृणां। चतसृषु। रेफां
तो गिरशब्दः। य्वोर्विहसे। धातोरिकारोकारयोर्दीर्घो भवति रेफवकारयोर्हसपरयोः
। गीः। गिरौ। गिरः। गिरं। गिरौ। गिरः। गिरा। गीर्भ्यां। एवं पुर्धुरादयः। धकारांतः
समिधूशब्दः। समित्। समिद्। समिधौ। समिधः। ० भकारांतः ककुभ्शब्दः। ककुप् २४
ककुब्। ककुभौ। ककुभः। ककुब्भ्यां भित्या। ० दकारांतास्त्यदादयः। त्यादेष्टस्या
दौ। आबतः स्त्रियां। आकारांतान्नाम्नः स्त्रियां वर्त्तमानाट्टाप् प्रत्ययो भवति।

पकारः स्लोपार्थः। स्त्रीलिंगे सर्वशब्दवद्रूपं नेयं। स्या। त्ये। त्याः। सा। ते। ताः। या। ये।
याः। एषा। एते। एताः। इयं स्त्रियां। इदम्शब्दस्य स्त्रियामियं भवति सिसाहितस्य।
इयं। इमे। इमाः। चकारांतस्त्वच्शब्दः। चोः कुरिति कुत्वं। त्वक्। त्वग्। त्वचौ। त्वचः। एवं
स्त्रुवाक्प्रभृतयः। अप्शब्दो नित्यं बहुवचनांतः। सम्महतो धौ दीर्घः शौ च। आप
ः। अपः। भि दपः। अबादीनां भकारपरे दत्वं भवति। अद्भिः। अद्भ्यः। २ अपां। अ
प्सु। शकारांतो दिश्शब्दः। दिशां। दिश दृश स्पृश मृश इत्येतेषां रसे पदांते च कु
त्वं भवति। दिक्। दिग्। दिशौ। दिशः। दृक्। दृग्। दृशौ। दृशः। स्पृक्। स्पृग्। स्पृशौ।
स्पृशः। मृक्। मृग्। मृशौ। मृशः। षकारांतस्त्विष्शब्दः। षो डः। वावसाने। त्विट्।
त्विड्। त्विषौ। त्विषः। आशिष्शब्दस्य सजुष्वत्प्रक्रिया। आशीः। आशिषौ। आ
शिषः। अदस्शब्दस्य सो न विशेषः। त्यादेष्टस्यादौ। सौसः। सेरौ। असौ। द्वि

सार· वचनादौ स्यादेष्टेरत्वस्यादितिसर्वत्राकारकृते आबत स्त्रियामित्यापविभक्तिका
२५ र्यप्राक्पश्चान्मादूकारः।अमू।अमू२ अमुं।अमू।अमूः।अमुया।अमूभ्यां।
अमूभिः।अमुष्यै।अमूभ्यां।अमूभ्यः।अमुष्याः।अमूभ्यां।अमूभ्यः।अमु
ष्याः।अमुयोः।अमूषां।अमुष्यां।अमुयोः।अमूषु॥ ॥इति हसांतास्त्रिलिं
गाः॥ ॥अथ हसांता नपुंसकलिंगाः॥ ॥तत्र रेफांतो वार्शब्दः।नपुंसकात्
स्यमोर्लुक्।वाः।वारी।वारि।अयमदंत इति विशेषणानुम्न भवति।वारा।वार्भ्यां।
चतुर्शब्दे तु चत्वारि।शौ चेत्याम्।चत्वारि२।चतुर्भिः।चतुर्भ्यः२ चतुर्णां।चतुर्षु।न
कारांतो अहन्शब्दः।अहः।अह्नो नकारस्य रसत्वं भवति रसे पदांते च।अह्नी।अ ह: २५
वाँ ह्नी।वेङ्गोः।अह्नः।अहनी।अहानि२।अह्ना।अहोभ्यां।०ब्रह्मन्शब्दस्य रसे पदांते च
नलोपो वक्तव्यः।हे ब्रह्मन्।हे ब्रह्म।ब्रह्मणा।ब्रह्मभ्यां।एवं शर्मन्वर्मन्प्रभृतयः॥

॥ नपुंसके धोनलोपो वा वक्तव्यः ॥

नांतादंताद्धे।दसिङ्स्योर्वा लोपः।वंदस्यागमजानागमजयोर्लोपालोपौ वक्तव्यौ
दीर्घत्वं न निवर्त्तते।परमे व्योमन्।परमे व्योम्नि।सर्वाभूतानि।सर्वाणि भूतानीत्यर्थः॥
त्यदादीनां स्यमोर्लुकि कृते टेरत्वं न भवति स्यादावितिविशेषणात्।त्यत्।त्ये।त्यानि।
तत्।ते।तानि।यत्।ये।यानि।एतत्।एते।एतानि।किं।के।कानि।शेषं पुंवत्।इदं।
इमे।इमानि।चकारांतः प्रत्यच्शब्दः।प्रत्यक्।प्रतीची।प्रत्यञ्चि।तकारांतो जगत्
शब्दः।जगत्।जगती।जगंति।महत्।महती।महंति।सकारांताः पयस्तेजस्व
र्चस्प्रभृतयः।पयः।पयसी।पयांसि।पयसा।पयोभ्यां।अदस्शब्दस्य स्यमोर्लु
कि कृते स्त्वा विसर्गः।अदः।टेरत्वे कृते मत्वोत्वे।अमू।अमूनि।शेषं पुंवत्॥ ॥
॥ ॥इति हसांता नपुंसकलिंगाः॥ ॥अथ युष्मदस्मदोः स्वरूपं निरूप्यते॥
तयोश्च वाच्यलिंगत्वात् त्रिष्वपि लिंगेषु समानरूपं।त्वमहौ सिना।सिसहित
योर्युष्मदस्मदोस्त्वमहमित्येतावादेशौ भवतः।यथासंख्येन।त्वं।अहं।युवां

सार·
२६

द्विवचने। युष्मदस्मदोर्द्विवचने परे युव आव इत्येतावादेशौ भवतः। आमौ। युष्मद
स्मदोः पर औ आम् भवति। युवां। आवां। यूयं वयं जसा। जसा सहितयोर्युष्मदस्म
दोर्यूयं वयमित्येतावादेशौ भवतः। यूयं। वयं। त्वमावेकत्वे। युष्मदस्मदोस्त्वन्
म इत्येतावादेशौ भवतः। एकत्वे गम्यमाने। आम्शसो। युष्मदस्मदोः परात्वं भव
त्यमिस्सकारभिस्त्विपरे। त्वां। मां। टेरत्वे कृते शसीति दीर्घत्वं। युवां। आवां।।
शसो नो वक्तव्यः। युष्मान्। अस्मान्। त्वन्मदादेशयोः कृतयोः। टाङ्योः।।
युष्मदस्मदोष्टेरेत्वं भवति टाङि इत्येतयोः परयोः। त्वया। मया। युवाभ्यां।
आवाभ्यां। युष्माभिः। अस्माभिः। तुभ्यं मह्यं ङया। ङेसा सहितयोर्युष्मदस्म
दोः तुभ्यं मह्यमिति एतावादेशौ भवतः। तुभ्यं। मह्यं। युवाभ्यां। आवाभ्यां। २६
भ्यसस्भ्यं। युष्मदस्मदोः परो भ्यस् अभ्यं भवति। शकारो भकारादिकृत्ये

व्यावृत्यर्थः। तेनात्वैत्वे न भवतः। युष्मभ्यं। अस्मभ्यं। ङसिभ्यसोऽश्तुः। पंचम्याङ
सिभ्यसोरश्तुर्भवति। शकारः सर्वादेशार्थः। त्वत्। मत्। युवाभ्यां। आवाभ्यां। यु
ष्मत्। अस्मत्। तव मम ङसा। ङसा सहितयोर्युष्मदस्मदोस्तव मम इत्येतावादे
शौ भवतः। तव। मम। युवयोः। आवयोः। सर्वादित्वात्सुट्। सामाकं। युष्मदस्मदोः
परस्य साम आकं भवति। युष्माकं। अस्माकं। त्वयि। मयि। युवयोः। आवयोः। युष्मासु।
अस्मासु।। ।। अथानयोरादेशविशेषविधिर्निरूप्यते। युष्मदस्मदोः षष्ठीचतु
र्थीद्वितीयाभिः ते मे वा नौ वस् नसौ। युष्मदस्मदोर्यथासंख्येनामी आदेशा भव
ति। कीदृशयोः। षष्ठीचतुर्थीद्वितीयासहितयोस्तत्रैकवचनेन सह ते मे भवतः।
द्वितीयेन वा नौ बहुवचनेन वस् नसौ। स्वामी ते स समायातः स्वामी मे स प्रत
गतः। नमस्ते भगवन् भूयो देहि मे मोक्षमव्ययं। स्वामी वां स जगत्सोऽपि दृष्वा नौ

क्ष

सार· दानयातनां।राज्ञोवांदास्यते दानं ज्ञानंनोमधुसूदनः।२।देवोवामवताद्विष्णुर्नर
२८ कान्नोजनार्दनः।स्वामीविबलवान्राज्ञःस्वामीनोसौजनार्दनः।३।नमोवोब्रह्म
विद्भ्योज्ञानेनोदीयतांधनं।सानेदान्वःप्रपश्यामःपश्यामोनःसकृद्दुःखिनः।४।
त्वामाम।अमासहितयोर्युष्मदस्मदोस्त्वामाइत्येतावादेशौभवतः।पश्यामि
त्वामदालीदं पश्यमोमदमेदकं।दोनो।पादादौवर्त्तमानयोर्युष्मदस्मदोर्नेत
आदेशाभवंति।देवास्मान्पाहिन्द्रहरेविलोस्मान्रक्षसर्वदा।संबोधनपदादय
नभवंतिवसादयः।युष्माकंपापकोविष्णुरस्माकंकुलदेवता।तवयशात्रवोराज्ञ
न्ममतेप्यतिशात्रवः।२।युष्मान्रक्षतुगोविंदोऽस्मान्कृष्णःसर्वदावतु।मम २८
येशोलज्ञामातातवमातायुधःसुता।३।चादिभिश्च।चादिभिरपियोगेनैतेआ
देशाभवंति।चादिनिपातः।चादिर्गणोव्ययोनिपातसंज्ञोभवति।।।स।वा।

आहृ
व·अह·एव·एवं·नूनं·पृथक्·विना·नाना·अद्धा·स्वस्ति·दोषा·नक्तं·मृषा·मिथ्या·
मिथस्·अथ·अथो·च्चस्·श्वस्·उच्चैस्·नीचैस्·स्वर्·अंतर्·प्रादुर्·पुनर्·भूयस्·
अहो·स्वित्·उत्·आहु·नमस्·सह·भते·अंतरेण·अंतरा·नमस्·अलं·असर्थं·
कृते·अ·मा·नो·ना·प्रतिषेधे·ईषत्।किल·खलु·वै·आरात्।दूरात्·भृशं·यत्·त
त्·अ·इ·उ·ऋ·ॡ·ए·ऐ·ओ·औ·।इत्येवमादिर्गणोनिपातसंज्ञोव्ययसंज्ञोभवति·
तत्रादिर्गणेविभक्त्यर्थेनिपात्यते·तस्मिन्नितितत्र।यस्मिन्नितियत्र·कस्मिन्नि
तिकुत्र·तस्मिन्कालेतदा।यस्मिन्कालेयदा।कस्मिन्कालेकदा।तेनप्रकारेणतथा·
येनप्रकारेणयथा·केनप्रकारेणकथं·अनेनप्रकारेणइत्थं·तस्मादितिततः।यस्मा
दितियतः।कस्मादितिकुतः।अस्मादितिअतः।इतः।सार्वविभक्तिकस्तस्·इत्येके·
पूर्वस्मिन्नितिपुरस्तात्·परस्मिन्नितिपरस्तात्।आदिरुद्धे·दक्षिणादिवसाति
तोजगत्।किमःसामान्येचिदादिः।कश्चित्।कश्चन।कचित्।केनचन·तदधीनकात्स्न्यो

सार
२८

वीसात्‌ सर्वभस्मेतिभस्मसात्‌ राजाधीनंराजसात्‌ उर्युररयंगीकरणे उरीकृत्य। उररीकृ
त्य। सद्यादिःकालेनिपात्यंते सद्यः। अद्य सपदि अधुना इदानीं संप्रतं साटिति
तूर्णं पूर्वेद्युः परेद्युः। यर्हि तर्हि शीघ्रं प्रादिरुपसर्गः। प्र परा अप सं अनु अव
निर् निस्‌ दुर् दुस्‌ वि आङ्। नि अधि अपि अधि अभि प्रति परि उप सु उत्‌
श्रत्‌ अंतर् आविर् प्रादुर् अयंगणउपसर्गसंज्ञकः। प्राग्धातोः उपसर्गाः प्राग्धातो
प्रयोक्तव्याः। उपकरोति निराकरोति तदव्ययं तदिदं चादिशब्दरूपमव्ययसंज्ञंभवति
क्त्वाद्यंतंच क्त्वा ल्यप् नम् णम् क्विप् डाप् यावत्‌ कृत्वा तुन् आम् एतत्कादयः।
अव्ययात्विभक्तेर्लुक् अव्ययात्परस्याविभक्तेर्लुक्भवति नतुशब्दनिर्देशः अव्ययानां
वनलिंगादिनियमः उक्तंहि। सदृशंत्रिषुलिंगेषुसर्वासुचविभक्तिषु। वचनेषुचसर्वेषु २८
यन्नव्येतितदव्ययम्‌॥१॥ ॥इत्यव्ययानि॥ ॥अथस्त्रीप्रत्ययाः॥ ॥श्रीः॥

आवतस्त्रियां। जाया। माया। श्रद्धा। मेधा। धरा। इत्यादि। अजादेश्चापूर्ववक्तव्यः। अ १
जा। एडका। कोकिला। बाला। शूद्रा। गणिका। कात्यल। का पिङ्गुअतः। स्त्रियांकापिप ३६
रपूर्वस्याकारस्येकारोभवति। कारिका। पाचिका। पाठिका। वर्तिभ्यगुरिरलोपमवा
प्योरुपसर्गयोः। आपंचैवहलंतानांयथावाचानिशादिशा।१। अवगाहः वगाहः। अ
पिधानं। पिधानं। स्त्रीचावा। स्त्रियांकापिपरतस्तदोसपूर्वस्यहृस्वोवाभवति। वेणिका। वे
णीका। नंदिका। नंदीका। श्रेयसितरा। श्रेयसीतरा। नौकादेनभवतिवाग्रहणादेव। नि
श्चये नपतंतत्यनेकेष्वर्थेष्विति निपाताः। निपातानामनेकार्थत्वात्। नर्णाडीपूर्वनकारांता
दकारांतादृणांताच्चस्त्रियामीप्प्रत्ययोभवति। दंडिनी दंतिनी। राज्ञी पिराज्ञोर्तोपोवक्तव्यः
राज्ञी। शुनी। मघोनी। कर्त्री। हर्त्री। औपगवी। यस्यलोपः। इ अश्रुप्रत्ययः। लस्यलोपोभवति

सारस्व· स्वरेयकारे च परे। षूीतः। षकारटकारडकारसकारानुबंधात्स्त्रियामीप्रत्ययोभवति· षवकी
२९ री। टकुरुचरी। उगोमती। सभवंती। अप्ययोरान्नित्यं। अपुप्रत्ययसंबंधिनोकारात्परस्यशं
तुर्नित्यंनुमागमोभवतिइकारेइपिचपरे। पचंती। नदादेः। नदादेर्गणात्स्त्रियामीपुप्रत्य
योभवति। नदी। गोरी। गोतमी। इंद्रादेरानीपु। इंद्रादेःस्त्रियौनीपुप्रत्ययोभवति। इंद्राणी। मा॰
भवानी। मृडानी। शर्वाणी। ईपुसमाहारेगुणश्च· समाहारेर्थेईपुप्रत्ययोभवति। गुण
श्च। त्रयी· पुंयोगेच। शूद्री। गणिका। जातेरयोपधात्। जातिवाचिनोयकारोपधादकारां
तात्स्त्रियामीपुप्रत्ययोभवति। मेषी। हंसी। सूकरी। अयकारोपधग्रहणात्· क्षत्रिया· वै
श्या। प्रथमवयोवाचिनोतईपुवक्तव्य· कुमारी। किशोरी। कलभी। प्रथमग्रहणात् वृद्धा·
स्थविरा। अक्रूरणात्शिशुः। स्वांगाद्वा। स्वांगवाचिनोवास्त्रियामीपुप्रत्ययोभवति। सुकु २९
स्वी। मृगाक्षी। तन्वंगी। वाग्रहणात्सुवदना। कमललोचना। कदिकारादक्तेरीवोक्त व

वः। अंगुलिः। अंगुली। धूलिः। धूली· अक्तेरितिविशेषणात्· कृतिः। भूतिः। ओरवमन्वा
देः। मन्वादेर्गणात्स्त्रियामीपुप्रत्ययोभवति ऐकारादेशश्च। मनायी। वृषाकपायी। र
कारान्मनोरौकारादेशश्च· मनावी। पत्यादयः। पत्न्यादयोनिपात्यते· पत्नी। अंतर्वत्नी·
सखी। असखी। अर्धजरती। युवती। दारशब्दोनित्यंबहुवचनांतःपुल्लिंगः। दाराः। दारान्·
वागुणात्। उकारांतात्स्त्रियांगुणवाचिनोवाईपुप्रत्ययोभवति। पट्वी। पटुः। मृद्वी। मृदुः। त
न्वी। तनुः। ऊतर्ऊः। उकारांतादूप्रत्ययोभवति· पंगूः। वामोरूः। यूनस्तिः। युवन्शब्दात्स्त्रियां
तिःप्रत्ययोभवति। युवतिः। न्नेणईपु। स्त्री। पोपवादः। नाम्नो। नोऽपरः। एभ्योनामत्वा
त्यादयः। आवंता दापइतिस्मिलोपः। इवंताह्रस्वपःसर्वलोपः॥ ॥ इतिस्त्रीप्रत्ययाः॥ ॥
॥ ॥ अथविभक्त्यर्थानिरूप्यंते॥ ॥ लिंगार्थेप्रथमा। धातुप्रत्ययातिरिक्तमर्थवच्छब्द
रूपंलिंगं। तस्यैवार्थस्तस्मिन्नर्थेप्रथमाविभक्तिर्भवति। उच्चैः। नीचैः। लिंगादयोपिप्रथमार्था

सारः ३०

इति केशितः तत्सदृशो भाति। रविरिव राजते राजा। रोषात्कुमारी रोरूयते। वाक्कज्यते भुवं भूपः॥
प्रागास्तां रामलक्ष्मणौ॥१॥ मनसि वचसि काये पुण्यपीयूषपूर्णास्त्रिभुवनमुपकारश्रेणि
भिः प्रीणयंतः॥ परगुणपरमाणून्पर्वतीकृत्य नित्यं निजहृदि विकसंतः संति संतः कियं
तः॥२॥ कुमाराः शेरते स्वैरं रोरूयंते च नारिकाः॥ जेगीयंते च गीतज्ञाः मेम्रियंते रुजार्दि
ताः॥३॥ आमंत्रणे च॥ आभिमुखीकरणेपि प्रथमा विभक्तिर्भवति। मां समुद्धर गोविंद
प्रसीद परमेश्वर॥ कुमारोस्वैरमासाथां क्षमध्वं भो तपस्विनः॥१॥ भोसः॥ भो भगो अ
घोऽस्य तो शब्दा निपात्यंते धिविषये॥ क्षमस्व भो दुराराध्य भगो नुग्यं नमोस्तु ते॥
अघी च भो महत्याह्न घातयाघोस्व घस्मरं॥१॥ कर्त्ता कर्म च करणं संप्रदानं तथैव च॥ ३०
अपादानाधिकरणमित्याहुः कारकाणि षट्॥ शेषाः कार्यैककर्त्तसाधनयोर्दानपात्रेषु
विश्लेषावधौ संबंध आधारभावयोः॥ शेषा विभक्तयो द्वितीयाद्या एष्वर्थेषु भवंति॥

कार्यकर्मकारके द्वितीया॥ आप्यं संस्कार्यं। विकार्यं च द्वितीया विभक्तिर्भवति। यत्सिद्धमेव
आप्यते तदाप्यं। यदुत्पत्त्या भावितं तत्साध्यं। यत्र गुणाधानं मलापकर्षो वा क्रियते तत्संस्का
र्यं। यत्र पूर्वावस्थापरित्यागेनावस्थांतरापत्तिः क्रियते तद्विकार्यं। कटं करोति कारुको रू
पं पश्यति चक्षुष्मान्॥ ग्रासं ग्रसति धर्मिष्ठः सोमं सुनोति सोमपाः॥१॥ अभितः सर्वतः सो
कार्यां धिगुपर्यादिषु त्रिषु॥ द्वितीयाम्रेडितांतेषु ततोन्यत्रापि दृश्यते॥ अभितो ग्रामं
नदी वहति। सर्वतो ग्रामं तरवो दृश्यंते। धिग्देवदत्तं जीवितं। उपर्युपरि ग्रामं ग्रामं अ
नुग्रामं प्रतिग्रामं॥ कालाध्वनोर्नैरंतर्ये॥ कालेवाचके अध्ववाचके नैरंतर्ये द्वितीया
विभक्तिर्भवति। मासमस्य द्विरधीते। मासमधीते। क्रोशं क्रोशं पर्वतः॥ कर्त्तरि प्रधा
ने क्रियाश्रये साधने च॥ क्रियासिध्युपकारके करणेर्थे तृतीया विभक्तिर्भवति। भि
न्नः शरेण रामेण रावणो लोकरावणः॥ नारायणगिरिर्णोपि वानरैर्युध्यते पुनः॥

सार दानपात्रे संप्रदानकारके चतुर्थी। सम्यक् श्रेयोबुध्या यस्मै प्रदीयते तत्संप्रदानं। वेद
३१ विदे गां ददाति। छात्राय कन्यां ददाति। विश्लेषो विभागस्तत्र यो अवधिश्चलतयालोः
तयावा विवक्षितस्तत्रापादाने पंचमी। धावतोऽश्वात्पतत्। भूभृतावतरति गंगा।।
संबंधे षष्ठी। संबंधिनोर्मध्ये यः प्रधानस्तत्र षष्ठी विवक्षिता। राज्ञः पुरुषोऽयं। पित्रो
रेतत्प्रपूजनं। गुरूणां वचनं पथ्यं कवीनां रसवद्वचः।। आधारे सप्तमी। आधा
रोधिकरणं। षड्विधमधिकरणं। औपश्लेषिकं। सामीपकं। अभिव्यापकं। वैषयि
कं। औपचारिकं। नैमित्तिकं चेति चतुर्विधमितिकेचित्। व्यापकं। औपश्लेषिकं। ३१
वैषयिकं सामीपकं चेति। व्यापकं यथा। तिलेषु तैलं व्याप्तं। औपश्लेषिके यथा। क
टे आस्ते ब्राह्मणः। वैषयिकं यथा। वने शार्दूलाः संति। सामीपकं यथा। वने वसं

ति घोषाः। उक्तंच। कटे शेते कुमारोसौ वटे गावः सुशेरते। तिलेषु विद्यते तैलं हृदि ब्रह्मा
मृतं परं।।१।। भावे। क्रियालक्षणं। तत्र सप्तमी। प्रसिद्धक्रियया अप्रसिद्धक्रियया वा
लक्षणं बोधनं भावः। वर्षति देवे चोर आयातः। पूते त्वंशुमालिनि पतितो रातिः। वसंते को
किला शब्दं करोति। विनासहनमस्तेनिर्धारणे साम्यादिभिश्च। एतैरपि योगे द्विती
याद्या विभक्तयो भवंति। विनापापं सर्वं फलति। अंतरेण लक्ष्मीं किं जीवितेन। अं
तरा त्वां मां मुकुंद इत्यादिपदाद्याच। सह सदृश साकं सार्धं समं योगे तृतीया। सह
शिष्येणागतो गुरुः। सदृशश्चैत्रो मैत्रेण। साकं नयनाभ्यां लक्ष्मणादंताः। सार्धं धं
निभिर्धूर्तः साधुः। नमः स्वस्ति स्वाहा स्वधालं वषड्योगेन चतुर्थी। नमो नारायणाय।
स्वस्ति राज्ञे। सोमाय स्वाहा। पितृभ्यः स्वधा। अलं मल्लो मल्लाय। वषडिंद्राय। संत
कोनान्नमुक्तिः। अन्यारादितरः। निर्धारणे क्रियागुणजातिभिः समुदायात्पृथ

सार ३२ करणं तत्र षष्ठी। क्रिया पराणां भगवदाराधकः श्रेष्ठः। गवां कृष्णा गौः संपन्नक्षीरा। एतेषां छा
त्रियः शूरतमः। स्वाम्यादिभिश्च। गोषु स्वामी गवां स्वामी। गोष्वधिपतिः गवामधिपतिः। क
र्तृकार्ययोः कृद्योः कृति षष्ठी। कर्तृकार्ययोः षष्ठी भवति। क्तादिवर्जितकृदंतशब्दे प्रयुज्य
माने। व्यासस्य कृतिः। भारतस्य श्रवणं। स्मृत्यर्थकार्ये। मातुः स्मरति। मातरं स्मरति।
हेतोस्तृतीयापंचमी वक्तव्या। अनित्यः शब्दः कृतकत्वेन कृतकत्वाद्वा। भयहेतौ च। चो
राद्भेति। व्याघ्राच्च त्रस्यति। विकृतात्ताच्चाकृतः। षष्ठी हेतुप्रयोगे। कस्य हेतोरियं कन्या।
त्वं भावेत्तृतीया। अन्यस्यान्यत्रोपसारणवर्त्तमानत्वमिति कर्मावः। शिष्यं पुत्रेण पश्यति।
आचार्यः। संसारमसारेण पश्यति यतिः। येनांगविकारः। येनांगेनांगिनां गविकारो
लक्ष्यते तस्मादंगात्तृतीया विभक्तिर्भवति। अक्ष्णा काणः। पादेन खंजः। इत्यादावन्यनां ३२
गेन विकारः। मुखेन त्रिलोचनः। वपुषा चतुर्भुजः। इत्यादौ अधिकेन विकारः। जनिक

र्तुः प्रकृतिः। जायमानेकार्यस्योपादानमपादानसंज्ञं भवति। तत्रापादाने पंचमी। यस्मात्प्रजः
प्र जायते तद्धृक्लीति। आङ्मर्यादायोगेन। आपाटलिपुत्राद्वृष्टो देवः। तादर्थ्ये चतुर्थी वक्तव्या। संय
माय कर्त्तं धत्ते नरो धर्माय संयमं। धर्ममोक्षाय मेधावी धनं दानाय रक्षते॥ क्रुधादियोगे
च। कृष्णाय कुध्यति। मित्राय द्रुह्यति। गुणवते स्पृहयति। ल्यब्लोपे पंचमी वक्तव्या। हर्म्यात्प्रेक्ष
ते। हर्म्यमारुह्य प्रेक्षत इत्यर्थः॥ निमित्तात्कर्मयोगे सप्तमी वक्तव्या। चर्मणि द्वीपिनं हंति दंतयो व्याघ्रे
र्हंति कुंजरं। केशेषु चमरीं हंति सीम्नि पुष्कलको हतः। विषये च। तर्के चतुरः। षष्ठी सप्तम्यौ तानाद
रे। बहूनां क्रोशतां गतः सन्नारः। बहुष्वसाधुषु वदत्सु पिस्वयमायोयाति साधुमार्गेण। मा
तापित्रोः रुदतोः प्रव्रजति पुत्रः। अन्याख्ये प्रथमा। यदिदं कर्मत्वादन्येनारख्यातेन कृतादिना उक्तं
भवति। तदा प्रथमा प्रयोक्तव्या। घटः क्रियते। पटः कार्यः। छंदसि स्यादि सर्वत्र। रथा जुहो
ति। पुनर्नु ब्राह्मणस्यति। प्रकृती रिरिपुः॥ ॥ इति कारकप्रक्रिया॥ ॥ अथार्थवद्धि

सार० भक्तिविशिष्टानां पदानां समासो निरूप्यते । समासश्चान्वयेनाम्नां । नाम्नामन्वययोग्य
३३ त्वे सत्येव समासो भवति । तच्छब्दात्तद्धितोपि । ततो भार्यापुरुषस्येत्यादौ न समासः । परस्पर
मसंबंधात् । स च षड्विधः । अव्ययीभावस्तत्पुरुषो द्वंद्वो बहुव्रीहिः कर्मधारयो द्विगुश्चेति ।
पूर्वपदप्रधानोऽव्ययीभावः । द्विगुतत्पुरुषौ परपदप्रधानौ । द्वंद्वकर्मधारयौ चोभयपदप्र
धानौ । बहुव्रीहिरन्यपदप्रधानः । तस्य क्रियाभिसंबंधात् । उभयपदप्रधानो बलवान् ।
एकपद्यमैकस्वर्यमैकविभक्तिकत्वं च समासप्रयोजनं । अधिस्त्रि इति स्थिते । स्त्रीशब्दात्
द्वितीयैकवचनमम् । स्त्रियमधिकृत्य भवतीति विग्रहः । अन्वययोग्यार्थसमर्पकः पदस
मुदायो विग्रहो वाक्यमिति यावत् । कृते समासे अव्ययानां पूर्वनिपातो वक्तव्यः । पूर्वव्य ३३
यव्ययीभावः । अव्यये पूर्वपदे सति योऽन्वयः सोऽव्ययीभावसंज्ञकः समासो भवति ।
समासप्रत्यययोः । समासे वर्त्तमानाया विभक्तेः प्रत्यये च परे लुग्भवति । इसमाल्लु

क् । नामसंज्ञायां स्यादिर्विभक्तिः । स नपुंसकं । सोऽव्ययीभावो नपुंसकलिंगो भवति । नपुंसक
त्वाद्ध्रस्वत्वं । अव्ययीभावात् । अव्ययीभावात्परस्या विभक्तेर्लुग्भवति । अधिस्त्रि गृहका
र्यं । रायमतिक्रांतमतिरि कुलं । नावमतिक्रांतमतिनु जलं । ह्रस्वादेशे संध्यक्षराणामिका
रोकारौ वक्तव्यौ । यथा सादृश्ये । यथाशब्दः सादृश्यार्थे समस्यते सोऽव्ययीभावः । शक्तिम
नतिक्रम्य करोतीति यथाशक्ति । अतोऽमनतः । अकारांतादव्ययीभावात्परस्या विभक्ते
रम्भवति तृतं वर्जयित्वा । कुंभस्य समीपे इत्युपकुंभं । उपकुंभं पश्य । वा टाङ्योः । टाङी
त्यनयोर्वाम्भवति । उपकुंभेन कृतं । उपकुंभं कृतं । उपकुंभे निधेहि । उपकुंभं निधेहि ।
अनत इति विशेषणात्सप्तम्या अम् न भवति । उपकुंभादानय । अवधारणार्थे यावदिति ।
अवधारणार्थे यावच्छब्दे प्रयुज्यमाने सोऽव्ययीभावसंज्ञकः समासो भवति । यावंत्यमत्रा
णि तावतो ब्राह्मणानामंत्रयस्वेति यावदमत्रमामंत्रयस्व । मक्षिकाणामभावो निर्मक्षि

सार कं वर्त्तते ॥ ॥ इत्यव्ययीभावः ॥ ॥ अमादौ तत्पुरुषः । द्वितीयाद्यंते पूर्वपदे सति तत्पुरुषसंज्ञकः
३४ समासो भवति । ग्रामं प्राप्तो ग्रामप्राप्तः । दात्रेण छिन्नं दात्रछिन्नं । यूपाय दारु । यूपदारु । वृ
क्षेभ्यो भयं वृक्षभयं । राज्ञः पुरुषो राजपुरुषः । अक्षेषु शौंडः अक्षशौंडः । क्वचिदमाद्यंतस्यापर
त्वं । अग्नौ आहित इत्याहिताग्निः । भूतपूर्वः । समासे क्वचिदेकपदे णत्वहेतुः । शराणां वनं
शरवणं । आम्राणां वनं आम्रवणं । त्रिनयनः त्रिणयनः । पानस्य वा । पानस्य वा णत्वं भ
वति । क्षीरपानं । क्षीरपाणं । नञि । नञि पूर्वपदे सति तत्पुरुषसंज्ञकः समासो भवति ॥
नो । समासे सति नञो अकारादेशो भवति । न ब्राह्मणः अब्राह्मणः । अन् स्वरे । समा
से सति नञो ऽनादेशो भवति स्वरे परे । नाकादिवर्जं । अश्वादन्यो ऽनश्वः । धर्मविरु
द्धो ऽधर्मः । ग्रहणाभावो ऽग्रहणमिति । तदन्यतद्विरुद्धतदभावेषु नञ् वर्त्तते ॥ ॥ ३४
॥ ॥ इति तत्पुरुषः ॥ ॥ चार्थे द्वंद्वः । समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः ॥

तत्रेश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियाभिसंबंधे समुच्चये समासो नास्ति । वटो भि
क्षामट गां चानयेति । क्रमेण क्रियाद्वयसंबंधे ऽन्वाचये च समासो नास्ति । परस्परमसंब
पात्ते । इतरेतरयोगे समाहारे चार्थे द्वंद्वः समासो भवति । द्वंद्वे ऽल्पस्वरप्रधानेकारोकारांता
नां पूर्वनिपातो वक्तव्यः । उक्तार्थानामप्रयोगः । पटुश्च गुप्तश्च पटुगुप्तौ । अग्निमारुतौ ।
भोक्तृभोग्यौ । धवखदिरौ । स्त्रीपुरुषौ । देवताद्वंद्वे पूर्वपदस्य दीर्घो वक्तव्यः । अग्न्यादेः
सोमादिना षत्वं वक्तव्यं । अग्नीषोमौ । इंद्राबृहस्पती । मित्रावरुणौ । इतरेतरयोगे द्विव
चनं । एकवद्भावो वा समाहारे चावक्तव्यः । यत्र हित्वं च ऊत्वं च सह द्वंद्व इतरेतरः । समाहा
रे ऽवेदन्यायश्चैकत्वं नपुंसकं । शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशं । शशकु
शपलाशाः । अन्यादीनां विभक्तिलोपः पूर्वस्य सगागमो वक्तव्यः । अन्योन्यं ।
परस्परं । एकशेषो द्विगुर्द्विधा । एकत्ववर्त्तमानो द्विगुद्वंद्वौ नपुंसकलिंगो भवतः ॥

॥ ॥इतिद्वंद्वः॥ ॥संख्यापूर्वोद्विगुः। संख्यापूर्वकः समासोद्विगुर्निगद्यते। समाहा
रेत्तद्विद्विगुः। समाहारार्थेद्विगुः समासोभवतिततोकारांताद्दीप्प्रत्ययोभवति। द
शानांग्रामाणांसमाहारोदशग्रामी॥ पंचानामग्नीनांसमाहृताइतिपंचाग्नि। पंचानांगवां
समाहारः पंचगुः। नपुंसकत्वाद्ध्रस्वत्वं। त्रिफलेतिरूढितः। पात्राद्यंताद्विगुर्नेवंतः
। पंचपात्रं। त्रिभुवनं। चतुष्पथं॥ ॥इतिद्विगुः॥ ॥बहुव्रीहिरन्यार्थे। अन्यपदार्थे
प्रधानेयः सबहुव्रीहिसंज्ञकः समासोभवति। बहुधनंयस्यसबहुधनः। अस्थिधनः
श्वा। यस्यप्रधानस्यैकदेशोविशेषणतयायत्रज्ञायतेसतद्गुणसंविज्ञानोबहुव्रीहिः
। लंबौकर्णौयस्यसलंबकर्णः। बहुव्रीहौविशेषणसप्तम्यंत योः पूर्वनिपातोवक्तव्यः ३५
। भालेलोचनंःचंद्रशेखरः। पद्मनाभः। नञ्‌महत्स्य। इंदुःशेखरेयस्यसइंदुशेखरः
। सुखार्थप्रज्ञामेधयोरसक। सुप्रज्ञाः। दुर्मेधाः। धर्मादन्। धर्मशब्दादन्प्रत्ययोभ

इंदुादिभ्यःसप्तम्यंतस्यनपूर्वनिपातःः२

वति। स्वधर्मा। अन्यार्थे। स्त्रीलिंगस्यान्यार्थेवर्त्तमानस्यह्रस्वोभवति। पुंवद्भा। समासेस
तिसमानाधिकरणेपूर्वस्यस्त्रीप्रत्ययस्यपुंवद्भावभवति। पुंवद्भावादीपोनिवृत्तिः। कुविदापोपि
वायहणाद। कल्याणी। प्रियइत्यादौनभवति। रूपवतीभार्यायस्यसरूपवद्भार्यः। गोः। गोश
ब्दस्यान्यार्थेवर्त्तमानस्यह्रस्वोभवति। पंचगावोयस्यसपंचगुः। संख्यासुख्याआदिपू
र्वस्यपादशब्दस्यलोपोवक्तव्यः। सहस्त्रपादायस्यससहस्त्रपात्। शोभनोपादोयस्य
सस्तुपात्। व्याघ्रपात्। शसादौस्वरपरेपदादेशश्चवक्तव्यः। द्विपदः। द्विपदाइतिबहुव्री
हिः। ॠदकाः। समासेसतिदन्तअन्कइत्यंतेप्रत्ययोभवति। आसिंत्यामहिमायस्यसोसिं
त्यमहिमः। ओवा। उतस्यपदस्यदलोपोभवतियकारेस्वरेचपरे। वागृणाणा। केचि
न्नभवतकपधालोपश्च। अक्षेमःआमःआङ्कः। कवीनांराजाइतिकविराजः। दकारइ
वर्थः। कविराजी। राज्ञांपूः राजपुरं। चाकचमनश्चनाडन्ननसं। दक्षिणस्यांदिशिपंथाइ

सार: तिदक्षिणापथः। अहश्च रात्रिश्च अहोरात्रं। द्वित्राः। बहवो राजानो यस्यां सा बहुराजा नगरी।
अत्र टिलोपे कृते आबन्तस्त्रियां। बहवः कर्त्तारो यस्य स बहुकर्तृकः॥ ॥इति बहुव्रीहिः॥ ॥
३६ कर्मधारयस्तुल्यार्थे। पदद्वयं तुल्यार्थे एकार्थनिष्ठे सति कर्मधारयसंज्ञकः समासो भव
ति। नीलं च तदुत्पलं च नीलोत्पलं। रक्ता चासौ लता च रक्तलता। पुमांश्चासौ कोकिलश्च
पुंस्कोकिलः। पुंसः खयसंयोगात् सस्य लोपस्य निषेधो वक्तव्यः॥ ॥इति कर्मधारयः॥
नाम्नश्च कृता समासः। प्रादेरुपसर्गस्य नाम्नश्च कृदन्तेन सह समासः स तत्पुरुषो भवति।
प्रकृष्टो वादः प्रवादः। कुंभं करोतीति कुंभकारः। सहादेः सादिः। सहादेः सादिर्भवति। स
ह पुत्रेण वर्त्तत इति सपुत्रः। सहसंतिरसां सध्रिसमितिरयः। सध्र्यङ्। सम्यङ्। तिर्यङ्
। कोः कत्। कुशब्दस्य तत्पुरुषे स्वरे कदादेशो भवति। कुत्सितं अन्नं कदन्नं। ईषदर्थे कादे ३६
यः। कदुष्णं। कोष्णं। कवोष्णं। कालवणं। पुरुषे वा। कापुरुषः। कुपुरुषः। षष उद्दोढः। षोड

श। षट् च दश च षोडश। संख्यायाः प्रकारे धा। द्विविधः। षट्प्रकारं षोढा। दंतस्य दतृ। षट् दंता य
स्य स षोडन्। श्रितानुभ्व सुदती। द्वितइति द्वंद्वे। बृहस्पतिः। महेश्वरः। द्यावाभूमी। द्योशब्दस्य
द्यावादेशः। आकृतिगणोयं। अलुक् क्वचित्। क्वचित् समासे कृते विभक्तेर्लुग्न भवति। कृच्छ्रा
न्मुक्तः। स्तोकान्मुक्तः। अप्सुयोनिर्यस्य अप्सुयोनिः। उरसिलोमा। हृदिस्पृक्। कंठेकालः।
वाचोयुक्तिः। दिवोदासः। पश्यतोहरः। समानाधिकरणे शाकपार्थिवादीनामुत्तरपद
लोपो वक्तव्यः। कः। शाकप्रियः पार्थिवः शाकपार्थिवः। देवपूजको ब्राह्मणः देवब्राह्मणः।
आदेशाश्च द्वंद्वे। द्वंद्वसमासे सति आदिपदस्य लोपो भवति। माता च पिता च पितरौ। दु
हिता च पुत्रश्च पुत्रौ। अता द्वंद्वे पूर्वपदस्य वा। माता च पिता च मातापितरौ। द्वंद्वे सर्वादित्वं वा।
वर्णाश्च आश्रमाश्च इतरे च। वर्णाश्रमेतरे। वर्णाश्रमेतराः। वैय्याधिकरण्ये बहुव्रीहौ मध्यम
पदलोपो वक्तव्यः। कुमुदस्य गंधः इव गंधो यस्य कुमुदगंधिः। गंधशब्दादिकारः। हंसग

सार· मना। अंगना। दिक्संख्ये संज्ञायां। दिक्संख्यावाचकशब्दौ संज्ञायां समस्येते स तत्पुरु
३७ षः। अविग्रहो नित्यसमासः। अन्यस्वस्वपदविग्रहोपि। दक्षिणाग्निः। सप्तग्रामः॥ ॥
॥ ॥इति समासप्रक्रिया॥ ॥अथ तद्धितो निरूप्यते। अपत्येऽण्। नाम्नोऽपत्ये
र्थे अण्प्रत्ययो भवति। उपगोरपत्यमिति वाक्ये॥ उपगो अण् इति स्थिते समासप्रत्य
ययोरिति षष्ठीलोपः। आदिस्वरस्य ञ्णिति वृद्धिः। स्वराणां मध्ये य आदिस्वरस्त
स्य वृद्धिर्भवति ञिति णिति प्रत्यये परे णकारो वृध्यर्थः। वोऽवस्वरे। उकारस्यौका
रस्य वाऽव् भवति स्वरे यकारे च परे। औपगवः। वसिष्ठस्यापत्यं पुमान् वासिष्ठः। गौ
तमः। मातुरणि। ऋकारस्य उर्भवति अणि परे। क्वचित्संख्यासमानार्थेभ्यो यामा। वा वक्त
व्या। षण्मातृणामपत्यं षाण्मातुरः। द्वैमातुरः। अत इञ्। अकारान्तान्नाम्न ३७
ऽपि शब्दादपत्येऽर्थे इञ्प्रत्ययो भवति। यस्य लोपः। दाक्षिः। दैवदत्तिः। ष्यायनणे

यण्णीया गर्गनडाश्वस्त्री पितृष्वस्रादेः। गर्गादेर्नडादेरश्वादेः स्त्रीलिंगात् पितृ स्या·
श्र· ष्वस्रादेश्च ष्ण्य आयनण् एयण् णीय इत्येते प्रत्यया भवंति अपत्यर्थे। गार्ग्यः। वा
पु३ त्स्यः। नाडायनः। चारायणः। शर्न्नोणोनन्त। आमुष्यायणः। अत्र्यादेरेयण्। आत्रेयः।
गांगेयः। कापेयः। मातेयः। पैतृष्वस्रीयः। मातृष्वस्रीयः। लुग्बहुत्वे क्वचित्। अपत्यप्र
त्ययस्य प्रत्ययस्य बहुत्वे सति क्वचित् ऋष्यन्धकवृष्णिविषये लुग्भवति। गर्गाः। अत्रयः। विद गी:५
नाः। देवतेदमर्थे। देवतार्थे इदमर्थे च ते प्रत्यया भवंति। इंद्रो देवतास्य ऐंद्रं हविः॥
सौम्यं। देवदत्तार्थमिदं दैवदत्तं वस्त्रं। क्वचिद्द्वयोः। क्वचित्पूर्वोत्तरपदयोर्वृद्धिर्भवति ञि
प णिति णिति वृद्धिः। आग्निमारुतं कर्म। सौहार्दं। अत्र भावे ष्यण्वक्तव्यः। णितो वा उत्तरप
याविपर्यान्तरणितो वा भवति। अजो गार्ग्यस्य सोऽजगुः। शिवः। तस्य धनुः आजगवं।
अजगवं वा। कुमुदस्य गंध इव गंधो यस्य स कुमुदगंधिः। तस्यापत्यं स्त्री कौमुदगन्धा·

अन्यशब्दस्य दरु आगम। ईयप्रत्यये परे।

सार कुमुदगंधावा। श्वशुरस्यायं श्वाशुर्यः। ग्रामः। विष्णोरिदं वैष्णवं। गोरिदं गव्यं। कु
३८ ल्यं। त्वदीयं मदीयं। चतुरश्च लोपः। चतुरशब्दस्य चकारस्य लोपो भवति ण्यणीययोः।
तुर्यः तुरीयः। अन्यदर्के अन्यदीयं। अर्धजरतीयं। कारकाक्रियायुक्ते कारकादण्यते
प्रत्यया भवंति क्रियायुक्ते कर्तरि कर्मणि चाभिधेये। कुंकुमेन रक्तं कौंकुमं वस्त्रं। मथु अत्राण
राया आगतो माथुरः। ग्रामे भवो ग्राम्यः। धुरं वहतीति धुर्यः। धौरेयः। अत्रेयण।
केनेयेकाः। कारकात्कर्तरि ईनं। इय इक इत्येते प्रत्यया भवंति भवाद्यर्थेषु नित्यं।
कर्णाट वैषां वैकल्पिकं। कर्णाटे भवः। कार्णाटकः। कर्णाटको वा ग्रामादागतस्तत्र भवो वा
ग्राम्यः। ग्रामीणः। सध्रीचीनः। समीचीनः। तिरश्चीनः। यलोपश्च। कानीनः। पौ ३८
षीणः। क्षत्रियं। इंद्रियं। अक्षैर्दीव्यती त्याक्षिकाः। शाब्दिकः। वैदिकः। त्यतनौ। कि

किमादेरद्यादेश्च भवाद्यर्थे त्यतनौ प्रत्ययौ भवतः। कुत्र भवः कुत्रत्यः। तत्रत्यः। अद्यतनः। ह्यस्त
नः। श्वस्तनः। सदातनः। सनातनः। पुरातनः। सायंतनः। चिरंतनः। स्वार्थेपि। ड का। प्रत्यया
स्वार्थे पि भवंति। देवदत्त एव देवदत्तकः। चतुर एव चातुर्वर्ण्यं। अत्राप्यण्। चोर एव
चौरः। अत्राण्। वय एव वायसः। अणीनयोर्युष्मदस्मदोस्तावकादिः। अण्प्रत्यये ईनप्र
त्यये च युष्मदस्मदोस्तवकादिरादेशा भवंति। तावकं। मामकं। तावकीनः। मामकीनः। यु
वयोर्युष्माकं वायं यौष्माकः। यौष्माकीणः। आवयोरस्माकं वा आस्माकः। आस्माकी
नः। वत्तुल्ये। तुल्यसादृश्यार्थे वत्प्रत्ययो भवति। चंद्र इव चंद्रवत्। घटेन सदृशं घटवद्व
तुरुकं। पटेन सदृशं पटवत्। कंबलः। भावे तलयणा। शब्दप्रवृत्तिनिमित्तं भावः तस्मिन्
भावे तलयण इत्येते प्रत्यया भवंति। ब्राह्मणस्य भावो ब्राह्मणता। ता तस्यान्तस्त्रि

सार· लिंगत्वादाप्। ब्राह्मणस्य भावो ब्राह्मणत्वं· आदिस्वरस्यैतिवृद्धिः। ब्राह्मण्यं· अत्रय
ण्। सुमनसो भावः सौमनस्यं· कोविद्द्यौरित्यनेनवृद्धिः। विदुषो भावः वैदुष्यं· वसो
३९ उर्वडिमिति वकारस्योत्वं कृत्वा· वैदुष्यं· समाहारेतावगुणश्च। त्रयाणां समाहारस्त्रेता।
जनता· बंधुता· जेगीता· वांतैकीबेता· ब्राह्मणत्वं· ब्राह्मण्यं· कर्मण्यपियण् चक
व्यः। ब्राह्मणस्येदं कर्म ब्राह्मण्यं· राज्ञ इदं कर्म राज्यं· राजन्यं· नोवतिटिलोपः। कोशिता
दर्शिम्नेव· भोहितादर्भविस्मन्प्रत्ययो भवति सनजित्। लघिमा। अणिमा।
भ्ररस्मनि· भकारस्य रभवति इमनि परे· प्रथिमा। बहोर्वाउवइमनिविग्रहे प। ।बहोलो
पश्चैव बहोः। बहुगुरुतरेषामिमनादीनां। मिकारस्य लोपो भवति बहोः स्थाने भेवा ३९
देशः। भूमा। अस्त्यर्थे मतुप्। नाम्नो अस्त्यर्थे मतुप्प्रत्ययो भवति। अस्यास्मिन्

४प्थोर्भावः प्रथिमा।

वास्तीत्यस्मिन्नर्थे उकारो नुम्विधानार्थः· गावो विद्यंते यस्यासौ गोमान्। श्रीतोनुम्। अस्त्व ४०
सोऽस्य। श्रीमान्। अङ्कौ मत्वर्थे· अस्त्यर्थे अङ्कौ प्रत्ययौ भवतः। वेलयंतः। माथिकः। मां
तोपधाद्वलिनो। मकारांतान्मकारोपधादकारांतादकारोपधाद्ववलिनो प्रत्ययो भवतः। अ
स्त्यर्थे· धनवान्। धनी छत्री· हषहस्ती· भूमिः। किंवान्· श्रामी· तडिदादिभ्यश्च। तडिदा
दिभ्यश्च वतुप्रत्ययो भवति· तडित्वान्। मरुत्वान्। एतत्कियत्द्भ्यः परिमाणे वतुः। परिमा तप
णार्थे एतत्कियत्तदेतेभ्यो वतुप्रत्ययो भवति। यत्तदारा। यत्तदो वतिपरे आकारांतादेशो
भवति। किमः किये च। किमः कियादेशो भवति। यावान्। तावान्। कियान्। आङ्भेतदो
वा। एतद्शब्दस्य एदेशो आत्वंभवति। एतावान्। इयान्। तुंदादेरिलः। तुंदादेर्गणादिल
प्रत्ययो भवति तुंदिलः। फेनिलः। पिच्छिलः। आत्मनस्यदंतातुरः। आत्मतस्य दंतशब्दा

सार दुरप्रत्ययो भवति। उन्नता दंता यस्य स दंतुरः। श्रद्धादेरालुः। श्रद्धादेरालुप्रत्ययो भवति। श्र
४० द्धालुः। मायालुः। कृपालुः। अस्मायामेधास्रग्भ्यो विन्। अस्त्यर्थे विनिर्वक्तव्यः। तपस्वी। माया
वी। मेधावी। स्रग्वी। वाचो ग्मिनिः। वाक्शब्दात् ग्मिनिप्रत्ययो भवति। वाग्मी। आला
टौ बहुभाषिणि। बहुभाषिण्यर्थे आलाटौ प्रत्ययौ भवतः। वाचाटः। वाचालः। ईषद
समाप्तौ कल्पप्देश्यदेशीयाः। ईषदसमाप्तावर्थे कल्पदेश्यदेशीय इत्येते प्रत्यया भव
ति। ईषदसमाप्तः सर्वज्ञः सर्वकल्पः। पटुदेश्यः। पटुदेशीयः। प्रशंसायां रूपः। प्रशं
सायां वाच्यायां रूपप्रत्ययो भवति। प्रशस्तो वैयाकरणो वैयाकरणरूपः। भूत
पूर्वे चरट्। भूतपूर्वे वृत्ते चरट् प्रत्ययो भवति। पूर्वं दृष्टः इति दृष्टचरः। स्त्री चेत् ४०
दृष्टचरी। प्राचुर्यप्राधान्यादिषु मयट्। प्राचुर्यप्राधान्यादिषु मयट् प्रत्ययो भ

वति। अन्नप्रचुरः अन्नमयो यज्ञः। मृन्मयो घटः। अमृतमयश्चंद्रः। तदधीते तद्वे
ख्या त्यण् च वक्तव्यः। न संधिय्वोर्युट् च। संधिजौ य्वौ संधिय्वौ तयोः संबंधिनः स्वरस्य न वृ
द्धिर्भवति। किंतु तयोर्युडागमो भवति। इयू उवू इत्येतावागमौ भवतः। वर्णविश्लेषकल्प
यकारात्पूर्वमिकारः। वकारात्पूर्वमुकारः। आदिस्वरस्य ञ्णिति वृद्धिः। व्याकरणं अधी
ते वेद वा वैयाकरणः। शोभनोऽश्वः स्वश्वः। स्वश्वे द्वारे नियुक्तो दौवारिकः। इतो जातार्थे
। जातार्थे वाच्ये इतप्रत्ययो भवति। कला संजाता यस्य स कलंकितः। तरतमेयस्विष्ठाः प्रक
४४ र्षे। अतिशयेऽर्थे तर तम ईयसु इष्ठ इत्येते प्रत्यया भवंति। अतिशयेन शुक्लः शुक्ल
तरः शुक्लतमः। ईयसिष्ठौ डितौ वेति वक्तव्यौ। अतिशयेन लघुः लघीयान्। पापी
यान्। लघीयसी। लघिष्ठः। पापिष्ठः। गुर्वादेरीष्ठेमेयःसु गरादिरलोपश्च। गुर्वा
दीनां गरादिरादेशो भवति टेर्लोपश्च। गरीयान्। गरिष्ठः। गरिमा। प्रेष्ठः। प्रेयान्।

सार॰ स्थविष्ठः। स्थवीयान्॰ इलोपो ज्याशब्दादीयसः। ज्याशब्दात्परस्य ईयस ईकारस्य लोपो भ
८१ वति॰ ज्यायान्॰ ज्येष्ठः। अतिशयेन दीर्घः द्राघीयान्। श्रेयान्। बहोरिष्ठाद्येः। बहोरिका
रः सयिर्भवति॰ भूयिष्ठः। भूयान्। किमेत्याद्याख्याताव्ययतरतमयोराम्वक्तव्यः। कुत
स्तरां परमाणवः। कुतस्तमां तेषामारंभकत्वं। उच्चैस्तरां गायति॰ पचतितमां॰ पठतित
मां॰ परिमाणे दघ्नाद्यः। परिमाणार्थे दघ्नादयः प्रत्यया भवंति॰ जानुपरिमाणं॰ जानु
दघ्नं जलं॰ शिरोद्वयसं॰ पुरुषमात्रं॰ द्वयोर्बहूनां चैकस्य निर्धारणे किमादिभ्योडतर
डतमौ वक्तव्यौ॰ कतरो भवतः काण्वः॰ कतमो भवतां तांत्रिकः॰ भवतो यतरस्ततः किं क
स्ततरः उन्नद्धक्रातु॰ संख्येयविशेषावधारणे द्वित्रिभ्यां तीयः। द्वितीयः। चेः संप्रसारणं ८१
तृतीयः॰ षट्चतुरोस्थः। षष्ठः। चतुर्थः। पंचादेर्मः। पंचादेर्मप्रत्ययो भवति पंचमः। न
वमः। एकादशादेर्डः। एकादशादेर्डप्रत्ययो भवति। सहादेः सादिरित्यनेन दशशब्दा

त एकशब्दस्य आकारांतादेशो भवति॰ एकादशः। द्वित्र्यष्टानां द्वात्रयोष्टाः प्राक्शतादन
शितौ॰ द्वित्र्यष्टानां शब्दानां द्वात्रयोष्टा यथासंख्येन अमी आदेशा भवंति॰ द्वादशः। विंश
त्यादेर्वा तमट्॰ विंशत्यादेर्वा तमट् प्रत्ययो भवति॰ विंशतितमः। विंशः। शतादेर्नित्यं॰ शत
तमः। सहस्रतमः। संख्यायाः प्रकारे धा॰ प्रकारेर्थे संख्यावाचके धाप्रत्ययो भवति॰ द्वि
धा॰ त्रिधा॰ गुणोप्यत्र। द्वेधा॰ त्रेधा॰ द्वैधं॰ त्रैधं॰ क्रियाया आवृत्तौ कृत्वस्॰ क्रियाया आ
वृत्यर्थे कृत्वस् प्रत्ययो भवति॰ द्विरुक्तं। त्रिरुक्तं। बह्वादेः शः। बह्वादेर्गणात् शस्प्रत्ययो
भवति॰ बहुशः। शतशः। सहस्रशः। अनेकशः। तयायडौ संख्यायां॰ संख्यायां तया
यडौ प्रत्ययौ भवतः। द्वितयं। त्रितयं॰ द्वयं॰ त्रयं॰। पक्षस्य मूले तिः। पक्षस्य मूले पक्ष
तिः। शेषा निपाताः कत्यादयः। कति संख्या येषां ते कति। इत्यादि॥ ॥इति तद्धित
प्रक्रिया॥ ॥इत्यनुभूतिस्वरूपाचार्यविरचितायां सारस्वतप्रक्रियायां तद्धित
प्रक्रियाप्रयोगः समाप्तः॥ ॥श्रीपरमात्मने समर्पितम्॥ ॥श्रीरस्तु॥ ॥